duced ; but Bhavabhuti has taken a greater advantage of it in heightening the action of the play. The wild scenery of mountains, streams and forests, as described in the Uttara-charita, impresses the reader with a sense of the awful and sublime grandeur of nature. But the scenery of the hermitage of Kanwa with its rippling Malini flowing by, its hills and dales, presents a striking contrast in this respect. They disclose the calm and loving aspect of nature with which the poet's imagination has a strong sympathy. In both the plays there is occasion for introducing the horrors of battle and bloodshed. But Kalidasa dismisses it with a passing remark, whereas Bhavabhuti dilates on it ; his imagination revels in the description of the horrible spectacle of the battle-field, the fiery energy of the warriors and the hideous sounds produced by the clashings of arms, clankings of war-chariots and huge elephants.

In the closing scenes the resemblance is greater. Dushyanta sees his unknown son, feels his heart overflowing with affection for him ; and from a collation of circumstantial evidence concludes the boy to be his son. In the Uttara-charita precisely similar is the predicament of Rama with regard to his unknown sons. Both Sita and Sakuntala are exemplary wives. But Sita's devotion to her husband is of a transcendental nature ; her forgivingness verges on improbability.

अभिज्ञानशकुन्तलम्।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः* ॥ १

नान्द्यन्ते

सूत्रधारः। नेपथ्याभिमुखमवलोक्य। आर्य्ये यदि नेपथ्यविधानम् अवसितम् इतस्तावदागम्यताम्।

प्रविश्य

नटी। अज्जउत्त इअम्हि (१)

सूत्रधारः। आर्य्ये अभिरूपभूयिष्ठा परिषदियम् †। अद्य खलु कालिदासग्रथितवस्तुना अभिज्ञानशकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः। तत् प्रतिपात्रमाधीयतां यत्नः।

(१) आर्य्यपुत्र इयमस्मि।

* प्रसन्नः इति पाठः क्वचित् दृश्यते। Preference is to be given to प्रपन्नः, for it defines the position and relation of तनुभिः more clearly.

† परिषत् इति विद्यासागरधृतः पाठः।

नटी। सुविहिदप्पओअदाए अज्जस्स ण किं वि परिहा-इस्सदि (१)

सूत्रधारः। आर्य्ये कथयामि ते भूतार्थम्।

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥ २

नटी। एव्वं णेदं। अणन्तरकरणिज्जं दाव अज्जो आणवेदु। (२)

सूत्रधारः। किमन्यदस्याः परिषदः श्रुतिप्रसादनतः*। तदिमम् एव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम् सम्प्रति हि।

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः॥ ३

नटी। तह। (३)

(१) सुविहितप्रयोगतया आर्य्यस्य न किमपि परिहास्यते।

(२) एवमेतत्। अनन्तरकरणीयं तावत् आर्य्यः आज्ञापयतु।

* कुत्रचित् पुस्तके। श्रुतिप्रसादनतः गीतात् इति पाठः धृतः। गीतात् is superfluous. श्रुतिप्रसादनतः alone is sufficient for the purpose. Kalidasa is never unnecessarily prolix.

नटी। अध कदमं उण उदुं अधिकरिअ गाइस्सं। This additional speech of the Actress, which is found in some editions, is not in good taste. For her business is not to suggest, but to carry out the wishes and directions of the stage-manager.

(३) तथा।

गायति

ईसीसिचुम्बिआइं भमरेहिं सुउमारकेसरसिहाइं ।
ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइं ॥ (१)

सूत्रधारः । आर्य्ये साधु गीतम् । अहो रागबद्धचित्तवृत्तिरालिखित इव सर्व्वतो रङ्गः । तदिदानीं कतमत् प्रकरणम् आश्रित्य एनमाराधयामः ।

नटी । णं अज्जमिस्सेहिं पढ़मं एव्व आणत्तं अहिखाणसउन्दलं णाम अपुव्वं णाड़अं पओए अहिकरीअदु त्ति । (२)

सूत्रधारः । आर्य्ये सम्यगनुबोधितोऽस्मि अस्मिन् क्षणे विस्मृतं खलु मया । कुतः

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥

निष्क्रान्तौ

प्रस्तावना

ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च ।

सूतः । राजानं मृगञ्चावलोक्य । आयुष्मन्

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्म्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥

(१) ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥

(२) ननु आर्य्यमिश्रैः प्रथममेव आज्ञप्तम् अभिज्ञानशकुन्तलं नाम अपूर्व्वं नाटकं प्रयोगे अधिक्रियतामिति ।

राजा। सूत दूरममुना सारङ्गेण वयमाकृष्टाः। अयं पुनरिदानीमपि

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः*
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम्।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥

तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः॥

सूतः। आयुष्मन् उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः तेन मृग एष विप्रकृष्टान्तरः। सम्प्रति समदेशवर्त्तिनस्ते न दुरासदो भविष्यति।

राजा। तेन हि मुच्यन्तामभीषवः।

सूतः। यदाज्ञापयत्यायुष्मान्। रथवेगं निरूप्य। आयुष्मन् पश्य पश्य

मुक्तेषु रश्मिषु निरायतपूर्व्वकाया
निष्कम्पचामरशिखा निभृतोर्द्ध्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः॥

राजा। सत्यम् अतीत्य हरितो हरींश्च वर्त्तन्ते वाजिनः।

* बद्धदृष्टिरिति विद्यासागरपादाः। दत्तदृष्टिः seems to be the more natural reading. For the antelope casts his eyes once and again on the car. बद्धदृष्टिः requires that his eyes are to be fixed as it were on the car, which seems to be highly improbable with his running at full speed for life.

तथाहि

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदन्तर्विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयोर्
न मे पार्श्वे किञ्चित् क्षणमपि न दूरे रथजवात्॥ ९

सूत पश्यैनं व्यापाद्यमानम्। शरसन्धानं नाटयति।

नेपथ्ये

भो भो राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

सूतः। आकर्ण्यावलोक्य च। आयुष्मन् अस्य खलु ते बाणपथवर्त्तिनः कृष्णसारस्यान्तरे तपस्विन उपस्थिताः।

राजा।ससम्भ्रमम्। तेन हि निगृह्यन्तां वाजिनः।

सूतः। तथा रथं स्थापयति।

ततः प्रविशति सशिष्यो वैखानसः।

वैखानसः। हस्तमुद्यम्य। राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः *।
क्व बत हरिणकाणां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते॥ १०

* पुष्पराशाविवाग्निः is another reading found in many editions. But it is not an apt simile. तूलराशौ carries home to the reader's mind the speaker's idea.

तत् साधुकृतसन्धानं प्रतिसंहर सायकम्।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि *।

राजा। एष प्रतिसंहृतः। यथोक्तं करोति।

वैखानसः। सदृशमेतत् पुरुवंशप्रदीपस्य भवतः।

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि †॥

राजा। सप्रणामम्। प्रतिगृहीतम्।

वैखानसः। राजन् समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेः‡ अनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्य्यातिपातः प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः। अपि च

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति॥

* ते शस्त्रं इति विद्यासागरधृतः पाठः।

† In several editions an additional speech is introduced through the mouth of the disciples. इतरौ। सर्व्वथा चक्रवर्त्तिनं पुत्रमाप्नुहि। Dramatic justice requires that these two characters should speak something. But the part which is assigned to them does not further the action of the play, nor gives them any distinct individuality. They merely echo the sentiment of their leader. It is better, then, to leave them alone. The aim of the author in introducing them seems to be to give an air of respectability to their leader.

‡ काश्यपस्य is another reading. It seems that the mention of the proper name, instead of the family one, is more suitable to the present occasion.

राजा। अपि सन्निहितोऽत्र कुलपतिः।

वैखानसः। इदानीमेव दुहितरं शकुन्तलाम् अतिथि-सत्काराय सन्दिश्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः।

राजा। भवतु तामेव पश्यामि। सा खलु विदितभक्तिं मां महर्षेः कथयिष्यति।

वैखानसः। साधयामस्तावत्। सशिष्यो निष्क्रान्तः।

राजा। सूत नोदयाश्वान् पुण्याश्रमदर्शनेनात्मानं पुनीमहे।

सूतः। यदाज्ञापयत्यायुष्मान्। भूयो रथवेगं निरूपयति।

राजा। समन्तादवलोक्य। सूत अकथितोऽपि ज्ञायत एव यथायमाश्रमस्तपोधनस्येति।

सूतः। कथमिव।

राजा। किं न पश्यति भवान्। इह हि

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगास्
तोयाधारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किताः॥ १४

सूतः। सर्व्वमुपपन्नम्।

राजा। स्तोकमन्तरं गत्वा। तपोवननिवासिनामुपरोधो माभूत् एतावत्येव रथं स्थापय यावदवतरामि।

सूतः। धृताः प्रग्रहाः अवतरत्वायुष्मान्।

राजा। अवतीर्य। सूत विनीतवेशेन प्रवेष्टव्यानि तपो-

वनानि नाम। इदं तावद्गृह्यताम्। सूताय आभरणानि धनुश्चोपनीय अर्पयति। सूत यावदाश्रमवासिनः प्रत्यवेक्ष्य अहमुपावर्त्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः। तथा। निष्क्रान्तः।

राजा। परिक्रम्यावलोक्य च। इदमाश्रमद्वारं यावत् प्रविशामि। प्रविश्य निमित्तं सूचयन्।

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥ १५

नेपथ्ये

इदो इदो सहीओ। (१) अयि इत्यामन्त्रणे सकौतुकस्मरणे वा

राजा। कर्णं दत्त्वा। अये दक्षिणेन वृक्षवाटिकाम् आलाप इव श्रूयते यावदत्र गच्छामि। परिक्रम्यावलोक्य च। अये एतास् तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुम् इत एवाभिवर्त्तन्ते। निपुणं निरूप्य। अहो मधुरमासां दर्शनम्।

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः। १६ व्यतिरेक प्रतिवस्तूपमा
यावदिमां छायामाश्रित्य प्रतिपालयामि। विलोकयन् स्थितः।

ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला।

शकुन्तला। इदो इदो सहीओ। (२)

(१) इत इतः सख्यौ।

(२) इत इतः सख्यौ।

अनसूया। हला सउन्दले तुवत्तो वि तादकस्सवस्स अस्समरुक्खआ पिअदरे त्ति तक्केमि जेण णोमालिआकुसुम-पेलवा वि तुमं एदाणं आलवालपूरणे णिउत्ता। (१)

शकुन्तला। ण केअलं तादणिओओ एव्व अत्थि मे सोदरसिणेहो वि एदेसु। (२) नाव्यं न सिञ्चति।

राजा। कथमियं सा कण्वदुहिता। असाधुदर्शी खलु तत्रभवान् काश्यपः य इमामाश्रमधर्मे नियुङ्क्ते।

इदं किलाव्याजमनोहरं वपुस्
तपःक्षमं* साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया।
शमीलतां छेत्तुमृषिर्व्यवस्यति॥

भवतु पादपान्तरित एव एनां विस्रब्धां पश्यामि।

तथा करोति।

शकुन्तला। सहि अनसूए अदिपिणद्धेण वक्कलेन पिअं-वदाए णिअन्तिद म्हि सिठिलेहि दाव णं। (३)

अनसूया। तह। (४) शिथिलयति।

(१) हला शकुन्तले त्वत्तोऽपि तातकाश्यपस्य आश्रमवृक्षकाः प्रियतरा इति तर्कयामि येन नवमल्लिकाकुसुमपेलवापि त्वमेतेषामालवालपूरणे नियुक्ता।

(२) न केवलं तातनियोग एव अस्ति मे सोदरस्नेहः अपि एतेषु।

(३) सखि अनसूये अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रितास्मि शिथिलय तावदेतत्।

(४) तथा।

* तपःक्षममिति पाठान्तरम्।

प्रियंवदा । एत्थ पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालह । (१)

राजा । कामम् अननुरूपमस्या वयसो वल्कलं न पुनरलङ्कारश्रियं न पुष्यति । कुतः

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ १८

शकुन्तला । अग्रतोऽवलोक्य । एसो वादेरिदपल्लवङ्गुलीहिं तुवरावेइ विअ मं केसररुक्खओ जाव णं सम्भावेमि । (२) परिक्रामति ।

प्रियंवदा । हला सउन्तले एत्थ एव्व दाव मुहुत्तअं चिट्ठ जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खओ पड़िभाइ । (३)

शकुन्तला । अदो क्खु पिअंवदा सि तुमं । (४)

राजा । प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा । अस्याः खलु ।

(१) अत्र पयोधरविस्तारयितृ आत्मनो यौवनं उपालभस्व ।

(२) एष वातेरितपल्लवाङ्गुलीभिः त्वरयति इव मां केसरवृक्षकः यावदेनं सम्भावयामि ।

(३) हला शकुन्तले अत्र तावत् मुहूर्त्तं तिष्ठ यावत्त्वया उपगतया लतासनाथ इव अयं केसरवृक्षकः प्रतिभाति ।

(४) अतः खलु प्रियंवदासि त्वम् ।

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्। १९ उपमा

अनसूया। हला सउन्तले इअं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणि त्ति णोमालिआ णं विसुमरिदासि। (१)

शकुन्तला। तदा अत्ताणं वि विसुमरिस्सं। लतामुपेत्य अवलोक्य च। हला रमणीए क्खु काले इमस्स लदापाअवमिहुणस्स वइअरो संवुत्तो! णवकुसुमजोव्वणा वणजोसिणी बद्धपल्लवदाए उवहोअक्खमो सहआरो (२) पश्यन्ती तिष्ठति।

प्रियंवदा। अणसूए जाणासि किं णिमित्तं सउन्दला वणजोसिणिं अदिमेत्तं पेक्खदि त्ति। (३)

अनसूया। न क्खु विभावेमि कहेहि। (४)

प्रियंवदा। जह वणजोसिणी अणुरूवेण पाअवेण संगदा अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअं त्ति। (५)

(१) हला शकुन्तले इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमल्लिका एनां विस्मृतासि।

(२) तदात्मानमपि विस्मरिष्यामि। हला रमणीये खलु काले अस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः। नवकुसुमयौवना वनज्योत्स्ना बद्धपल्लवतया उपभोगक्षमः सहकारः।

(३) अनसूये जानासि किंनिमित्तं शकुन्तला वनज्योत्स्नामतिमात्रं प्रेक्षते इति।

(४) न खलु विभावयामि।

(५) यथा वनज्योत्स्ना अनुरूपेण पादपेन सङ्गता अपिनाम एवम् अहमपि आत्मनोऽनुरूपं वरं लभेय इति

शकुन्तला। एसो णूणं तुह अत्तगदो मणोरहो। (१)

कलसमावर्ज्जयति।

राजा। अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्। अथवा कृतं सन्देहेन

असंशयं क्षत्रपरिग्रहक्षमा
यदार्य्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः॥ २०

तथापि तत्त्वत एनामुपलप्स्ये।

शकुन्तला। ससम्भ्रमम्। अम्मो सलिलसेअसंभमुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टइ। (२)

भ्रमरबाधां रूपयति।

राजा। सस्पृहमवलोक्य।

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती* ॥२१

(१) एष नूनं तवात्मगतो मनोरथः।

(२) अम्मो सलिलसेकसम्भ्रमोद्गतो नवमल्लिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्त्तते।

* एतदनन्तरं क्वचित् पुस्तके दृश्यते।
साधु बाधनमपि रमणीयमस्याः॥
यतो यतः षट्चरणोऽभिवर्त्तते ततस्ततः प्रेषितवामलोचना।
निवर्त्तितभ्रूरियमद्य शिक्षते भयादकामापि हि दृष्टिविभ्रमम्॥

शकुन्तला। ण एसो धिट्ठो विरमइ अस्सदो गमिस्सं। पदान्तरे स्थित्वा सदृष्टिक्षेपम्। कहं इदो वि आअच्छइ। हला परित्ताअह मं इमिणा दुव्विणीदेण महुअरेण* अहिहूअमाणं। (१)

उभे। सस्मितम्। का वअं परित्तादुं। दुस्सन्दं अक्कन्द। राअरक्खिदव्वाइ तवोवणाइ णाम †। (२)

राजा। अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यं न भेतव्यम्। अर्द्धोक्ते स्वगतम्। राजभावस्त्वभिज्ञातो भवेत्।

शकुन्तला। पदान्तरे स्थित्वा सदृष्टिक्षेपम्। कहं इदो वि मं अणुसरइ।

अपिच।

लीलां दृष्टिमितस्ततो विभजति सभ्रूलताविभ्रमाम्
आभुग्नेन विवर्त्तते वलिमता मध्येन कम्प्रस्तनी।
हस्ताग्रं विधुनोति पल्लवनिभं शीत्कारभिन्नाधरा
जातेयं भ्रमराभिलङ्घनभिया वाद्यैर्विना नर्त्तकी॥ २३

(१) न एष धृष्टः विरमति अन्यतो गमिष्यामि। कथं इतोऽपि आगच्छति। हला परित्रायेथां माम् अनेन दुर्व्विनीतेन मधुकरेण अभिभूयमानाम्।

(२) के आवां परित्रातुं। दुष्मन्तम् आक्रन्द। राजरक्षितव्यानि तपोवनानि नाम।

(३) कथम् इतोऽपि माम् अनुसरति।

* दुर्व्विनीतेन दुष्टमधुकरेण इति पाठो न सम्यक्। दुष्ट is superfluous for दुर्व्विनीत brings out the sense.

† राजरक्षितव्यानि is better than राजरक्षितानि।

राजा। सत्वरमुपसृत्य।

कः पौरवे वसुमतीं शासति शासितरि दुर्व्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु॥ २२

सर्व्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः।

अनसूया। अज्ज ण क्खु किं वि अच्चाहिदं। इअं णो पिअसही महुअरेण अहिहूअमाणा कादरीभूदा। (१)

शकुन्तलां दर्शयति।

राजा। शकुन्तलाभिमुखो भूत्वा। अपि तपो वर्द्धते।

शकुन्तला। साध्वसादवचना तिष्ठति।

अनसूया। दाणिं अदिहिविसेसलाहेण। हला सउन्तले गच्छ उड़अं फलमिस्सं अग्घं उवहर। इदं पादोदअं भविस्सदि। (२)

राजा। भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्।

प्रियंवदा। तेन हि इमस्सिं पच्छाअसोअलाए सत्तवसवेदिआए मुहुत्तअं उपविसिअ परिस्समविणोदं करेदु अज्जो (३)

राजा। नूनं यूयमप्यनेन कर्म्मणा परिश्रान्ताः।

(१) आर्य्य न खलु किमपि अत्याहितं। इयं नः प्रियसखी मधुकरेण अभिभूयमाना कातरीभूता।

(२) इदानीम् अतिथिविशेषलाभेन। हला शकुन्तले गच्छ उटजं फलमिश्रं अर्घ्यमुपहर। इदं पादोदकं भविष्यति।

(३) तेन हि अस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्त्तम् उपविश्य परिश्रमविनोदं करोतु आर्य्यः।

अनसूया। हला सउन्तले उइदंणो पज्जुवासणं अदिहीणं। एत्थ उववसिम्ह। (१)

सर्व्वे। उपविशन्ति।

शकुन्तला। आत्मगतम्। किं णु क्खु इमं पेक्खिअ तवोवणविरोहिणो विआरस्स गमणीअ म्हि संवुत्ता। (२)

राजा। सर्व्वा विलोक्य। अहो समवयोरूपरमणीयं भवतीनां सौहार्द्दम्।

प्रियंवदा। जनान्तिकम्। अणसूए को णु क्खु एसो महुरगम्भीराकिदी चउरं पिअं आलवन्दो पहाववन्दो विअ लक्खोअइ। (३)

अनसूया। सहि मम वि अत्थि कोदूहलं। पुच्छिस्सं दाव णं। प्रकाशम्। अज्जस्स महुरालावजणिदो वीसम्भो मं मन्तावेइ कदमो अज्जेण राएसिवंसो अलङ्करीअइ कदमो वा विरहपज्जुस्सुअजणो किदो देसो किं णिमित्तं वा सुउमारदरो वि तवोवणगमणपरिस्समस्स अत्ता पदं उवणीदो। (४)

(१) हला शकुन्तले उचितं नः पर्य्युपासनं अतिथीनाम् अत्र उपविशामः।

(२) किं नु खलु इमं प्रेक्ष्य तपोवनविरोधिनः विकारस्य गमनीयास्मि संवृत्ता।

(३) अनसूये कोनु खलु एष मधुरगम्भीराकृतिः चतुरं प्रियम् आलपन् प्रभाववानिव लक्ष्यते।

(४) सखि ममापि अस्ति कौतूहलं। प्रक्ष्यामि तावदेनम् आर्य्यस्य मधुरालापजनितः विस्रम्भः मां मन्त्रयते कतमः आर्य्येण राजर्षिवंशः अलङ्क्रियते ; कतमो वा विरहपर्य्युत्सुकजनः कृतः देशः। किं निमित्तं वा सुकुमारतरोऽपि तपोवनागमनपरिश्रमस्य आत्मा पदं उपनीतः।

शकुन्तला। आत्मगतम्। हिअअ मा उत्तम्म एसा तुए चिन्तिदाइं अनसूया मन्तेइ। (१)

राजा। आत्मगतम्। कथमिदानीमात्मानं निवेदयामि कथं वा आत्मापहारं करोमि। भवतु एवं तावदेनां वक्ष्ये। प्रकाशम्। भवति यः पौरवेण राज्ञा धर्म्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्म्मारण्यमिदमायातः।

अनसूया। सणाहा दाणिं धम्मआरिणो। (२)

शकुन्तला। शृङ्गारलज्जां रूपयति।

सख्यौ। उभयोराकारं विदित्वा। जनान्तिकम्। हला सउन्दले जइ एत्थ अज्ज तादो सण्णिहिदो भवे। (३)

शकुन्तला। सरोषम्। तदो किं भवे। (४)

सख्यौ। इमं जीविदसव्वस्सेण वि अदिहिविसेसं किदत्थं करिस्सदि। (५)

शकुन्तला। तुम्हे अवेध। किं वि हिअए करिअ मन्तेध ण वो वअणं सुणिस्सं। (६)

राजा। वयमपि तावद्भवत्योः सखीगतं किञ्चित् पृच्छामः।

(१) हृदय मा उत्ताम्य एषा त्वया चिन्तितानि अनसूया मन्त्रयते।

(२) सनाथा इदानीं धर्म्मचारिणः।

(३) हला शकुन्तले यदि अत्र अद्य तातः सन्निहितो भवेत्।

(४) ततः किं भवेत्।

(५) इमं जीवितसर्व्वस्वेनापि अतिथिविशेषं कृतार्थं करिष्यति।

(६) युवामपेतम्। किमपि हृदये कृत्वा मन्त्रयेथे न युवयोर्वचनं श्रोष्यामि।

सख्यौ। अज्ज अणुग्गहो एव्व* इअं अब्भत्थणा। (१)

राजा। भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः। इयं च वः सखी तदात्मजेति कथमेतत्।

अनसूया। सुणादु अज्जो। अत्थि को वि कोसिओ त्ति गोत्तणामहेओ महाप्पहावो राएसी। (२)

राजा। अस्ति श्रूयते।

अनसूया। तं णो पिअसहीए पहवं अवगच्छ। उज्झिआए सरीरसंवड्ढणादिहिं तादकस्सवो से पिदा। (३)

राजा। उज्झितशब्देन जनितं मे कौतूहलम्। आमूलात् श्रोतुमिच्छामि।

अनसूया। सुणादु अज्जो। पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किंवि जादसङ्केहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकारिणी। (४)

राजा। अस्त्येतदन्यसमाधिभीरुत्वं देवानाम्।

(१) आर्य्य अनुग्रह एव इयम् अभ्यर्थना।

(२) शृणोतु आर्य्यः। अस्ति कोऽपि कौशिक इति गोत्रनामधेयः महाप्रभावः राजर्षिः।

(३) तं नः प्रियसख्याः प्रभवम् अवगच्छ। उज्झितायाः शरीरसंवर्द्धनादिभिः तातकाश्यपः अस्याः पिता।

(४) शृणोतु आर्य्यः। पुरा किल तस्य राजर्षेः उग्रे तपसि वर्त्तमानस्य किमपि जातशङ्कैः देवैः मेनका नाम अप्सराः प्रेषिता नियमविघ्नकारिणी।

* अणुग्गह विअ is another reading; but अणुग्गह एव्व is better; for in the latter case the degree of politeness becomes greater.

अनसूया। तदो वसन्दोदारसमए से उम्मादइत्तअं रूवं पेक्खिअ। अर्द्धोक्ते लज्जया विरमति। (१)

राजा। परस्तादगम्यत एव। सर्व्वथा अप्सरःसम्भवैषा।

अनसूया। अहइं। (२)

राजा। उपपद्यते।

प्रतिवस्तूपमा मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥ २४

शकुन्तला। अधोमुखी तिष्ठति।

राजा। आत्मगतम्। लब्धावकाशो मे मनोरथः। किन्तु सख्या परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः।

प्रियंवदा। सस्मितम्। शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा। पुणो वि वत्तुकामो विअ अज्जो। (३)

शकुन्तला। सखीमङ्गुल्या तर्ज्जयति।

राजा। सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरित-श्रवणलोभादन्यदपि प्रष्टव्यम्।

अनसूया। अलं विआरिअ अणिअन्तणाणुजोओ तवस्सि-अणो णाम। (४)

(१) ततः वसन्तोदारसमये अस्याः उन्मादयितृ रूपं प्रेक्ष्य।

(२) अथ किम्।

(३) पुनरपि वक्तुकाम इव आर्य्यः।

(४) अलं विचार्य्य अनियन्त्रणानुयोगस्तपस्विजनोनाम।

राजा । इति सखीं ते ज्ञातुमिच्छामि ।

वैखानसं किमनया व्रतमाप्रदानाद्
व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेव सदृशेक्षणवल्लभाभिर्*
आहो निवत्स्यति समं हरिणाङ्गनाभिः ॥

प्रियंवदा । अज्ज धम्मचरणे वि परवसो अअं जणो गुरुणो उण से अणुरूववरप्पदाणे संकप्पो । (१)

राजा । आत्मगतम् । न खलु दुरवापेयं प्रार्थना ।
भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ।

शकुन्तला । सरोषमिव । अनसूए गमिस्सं अहं । (२)

(१) आर्य्ये धर्म्मचरणेऽपि परवशः अयं जनः । गुरोः पुनः अस्याः अनुरूपवरप्रदाने सङ्कल्पः ।

(२) अनसूये गमिष्याम्यहम् ।

* 　　मदिरेक्षणवल्लभाभिः
　　आत्मसदृशेक्षणवल्लभाभिः ।

These are two other readings ; of which the first can be discarded in as much as the adjective cannot with strict propriety be applied to antelopes ; and does not furnish any reason for engaging the affection of Sakuntala. The second reading is less poetic. The word सदृश brings out the idea of comparison, and what the comparison is made with is easily understood. To make the matter more explicit by supplying आत्मन् would be the business of prose.

अनसूया । किं णिमित्तं (१)

शकुन्तला । इमं असंबद्धप्पलाविणिं पिअंवदं अज्जाए गोदमोए णिवेदइस्सं । (२)

अनसूया । सहि ण जुत्तं अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छन्ददो गमणम् । (३)

शकुन्तला । न किञ्चिदुक्त्वा प्रस्थितैव ।

राजा । ग्रहीतुमिच्छन् निगृह्यात्मानम् । आत्मगतम् । अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः । अहं हि

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥२७॥

प्रियंवदा । शकुन्तलां निरुध्य । हला ण दे जुत्तं गन्तुं । (४)

शकुन्तला । सभ्रूभेदम् । किं णिमित्तं । (५)

प्रियंवदा । रुक्खसेअणे दुवे धारेसि मे । एहि दाव अत्ताणं मोआवेहि तदो गमिस्ससि । बलादेनां निवर्त्तयति । (६)

राजा । भद्रे वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये । तथाह्यस्याः ।

(१) किं निमित्तम् ।

(२) इमाम् असम्बद्धप्रलापिनीं प्रियंवदाम् आर्य्यायै गौतम्यै निवेदयिष्यामि ।

(३) सखि न युक्तम् अकृतसत्कारम् अतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम् ।

(४) हला न ते युक्तं गन्तुम् ।

(५) किं निमित्तम् ।

(६) वृक्षसेचने द्वे धारयसि मे । एहि तावत् आत्मानं मोचय ततो गमिष्यसि ।

प्रथमोऽङ्कः ।

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणाद्
अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।
स्रस्तं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं*
बन्धे स्रंसिनि चैकहस्तयमिताः पर्य्याकुला मूर्द्धजाः ॥

तदहमेनामनृणां करोमि (अङ्गुलीयं दातुमिच्छति ।)

उभे । (नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः ।)

राजा । अलमस्मानन्यथा सम्भाव्य । राज्ञः परिग्रहोऽयम् इति राजपुरुषं मामवगच्छत ।

प्रियंवदा । तेण हि ण अरिहदि एदं अङ्गुलीअअं अङ्गुलीविओअं । अज्जस्स वअणेण अरिणा दाणिं एसा । (किञ्चिद्विहस्य) हला सउन्तले मोइदा सि अणुअम्पिणा अज्जेण अहवा महाराएण । गच्छ दाणिं । (१)

शकुन्तला । (आत्मगतम् ।) जइ अत्तणो पभविस्सं । (प्रकाशम्) का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा । (२)

राजा । (शकुन्तलां विलोक्य । आत्मगतम् ।) किं नु खलु यथा वयमस्याम् एवमियमप्यस्मान् प्रति स्यात् । अथवा लब्धावकाशा मे प्रार्थना । कुतः ।

(१) तेन हि नार्हति एतदङ्गुलीयकमङ्गुलीवियोगं । आर्य्यस्य वचनेन अनृणा इदानीम् एषा । हला शकुन्तले मोचितासि अनुकम्पिना आर्य्येण अथवा महाराजेन । गच्छ इदानीम् ।

(२) यदि आत्मनः प्रभविष्यामि । का त्वं विसृष्टव्यस्य रोद्धव्यस्य वा ।

* बद्धमिति पाठः पुस्तकेषु दृश्यते । राघवभट्टेन संसमिति पाठः धृतः ।

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता मयि भाषमाणे ।*
कामं न तिष्ठति मदाननसंमुखीना
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ २९

नेपथ्ये ।

भो भोस्तपस्विनः सन्निहितास्तपोवनसत्त्वरक्षायै भवत ।
प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्मन्तः ।

तुरगखुरहतस्तथाहि रेणुर्
विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः
शलभसमूह इवाश्रमद्रुमेषु ॥ ३०

अपिच ।

तीव्राघातप्रतिहततरुः स्कन्धलग्नैकदन्तः †
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः ।

* ददात्यभिमुखं is another reading ; कर्णं ददाति means turns her ears towards. अभिमुख becomes redundant.

† In some editions the whole of the first line is read as a compound. In that case the meaning becomes very obscure. As it stands, it is not obscure ; but the meaning is not very beautiful. Pandit Premchandra Tarkabagis reads in his edition तीव्राघातादभिमुखतरुस्कन्धभग्नैकदन्तः which gives an intelligible sense.

मूर्त्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्म्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः ॥ ३१

सर्व्वाः। कर्णौ दत्त्वा किञ्चिदिव संभ्रान्ताः।

राजा। आत्मगतम्। अहो धिक् पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति। भवतु प्रतिगमिष्यामस्तावत्।

अनसूया। अज्ज इमिणा आरसाअबुत्तन्तेण पज्जाउलम्ह। अणुजाणीहि णो उड़अगमणाअ। (१)

राजा। ससम्भ्रमम्। गच्छन्तु भवत्यः। वयमप्याश्रमपीड़ा यथा न भवति तथा प्रयतिष्यामहे।

सर्व्वे। उत्तिष्ठन्ति।

सख्यौ। अज्ज असम्भाविदअदिहिसक्कारा भूयोवि पेक्खणणिमित्तं लज्जेमो अज्जं विसविदुं। (२)

राजा। मा मैवम्। दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि।

शकुन्तला। अणसूए अहिणअकुससूइए परिक्खदं मे चलणं कुरवअसाहापरिलग्गं अ वक्कलं। दाव परिवालेध मं जाव णं मोआवेमि। (३) राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता।

(१) आर्य्य अनेन आरण्यकवृत्तान्तेन पर्य्याकुलाः स्मः। अनुजानीहि नः उटजगमनाय।

(२) आर्य्य असम्भावितातिथिसत्कारा भूयोऽपि प्रेक्षणनिमित्तं लज्जामहे आर्य्यं विज्ञापयितुम्।

(३) अनसूये अभिनवकुशसूच्या परिक्षतं मे चरणम्। कुरवकशाखापरिलग्नं च वल्कलं। तावत् प्रतिपालयतम् मां यावदेतन्मोचयामि।

राजा। मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयात्रिकान् समेत्य नातिदूरेण तपोवनस्य निवेशयेयम्। न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्त्तयितुम्। मम हि

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।*
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥ ३२

निष्क्रान्ताः सर्व्वे।

प्रथमोऽङ्कः।

---

* असंस्तुतम् is another reading. The meaning becomes clear if we adopt the reading असंस्थितम्। असंस्तुतं means not acquainted or familiar. My mind refuses to go with my body; as if, it is not familiar with my body. But this would be going too far. Such a conceit mars the beauty of the poem otherwise so beautiful.

द्वितीयोऽङ्कः ।

ततः प्रविशति विषण्णो विदूषकः ।

विदूषकः । निश्वस्य । भो दिट्ठं एदस्स मअआसीलस्स रण्णो वअस्सभावेण णिव्विण्णो म्हि । अअं मओ अअं वराहो अअं सद्दूलो त्ति मज्झण्हे वि गिम्हविरलपाअवच्छाआसु वणराईसु आहिण्डीअइ *। पत्तसंकरकसाआइ कडुआइ गिरिणईजलाई पीअन्ति । अणिअदवेलं सूल्लमंसभूइट्ठो आहारो अण्हीअइ । तुरगाणुधावणकण्डिदसंधिणो रत्तिम्मि वि णिकामं सइदव्वं णत्थि । तदो महन्ते एव्व पच्चूसे दासीए पुत्तेहिं सउणिलुद्धएहिं वणग्गहण † कोलाहलेण पड़िबोधिदो म्हि । एत्तएण दाणिं वि पीड़ा ण णिक्कमइ ।। तदो गण्डस्स उवरि पिण्डओ संवुत्तो । हिओ किल अम्हेसु ओहीणेसु तत्तहोदो मिआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्दला णाम मम अधण्णदाए दंसिदा । संपद णअरगमणस्स मणं कहं वि ण करइ । अज्ज वि तस्स तं एव्व चिन्तअन्तस्स अच्छीसु पहादं आसि । का गदी । जाव णं किदाचारपरिक्कमं पेक्खामि । परिक्रम्य अवलोक्य च । एसो वाणासणहत्थाहिं जअणीहिं वनपुप्फमालाधारिणीहिं परिवुदो

(*) विद्यासागरधृतपाठः "आहिण्डीअइ अड़वीदो अड़वी" । "अड़वीदो अड़वी"—This portion seems to be superfluous. For वनराजि includes several अटवीs and conveys the idea that they wandered from one forest to another.

† वनगहण (वनग्रहण) seems to be the more natural reading ; for it is a technical term of hunting.

उठिन चित्त का अभिप्राय

इदो एव्व आअच्छइ पिअवअस्सो। होदु अङ्गभङ्गविअलो विअ भविअ चिट्टिस्सं जइ एव्वं वि णाम विस्समं लहेअं।
दण्डकाष्ठमवलम्ब्य स्थितः। (१)

तत: प्रविशति यथानिर्द्दिष्टपरिवारो राजा।

राजा।

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि। *
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥२॥

(१) विदू। भो दिष्टम् एतस्य मृगयाशीलस्य राज्ञ: वयस्यभावेन निर्विण्णोऽस्मि। अयं मृग: अयं वराह: अयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिषु आहिण्ड्यते। पवसङ्करकषायाणि कटुकानि गिरिनदीजलानि पीयन्ते। अनियतवेलं शूल्यमांसभूयिष्ठ: आहार: अद्यते। तुरगानुधावनकण्डितसन्धे: रात्रौ अपि प्रकामं शयितव्यं नास्ति। ततो महति एव प्रत्यूषे दास्या: पुत्रै: शकुनिलुब्धै: वनगाहनकोलाहलेन प्रतिबोधितोऽस्मि। एतावता इदानीमपि पीड़ा न निष्क्रामति। तत: गण्डस्य उपरि पिण्डक: संवृत्त:। ह्य: किल अस्मासु अवहीनेषु तत्रभवत: मृगानुसारेण आश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला नाम मम अधन्यतया दर्शिता। साम्प्रतं नगरगमनस्य मन: कथमपि न करोति। अद्यापि तस्य तामेव चिन्तयत: अक्ष्णो: प्रभातम् आसीत्। का गति:। यावदेनं कृताचारपरिक्रमं प्रेचे। एष बाणासनहस्ताभि: यवनीभि: वनपुष्पमालाधारिणीभि: परिवृत: इत एव आगच्छति प्रियवयस्य:। भवतु अङ्गभङ्गविकल इव भूत्वा स्थास्यामि यदि एवम् अपि नाम विश्रामं लभेय॥

* In most of the editions, the reading adopted here is तद्भावदर्शनाश्वासि। But Raghava Bhatta, whose soundness and erudition claim respect, follows the reading adopted in the text. And a little thought will make clear the superiority of the reading adopted by us. The king has not yet been fully assured of

द्वितीयोऽङ्कः ।

स्मितं कृत्वा । एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्बयते ।

स्निग्धं वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्व्वं तत् किल मत्परायणमहो कामी स्वतां पश्यति ॥ २ ॥

विदूषकः । तथास्थित एव । भो वअस्स ण मे हत्थपाआ पसरन्ति वाआमेत्तएण जीआवइस्सं ॥ *

राजा । कुतोऽयं गात्रोपघातः ।

विदूषकः । कुदो किल सअं अच्छी आउलीकरिअ अस्सुकारणं पुच्छसि †

Sakuntala's love for him. What he knows of the state of her mind is but a guess. Under such circumstances, how can the king go so far as to say that a knowledge of the state of her feelings would comfort him? What appears to be consistent with the circumstances of the case is that his mind is anxious to ascertain the attitude of Sakuntala towards him; and this meaning is borne out by the reading adopted by us. But the second line अक्षतार्थे &c. shows that the king has been to a certain extent assured of the feelings of Sakuntala; and on this view of the case it can be contended that the other reading too gives a good sense.

* भो वयस्य न मे हस्तपादं प्रसरति । वाङ्मात्रेण जाप्यसे (जीव्यसे वा) ।

† कुतः किल स्वयमक्षि आकुलीकृत्य अश्रुकारणं पृच्छसि ।

राजा । न खल्ववगच्छामि ।

विदूषकः । भो वअस्स ज वेअसो खुज्जलीलं विडम्बइ तं किं अत्तणो पहाविण णं णईवेअस्स । *

राजा । नदीवेगस्तत्र कारणम् ।

विदूषकः । मम वि भवं । †

राजा । कथमिव ।

विदूषकः । एव्वं राअकज्जाइ उज्झिअ एआरिसे आउलप्पदेसे वणचरवुत्तिणा तुए होदव्वं जं सच्चं पच्चहं सावदसमुच्छारणेहिं संखोहिअसंधिवंधाणं मम गत्ताणं अणीसो अस्मि संवुत्तो । ता पसादइस्सं विसज्जिदुं मं एक्काहं वि दाव विस्समिदुं । ‡

राजा । स्वगतम् । अयं चैवमाह । ममापि काश्यपसुताम् अनुस्मृत्य मृगयाविक्लवं चेतः । कुतः

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु ।
सहवसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलोकितोपदेशः ॥३॥

* भो वयस्य यद् वेतसः कुब्जलीलां विड़म्बयति तत् किम् आत्मनः प्रभावेण ननु नदीवेगस्य ।

† ममापि भवान् ।

‡ एवं राजकार्य्याणि उज्झित्वा एतादृशे आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यं । यत् सत्यं प्रत्यहं श्वापदसमुत्सारणैः संक्षोभितसन्धिबन्धानां मम गात्राणाम् अनीशोऽस्मि संवृत्तः । तत् प्रसादयिष्यामि विसृष्टुं माम् एकाहमपि तावद् विश्रमितुम् ॥

विदूषकः। राज्ञीमुखं विलोक्य। अत्तभवं किं वि हिअए करिअ मन्तेद्। अरसे मए रुदूअं आसि।*

राजा। सस्मितम्। किमन्यत्। अनतिक्रमणीयं सुहृद्-वाक्यमिति स्थितोऽस्मि।

विदूषकः। चिरं जोअ। गन्तुमिच्छति। †

राजा। वयस्य तिष्ठ सावशेषं मे वचः।

विदूषकः। आणवेदु भवं। ‡

राजा। विश्रान्तेन भवता ममाप्येकस्मिन्ननायासे कर्म्मणि सहायेन भवितव्यम्।

विदूषकः। किं मोदअखण्डिआए। तेन हि अअं सुग-हीदो जणो। §

राजा। यत्र वक्ष्यामि। कः कोऽत्र भोः।

प्रविश्य

दौवारिकः। प्रणम्य। आणवेदु भट्टा। ¶

राजा। रैवतक सेनापतिस्तावदाहूयताम्।

दौवारिकः। तह। निष्क्रम्य सेनापतिना सह पुनः प्रविश्य।

* अत्रभवान् किमपि हृदये कृत्वा मन्त्रयते। अरण्ये मया रुदितमासीत्।

† चिरं जीव।

‡ आज्ञापयतु भवान्।

§ किं मोदकखण्डिकायां। तेन हि अयं सुगृहीतः जनः।

¶ आज्ञापयतु भर्त्ता।

एसो अस्सावअणोक्कण्ठो इदो दिस्सदिट्ठि एव्व भट्टा चिट्ठइ। उपसप्पदु अज्जो। *

सेनापतिः। राजानमवलोक्य। दृष्टदोषापि स्वामिनि मृगया केवलं गुण एव संवृत्ता। तथाहि देवः

अनवरतधनुर्ज्यास्फालनक्रूरपूर्व्वं
रविकिरणसहिष्णु स्वेदलेशैरभिन्नम्।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्त्ति॥४॥

उपेत्य। जयतु स्वामी गृहीतश्वापदमरण्यं किमन्यत्राव-स्थीयते।

राजा। मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माठव्येन।

सेनापतिः। जनान्तिकम्। सखे स्थिरप्रतिबन्धो भव। अहं तावत् स्वामिनश्चित्तवृत्तिमनुवर्त्तिष्ये। प्रकाशम्। प्रलपत्वेष वैधेयः ननु प्रभुरेव निदर्शनम्।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः॥५॥

विदूषकः। कृतकरोषम्। ‡ अत्तभवं पकिदिं आअसो।

* तथा। एष आज्ञावचनोत्कण्ठ इतः दत्तदृष्टिरेव भर्त्ता तिष्ठति। उपसर्पतु आर्य्यः।

‡ कृतकरोषम्—कृतकः कृत्रिमः रोषः यस्मिन् कर्म्मणि तत् यथातथा—with affected or assumed anger.

तुमं दाव अडवीदो अडवीं आहिण्डन्तो णरणासिआलोलुवस्स जिण्णरिच्छस्स कस्स वि मुहे पडिस्ससि ।*

राजा । भद्र सेनापते आश्रमसन्निकृष्टे स्थिताः स्मः अतस्ते वचो नाभिनन्दामि । अद्य तावत्

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥६॥

सेनापतिः । यत् प्रभविष्णवे रोचते ।

राजा । तेन हि निवर्त्तय पूर्व्वगतान् वनग्राहिणः । यथा च न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषेद्धव्याः ।
पश्य

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्य्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति ॥७॥

सेनापतिः । यदाज्ञापयति स्वामी ।

विदूषकः । धंसदु दे उच्छाहवुत्तन्तो ।‡

निष्क्रान्तः सेनापतिः ।

राजा । परिजनं विलोक्य । अपनयन्तु भवत्यो मृगयावेशम् । रैवतक त्वमपि स्वं नियोगमशून्यं कुरु ।

* अत्रभवान् प्रकृतिमापन्नः त्वं तावत् अटवीतः अटवीं आहिण्डमानः नरनासिकालोलुपस्य जीर्णर्क्षस्य कस्यापि मुखे पतिष्यसि ।

‡ ध्वंसतां ते उत्साहवृत्तान्तः ।

परिजनः । जं देओ आणवेइ । निष्क्रान्तः । *

विदूषकः । कअं भअदा णिम्मच्छिअं । सम्पदं एदस्सिं पाअवच्छाआए विरइदलदाविदाणदंसणी आएआसणे णिसीददु भवं जाव अहं वि सुहासीणो होमि । †

राजा । गच्छाग्रतः ।

विदूषकः । एदु भवं । ‡

उभौ । परिक्रम्योपविष्टौ ।

राजा । माटव्य अनवाप्तचक्षुःफलोऽसि येन त्वया दर्शनीयं वस्तु न दृष्टम् ।

विदूषकः । णं भवं अग्गदो मे वट्टइ । §

राजा । सर्व्वः कान्तमात्मानं पश्यति । तामाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि ।

विदूषकः । स्वगतम् । होदु से अवसरं न दाइस्सं । प्रकाशम् भो वअस्स दे तावसकसआ अब्भत्थणीआ दीसइ । ¶

* यद्देवः आज्ञापयति ।

† कृतं भवता निर्म्मक्षिकं । साम्प्रतम् एतस्यां पादपच्छायायां विरचितलता-वितानदर्शनीयायाम आसने निषीदतु भवान् यावदहमपि सुखासीनो भवामि ।

‡ एतु भवान् ।

§ ननु भवान् मे अग्रतो वर्त्तते ।

¶ भवतु अस्मै अवसरं न दास्यामि । भो वयस्य तव तापसकन्यका अभ्यर्थनीया दृश्यते ।

राजा। सखे न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते *।

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम्।
अर्कस्योपरि शिथिलं च्युतमिव नवमल्लिकाकुसुमम्॥

विदूषकः। विहस्य। जह कस्स वि पिण्डखज्जूरेहिं उव्वेइदस्स तिन्तिलीए अहिलासो होइ तह इत्थिआरअणपरिहाइणो भअदो इअं अब्भत्थणा। †

राजा। न तावदेनां पश्यसि येनैवमवादीः।

विदूषकः। तं क्खु रमणिज्जं जं भअदोवि विम्हअं उप्पादेइ। ‡

राजा। वयस्य किं बहुना

चित्रे निवेश्य परिकल्पितसत्त्वयोगा §
रूपोच्चयेन मनसा विधिना कृता नु।

* In some of the editions, there is a couplet here which in our opinion is not in strict keeping with the spirit of the conversation. The couplet is :—

निवारितनिमेषाभिः नेत्रपङ्क्तिभिरुन्मुखः।
नवामिन्दुकलां लोकः केन भावेन पश्यति॥

† यथा कस्यापि पिण्डखर्ज्जूरैरुद्वेजितस्य तिन्तिड्यामभिलाषो भवति तथा स्त्रीरत्नपरिभाविणो भवतः इयमभ्यर्थना।

‡ तत् खलु रमणीयं यद् भवतोऽपि विस्मयमुत्पादयति।

§ चित्ते निवेश्य इति क्वचित् पाठः। सतु न हृद्यः मनसेति द्वितीयचरणे तदर्थस्य प्रोक्तत्वात्।

स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥

विदूषकः। जइ एव्वं पच्चादेसो दाणिं रूववदीणं। (१)

राजा। इदं च मे मनसि वर्त्तते।

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैर्
अनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥*

(१) यदि एवं प्रत्यादेश इदानीं रूपवतीनाम्।

* This sloka occurs in the शृङ्गारशतक of Bhartrihari and is read there as

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै
रनाविद्धं रत्नं मधुनवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव भवद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यत इति ॥

If traditions be believed in, Bhartrihari was the brother of Vikramaditya, and therefore, a contemporary of Kalidasa. Supposing that Bhartrihari was the brother of Vikrama, it may be asserted as a possible view of the case that Kalidasa with a view to do honour to the royal poet made room for the verse in his immortal work. Or, it may be that both of them drew it from some common source. Scholars, however, are of opinion that Bhartrihari, grammarian, philosopher, and poet in one, is posterior to Kalidasa. "Bhartrihari lived in the first half of the seventh century. The Chinese traveller I Tsing, who spent more than twenty years in India at the end

विदूषकः। तेण हि लहु परित्ताअदु णं भवं। मा कस्स वि तवस्सिणो इङ्गुलितेल्लमिस्सचिक्कणसीसस्स हत्थे पड़िहिद। (१)

राजा। परवती खलु तत्रभवती। न च सन्निहितोऽत्र गुरुजनः।

विदूषकः। अध भअन्तं अन्तरेण केरिसो से दिट्ठिराओ*। (२)

राजा। निसर्गादेव अप्रगल्भस्तपस्विकन्याजनः। तथापि तु

> अभिमुखे मयि संहृतमीक्षितं
> हसितमन्यनिमित्तकृतोदयम्।
> विनयवारितवृत्तिरतस्तया
> न विवृतो मदनो न च संवृतः ॥

विदूषकः। ण क्खु दिट्ठमेत्तस्स तुह अङ्कं आरोहदि। (३)

of that century, records that, having turned Buddhist monk, the poet again became a layman; and fluctuated altogether seven times between the monastery and the world."

Macdonell.

It has been shown elsewhere that the poet must have realised the ignominy of poverty; and there is little truth in the saying that he was the brother of King Vikramaditya.

(१) तेन हि लघु परित्रायतां एनां भवान्। मा कस्यापि तपस्विनः इङ्गुदीतैलमिश्रचिक्कणशीर्षस्य हस्ते पतिष्यति।

(२) अथ भवन्तम् अन्तरेण कीदृशः अस्याः दृष्टिरागः।

(३) न खलु दृष्टमात्रस्य तव अङ्कमारोहति।

* अथ अथ इति प्रश्ने।

राजा। मिथः प्रस्थाने पुनः शालीनतयापि कामम् आविष्कृतो भावस्तत्रभवत्या। तथाहि

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम्॥ १२॥

विदूषकः। तेण हि गहीदपाहेओ होहि। किदं तुए उववणं तवोवणं त्ति पेक्खामि। (१)

राजा। सखे तपस्विभिः कैश्चित् परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन सकृदपि आश्रमे वसामः।

विदूषकः। को अवरो अपदेसो तुम्हाणं राआणं णीवारछट्ठभाअं अम्हाणं उवहरन्तु त्ति। (२)

राजा। मूर्ख अन्यद्भागधेयमेतेषां रक्षणे निपतति यद्रत्नराशीनपि विहायाभिनन्द्यम्। पश्य

व्यतिरेकः
यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम्।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः॥ १३॥

नेपथ्ये

हन्त सिद्धार्थौ स्वः।

राजा। कर्णं दत्त्वा। अये धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम्।

(१) तेन हि गृहीतपाथेयः भव। कृतं त्वया उपवनं तपोवनमिति प्रेक्षे।

(२) कोऽपरः अपदेशः युष्माकं राज्ञां। नीवारषष्ठभागम् अस्माकम् उपहरन्तु इति।

प्रविश्य

दौवारिकः। जेदु जेदु भट्टा। एदे दुवे इसिकुमारआ पड़िहारभूमिं उपट्ठिदा। (१)

राजा। तेन हि अविलम्बितं प्रवेशय तौ।

दौवारिकः। एस पवेसेमि। निष्क्रम्य ऋषिकुमारकाभ्यां सह प्रविश्य। इदो इदो भअवन्ता। (२)

उभौ। राजानं विलोकयतः।

प्रथमः। अहो दीप्तिमतोपि विश्वसनीयतास्य वपुषः। अथवा उपपन्नमेतदृषिभ्यो नातिभिन्ने राजनि। कुतः

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्व्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्व्वः ॥१४॥

द्वितीयः। गौतम अयं स बलभित्सखो दुष्यन्तः।

प्रथमः। अथकिम्।

द्वितीयः। तेन हि

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्रीम्
एकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।
आशंसन्ते समितिषु सुराः सक्तवैरा हि दैत्यैर्*
अस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥१५॥

मन्द्राक्रान्ता

दीपकम्

(१) जयति जयति भर्त्ता। एतौ द्वौ ऋषिकुमारौ प्रतिहारभूमिम् उपस्थितौ।

(२) एष प्रवेशयामि। इत इतो भगवन्तौ।

* आशंसन्ते सुरयुवतयो बद्धवैराहि दैत्यैः इति बहुपुस्तकसम्मतः पाठः। स न

उभौ। उपगम्य। विजयस्व राजन्।

राजा। आसनादुत्थाय। अभिवादये भवन्तौ।

उभौ। स्वस्ति भवते। फलान्युपहरतः।

राजा। सप्रणामं परिगृह्य। आज्ञामिच्छामि।

उभौ। विदितो भवानाश्रमसदामिहस्थः तेन भवन्तं प्रार्थयन्ते।

राजा। किमाज्ञापयन्ति।

उभौ। तत्रभवतः कण्वस्य महर्षेरसान्निध्यात् रक्षांसि नः इष्टिविघ्नमुत्पादयन्ति। तत् कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति।

राजा। अनुगृहीतोऽस्मि।

विदूषकः। अपवार्य। एसा दाणिं अणुऊला दे अब्भत्थणा *। (१)

राजा। स्मितं कृत्वा। रैवतक मद्वचनादुच्यतां सारथिः सबाणासनं रथमुपस्थापयेति।

सङ्कृते। सुरयुवतीनां दैत्यैः सह वद्धवैरत्वं कीदृशम् नु लक्षणामन्तरेण अर्थापत्तिं विना वा तन्नोपपद्यते, लक्षणास्वीकारार्थं नच किमपि विशिष्टं प्रयोजनं वर्त्तते नापि रूढ़िः। तथापि "शृङ्गारे ललितोद्गारे" सिद्धहस्तस्य कवेः "मोच्यते सुरवन्दीनाम्" इत्याद्युक्ते रनुरूपः एष पाठः इत्यलं विस्तरेण।

(१) एषा इदानीं अनुकूला ते अभ्यर्थना।

* "एस दाणीं भअदी अनुऊलीगलहत्थो" is the reading of some editions.

दौवारिकः। जं देओ आणवेइ। निष्क्रान्तः। (१)

उभौ। सहर्षम्।

अनुकारिणि पूर्व्वेषां युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः।१६॥

राजा। सप्रणामम्। गच्छतां पुरो भवन्तौ। अहम् अपि अनुपदमागत एव।

उभौ। विजयस्व। [निष्क्रान्तौ।]

राजा। माठव्य अप्यस्ति शकुन्तलादर्शने कुतूहलम्।

विदूषकः। पढ़मं सपरिवाहं आसि दाणिं रक्खसवुत्तन्तेन विन्दु वि ण अवसेसिदो। (२)

राजा। मा भैषीः ननु मत्समीपे वर्त्तिष्यसे।

विदूषकः। एस रक्खसादो रक्खिदो म्हि। (३)

प्रविश्य

दौवारिकः। सज्जो रहो भट्टिणो विजअप्पत्थाणं अवेक्खइ। एस उण णअरादो देईणं आणत्तिहरओ करअहो आअदो। (४)

राजा। सादरम्। किमम्बाभिः प्रेषितः।

दौवारिकः। अहइं। (५)

(१) यद् देवः आज्ञापयति।

(२) प्रथमं सपरीवाहम् आसीदिदानीं राक्षसवृत्तान्तेन विन्दुरपि नावशेषितः।

(३) एष राक्षसात् रक्षितोऽस्मि।

(४) सज्जोरथोभर्त्तुर्विजयप्रस्थानमपेक्षते। एष पुनर्नगरात् देवीनाम् आज्ञप्तिहरः करभक आगतः।

(५) अथ किम्।

राजा। ननु प्रवेश्यताम्।

दौवारिकः। तह। निष्क्रम्य करभकेण सह प्रविश्य। एसो भट्टा उपसप्प। (१)

करभकः। जेदु जेदु भट्टा देई आणवेइ आआमिणि चउत्थादिअहे पउत्तपारणो मे उववासो होहिइ तहिं दीहाउणा अवस्सं अह्मे संभाविदव्व त्ति। (२)

राजा। इतस्तपस्विकार्य्यम् इतो गुरुजनाज्ञा इयमपि अनतिक्रमणीयम् किमत्र प्रतिविधेयम्।

विदूषकः। तिसङ्कुविअ अन्तराले चिट्ठ। (३)

राजा। सत्यमाकुलीभूतोऽस्मि।

अनुष्टुप्　कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः।
　　पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा॥ १८॥

विचिन्त्य। सखे त्वमम्बया पुत्त्र इति प्रतिगृहीतः। अतो भवान् इतः प्रतिनिवृत्य तपस्विकार्य्यव्यग्रमनसंमामावेद्य तत्र-भवतीनां पुत्त्रकृत्यम् अनुष्ठातुमर्हति

विदूषकः। ण क्खु मं रक्खाभीरुअं गणेसि। (४)

राजा। सस्मितम्। भो महाब्राह्मण कथमेतद्भवति सम्भाव्यते।

(१) तथा। एष भर्त्ता उपसर्प।

(२) जयति जयति भर्त्ता। देवी आज्ञापयति आगामिनि चतुर्थदिवसे प्रवृत्त-पारणः मे उपवासो भविष्यति। तस्मिन् दीर्घायुषा अवश्यं वयं सम्भावयितव्या इति।

(३) त्रिशङ्कुरिव अन्तराले तिष्ठ।

(४) न खलु मां रक्षोभीरुं गणयसि।

विदूषकः। जह राआणुएण गन्तव्वं तह गच्छामि। (१)

राजा। ननु तपोवनोपरोधः परिहरणीय इति सर्व्वान् अनुयात्रिकांस्त्वयैव सह प्रस्थापयामि।

विदूषकः। सगर्व्वं। तेण हि जुवराओ म्हि दाणिं संवुत्तो। (२)

राजा। आत्मगतम्। चपलोऽयं वटुः। कदाचिदस्मत्प्रार्थनाम् अन्तःपुरेभ्यः कथयेत्। भवतु एनमेवं वक्ष्ये। विदूषकं हस्ते गृहीत्वा प्रकाशम्। वयस्य ऋषिगौरवादाश्रमं गच्छामि। न खलु सत्यमेव तापसकन्यायां ममाभिलाषः। पश्य

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः। विषमालंकार
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः॥ १८॥

विदूषकः। अहइ। निष्क्रान्ताः सर्व्वे। (२) मालभारिणी (औपच्छन्दसिक)

द्वितीयोऽङ्कः।

तृतीयोऽङ्कः।

ततः प्रविशति यजमानशिष्यः कुशानादाय।

शिष्यः। अहो महानुभावः पार्थिवो दुष्यन्तः। प्रविष्टमात्र एवाश्रमं तत्रभवति राजनि निरुपद्रवाणि नः कर्म्माणि प्रवृत्तानि भवन्ति।

(१) यथा राजानुगेन गन्तव्यं तथा गच्छामि।

(२) तेन हि युवराजोऽस्मि इदानीं संवृत्तः।

(३) अथ किम्।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुङ्कारेणेव धनुषः स हि विघ्नानपोहति ॥१॥

यावदिमान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्यः उपनयामि। परिक्रम्य अवलोक्य च। आकाशे। प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते। श्रुतिमभिनीय। किं ब्रवीषि आतपलङ्घनात् बलवदस्वस्था शकुन्तला तस्याः शरीर-निर्व्वापणाय इति। तर्हि त्वरितं गम्यताम्। सा हि खलु भगवतः कुलपतेरुच्छ्वसितम् (१)। अहमपि तावत् वैतानिकं शान्त्युदकम् अस्यै गौतमीहस्ते विसर्ज्जयिष्यामि। निष्क्रान्तः।

विष्कम्भकः।

ततः प्रविशति कामयानावस्थो राजा।

राजा। निश्वस्य।

आर्या जाने तपसो वीर्य्यं सा बाला परवतीति मे विदितम्।
अलमस्मि ततो हृदयं तथापि नेदं निवर्त्तयितुम् ॥ (२) २॥

(१) भगवतः कण्वस्य इति क्वचित् पाठः। This reading is not in good taste. A disciple should not, except in unavoidable circumstances, utter the name of his teacher, spiritual leader or other respectable persons. The saying goes :—

आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥

This custom is not confined to India alone. Students of Philology may be struck with the resemblance of this custom to what is called Ukuhlonipa.

(२) न च निम्नादिव सलिलं निवर्त्तते तती मे हृदयं। इति गौड़ीय-

मदनबाधां निरूप्य । भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वसनीयाभ्याम् अतिसन्धीयते कामिजनसार्थः । कुतः

तव कुसुमशरत्वं शीतरश्मित्वमिन्दोर्
द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैस्
त्वमपि कुसुमबाणान् वज्रसारीकरोषि ॥ ३॥

भगवन् कामदेव, न ते मय्यनुक्रोशः । कुतश्च ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत् । विचिन्त्य । आं ज्ञातम्

अद्यापि नूनं हरकोपवह्नि-
स्त्वयि ज्वलत्यौर्व इवाम्बुराशौ ।
त्वमन्यथा मन्मथ मद्विधानां
भस्मावशेषः कथमेवमुष्णः ॥ ४॥

परिक्रम्य । क्व नु खलु संस्थिते कर्मणि सदस्यैरनुज्ञातः श्रमक्लान्तमात्मानं विनोदयामि । निश्वस्य । किं नु खलु मे प्रियादर्शनादृते शरणमन्यत् । यावदेनामन्विष्यामि । सूर्यमवलोक्य इमामुग्रातपां वेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति तत्रैव तावद्गच्छामि । परिक्रम्य । संस्पर्शं रूपयित्वा । अहो प्रवातसुभगोऽयमुद्देशः ।

शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः ॥ ५॥

पुस्तकेषु धृतः पाठः । This reading gives a good sense ; and seems to be an echo of the sentiment expressed in the Kumarasambhava, पयश्च निम्नाभिमुखं प्रतीपयेत् ?

परिक्रम्यावलोक्य च। अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया शकुन्तलया भवितव्यम्। तथाहि

आर्या अभ्युन्नता पुरस्तादवगाढ़ा जघनगौरवात् पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥६॥

यावत् विटपान्तरेणावलोकयामि। परिक्रम्य तथा कृत्वा। सहर्षम्। अये लब्धं नेत्रनिर्व्वाणम् एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते। भवतु श्रोष्यामि आसां विस्रम्भकथितानि। विलोकयन् स्थितः।

ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला।

सख्यौ। उपवीज्य सस्नेहम्। हला सउन्तले अवि सुहेइ दे णलिणीपत्तवादो। (१)

शकुन्तला। किं वीएन्ति मं सहीओ। (२)

सख्यौ। विषादं नाटयित्वा परस्परमवलोकयतः।

राजा। बलवदस्वस्थशरीरा शकुन्तला दृश्यते। सवितर्कम्। तत् किमयमातपदोषः स्यात् उत यथा मे मनसि वर्त्तते। साभिलाषं निर्व्वर्ण्य। अथवा कृतं सन्देहेन।

शिखरिणी स्तनन्यस्तोशीरं शिथिलितमृणालैकवलयं मृणाल का एक कंगन
17. प्रियायाः साबाधं किमपि कमनीयं वपुरिदम्।
V. IMPORTANT समस्तापः कामं मनसिजनिदाघप्रसरयोर्
(ग्रीष्म)
न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥७॥
सुन्दर

(१) हला शकुन्तले अपि सुखयति ते नलिनीपत्रवातः।

(२) किं वीजयतः मां सख्यौ।

प्रियंवदा। जनान्तिकम्। अणसूए तस्स राएसिणो पढ़म-दंसणादो आरहिअ पज्जुस्सुआ विअ सउन्तला। किं णु क्खु से तण्णिमित्तो अअं आतङ्को भवे। (१)

अनसूया। सहि मम वि एरिसी आसङ्का हिअअस्स। होदु पुच्छिस्सं दाव णं। प्रकाशम्। सहि पुच्छिअव्वा सि किं वि। वलिअं क्खु दे सन्तावो। (२)

शकुन्तला। पूर्व्वार्द्धेन शयनादुत्थाय। हला किं वत्तुकामासि। (३)

अनसूया। हला सउन्तले अणव्भन्तरा क्खु अम्हे मअणगअस्स वुत्तन्तस्स। किन्तु जारिसी इतिहासणिबन्धेसु कामअमाणाणं अवत्था सुणीअइ तारिसिं दे पेक्खामि। कहेहि किं निमित्तं दे सन्तावो विआरं क्खु परमत्थदो अजाणिअ अणारम्भो पड़िआरस्स। (४)

राजा। अनसूयामप्यनुगतो मदीयस्तर्कः। नहि स्वाभि-प्रायेण मे दर्शनम्।

(१) अनसूये तस्य राजर्षेः प्रथमदर्शनात् आरभ्य पर्य्युत्सुका इव शकुन्तला। किं नु खलु अस्याः तन्निमित्तः अयम् आतङ्को भवेत्।

(२) सखि ममापि ईदृशी आशङ्का हृदयस्य। भवतु प्रच्यामि तावदेनां सखि प्रष्टव्यासि किमपि। बलीयान् खलु ते सन्तापः।

(३) हला किं वक्तुकामासि।

(४) हला शकुन्तले अनभ्यन्तरे खलु आवां मदनगतस्य वृत्तान्तस्य। किन्तु यादृशी इतिहासनिबन्धेषु कामयमानानाम् अवस्था श्रूयते तादृशीं ते प्रेक्षे। कथय किंनिमित्तस्ते सन्तापः। विकारं खलु परमार्थतः अज्ञात्वा अनारम्भः प्रतीकारस्य।

शकुन्तला । आत्मगतम् । बलिअं क्खु मे अहिणिएसो । दाणिं वि सहसा एदाणं ण सक्कणोमि णिएदेउं । (१)

प्रियंवदा । सहि सुठ्ठु एसा भणइ । किं अत्तणो आतङ्कं उवेक्खसि । अणुदिअहं क्खु परिहीअसि अङ्गेहिं । केअलं लावसमई छाया तुमं ण मुञ्चइ । (२)

राजा । अवितथमाह प्रियंवदा । तथाहि

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा ।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥८॥

शकुन्तला । सहि कस्स वा अस्सस्स कहइस्सं । आआसइत्तिआ दाणिं वो भविस्सं । (३)

उभे । अदो एव्व क्खु णिब्बन्धो सिणिद्धजनसंविहत्तं हि दुक्खं सज्झवेअणं होइ । (४)

(१) बलीयान् खलु मे अभिनिवेशः । इदानीमपि सहसा एतयो र्न शक्नोमि निवेदयितुम् ।

(२) सखि सुष्ठु एषा भणति । किम् आत्मनः आतङ्कम् उपेक्षसे । अनुदिवसं खलु परिहीयसे अङ्गैः । केवलं लावण्यमयी छाया त्वां न मुञ्चति ।

(३) सखि कस्य वा अन्यस्य कथयिष्यामि । आयासयित्री इदानीं वां भविष्यामि ।

(४) अत एव खलु निर्बन्धः स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति ।

राजा।

पृष्टा जनेन समदुःखसुखेन बाला
　　नेयं न वक्ष्यति मनोगतमाधिहेतुम्।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्णम्
　　अत्रान्तरे श्रवणकातरतां गतोऽस्मि॥८॥

शकुन्तला। सहि जदो पहुइ मम दंसणपहं आअओ सो तवोवणरक्खिआ राएसी * तदो आरहिअ तग्गएण अहिलासेण एतदवत्थ म्हि संवुत्ता। (१)

राजा। सहर्षम्। श्रुतं श्रोतव्यम्।

स्मर एव तापहेतुर्निर्व्वापयिता स एव मे जातः।
　　दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य † ॥१०॥

शकुन्तला। तं जइ वो अणुमअं तह वट्टह जह तस्स राएसिणो अणुकम्पणीया होमि। अस्सहा अवस्सं सिञ्चह मे तिलोदअं। (२)

राजा। संशयच्छेदि वचनम्।

(१) सखि यतः प्रभृति मम दर्शनपथम् आगतः स तपोवनरक्षिता राजर्षिः ततः आरभ्य तद्गतेन अभिलाषेण एतदवस्थास्मि संवृत्ता।

(२) तद् यदि वामनुमतं तथा वर्त्तेथाम् यथा तस्य राजर्षेः अनुकम्पनीया भवामि। अन्यथा अवश्यं सिञ्चतं मे तिलोदकम्।

* राएसी इत्येतदनन्तरं तदो आरहिअ इत्येतत्पूर्व्वम् अर्द्धोक्ते लज्जां नाटयति। सभे। काहेदु पिअसही। शकुन्तला। अयमंशः दृश्यते केषु पुस्तकेषु।

† In most of the editions the reading is अभ्रश्यामः। अर्द्धश्यामः clearly indicates the points of comparison with the first half; and Raghava Bhatta has adopted it.

प्रियंवदा। जनान्तिकम्। अणसूए दूरगअमम्महा अक्खमा इयं कालहरणस्स। जस्सिं वद्धभावा एसा सो ललामभूतो पोरवाणं। ता जुत्तं से अहिलासो अहिणन्दिउं। (१)

अनसूया। तह जह भणासि। (२)

प्रियंवदा। प्रकाशम्। सहि दिट्ठिआ अणुरूवो दे अहिणिएसो। साअरं वज्जिअ कहिं वा ओतरइ महाणई। को दाणिं सहआरं अन्तरेण अतिमुत्तलअं पल्लविअं सहइ *। (३)

राजा। किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्त्तेते।

अनसूया। को उण उवाओ भवे जेण अविलम्बिअं णिहुअं अ सहीए मणोरहं सम्पादेम। (४)

प्रियंवदा। णिहुअं त्ति चिन्तणीअं भवे सिग्घं त्ति सुअरं। (५)

(१) अनसूये दूरगतमन्मथा अक्षमा इयं कालहरणस्य। यस्मिन् वद्धभावा एषा स ललामभूतः पौरवाणां तद् युक्तम् अस्याः अभिलाषः अभिनन्दितुम्।

(२) तथा यथा भणसि।

(३) सखि दिष्ट्या अनुरुप स्ते अभिलाषः। सागरं वर्ज्जयित्वा कुत्र वा महानदी अवतरति। क इदानीं सहकारमन्तरेण अतिमुक्तलतां पल्लवितां सहते।

(४) कः पुनः उपायो भवेत् येन अविलम्बितं निभृतं च सख्याः मनोरथं सम्पादयावः।

(५) निभृतमिति चिन्तनीयं भवेत् शीघ्रमितिसुकरम्।

* The above speech is in some editions divided between the two companions. The latter half beginning with को दाणिं &c. is assigned to Priyambada.

अनसूया। कहंविग्र। (१)

प्रियंवदा। णं सो राएसी इमस्सिं सिणिद्धदिट्ठिए सूइ-अहिलासो इमाइं दिअहाइं पजाअरकिसो लक्खीअइ। (२)

राजा। सत्यमित्यभूत एवास्मि। तथाहि

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं

निशि निशि भुजन्यस्तापाङ्गप्रसारिभिरश्रुभिः।

113. अनभिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्

कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्य्यते॥११॥

प्रियंवदा। विचिन्त्य। हला मअणलेहो से करीअउ। तं देअसेसावदेसेण सुमणोगोविअं करिअ से हत्थअं पावइस्सं। (३)

अनसूया। रोअइ मे सुउमारो पओओ। किं वा सउन्तला भणाइ। (४)

शकुन्तला। को णिओओ वो विकप्पीअइ। (५)

प्रियंवदा। तेण हि अत्तणो उवसासपूव्वं चिन्तेहि दाव किंवि ललिअपदबन्धणं। (६)

(१) कथमिव।

(२) ननु स राजर्षिः अस्यां स्निग्धदृष्ट्या सूचिताभिलाषः इमानि दिवसानि प्रजागरकृशः लक्ष्यते।

(३) हला मदनलेखः अस्मै क्रियताम्। तं देवशेषापदेशेन सुमनोगोपितं कृत्वा अस्य हस्तं प्रापयिष्यामि।

(४) रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति।

(५) को नियोगः युवयोर्विकल्प्यते।

(६) तेन हि आत्मनः उपन्यासपूर्वं चिन्तय तावत् किमपि ललितपदबन्धनम्।

शकुन्तला । चिन्तेमि अहं । अवहीरणभीरुअं उण वेवइ मे हिअअं । (१)

राजा । अयं स ते तिष्ठति सङ्गमोत्सुको
विशङ्कसे भीरु यतोऽवधीरणाम् ।
लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत् * ॥१२॥

सख्यौ । अत्तगुणावमाणिणि को दाणिं सरीरणिव्वावइत्तिअं सारदिअं जोसिणिं पटन्तेण वारेइ । (२)

शकुन्तला । सस्मितम् । णिओइआ दाणिं म्हि । उपविष्टा चिन्तयति । (३)

राजा । स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियाम् अवलोकयामि । यतः

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः ।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥१३॥

(१) चिन्तयामि अहम् अवधीरणभीरु पुनः वेपते मे हृदयम् ।

(२) आत्मगुणावमानिनि कः इदानीं शरीरनिर्व्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति ।

(३) नियोजिता इदानीमस्मि ।

* एतदनन्तरं क्वचित् पुस्तके अपिच ।

अयं स यस्मात् प्रणयावधीरणां विशङ्कनीयां करभोरु मन्यसे ।
उपागतस्त्वां प्रणयोन्मुखो जनो न रत्नमन्विष्यति मृग्यते हि तत् ॥

अयमंशो दृश्यते ।

शकुन्तला। हला चिन्तिअं मए गीअवत्थु। णहु सण्णिहिआणि उण लेहणसाहणाणि। (१)

प्रियंवदा। इमस्सिं सुओदरसुउमारे णलिणीवत्ते णहेहिं णिक्खित्तवण्णं करेहि। (२)

शकुन्तला। यथोक्तं रूपयित्वा। हला सुणुह दाणिं संगअत्थं णव त्ति। (३)

उभे। अवहिअ म्ह। (४)

शकुन्तला। वाचयति।

तुज्झ ण आणे हिअअं मह उण कामो दिवा वि रत्तिं वि। आर्या
णिग्घिण तवइ बलीअं तुह वुत्तमणोरहाइ अङ्गाइ॥ (५) ॥१४॥

राजा। सहसोपसृत्य।

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव। आर्या
दृष्टान्तः
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥ १५॥

सख्यौ। सहर्षम्। साअअं अविलम्बिणो मणोरहस्स।(६)

(१) हला चिन्तितं मया गीतवस्तु। नहि सन्निहितानि पुनः लेखनसाधनानि।

(२) अस्मिन् शुकोदरसुकुमारे नलिनीपत्रे नखैः निक्षिप्तवर्णं कुरु।

(३) हला शृणुत इदानीं सङ्गतार्थं नवेति।

(४) अवहिते स्वः।

(५) तव न जाने हृदयं मम पुनः कामो दिवापि रात्रिमपि।
निर्घृण तपति बलीयः त्वयि वृत्तमनोरथानि अङ्गानि॥

(५) स्वागतं अविलम्बिनः मनोरथस्य।

शकुन्तला। अभ्युत्थातुमिच्छति। *

राजा। अलमलमायासेन।

सन्दष्टकुसुमशयनान्याशुक्लान्तविसभङ्गसुरभीणि।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति ॥ २६ ॥

अनसूया। इदो सिलातलेक्कदेसं अलङ्करेउ वअस्सो। (१)

राजा। उपविशति।

शकुन्तला। सलज्जं तिष्ठति। †

प्रियंवदा। दुवेणं वि वो असोसाणुराओ पच्चक्खो। सहीसिणेहो मं पुनरुत्तवादिणिं करेइ। (२)

राजा। भद्रे नैतत् परिहार्य्यम्। विवक्षितं हि अनुक्तम् अनुतापं जनयति।

प्रियंवदा। आवसस्स विसअवासिणो अत्तिहरेण रसा होअव्वं त्ति एसो वो धम्मो। (३)

(१) इतः शिलातलैकदेशम् अलङ्करोतु वयस्यः।

(२) द्वयोरपि युवयोः अन्योन्यानुरागः प्रत्यक्षः। सखीस्नेहः मां पुनरुक्तवादिनीं करोति।

(३) आपन्नस्य विषयवासिनः आर्त्तिहरेण राज्ञा भवितव्यम् इति एष वः धर्मः।

* शकुन्तला। ससाध्वसमात्मगतम्। हिअअ तह उत्तम्मिअ दाणिं किंवि ण पडिवज्जसि। अभ्युत्थातुमिच्छति। इति पाठान्तरम्।

† राजा। उपविश्य। कच्चित् सखीं वो नातिबाधते सन्तापः।

प्रियंवदा। सख्या सह उपविश्य। लद्धोसहो सम्पदं उपसमं गमिस्सदि।

अनसूया। जनान्तिकम्। पिअंवदे कालेणेति किं पेक्ख मेहवादाहतमीरीविअ णिमिसन्तरेण पच्चाअदं पिअसहिं।—

शकुन्तला। सलज्जं तिष्ठति। इति पाठभेदः।

राजा। नास्मात् परम्।

प्रियंवदा। तेण हि इअं णो पिअसही तुमं उद्दिसिअ इमं अवत्थन्तरं भअवता मअणेण आरोविआ। ता अरिहसि अब्भुववत्तीए जीविअं से अवलम्बिउं। (१)

राजा। भद्रे साधारणोऽयं प्रणयः। सर्व्वथा अनुगृहीतोऽस्मि।

शकुन्तला। प्रियंवदामवलोक्य। हला किं अन्तेउरविरहपज्जुस्सुअस्स राएसिणो उवरोहेण। (२)

राजा।

इदमनन्यपरायणमन्यथा हृदयसन्निहिते हृदयं मम।
यदि समर्थयसे मदिरेक्षणे मदनबाणहतोऽस्मि हतः पुनः ॥ १७॥

द्रुतविलम्बितम्

अनसूया। वअस्स बहुवल्लहा राआणो सुणीअन्ति। जह णो पिअसही बन्धुअणसोअणीआ ण होइ तह णिव्वत्तेहि। (३)

राजा। भद्रे किं बहुना

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।
समुद्रवसना चोर्व्वी * सखी च युवयोरियम् † ॥ १८॥

अनुष्टुप्

दीपकम्

(१) तेन हि इयं नः प्रियसखी त्वामुद्दिश्य इदम् अवस्थान्तरं भगवता मदनेन आरोपिता। तदर्हसि अभ्युपपत्त्या जीवितम् अस्याः अवलम्बितुम्।

(२) हला किम् अन्तःपुरविरहपर्य्युत्सुकस्य राजर्षेरुपरोधेन।

(३) वयस्य बहुवल्लभाः राजानः श्रूयन्ते। यथा नः प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्व्वर्त्तय।

* समुद्ररशनेति पाठः क्वचित्।

† एतदनन्तरं क्वचित् पुस्तके—

उभे। णिव्वुत्र ह्म। (१)

प्रियंवदा। सदृष्टिक्षेपम्। अणसूए जह एसो इदो दिस-
दिट्ठो उस्सुओ मअपोअओ मादरं असेसइ एहि संजोएम
णं। (२)

उभे। प्रस्थिते।

शकुन्तला। हला असरणह्मि अमाअरा वो आ-
अच्छउ। (३)

उभे। पुहुवीए जो सरणं सो तुह समीवे वट्टइ।
निष्क्रान्ते। (४)

शकुन्तला। हला मरिसावेध लोअवालं जं अह्महि उवआरातिक्कमेण विस्सद्ध-
प्पलाविणीहिं भणिअं।

सख्यौ। जेण तं मन्तिअं सा मरिसावेउ अस्सम को अच्चओ।

शकुन्तला। अरिहइ क्खु महाराओ अजुत्तवअणाणि सोढुं परोक्खं को वा
किं ण मन्तेइ।

राजा। सस्मितम्।

अपराधमिमं ततः सहिष्ये यदि रम्भोरु तवाङ्गसंचिताङ्गे।
कुसुमास्तरणे क्लमापहेऽस्मिन् स्वजनत्वादनुमन्यसेऽवकाशम्॥

प्रियंवदा। णं एत्तिएण उण दे तुट्ठी भवे।

शकुन्तला। सरोषमिव। विरम दुल्ललिए एतदवत्थां वि मं कीलेसि।
अवसंशी दृश्यते।

(१) निर्वृते स्वः।

(२) अनसूये यथा एष इतो दत्तदृष्टिः उत्सुको मृगपोतकः मातरम् अन्विष्यति,
एहि संयोजयावः एनम्।

(३) हला अशरणास्मि अन्यतरा युवयो रागच्छतु।

(४) पृथिव्याः यः शरणं स तव समीपे वर्त्तते।

शकुन्तला। कहं गताओ एव्व। (१)

राजा। अलमावेगेन। नन्वयमाराधयिता जनस्तव समीपे वर्त्तते।

किं शीतलैः क्लमविनोदिभिरार्द्रवातान्
सञ्चारयामि नलिनीदलतालवृन्तैः।
अङ्के निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ॥१९॥

वसन्ततिलका

शकुन्तला। ण माणणीएसु अत्ताणं अवराहइस्सं। (२)

उत्थाय गन्तुमिच्छति।

राजा। सुन्दरि अनिर्वाणो दिवसः। इयं च ते समवस्था।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम्।
कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः ॥२०॥

आर्या

बलादेनां निवर्त्तयति।

शकुन्तला। पोरव रक्ख अविणअं मअणसन्तत्ता वि णहु अत्तणो पभवामि। (३)

राजा। भीरु अलं गुरुजनभयेन। दृष्ट्वा ते विदितधर्म्मा तत्रभवानत्र दोषं न ग्रहीष्यति कुलपतिः।

अपिच

गान्धर्व्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः ॥२१॥

अनुष्टुप्

(१) कथं गते एव।

(२) न माननीयेषु आत्मानम् अपराधयिष्यामि।

(३) पौरव रक्ष अविनयं मदनसन्तप्तापि नहि आत्मनः प्रभवामि।

शकुन्तला। मुञ्च दाव मं। भूओ वि सहीजणं अणु-
माणइस्सं। (१)

राजा। भवतु मोक्ष्यामि।

शकुन्तला। कदा।

राजा।

मालभारिणी (औपच्छन्दसिक)

अपरिक्षतकोमलस्य यावत् कुसुमस्येव नवस्य षट्पदेन।
अधरस्य पिपासता मया ते सदयं सुन्दरि गृह्यते रसोऽस्य॥२२

मुखमस्याः समुन्नमयितुमिच्छति।

शकुन्तला। परिहरति नाट्येन। *

(१) मुञ्च तावन्मां भूयोऽपि सखीजनं अनुमानयिष्यामि।

* एतदनन्तरं क्वचित् पुस्तके।

राजा। कथं प्रकाशं गतोऽस्मि।

शकुन्तलां मुक्त्वा तेनैव पदेन पुनः प्रतिनिवर्त्तते।

शकुन्तला। पदान्तरे निवृत्य। पौरव अनिच्छापूरओ वि सम्भासमेत्तपरि-
चिओ अअं जणो न विसुमरिदव्वो।

राजा।

त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे।
दिनावसाने छायेव तरोर्मूलं न मुञ्चति॥

शकुन्तला। आत्मगतम् हद्धी हद्धी इमं सुणिअ ण चरणा पुरोमुहा पसरन्ति
भोदु। इमेहिं रत्तकुरुवएहिं ओवारिअसरीरा पेक्खिस्सं दाव से भावाणुबन्धं तथा
कृत्वा स्थिता।

राजा। प्रिये कथमनुरागैकरसं मामुपेक्ष्य निरपेक्षैव कामं गच्छसि।

अनिर्दयोपभोग्यस्य रूपस्य मृदुनः कथम्।
कठिनं खलु ते चेतः शिरीषस्येव बन्धनम्॥

शकुन्तला। एदं सुणिअ ण मे अत्थि विभवो गन्तुं।

राजा। सम्प्रति प्रियाशून्ये लतामण्डपे कथमस्मि। विचिन्त्य। अग्रतोऽवलोक्य। हन्त व्याहतं गमनम्।

मणिबन्धनतो गलितं संक्रान्तोशीरपरिमलं तस्याः।
हृदयस्य निगड़मिव मे मृणालवलयं स्थितं पुरतः॥

सादरमादत्ते।

शकुन्तला। हस्तं विलोक्य। अम्मो दौव्वल्लसिढ़िलदाए परिब्भट्टं मुणालवलअं ण विसाअं।

राजा। मृणालवलयमुरसि निक्षिप्य।

अनेन लीलाभरणेन ते प्रिये विहाय कान्तं भुजमत्र तिष्ठता।
जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया॥

शकुन्तला। अदो अवरं असहस्सि विलम्बिउं। एदेण एव्व ववदेसेण अत्ताणअं दंसइस्सं। उपसर्पति।

राजा। सहर्षम्। अये जीवितेश्वरी मे प्राप्ता। परिदेवनानन्तरं प्रसादेनोप कृतोऽस्मि दैवस्य।

पिपासाक्षामकण्ठेन याचितश्चाम्बु पक्षिणा।
नवमेघोज्झिता चास्य धारा निपतिता मुखे॥

शकुन्तला। सम्मुखे स्थित्वा। अज्ज अज्जउत्त सुमरिय मुणालवलयस्सकरव्भंस्सिणो कदे पड़िणिउत्त म्हि। कहिअं मे हिअएण तुए गहीअं त्ति। ता णिक्खिव एदं मा मं अत्ताणअं अ मुणिअणेसु पआसइस्ससि।

राजा। एकेनाभिसन्धिना प्रत्यर्पयामि। अहमेव ते यथास्थानं निवेशयामि।

शकुन्तला। स्वगतम्। हद्धी हद्धी का गई। प्रकाशम्। एव्वं करसु।

राजा। इतः शिलातलमेव संश्रयावः।

उभौ। परिक्रम्योपविष्टौ।

राजा। शकुन्तलाया हस्तमादाय। अहो स्पर्शः।

हरकोपाग्निदग्धस्य दैवेनामृतवर्षिणा ।
प्ररोहः सम्भृतो भूयः किंस्वित् कामतरोरयम् ॥

शकुन्तला । तुवरउ तुवरउ अज्जउत्तो ।

राजा । सहर्षमात्मगतम् । इदानीमस्मि विश्वस्तः यतः भर्त्तुः आभाषणपद-मिदम् । प्रकाशम् । सुन्दरि नातिश्लिष्टः सन्धिरस्य तत् अन्यथा घटयितव्यः ।

शकुन्तला । जह दे रोअइ तह दंसेसु ।

राजा । सव्याजं विलम्ब्य । प्रतिमुच्य । सुन्दरि दृश्यताम् ।

अयं स ते श्यामलतामनोहरो विशेषशोभार्थमिवोज्झिताम्बरः ।
मृणालरूपेण नवो निशाकरः करं समेत्योभयकोटिमाश्रितः ॥

शकुन्तला । ण दाव पेक्खामि पवणपव्वोलिअकस्सोप्पलरेणुणा कलुसीकआ दिट्ठी ।

राजा । सस्मितम् । यदि मन्यसे अहमेनां वदनमारुतेन विशदां करिष्ये ।

शकुन्तला । अणुकम्पिआ होमि ण उण दे विस्ससामि ।

राजा । मा मैवं नहि परिजना आदेशात् परमतिवर्त्तन्ते ।

शकुन्तला । अअं एव्व पच्चुवआरो अविस्सासजणओ ।

राजा । स्वगतम् । नाहमेवं रमणीयमात्मनः सेवावकाशं शिथिलयिष्ये । मुखमुन्नमयितुं प्रवृत्तः ।

शकुन्तला । अकामप्रतिबन्धं रूपयन्ती विरमति ।

राजा । आत्मगतम् ।

चारुणा स्फुरितेनायमपरिक्षतकोमलः ।
पिपासतो ममानुज्ञां ददातीव प्रियाधरः ॥

शकुन्तला । पड़िसाणमन्थरो विअ अज्जउत्तो ।

राजा । कर्णोत्पलसन्निकर्षादीक्षणस्य सादृश्यमूढोऽस्मि । मुखमारुतेन चक्षुः सेवते ।

शकुन्तला । होउ पइदित्यदंसणा म्हि संवुत्ता । लज्जामि उण अणुवआरिणी पिअआरिणो अज्जउत्तस्स ।

नेपथ्ये ।

चक्कवाकवहुए आमन्तेहि सहअरं उवट्ठिआ रअणी । (१)

शकुन्तला । ससम्भ्रमम् । पोरव असंसअं मम सरीरवुत्तन्तोवलम्भस्स अज्जा गोतमी इदो एव्व आअच्छइ । दाव विड़वन्तरिओ होहि । (२)

राजा । सुन्दरि किमन्यत्

इदमप्युपकृतिपक्षे सुरभि मुखं ते मया यदाघ्रातम् ।
ननु कमलस्य मधुकरः सन्तुष्यति गन्धमात्रेण ॥

शकुन्तला । असन्तोषिण किं करइ ।

राजा । इदमिति व्यवसितो वक्त्रं ढौकयति ।

In the extracts given above, there is much that is good poetry. But the great defect of the whole piece is that the scene has been unprofitably prolonged. It does not further the action of the play. In spite of its length, it leaves the hero and the heroine in the same predicament they were in, long before. The first interview of the lovers, where the heroine is all bashfulness and is unable to sum up her energy and courage to give out her feelings, must be short.

But the case here is quite otherwise. The heroine as introduced here is wanting in bashfulness and is no better than a flirt. We cannot believe that the skilful dramatist, a close observer of human nature, can make such a mistake ; and therefore we have not adopted the piece as a part of the text.

(१) चक्रवाकवधु आमन्त्रयस्व सहचरं उपस्थिता रजनी ।

(२) पौरव, असंशयं मम शरीरवृत्तान्तोपलम्भाय आर्या गौतमी इत एव आगच्छति । तावत् विटपान्तरितः भव ।

राजा । तथा । आत्मानमावृत्य तिष्ठति ।

ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च ।

सख्यौ । इदो इदो अज्जा गोदमी । (१)

गौतमी । शकुन्तलामुपेत्य । जादे अवि लहुसन्तावाइं दे अङ्गाइं । (२)

शकुन्तला । अत्थि मे विसेसो । (३)

गौतमी । इमिणा दब्भोदएण णिराबाहं एव्व दे शरीरं होहिइ । शिरसि शकुन्तलामभ्युक्ष्य । वच्छे परिणओ दिअहो एहि उडअं एव्व गच्छामो । प्रस्थिता । (४)

शकुन्तला । आत्मगतम् । हिअअ पढमं एव्व सुहोवणए मणोरहे काअरभावं ण मुञ्चसि । साणुसअविहडिअस्स कहं दे संपअं सन्दावो । पदान्तरे स्थित्वा । प्रकाशम् । लदावलअ सन्तावहारअ आमन्तेमि तुमं भूओ वि परिहोअस्स । दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः । (५)

राजा । पूर्वस्थानमुपेत्य । सनिश्वासम् । अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः । मया हि ।

(१) इत इत आर्या गौतमी ।

(२) जाते अपि लघुसन्तापानि ते अङ्गानि ।

(३) अस्ति मे विशेषः ।

(४) अनेन दर्भोदकेन निराबाधम् एव ते शरीरं भविष्यति । वत्से परिणतो दिवसः एहि उटजमेव गच्छामः ।

(५) हृदय प्रथममेव सुखोपनते मनोरथे न कातरभावं मुञ्चसि । सानुशयविघटितस्य कथं ते साम्प्रतं सन्तापः । लतावलय, सन्तापहारक, आमन्त्रये त्वां भूयोऽपि परिभोगाय ।

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्त्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥ २३॥

क्व नु खलु संप्रति गच्छामि । अथवा इहैव प्रियापरिभुक्तमुक्ते लतावलये मुहूर्त्तं स्थास्यामि । सर्व्वतोऽवलोक्य ।

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्ताद्भ्रष्टमिदं विसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि ॥ २४॥

आकाशे ।

राजन्

सायन्तने सवनकर्म्मणि संप्रवृत्ते
वेदिं हुताशनवतीं परितः प्रयस्ताः ।
छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्यापयोदकपिशाः पिशिताशनानाम् ॥ २५॥

राजा । अयमहमागच्छामि । निष्क्रान्तः ।

तृतीयोऽङ्कः ।

चतुर्थोऽङ्कः ।

ततः प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ ।

अनसूया । पिअंवदे जइवि गन्धव्वेण विहिणा णिव्वुत्त-कल्लाणा सउन्तला अणुरूवभत्तुगामिणी संवुत्त त्ति णिव्वुअं मे हिअअं तहवि एत्तिअं चिन्तणीअं । (१)

प्रियंवदा । कहंविअ । (२)

अनसूया । अज्ज सो राएसी इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अन्तेउरसमागओ इदोगअं वुत्तन्तं सुमरइ वा णव त्ति । (३)

प्रियंवदा । वीसद्धा होहि । ण तारिसा आकिदि-विसेसा गुणविरोहिणो होन्ति । तादो दाणिं इदं वुत्तन्तं सुणिअ ण आणे किं पडिवज्जिस्सइ त्ति । (४)

अनसूया । जह अहं देक्खामि तह तस्स अणुमअं होउ । (५)

(१) प्रियंवदे यद्यपि गान्धर्व्वेण विधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्ता इति निर्वृतं मे हृदयं तथापि एतावच्चिन्तनीयम् ।

(२) कथमिव ।

(३) अद्य स राजर्षिः इष्टिं परिसमाप्य ऋषिभिः विसृष्टः आत्मनो नगरं प्रविश्य अन्तःपुरसमागतः इतोगतं वृत्तान्तं स्मरति वा नवेति ।

(४) विस्रब्धा भव । न तादृशाः आकृतिविशेषाः गुणविरोधिनः भवन्ति । तात इदानीं इमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यते इति ।

(५) यथा अहं पश्यामि तथा तस्य अनुमतं भवेत् ।

प्रियंवदा। कहंविअ। (१)

अनसूया। गुणवन्तस्स कस्सआ पडिवादणीअ त्ति अअं दाव पढ़मो संकप्पो। तं जइ देव्वं एव्व संपादेइ णं अप्पआसेण कअत्थो गुरुअणो। (२)

प्रियंवदा। पुष्पभाजनं विलोक्य। सहि अवचिआइ वलिकम्मपज्जत्ताइ कुसुमाइ। (३)

अनसूया। णं पिअसहीए सउन्तलाए सोहग्गदेवदा अच्चणीआ। (४)

प्रियंवदा। जुज्जइ। (५)

तदेव कर्म्मारभेते।

नेपथ्ये।

अयमहं भोः।

अनसूया। कर्णं दत्वा। सहि अदिहीणं विअ णिवेदिअं। (६)

प्रियंवदा। णं उड़असस्सिहिआ सउन्तला। आत्मगतम्। अज्ज उण हिअएण असस्सिहिआ। (७)

(१) कथमिव।

(२) गुणवते कन्यका प्रतिपादनीया इति अयं तावत् प्रथमः सङ्कल्पः। तद यदि दैवमेव सम्पादयति ननु अप्रयासेन कृतार्थः गुरुजनः।

(३) सखि अवचितानि वलिकर्म्मपर्य्याप्तानि कुसुमानि।

(४) ननु प्रियसख्याः शकुन्तलायाः सौभाग्यदेवता अर्चनीया।

(५) युज्यते।

(६) सखि अतिथीनामिव निवेदितम्।

(७) ननु उटजसन्निहिता शकुन्तला। अद्य पुनः हृदयेन असन्निहिता।

अनसूया। होदु। अलं एत्तिएहिं कुसुमेहिं। (१)

प्रस्थिते।

नेपथ्ये

आः अतिथिपरिभाविणि

वंशस्थ विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
उपमा कथां प्रमत्तः प्रथमं कृतामिव ॥ १॥

प्रियंवदा। हद्धी हद्धी अप्पिअं एव्व संवुत्तं। कस्सिं वि पूआरिहे अवरद्धा सुण्णहिअआ सउन्दला। पुरोऽवलोक्य। ण हु जस्सिं कस्सिं वि। एसो दुव्वासो सुलहकोवो महेसी तह सविअ वेअवलोप्फुल्लाए दुव्वाराए गईए पड़िणिउत्तो। को अण्णो हुअवहादो दहिउं पभविस्सदि। (२)

अनसूया। गच्छ पाएसु पणमिअ णिवत्तेसु णं जाव अहं अग्घोदअं उपकप्पेमि। (३)

प्रियंवदा। तह। निष्क्रान्ताः। (४)

(१) भवतु अलमेतावद्भिः कुसुमैः।

(२) हा धिक् हा धिक् अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हे अपराद्धा शून्यहृदया शकुन्तला। नहि यस्मिन् कस्मिन्नपि। एष दुर्वासाः सुलभकोपो महर्षिः तथा शप्त्वा वेगवलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः कोऽन्यो हुतवहाद् दग्धुं प्रभविष्यति।

(३) गच्छ पादयोः प्रणम्य निवर्त्तय इमं यावदहम् अर्घ्योदकमुपकल्पयामि।

(४) तथा।

अनसूया। पदान्तरे स्खलितं निरूप्य। अम्मो आवेअक्खलिदाए गईए पव्भट्टं मे अग्गहत्थादो पुप्फभाअणं। पुष्पोच्चयं रूपयति। (१)।

प्रविश्य

प्रियंवदा। सहि पइदिवक्को सो कस्स अणुणअं पडिगेण्हइ। किं वि उण साणुक्कोसो किदो! (२)

अनसूया। सस्मितम्। तस्सिं बहु एदं वि। कहेसु। (३)

प्रियंवदा। जदा णिवत्तिदुं ण इच्छदि तदा विण्णविदो मए भअवं पढमं त्ति पेक्खिअ अविण्णादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो मरिसिदव्वो त्ति। (४)

अनसूया। तदो तदो। (५)

प्रियंवदा। तदो मे वअणं अण्णहा भविदुं ण अरिहदि किन्तु अहिण्णाणाभरणदंसणेण सावो णिवत्तिस्सदि त्ति मन्तअन्तो सअं अन्तरिहिदो। (६)

(१) अम्मो आवेगस्खलितया गत्या प्रभ्रष्टं मे अग्रहस्तात् पुष्पभाजनम्।

(२) सखि प्रकृतिवक्रः स कस्य अनुनयं प्रतिगृह्णाति। किमपि पुनः सानुक्रोशः कृतः।

(३) तस्मिन् बहु एतदपि। कथय।

(४) यदा निवर्त्तितुं न इच्छति तदा विज्ञापितो मया भगवन् प्रथममिति प्रेक्ष्य अविज्ञाततपःप्रभावस्य दुहितृजनस्य एकः अपराधः मर्षयितव्य इति।

(५) ततस्ततः।

(६) ततो मे वचनम् अन्यथा भवितुं नार्हति किन्तु अभिज्ञानाभरणदर्शनेन शापो निवर्त्स्यति इति मन्त्रयमाणः स्वयम् अन्तर्हितः।

अनसूया । सक्कं दाणिं आस्ससिदुं । अत्थि तेन राएसिणा संपत्थिदेण सनामहेअङ्किदं अङ्गुलीअअं सुमरणीअं त्ति सअं पिणद्धं तस्सिं साहीणोवाआ सउन्तला होहिइ । (१)

प्रियंवदा । सहि एहि देअकज्जं दाव णिव्वत्तेम । (२)

परिक्रामत: ।

प्रियंवदा । अवलोक्य । अनसूए पेक्ख दाव वामहत्थोवहिदवअणा आलिहिदा विअ पियसही भत्तुगदाए चिन्ताए अत्ताणं वि ण एसा विभावेइ किं उण आअन्तुअं । (३)

अनसूया । पिअंवदे दुवेणं एव्व णो मुहे एसो वुत्तन्तो चिट्ठउ । रक्खिदव्वा क्खु पइदिपेलवा पिअसही । (४)

प्रियंवदा । को दाणिं उण्होदएण णोमालिअं सिञ्चइ । (५) वैधर्म्येण दृष्टान्तालंकारः

उभे । निष्क्रान्ते ।

इति विष्कम्भकः

(१) शक्यमिदानीम् आश्वसितुं । अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितम् अङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम् । तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति ।

(२) सखि एहि देवकार्य्यं तावन्निर्व्वर्त्तयाव: ।

(३) अनसूये प्रेक्षस्व तावत् वामहस्तोपहितवदना आलिखिता इव प्रियसखी भर्तृगतया चिन्तया आत्मानमपि न एषा विभावयति किं पुनरागन्तुकम् ।

(४) प्रियंवदे द्वयोरेव आवयो: मुखे एष वृत्तान्त: तिष्ठतु । रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी ।

(५) क इदानीं उष्णोदकेन नवमल्लिकां सिञ्चति ।

विष्कम्भकः ।*

ततः प्रविशति सुप्तोत्थितः शिष्यः ।

शिष्यः । वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासात् उपावृत्तेन काश्यपेन । प्रकाशं निर्गतस्तावदवलोकयामि कियत् अवशिष्टं रजन्या इति । परिक्रम्यावलोक्य च । हन्त प्रभातम् । तथाहि

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥२॥

अपि च

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि ॥३॥

* In this prologue there are some minor points in which there is no agreement among the various editions. For instance, the editions brought out by Babu Bhuban Chandra Basak and Mr. Patankar assign the part of appeasing the wrath of Durbasa to Anasuya. It matters very little whether Anasuya or Priyambada pacifies the Rishi. But if we take into consideration the fact that in the original or the source of the play,—Padmapurana, Svargakhanda,—there is no Anasuya, and the task has been that of Priyambada ; it seems fair that Priyambada gets that credit in the remodelled story.

प्रविश्यापटीक्षेपेण ।*

अनसूया । जइवि णाम विसअपरम्मुहस्स जणस्स एदं ण विदिअं तहवि तेण रसा सउन्तलाए अणज्जं आचरिदं । (१)

शिष्यः । यावदुपस्थितां होमवेलां गुरवे निवेदयामि ।

निष्क्रान्तः ।

अनसूया । पड़िबुद्धा वि किं करिस्सं । ण मे उइदेसु । (२)

* *N. B.* In Babu Bhuban Chandra Basak's edition two more slokas are found here ; the last of which is recognised by an authority no less than Mammatha Bhatta, the author of the Kavyaprakasa. The slokas are :—

(१) कर्कन्धूनामुपरि तुहिनं रञ्जयत्यग्रसन्ध्या
दार्भं मुञ्चत्युटजपटलं वीतनिद्रो मयूरः ।
वेदिप्रान्तात् खुरविलिखितादुत्थितश्चैष सद्यः
पश्चादुच्चैर्भवति हरिणः स्वाङ्गमायच्छमानः ॥

(२) पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षयिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै
रत्यारूढ़िर्भवति महतामप्यपभ्रंशनिष्ठा ॥

These two slokas are put in the mouth of the disciple of the Sage Kanwa.

(१) यद्यपि नाम विषयपराङ्मुखस्य जनस्य एतन्नविदितं तथापि तेन राज्ञा शकुन्तलायामनार्य्यमाचरितम् ।

(२) प्रतिबुद्धापि किं करिष्यामि । नमे उचितेषु अपि नित्यकरणीयेषु हस्तपादं प्रसरति । काम इदानीं सकामो भवतु येन असत्यसन्धे जने शुद्धहृदया सखी पदं कारिता । अथवा दुर्व्वाससः शाप एष विकारयति । अन्यथा स राजर्षिः ताहशानि मन्त्रयित्वा एतावन्तं कालं लेखमात्रमपि न विसृजति । तदितः

वि णिअकरणिज्जेसु हत्थपाआ पसरन्ति। कामो दाणिं सकामो होदु जेण असच्चसन्धे जणे सुद्धहिअआ सही पदं कारिदा। अहवा दुव्वाससो सावो एसो विआरेदि। अस्सहा कह सो राएसी तारिसाणि मन्तिअ एत्तिअस्स कालस्स लेहमेत्तं वि ण विसज्जेदि। ता इदो अहिआणं अङ्गुलीअअं से विसज्जामो। दुक्खसीले तवस्सिजणे को अब्भत्थीअदु। णं सहीगामी दोसो त्ति ववसिदा वि ण पारेमि पवासपड़िणिउत्तस्स तादकस्सवस्स दुस्सन्तपरिणीदं आवसरुत्तं सउन्तलं णिवेदिदुं। इत्थं गए अम्हेहिं किं करणिज्जं।

प्रविश्य

प्रियंवदा। सहर्षम्। सहि तुवर तुवर सउन्तलाए पत्थाणकोदुअं णिव्वत्तिदुं। (१)

अनसूया। सहि कहं एदं। (२)

प्रियंवदा। सुणाहि दाणिं सुहसइदपुच्छिआ सउन्तलासआसं गद म्हि। (३)

अभिज्ञानमङ्गुलीयकमस्मै विसृजामः। दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्। ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्ताय तातकाश्यपाय दुष्यन्तपरिणीताम् आपन्नसत्वां शकुन्तलां निवेदयितुम्। इत्थं गते अस्माभिः किं करणीयम्।

(१) सखि त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्व्वर्त्तयितुम्।

(२) सखि कथमेतत्।

(३) शृणु इदानीं सुखशयितपृच्छिका शकुन्तलासकाशं गतास्मि।

अनसूया। तदो तदो। (१)

प्रियंवदा। दाव एणं लज्जावणदमुहिं परिस्सजिअ सअं तादकस्सविण एव्वं अहिणन्दिदं दिट्ठिआ धूमाउलिददिट्ठिणो वि जजमाणस्स पावए एव्व आहुई पड़िदा। वच्छे सुसिस्सपरिदिण्णा विअ विज्जा असोअणिज्जा संवुत्ता। अज्ज एव्व इसिपड़िरक्खिदं तुमं भत्तुणो सआसं विसज्जेमि त्ति। (२)

अनसूया। अह केण सूइदो तादकस्सवस्स वुत्तन्तो। (३)

प्रियंवदा। अग्गिसरणं पविट्ठस्स शरीरं विणा छन्दोमईए वाणिआए। (४)

अनसूया। सविस्मयम्। कहेहि। (५)

प्रियंवदा। संस्कृतमाश्रित्य।

अनुष्टुप

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥४॥

अनसूया। प्रियंवदामालिङ्ग्य। सहि पिअं मे। किन्तु अज्ज

(१) ततस्ततः।

(२) तावदेनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकाश्यपेन एवम् अभिनन्दितं दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावके एव आहुतिः पतिता। वत्से सुशिष्यपरिदत्ता इव विद्या अशोचनीया संवृत्ता। अद्य एव ऋषिपरिरक्षितां त्वाम् भर्तुः सकाशं विसर्जयामि इति।

(३) अथ केन सूचितः तातकाश्यपस्य वृत्तान्तः।

(४) अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाण्या।

(५) कथय।

एव्व सउन्तला णीअदि त्ति उक्कण्ठासाहारणं परितोसं अणुहोमि। (१)

प्रियंवदा। सहि वअं दाव उक्कण्ठं विणोदइस्सामो सा तपस्सिणी णिव्वुदा होउ। (२)

अनसूया। तेण हि एदस्सिं चूदसाहावलम्बिदे णारिएरससुग्गए एतस्सिमित्तं एव्व कालन्तरक्खमा णिक्खित्ता मए केसरमालिआ। ता इमं हत्थसंसिहिअं करेहि। जाव अहं वि से मअलोअणं तित्थमित्तिअं दुव्वाकिसलआणि त्ति मङ्गलसमालम्भणाणि विरएमि। (३)

प्रियंवदा। तह करीअदु। (४)

अनसूया। निष्क्रान्ता।

प्रियंवदा। नाटोन सुमनसो गृह्णाति।

नेपथ्ये।

गौतमि आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय।

(१) सखि प्रियं मे। किन्तु अद्य एव शकुन्तला नीयते इति उत्कण्ठासाधारणं परितोषम् अनुभवामि।

(२) सखि आवां तावदुत्कण्ठां विनोदयिष्याव: सा तपस्विनी निर्वृता भवतु।

(३) तेन हि एतस्मिन् चूतशाखावलम्बिते नारिकेलसमुद्गके एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केशरमालिका। तदिमां हस्तसन्निहितां कुरु। यावदहमपि अस्यै मृगरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानि इति मङ्गलसमालम्भनानि विरचयामि।

(४) तथा क्रियताम्।

प्रियंवदा। कर्णं दत्त्वा। अणसूए तुवर तुवर एदे हत्थिणाउरगामिणो इसीओ सद्दावीअन्ति। (१)

प्रविश्य समालम्भनहस्ता।

अनसूया। सहि एहि गच्छम्ह। (२)

परिक्रामतः।

प्रियंवदा। विलोक्य। एसा सुज्जोदए एव्व सिहामज्जिदा पड़िच्छिदणीवारहत्थाहिं सोत्थिवाअणिआहिं तावसीहिं अहिणन्दीअमाणा सउन्तला चिट्ठइ। उवसप्पामो णं। (३)

उपसर्पतः।

ततः प्रविशति यथोद्दिष्टव्यापारा आसनस्था शकुन्तला।

शकुन्तलां प्रति तापसीनाम्।

अन्यतमा। जादे भत्तुणो बहुमाणसूअअं महादेईसद्दं लहेहि। (४)

द्वितीया। वच्छे वीरप्पसविणी होहि। (५)

तृतीया। वच्छे भत्तुणो बहुमदा होहि। (६)

आशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः।

(१) अनसूए त्वरस्व त्वरस्व एते हस्तिनापुरगामिनः ऋषयः शब्दाय्यन्ते।

(२) सखि एहि गच्छावः।

(३) एषा सूर्योदये एव शिखामज्जिता प्रतीष्टनीवारहस्ताभिः स्वस्तिवाचनिकाभिः तापसीभिः अभिनन्द्यमाना शकुन्तला तिष्ठति। उपसर्पावः एनाम्।

(४) जाते भर्त्तुः बहुमानसूचकं महादेवीशब्दं लभस्व।

(५) वत्से वीरप्रसविनी भव।

(६) वत्से भर्त्तुः बहुमता भव।

सख्यौ। उपसृत्य। सहि सुहमज्जणं दे होदु। (१)

शकुन्तला। साअदं मे सहीणं इदो णिसीदह। (२)

उभे। मङ्गलपात्राण्यादाय। उपविश्य। हला सज्जा होहि जाव मङ्गलसमालम्भणं विरचेम। (३)

शकुन्तला। इदं वि बहुमन्तव्वं दुल्लहं दाणिं मे सहीमण्डणं होहिइ। वाष्पं विसृजति। (४)

उभे। सहि उइदं ण दे मङ्गलकाले रोइदुं। अश्रूणि प्रमृज्य नाट्येन प्रसाधयतः। (५)

प्रियंवदा। आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं विप्पआरीअदि। (६)

प्रविश्य उपायनहस्तौ।

ऋषिकुमारकौ। इदमलङ्करणम् अलङ्क्रियतामत्रभवती।

सर्व्वाः। विलोक्य विस्मिताः।

गौतमी। वच्छ हारीद कुदो एदं। (७)

प्रथमः। तातकाश्यपप्रभावात्।

(१) सखि सुखमज्जनं ते भवतु।

(२) स्वागतं मे सख्योः इतो निषीदतम्।

(३) हला सज्जा भव यावत् मङ्गलसमालम्भनं विरचयावः।

(४) इदमपि बहुमन्तव्यम्। दुर्लभम् इदानीं मे सखीमण्डनं भविष्यति।

(५) सखि उचितं न ते मङ्गलकाले रोदितुम्।

(६) आभरणोचितं रूपम् आश्रमसुलभैः प्रसाधनैः विप्रकार्य्यते।

(७) वत्स हारीत कुतः एतत्।

गौतमी। किं माणसी सिद्धी। (१)

द्वितीयः। न खलु श्रूयताम्। तत्रभवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति। तत इदानीं

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित्।*
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितैर्
दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः॥५॥

प्रियंवदा। शकुन्तलां विलोक्य। हला इमाए अब्भुववत्तीए सूइदा दे भत्तुणो गेहे अणुहोदव्वा राअलच्छी। (२)

शकुन्तला। व्रीड़ां रूपयति।

प्रथमः। गौतम एह्येहि अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः।

द्वितीयः। तथा।

निष्क्रान्तौ।

सख्यौ। अए अणुवहुत्तभूषणो अअं जणो। चित्तकम्मपरिचएण अङ्गेसु दे आहरणविणिओअं करेह्म। (३)

शकुन्तला। जाणे वो णेउणं। (४)

* चरणोपभोगसुलभ इति पाठान्तरम्।

(१) किं मानसी सिद्धिः।

(२) हला अनया अभ्युपपत्त्या सूचिता ते भर्त्तुर्गेहे अनुभवितव्या राजलक्ष्मीः।

(३) अयि अनुपभुक्तभूषणः अयं जनः। चित्रकर्म्मपरिचयेन अङ्गेषु ते आभरणविनियोगं कुर्व्वः।

(४) जाने वां नैपुणम्।

उभे । नाट्येनालङ्कुरुतः ।

ततः प्रविशति स्नानोत्तीर्णः काश्यपः ।

काश्यपः । One of four remarkable slokas of Kalidas.

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः शार्दूलविक्रीडितम्
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥६॥ वियोगदुःखैः

परिक्रामति ।

सख्यौ । हला सउन्तले अवसिदमण्डणासि । परिहेसु संपदं क्खोमजुअलं । (१)

शकुन्तला । उत्थाय परिधत्ते ।

गौतमी । जादे एसो दे आणन्दपरिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरु उवट्ठिदो । आचारं दाव पड़िवज्जस्स । (२)

शकुन्तला । सव्रीड़म् । ताद वन्दामि । (३)

काश्यपः । वत्से !

ययातेरिव शर्मिष्ठा भर्त्तुर्वहुमता भव । अनुष्टुप्
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥७॥

गौतमी । भअवं वरो क्खु एसो ण आसिसा । (४)

(१) हला शकुन्तले अवसितमण्डनासि । परिधेहि साम्प्रतं क्षौमयुगलम् ।

(२) जाते एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः । आचारं तावत् प्रतिपद्यस्व ।

(३) तात वन्दे ।

(४) भगवन् वरःखलु एष न आशीः ।

काश्यपः। वत्से इतः सद्योहुतानग्नीन् प्रदक्षिणीकुरुष्व।

सर्व्वे। परिक्रामन्ति।

काश्यपः। ऋक्छन्दसा आशास्ते।

अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥ ७॥
प्रतिष्ठस्वेदानीम्। सदृष्टिक्षेपम्। क्व ते शार्ङ्गरवमिश्राः।

प्रविश्य

शिष्यः। भगवन् इमे स्मः।

काश्यपः। भगिन्यास्ते मार्गमादेशय।

शार्ङ्गरवः। इत इतो भवती।

सर्व्वे। परिक्रामन्ति।

काश्यपः। भो भोः सन्निहितास्तपोवनतरवः

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् ॥८॥

कोकिलरवं सूचयित्वा।

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥१०॥

आकाशे।

रम्यान्तरः कमलिनीहरितैः सरोभिश्
छायाद्रुमैर्नियमितार्कमयूखतापः।

भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥११॥

सर्व्वे। सविस्मयमाकर्णयन्ति।

गौतमी। जादे णातिजणसिणिद्धाहिं अणुसातगमणा सि तवोवणदेवदाहिं। पणम भअवदीणं। (१)

शकुन्तला। सप्रणामं परिक्रम्य। जनान्तिकम्। हला पिअंवदे णं अज्जउत्तदंसणुस्सुआए वि अस्समं परिच्चअन्तीए दुक्खेण मे चलणा पुरदो पवट्टन्ति। (२)

प्रियंवदा। ण केअलं तवोवणविरहकादरा सही एव्व। तुए उवट्ठिदविओअस्स तवोवणस्स वि दाव समवत्था दीसइ। (३)

उग्गलिअदब्भकअला मआ परिच्चत्तणच्चणा मोरा।
ओसरिअपण्डुपत्ता मुअन्ति अस्सूविअ लदाओ ॥१२॥

शकुन्तला। स्मृत्वा। ताद लदावहिणिअं वणजोसिणिं दाव आमन्तइस्सं। (४)

(१) जाते ज्ञातिजनस्निग्धाभिः अनुज्ञातगमनासि तपोवनदेवताभिः। प्रणम भगवतीः।

(२) प्रियंवदे ननु आर्य्यपुत्रदर्शनोत्सुकाया अपि आश्रमं परित्यजन्त्याः दुःखेन मे चरणौ पुरतः प्रवर्त्तेते।

(३) न केवलं तपोवनविरहकातरा सखी एव। त्वया उपस्थितवियोगस्य तपोवनस्यापि तावत् समवस्था दृश्यते।

उद्गलितदर्भकवलाः मृगाः परित्यक्तनर्त्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्ति अश्रु इव लताः॥

(४) तात लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये।

काश्यपः। अवैमि ते तस्यां सोदर्य्यस्नेहम्। इयं तावत् दक्षिणेन।

शकुन्तला। लतामुपेत्य। वणजोसिणि चूदसंगदा वि मं पच्चालिङ्ग इदोगदाहिं शाहावाहाहिं। अज्जप्पहुइ दूरपरिवट्टिणी दे भविस्सं। (१)

काश्यपः।

संकल्पितं प्रथममेव मया तवार्थे
वसन्ततिलका भर्त्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेयम्
दोनों के विषय में अस्यामहं त्वयि च सम्प्रति वीतचिन्तः ॥१३॥

इतः पन्थानं प्रतिपद्यस्व।

शकुन्तला। सख्यौ प्रति। हला एसा दुवेणं वो हत्थे णीक्खेवो। (२)

उभे। अअं जणो कस्स हत्थे समप्पिदो। वाष्पं विहरतः। (३)

काश्यपः। अनसूये अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्त्तव्या शकुन्तला।

सर्व्वे। परिक्रामन्ति।

शकुन्तला। ताद एसा उड़अपज्जन्तचारिणी गब्भमन्थरा-

(१) वनज्योत्स्ने चूतसङ्गतापि मां प्रत्यालिङ्ग इतोगतैः शाखाबाहुभिः। अद्य प्रभृति दूरपरिवर्त्तिनी ते भविष्यामि।

(२) हला एषा द्वयोर्युवयोः हस्ते निक्षेपः।

(३) अयं जनः कस्य हस्ते समर्पितः।

मअवह्न जदा अणवप्पसवा होइ तदा मे कं वि पिअणिवेदइत्तअं विसज्जइस्ससि। (१)

काश्यपः। वत्से नेदं विस्मरिष्यामः।

शकुन्तला। गतिभङ्गं रूपयित्वा। को णु क्खु एसो णिवसणे मे सज्जइ। परावर्त्तते। (२)

काश्यपः। वत्से!

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्द्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥१४॥

शकुन्तला। वच्छ किं सहवासपरिच्चाइणिं मं अणुसरसि! अचिरप्पसूदाए जणणीए विणा विवड्ढिदो एव्व। दाणिं वि मए विरहिदं तुमं तादो चिन्तइस्सदि णिवत्तेहि दाव। रुदती प्रस्थिता। (३)

काश्यपः।

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम्।

(१) तात एषा उटजपर्य्यन्तचारिणी गर्भमन्थरा मृगवधूः यदा अनघप्रसवा भवति तदा मे किमपि प्रियनिवेदयितारं विसर्जयिष्यसि।

(२) को नु खलु एष निवसने मे सज्जति।

(३) वत्स किं सहवासपरित्यागिनीं मामनुसरसि। अचिरप्रसूतया जनन्या विना विवर्द्धित एव। इदानीमपि मया विरहितं त्वाम् तातश्चिन्तयिष्यति। निवर्त्ततां तावत्

अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥१५॥

शार्ङ्गरवः। भगवन् उदकान्तं (*) स्निग्धो जनोऽनुगन्तव्य इति श्रूयते तदिदं सरस्तीरम् अत्र सन्दिश्य प्रतिगन्तुम् अर्हसि।

काश्यपः। तेन हि इमां क्षीरवृक्षच्छायामाश्रयामः।

सर्व्वे। परिक्रम्य स्थिताः।

काश्यपः। आत्मगतम्। किं न खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम्। चिन्तयति।

शकुन्तला। जनान्तिकम्। हला पेक्ख णलिणीपत्तन्तरिअं वि सहअरं अदेक्खन्ती आदुरा चक्कवाई आरडइ। दुक्करं अहं करेमि। (१)

अनसूया। सहि मा एव्वं मन्तिअ।
एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं।
गरुअं वि विरहदुक्खं आसाबन्धो सहावेइ॥ (२)॥१६॥

काश्यपः। शार्ङ्गरव इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।

* आोदकान्तं इति पाठे उदकान्तात् आ इति विग्रहे अव्ययीभावः।

(१) हला प्रेक्षस्व नलिनीपत्रान्तरितमपि सहचरम् अपश्यन्ती आतुरा चक्रवाकी आरटति। दुष्करम् अहं करोमि।

(२) सखि अलमेवं मन्त्रयित्वा।
एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।
गुरु अपि विरहदुःखमाशाबन्धः साहयति॥

शार्ङ्गरवः। आज्ञापयतु भगवान्।

काश्यपः।

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनस्-
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्व्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं न खलु तद्वाच्यं बधूबन्धुभिः॥१७॥

शार्ङ्गरवः। गृहीतः सन्देशः।

काश्यपः। वत्से त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तो लौकिकज्ञा वयम्।

शार्ङ्गरवः। न खलु धीमतां कश्चिदविषयो नाम।

काश्यपः। सा त्वमितः पतिकुलं प्राप्य

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥१८॥

कथं वा गौतमी मन्यते।

गौतमी। एत्तिओ बहूजनस्स उवदेसो। जादे एदं क्खु सव्वं ओधारेहि। (१)

काश्यपः। वत्से परिष्वजस्व मां सखीजनञ्च।

शकुन्तला। तात इदो एव्व किं पिअंवदामिस्सा सहीओ णिवत्तिस्सन्ति। (२)

(१) एतावान् बधूजनस्य उपदेशः। जाते एतत् खलु सर्व्वं अवधारय।

(२) तात इत एव किं प्रियंवदामिश्राः सख्यः निवर्त्तिष्यन्ते।

काश्यपः। वत्से इमे अपि प्रदेये न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

शकुन्तला। पितरमाश्लिष्य। कहं दाणिं तादस्स अङ्कादो परिव्भट्टा मलयतरुन्मूलिदा (*) चन्दणलदा विश्र देसान्तरे जीविदं धारइस्सं। (१)

काश्यपः। वत्से किमेवं कातरासि।

अभिजनवतो भर्त्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥१८॥

शकुन्तला। पितुः पादयोः पतति।

काश्यपः। यदिच्छामि ते तदस्तु।

शकुन्तला। सख्यावुपेत्य। हला दुवे वि मं समं एव्व परिस्सजह। (२)

सख्यौ। तथा कृत्वा। सहि जइ णाम सो राश्रा पच्चहिस्साणमन्थरो होइ तदो से इमं अत्तणामहेअङ्किअं अङ्गुलीअअं दंसेसु। (३)

* मलअतटीन्मूलिदा इति पाठान्तरम्।

(१) कथमिदानीं तातस्य अङ्कात् परिभ्रष्टा मलयतरून्मूलिता चन्दनलता इव देशान्तरे जीवितं धारयिष्यामि।

(२) हला द्वे अपि मां सममेव परिष्वजेथाम्।

(३) सखि यदिनाम स राजा प्रत्यभिज्ञानमन्थरो भवति; ततः अस्मै इदम् आत्मनामधेयाङ्कितमङ्गुलीयकं दर्शय।

शकुन्तला । इमिणा संदेसेण वो आकम्पिअ म्हि । (१)

सख्यौ । मा भाआहि । सिणिहो पावसङ्की । (२)

शार्ङ्गरवः । युगान्तरमारूढः सविता त्वरतां भवती ।

शकुन्तला । आश्रमाभिमुखी स्थित्वा । ताद कदा णु भूओ तवोवणं पेक्खिस्सं । (३)

काश्यपः । श्रूयताम्

D

> भूत्वा चिराय चतुरन्तमहीसपत्नी
> दौष्यन्तिमप्रतिरथं तनयं निविश्य ।
> भर्त्रा तदर्पितकुटुम्बभरेण सार्द्धं
> शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥२०॥

One of four. वसन्ततिलका

गौतमी । जादे परिहीअइ गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो एसा एव्वं मन्तइस्सदि णिवत्तदु भवं । (४)

काश्यपः । वत्से उपरुध्यते तपोऽनुष्ठानम् ।

शकुन्तला । भूयः पितरमाश्लिष्य । तवच्चरणपीड़िअं तादशरीरं । ता मा अतिमेत्तं मम किदे उक्कण्ठिदं । (५)

(१) अनेन सन्देशेन युवयोराकम्पितास्मि ।

(२) मा भैषीः स्नेहः पापशङ्की ।

(३) तात कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

(४) जाते परिहीयते गमनवेला । निवर्त्तय पितरं । अथवा चिरेणापि पुनरेषा एवं मन्त्रयिष्यते । निवर्त्ततां भवान् ।

(५) तपश्चरणपीड़ितं तातशरीरम् । तदलम् अतिमात्रं मम कृते उत्कण्ठा ।

काश्यपः। सनिश्वासम्।

आर्या शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्व्वम्।
उटजद्वारि विरूढ़ं नीवारवलिं विलोकयतः ॥२१॥

गच्छ शिवास्ते पन्थानः सन्तु।

निष्क्रान्ता शकुन्तला सहयायिनश्च।

सख्यौ। शकुन्तलां विलोक्य। हद्धी हद्धी अन्तरिहिआ सउन्तला वणराईए। (१)

काश्यपः। सनिश्वासम्। अनसूये गतवती वां सहधर्म्मचारिणी। निगृह्य शोकमनुगच्छतं माम्*। प्रस्थितः।

उभे। ताद सउन्तलाविरहिअं सूणं विअ तवोवणं पविसामो। (२)

काश्यपः। स्नेहप्रवृत्तिरेवंदर्शिनी। सविमर्शं परिक्रम्य।
हन्त भोः शकुन्तलां विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः
अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥२२॥

निष्क्रान्ताः सर्व्वे।

इन्द्रवज्रा

चतुर्थोऽङ्कः।

---

* The dual number is more proper; for Kanwa asks both of them to follow him.

(१) हा धिक् हा धिक् अन्तर्हिता शकुन्तला वनराज्या।

(२) तात शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः।

पञ्चमोऽङ्कः ।

ततः प्रविशत्यासनस्थो राजा विदूषकश्च ।

विदूषकः । कर्णं दत्त्वा । भो वअस्स संगीदसालन्तरे अवहाणं देहि । कलविसुद्धाए गीदीए सरसंजोओ सुणीअदि । जानामि तत्तहोदी हंसवदिआ वस्सपरिचअं करेदि त्ति । (१)

राजा । तूष्णीं भव यावदाकर्णयामि ।

आकाशे गीयते ।

अहिणअमहुलोलुवो तुमं तह परिचुम्बिअ चूअमञ्जरिं ।
कमलवसइमेत्तणिव्वुओ महुअर विसुमरिओ सि णं कहं ॥(२)॥ १॥

राजा । अहो रागपरिवाहिणी गीतिः ।

विदूषकः । किं दाव गीदीए अवगदो अक्खरत्थो । (३)

राजा । स्मितं कृत्वा । सकृत्कृतप्रणयोऽयं जनः । तदस्या देवीं वसुमतीमन्तरेण महदुपालम्भनं गतोऽस्मि । सखे माठव्य मद्वचनादुच्यतां हंसपदिका निपुणमुपालब्धोऽस्मीति ।

विदूषकः । जं भवं आणवेदि । उत्थाय । भो वअस्स

(१) भो वयस्य सङ्गीतशालान्तरे अवधानं देहि । कलविशुद्धायाः गीतेः स्वरसंयोगो श्रूयते । जाने तत्रभवती हंसपदिका वर्णपरिचयं करोति इति ।

(२) अभिनवमधुलोलुप त्वं तथा परिचुम्ब्य चूतमञ्जरीम् । कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽसि एनां कथम् ।

(३) किं तावद् गीतेरवगतः अक्षरार्थः ।

गहीदस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताड़ीअमाणस्स अच्छराए वीदरामस्स विअ णत्थि दाणिं मे मोक्खो। (१)

राजा। गच्छ नागरिकवृत्त्या संज्ञापयैनाम्।

विदूषकः। का गई। निष्क्रान्तः। (२)

राजा। आत्मगतम्। किं नु खलु गीतमाकर्ण्य इष्टजन-विरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्य्युत्सुकीभवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्व्वं
भावस्थिराणि जननान्तरसौहृदानि ॥२॥

पर्य्याकुलस्तिष्ठति।

ततः प्रविशति कञ्चुकी।

कञ्चुकी। अहो नु खलु ईदृशीमवस्थां प्रतिपन्नोऽस्मि।

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्था ॥३॥

भोः कामं धर्म्मकार्य्यमनतिपात्यं देवस्य। तथापि इदानीम् एव धर्म्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्या-

(१) यद्भवानाज्ञापयति। भो वयस्य गृहीतस्य तया परकीयैः हस्तैः शिखण्डके ताड्यमानस्य अप्सरोभिः वीतरागस्य इव नास्ति इदानीं मे मोक्षः।

(२) का गतिः।

गमनमस्मै नोत्सहे निवेदयितुम्। अथवा अविश्रमो लोकतन्त्राधिकारः।

भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म्म एषः॥४॥

यावत् नियोगमनुतिष्ठामि। परिक्रम्यावलोक्य च। एष देवः

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा
निषेवते श्रान्तमना विविक्तम्।
यूथानि सञ्चार्य्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः॥५॥

उपगम्य। जयतु देवः। एते खलु हिमवतो गिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः। श्रुत्वा देवः प्रमाणम्।

राजा। सादरम्। किं काश्यपसन्देशहारिणः।

कञ्चुकी। अथकिम्।

राजा। तेन हि मद्वचनात् विज्ञाप्यतामुपाध्यायः सोमरातः अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमपि अत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि।

कञ्चुकी। यथाज्ञापयति देवः। निष्क्रान्तः।

राजा। उत्थाय। वेत्रवति अग्निशरणमार्गमादेशय।

प्रतीहारी। इदो इदो देवो। (१)

(१) इत इतो देवः।

राजा। परिक्रामति। अधिकारखेदं निरूप्य। सर्व्वः प्रार्थितम् अर्थमधिगम्य सुखी सम्पद्यते जन्तुः राज्ञां तु चरितार्थता दुःखोत्तरैव।

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव।
नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम्॥६॥

नेपथ्ये

वैतालिकौ। विजयतां देवः।

प्रथमः।

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्॥७॥

द्वितीयः।

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्॥८॥

राजा। एते क्लान्तमनसः पुनर्नवीकृताः स्मः।

परिक्रामति।

प्रतीहारी। अहिणअसम्मज्जणसस्सिरीओ सण्णिहिअ-होमधेणू अग्गिसरणालिन्दो। आरोहदु देओ। (१)

राजा। आरुह्य परिजनांसावलम्बी तिष्ठन्। वेत्रवति किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः।

किं तावद्व्रतिनामुपोढ़तपसां विघ्नैस्तपो दूषितं
धर्म्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्।
आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधाम्
इत्यारूढ़बहुप्रतर्कमपरिच्छेदाकुलं मे मनः॥ ९॥

प्रतीहारी। सुचरिअणन्दिणो इसीओ देअं सभाजइदुं आअद त्ति तक्केमि। (२)

ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः पुरश्चैषां कञ्चुकी पुरोहितश्च।

कञ्चुकी। इत इतो भवन्तः।

शार्ङ्गरवः। शारद्वत

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव॥१०॥

शारद्वतः। जाने भवान् पुरप्रवेशादित्यम्भूतः संवृत्तः।

(१) अभिनवसम्मार्ज्जनसश्रीकः सन्निहितहोमधेनुरग्निशरणालिन्दः। आरोहतु देवः।

(२) सुचरितनन्दिनः ऋषयः देवं सभाजयितुमागता इति तर्कयामि।

आर्या
मालोपमा

अहमपि

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥११॥

शकुन्तला। निमित्तं सूचयित्वा। अम्महे किं मे वामेअरं णाअणं विप्फुरइ। (१)

गौतमी। जादे पड़िहदं अमङ्गलं। सुहाइं दे भत्तुकुलदेवदाओ वितरन्तु। परिक्रामति। (२)

पुरोहितः। राजानं निर्दिश्य। भोस्तपस्विनः असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति। पश्यतैनम्।

शार्ङ्गरवः। भो महाब्राह्मण काममेतदभिनन्दनीयम् तथापि वयमत्र मध्यस्थाः। कुतः

वंशस्थम्

भवन्ति नम्रास्तरवः फलागमैर्
नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥* १२॥

* This sloka too occurs in the Nitisataka of Bhartrihari ; it is read there as follows :—

भवन्ति नम्रास्तरवः फलोद्गमै
नवाम्बुभिर्भूमिविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥

(१) अम्महे किं मे वामेतरन्नयनं विस्फुरति।
(२) जाते प्रतिहतममङ्गलं। सुखानि ते भर्तृकुलदेवता वितरन्तु।

प्रतीहारी। देअ पसस्समुहवस्सा दीसन्ति। जानामि वीसद्धकज्जाओ इसीओ। (१)

राजा। शकुन्तलां दृष्ट्वा। अथात्रभवती

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या। उपमा
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्॥ १३॥ आर्या

प्रतीहारी। देअ कुदूहलगब्भो पहिओ ण मे तक्को पसरइ। दंसणीआ उण से आकिदी लक्खीअइ। (२)

राजा। भवतु। अनिर्वर्णनीयं परकलत्रम्।

शकुन्तला। हस्तमुरसि कृत्वा। आत्मगतम्। हिअअ किं एव्वं वेवसि। अज्जउत्तस्स भावं ओहारिअ धीरं दाव होहि। (३)

पुरोहितः। पुरोगत्वा। एते विधिवदर्च्चितास्तपस्विनः। कश्चिदेषामुपाध्यायसन्देशः। तं देवः श्रोतुमर्हति।

राजा। अवहितोऽस्मि।

ऋषयः। हस्तमुद्यम्य। विजयस्व राजन्।

राजा। सर्व्वानभिवादये।

ऋषयः। इष्टेन युज्यस्व।

राजा। अपि निर्व्विघ्नतपसो मुनयः।

ऋषयः। कुतो धर्म्मक्रियाविघ्नः सतां रक्षितरि त्वयि। अनुष्टुप्
तमस्तपति घर्म्मांशौ कथमाविर्भविष्यति॥ १४॥ दृष्टान्त

(१) देव प्रसन्नमुखवर्णा दृश्यन्ते। जाने विसब्धकार्य्याः ऋषयः।

(२) देव कुतूहलगर्भः प्रहितो न मे तर्कः प्रसरति। दर्शनीया पुनः अस्या आकृतिर्लक्ष्यते।

(३) हृदय किमेवं वेपसे। आर्य्यपुत्रस्य भावं अवधार्य्य धीरं तावद्भव।

राजा। अर्थवान् खलु मे राजशब्दः। अथ भगवान् लोकानुग्रहाय कुशली काश्यपः।

ऋषयः। स्वाधीनकुशलाः सिद्धिमन्तः। स भवन्तम् अनामयप्रश्नपूर्व्वकमिदमाह।

राजा। किमाज्ञापयति भगवान्।

शार्ङ्गरवः। यन्मिथःसमयादिमां मदीयां दुहितरं भवान् उपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः

वंशस्थ

त्वमर्हतां प्राग्रसरः* स्मृतोऽसि नः
शकुन्तला मूर्त्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥ १५॥

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सहधर्म्मचरणायेति।

गौतमी। अज्ज किं वि वत्तुकामम्हि ण मे वअणावसरो अत्थि। कहं त्ति।

आर्या

णावेक्खिओ गुरुअणो इमाए ण तुए पुच्छिओ वन्धू।
एक्कक्कमेव्वं चरिए भणामि किं एक्कमेक्कस्स ॥ (१)॥ १६॥

शकुन्तला। आत्मगतम्। किं णु क्खु अज्जउत्तो भणइ। (४)

* प्राग्रहरः। इति विद्यासागरधृतः पाठः। बहुपुस्तकसम्मतः पाठस्तु मूले निवेशितः।

(१) आर्य्ये किमपि वक्तुकामास्मि न मे वचनावसरोऽस्ति। कथमिति—
नापेक्षितो गुरुजनोऽनया न त्वया पृष्टो बन्धुः।
एकैकमेवं चरिते भणामि किमेकमेकस्य ॥ १६॥

(२) किं नु खलु आर्य्यपुत्रो भणति।

राजा। किमिदमुपन्यस्तम्।

शकुन्तला। आत्मगतम्। पावश्रो क्खुवश्रणोवस्सासो। (१)

शार्ङ्गरव। कथमिदं नाम। भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः।

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्त्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते
तदप्रियापि प्रमदा स्वबन्धुभिः ॥१७॥

राजा। किं चात्रभवती मया परिणीतपूर्व्वा।

शकुन्तला। सविषादम् आत्मगतम्। हिश्रश्र संपदं दे आशङ्का (*)। (२)

शार्ङ्गरवः। किं कृतकार्य्यद्वेषाद् धर्म्मं प्रति विमुखतोचिता राज्ञः।

राजा। कुतोऽयमसत्कल्पनाप्रश्नः।

शार्ङ्गरवः। मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्य्यमत्तेषु।

राजा। विशेषेणाधिक्षिप्तोऽस्मि।

गौतमी। जादे मुहुत्तश्रं मा लज्जसु। श्रवणइस्सं दाव दे श्रोउण्ठणं तदो तुमं भत्ता श्रहिजाणिस्सदि। (३) यथोक्तं करोति।

* संपडिश्रा दाणिं दे आसङ्का इति विद्यासागरधरणाः।

(१) पावकः खलु वचनोपन्यासः।

(२) हृदय साम्प्रतं ते आशङ्का।

(३) जाते मुहूर्त्तं मा लज्जस्व! अपनेष्यामि तावत्ते अवगुण्ठनं ततस्त्वां भर्त्ता अभिज्ञास्यति।

राजा। शकुन्तलां निर्वर्ण्य। आत्मगतम्।

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेति व्यवस्यन्।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
नच खलु परिभोक्तुं नापि शक्नोमि हातुम्॥१८॥

विचारयन् स्थितः।

प्रतीहारी। अहो धम्मावेक्खिदा भट्टुणो। एरिसं णाम सुहोवणअं रूवं देक्खिअ को अस्सो विचारेदि। (१)

शार्ङ्गरवः। भो राजन् किमिति जोषमास्यते।

राजा। भोस्तपोधनाः चिन्तयन्नपि न खलु स्वीकरणम् अत्रभवत्याः स्मरामि। तत् कथमिमाम् अभिव्यक्तसत्त्वलक्षणाम् प्रति आत्मानं क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये।

शकुन्तला। अपवार्य्य। अज्जउत्तस्स परिणए एव्व संदेहो। कुदो दाणिं मे दूराहिरोहिणी आसा। (२)

शार्ङ्गरवः। मा तावत्।

कृताभिमर्षामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन॥२०॥

शारद्वतः। शार्ङ्गरव विरम त्वमिदानीम्। शकुन्तले

(१) अहो धर्म्मापेक्षिता भर्त्तुः। ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति।

(२) आर्य्यपुत्रस्य परिणये एव सन्देहः। कुतः इदानीं मे दूराधिरोहिणी आशा।

वक्तव्यमुक्तमस्माभिः । सोऽयमत्रभवानेवमाह । दीयतामस्मै प्रत्ययप्रतिवचनम् ।

शकुन्तला । अपवार्य । इमम् अवत्थन्तरं गदे तारिसे अणुराए किं वा सुमराविदेण । अत्ता दाणिं मे सोअणीओ त्ति ववसिदं एदं । प्रकाशम् । अज्जउत्त । अर्द्धोक्ते । संसइए परिणए ण एसो समुदाआरो । पोरव जुत्तं णाम दे तह पुरा अस्समपदे सहावुत्ताणहिअअं इमं जणं समअपूव्वं पआरिअ एरिसेहिं अक्खरेहिं पच्चाक्खादुं । (१)

राजा । शान्तं पापम् ।

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम् ।
कूलङ्कषेव सिन्धुः प्रसन्नमम्भस्तटतरुञ्च ॥२१॥

शकुन्तला । होउ । जइ परमत्थदो परपरिग्गहसङ्किणा तुए एव्वं पउत्तं ता अहिसाणेण तुह आसङ्कं अवणइस्सं । (२)

राजा । उदारः कल्पः ।

शकुन्तला । मुद्रास्थानं परामृश्य । हद्धी हद्धी अङ्गुलीअअसुण्णा मे अङ्गुली । सविषादं गौतमीमवेक्षते । (३)

(१) इदम् अवस्थान्तरं गते तादृशे अनुरागे किंवा स्मारितेन । आत्मा इदानीं मे शोचनीय इति व्यवसितमेतत् । आर्य्यपुत्र ; संशयिते परिणये न एष समुदाचारः । पौरव युक्तं नाम ते तथा पुराश्रमपदे स्वभावोत्तानहृदयम् इमं जनं समयपूर्व्वं प्रतार्य्य ईदृशैः अक्षरैः प्रत्याख्यातुम् ।

(२) भवतु यदि परमार्थतः परपरिग्रहशङ्किना त्वया एवं प्रवृत्तं तदभिज्ञानेन तवाशङ्कामपनेष्यामि ।

(३) हा धिक् हा धिक् अङ्गुलीयकशून्या मे अङ्गुली ।

गौतमी। णूणं दे सक्कावआरब्भन्तरे सचीतित्थसलिलं वन्दमाणाए पब्भट्ठं अङ्गुलीअअं। (१)

राजा। सस्मितम्। इदं तत् प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते।

शकुन्तला। एत्थ दाव विहिणा दंसिअं पहुत्तणं। अवरं दे कहिस्सं। (२)

राजा। श्रोतव्यमिदानीं संवृत्तम्।

शकुन्तला। णं एक्कस्सिं दिअहे णोमालिआमण्डवे णलिणीपत्तभाअणगअं उदअं तुह हत्थे सण्णिहिअं आसि। (३)

राजा। शृणुमस्तावत्।

शकुन्तला। तक्खणं सो मे पुत्तकिअओ दीहापङ्गो णाम मअपोदओ उवट्ठिओ। तुए अअं दाव पढमं पिअउ त्ति अणुअम्पिणा उवच्छन्दिओ उअएण। ण उण दे अपरिचआदो हत्थब्भासं उवगओ। पच्छा तस्सिं एव्व मए गहिए सलिले णेण किदो पणओ। तदा तुमं इत्थं पहसिओ सि सव्वो सगन्धेसु विस्ससइ दुवे वि एत्थ आरण्णआ त्ति। (४)

(१) नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टम् अङ्गुलीयकम्

(२) अत्र तावद् विधिना दर्शितं प्रभुत्वं। अपरं ते कथयिष्यामि।

(३) ननु एकस्मिन् दिवसे नवमल्लिकामण्डपे नलिनीपत्रभाजनगतम् उदकम् तव हस्ते सन्निहितमासीत्।

(४) तत्क्षणं स मे पुत्रकृतकः दीर्घापाङ्गोनाम मृगपोतक उपस्थितः। त्वया अयं तावत् प्रथमं पिबतु इति उपच्छन्दितः उदकेन। न पुनस्ते अपरिचयात् हस्ताभ्यासमुपगतः। पश्चात्तस्मिन्नेव मया गृहीते सलिले अनेन कृतः प्रणयः। तदा त्वमित्थं प्रहसितः असि सर्वः सगन्धेषु विश्वसितिः। द्वौ अपि अत्र आरण्यकाविति।

राजा। एवमादिभिरात्मकार्य्यनिर्वर्त्तिनीनामनृतमयवाङ्मधुभिराकृष्यन्ते विषयिणः।

गौतमी। महाभाअ ण अरिहसि एव्वं मन्तिउं। तवोवणसंवड्ढिओ अणभिण्णो अअं जणो कइतवस्स। (१)

राजा। तापसवृद्धे

स्त्रीणामशिक्षितपटुत्वममानुषीषु वसन्ततिलका
संदृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजातम् अर्थान्तरन्यासः
अन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥२२॥

शकुन्तला। सरोषम्। अणज्ज अत्तणो हिअआणुमाणेण पेक्खसि। को दाणिं अण्णो धम्मकञ्चुअप्पवेसिनो तिणच्छण्णकूवोवमस्स तव अणुकिदिं पड़िवज्जिस्सइ। (२)

राजा। आत्मगतम्। सन्दिग्धबुद्धिं मां कुर्वन् अकैतव इवास्याः कोपो लक्ष्यते। तथाह्यनया (*)

मय्येव विस्मरणदारुणचित्तवृत्तौ वसन्ततिलका
वृत्तं रहः प्रणयमप्रतिपद्यमाने।

* तथाह्यनयेत्येतदनन्तरं कुत्रचित् पुस्तके, न तिर्य्यगवलोकितं स्फुरति लोचनं केवलं वचो न परुषाक्षरं न च पदेषु संगच्छते। हिमार्त्त इव वेपते मधुर एष बिम्बाधरः स्वभावविनते भ्रुवौ युगपदेव भेदं गते ॥ किञ्च। अयमंशो दृश्यते।

(१) महाभाग नार्हसि एवं मन्त्रयितुं तपोवनसंवर्द्धितः अनभिज्ञः अयं जनः कैतवस्य।

(२) अनार्य्य आत्मनः हृदयानुमानेन प्रेक्षसे। क इदानीं अन्यः धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तव अनुकृतिं प्रतिपत्स्यते।

भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
उत्प्रेक्षा
भग्नं शरासनमिवातिरुषा स्मरस्य ॥२३॥

पुरोहितः। भद्रे प्रथितं दुष्यन्तस्य चरितं तथापीदं न लक्षये।

शकुन्तला। सुट्ठु, दाव अत्त सच्छन्दचारिणी किदम्हि जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुणो हिअअट्ठिअविसस्स हत्थब्भासं उवगआ। पटान्तेन मुखमावृत्य रोदिति। (१)

शार्ङ्गरवः। इत्थमात्मकृतं परिहतं चापलं दहति।

अनुष्टुप् अतः परीक्ष्य कर्त्तव्यं विशेषात् सङ्गतं रहः। वैधर्म्येण
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥२४॥ अर्थान्तरन्यासः

राजा। अयि भोः किमत्रभवतीप्रत्ययादेव अस्मान् संयुतदोषाक्षरैः क्षिणुथ।

शार्ङ्गरवः। सासूयम्। श्रुतं भवद्भिरधरोत्तरम्।

आजन्मनः शाठ्यमशिक्षितो यस्
इन्द्र
उपजाति तस्याप्रमाणं वचनं जनस्य।
अप्रस्तुतप्रशंसा
परातिसन्धानमधीयते यैर्
विद्येति ते सन्तु किलाप्तवाचः ॥२५॥

राजा। भोः सत्यवादिन् अभ्युपगतं तावदस्माभिरेवम्। किं पुनरिमामतिसन्धाय लभ्यते।

शार्ङ्गरवः। विनिपातः।

(१) सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि याहं अस्य पुरुवंशप्रत्ययेन मुखमधोः हृदयस्थितविषस्य हस्ताभ्यासम् उपगता।

राजा। विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयम् एतत्।

शारद्वतः। शार्ङ्गरव किमुत्तरेण। अनुष्ठितो गुरोः सन्देशः प्रतिनिवर्त्तामहे वयम्। राजानं प्रति।

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी॥*२६॥ अनुष्टुप् अर्थान्तरन्यासः

गौतमि गच्छाग्रतः। प्रस्थिताः।

शकुन्तला। कहं इमिणा किदवेण विप्पलद्ध म्हि तुम्हे वि मं परिच्चअह। अनुप्रतिष्ठते। (१)

गौतमी। स्थित्वा। वच्छ सङ्गरव अणुगच्छइ इअं क्खु णो करुणपरिदेविणी सउन्तला। पच्चादेसपरुसे भत्तुणि किं वा मे पुत्तिआ करउ। (२)

शार्ङ्गरवः। सरोषं सन्निवृत्य। किं पुरोभागे स्वातन्त्र्यम् अवलम्बसे।

शकुन्तला। भीता वेपते।

शार्ङ्गरवः। शकुन्तले

यदि यथा वदति क्षितिपस्तथा द्रुतविलंबितम्
त्वमसि किं पितुरुत्कुलया त्वया।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम्॥२७॥

तिष्ठ साधयामो वयम्।

* उपपन्नैर्हि दारेषु इति पाठान्तरम्।

(१) कथमनेन कितवेन विप्रलब्धास्मि। यूयमपि मां परित्यजथ।

(२) वत्स शार्ङ्गरव अनुगच्छति इयं खलु नः करुणपरिदेविनी शकुन्तला। प्रत्यादेशपरुषे भर्त्तरि किंवा मे पुत्रिका करोतु।

राजा। भोस्तपस्विन् किमत्रभवतीं विप्रलभसे।

आर्या कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।

प्रतिवस्तूपमा वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः॥२८॥

शार्ङ्गरव। यदा तु पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवान् तदा कथमधर्मभीरुः।

राजा। भवन्तमेवात्र गुरुलाघवं पृच्छामि।

अनुष्टुप मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।

दारत्यागो भवास्याहो परस्त्रीस्पर्शपांशुलः॥२९॥

पुरोहितः। विचार्य्य। यदि तावदेवं क्रियताम्

राजा। अनुशास्तु मां भवान्।

पुरोहितः। अत्रभवती तावत् आ प्रसवादस्मद्गृहे तिष्ठतु। कुत इदमुच्यत इति चेत् त्वं साधुभिरुद्दिष्टः प्रथममेव चक्रवर्त्तिनं पुत्त्रं जनयिष्यसीति। स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि विपर्य्यये तु पितुरस्याः समीपनयनमवस्थितमेव।

राजा। यथा गुरुभ्यो रोचते।

पुरोहितः। वत्से अनुगच्छ माम्।

शकुन्तला। भअवदि वसुहे देहि मे विअरं। (१)

रुदती प्रस्थिता। निष्क्रान्ता सह पुरोधसा तपस्विभिश्च।

राजा। शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति।

नेपथ्ये

आश्चर्य्यम् आश्चर्य्यम्।

(१) भगवति वसुधे देहि मे विवरम्।

राजा । आकर्ण्य । किं नु खलु स्यात् ।

प्रविश्य

पुरोहितः । सविस्मयम् । देव अद्भुतं खलु संवृत्तम् ।

राजा किमिव ।

पुरोहितः । देव परावृत्तेषु कण्वशिष्येषु

सा निन्दन्ती स्वानि भाग्यानि बाला

बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता ।

राजा । किञ्च । मालिनी

पुरोहितः । स्त्रीसंस्थानं चाप्सरस्तीर्थमारात् समन्वय

उत्क्षिप्यैनां ज्योतिरेकं जगाम ॥ ३० ॥

सर्व्वे । विस्मयं रूपयन्ति ।

राजा । भगवन् प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव किं वृथा तर्केणान्विष्यते । विश्राम्यतु भवान् ।

पुरोहितः । विजयस्व । निष्क्रान्तः ।

राजा । वेत्रवति पर्य्याकुलोऽस्मि शयनभूमिमार्गमादेशय ।

प्रतिहारी । इदो इदो देवो । प्रस्थिता । (१)

राजा ।

उत्प्रेक्षा कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् । आर्या

बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम् * ॥ ३१ ॥

निष्क्रान्ताः सर्व्वे ।

पञ्चमोऽङ्कः ।

---

* मे इति विद्यासागरचरणाः ।   (१) इत इतो देवः ।

षष्ठोऽङ्कः।

ततः प्रविशति नागरिकः श्यालः पश्चात् बद्धपुरुषमादाय रक्षिणौ च।

रक्षिणौ। ताड़यित्वा। अले कुम्भिलआ कहेहि कहिं तुए एशे मणिवन्धणुक्किसणामहेए लाअकीए अङ्गुलीअए शमाशादिए। (१)

पुरुषः। भीतिनाटितकेन। पशीदन्ते भावमिश्शे। अहके ण एरिशकम्मकाली। (२)

प्रथमः। किं क्खु शोहणे वम्हणेत्ति कलिअ रस्ना पड़िग्गहे दिस्से। (३)

पुरुषः। शुणह दाणिं। अहके शक्कावदालव्भन्तलवाशी धीवले। (४)

द्वितीयः। पाडच्चला किं अह्मेहिं जादो पुच्छिदा। (५)

श्यालः। सूअअ कहेउ सव्वं अणुक्कमेण। मा णं अन्तरा पड़िवन्धह। (६)

(१) अरे कुम्भिलक कथय कुत्र त्वया एतत् मणिबन्धनोत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम्।

(२) प्रसीदन्तु भावमिश्राः। अहं न ईदृशकर्मकारी।

(३) किं खलु शोभनः ब्राह्मणः इति कृत्वा राज्ञा प्रतिग्रहः दत्तः।

(४) शृणुत इदानीं। अहं शक्रावताराभ्यन्तरवासी धीवरः।

(५) पाटच्चर किमस्माभिः जातिः पृष्टा।

(६) सूचक कथयतु सर्व्वमनुक्रमेण, मा एनमन्तरा प्रतिवध्नान।

उभौ। जं आवुत्ते आणवेइ। कहेहि। (१)

पुरुषः। अहके जालुग्गालादीहिं मच्छबन्धणोवाएहिं कुडुम्बभलणं कलेमि। (२)

श्यालः। विहस्य। विसुद्धो दाणिं आजीवो। (३)

पुरुषः। भट्टा।

शहजे किल जे विणिन्दिए णहु शे कम्म विवज्जणीअए। वियोगिनी
पशुमालणकम्मदालुणे अणुकम्पामिदुए वि शोत्तिए॥ (४) ॥१॥

श्यालः। तदो तदो। (५)

पुरुषः। एक्कश्शिं दिअशे खण्डशो लोहिअमच्छे मए कप्पिदे जाव तश्श उदलब्भन्तले एदं लदणभाशुलं अङ्गुलीअअं देक्खिअं। पच्छा अहके शे विक्कआअ दंशअन्ते गहिदे भावमिश्शेहिं। मालेह वा मुञ्चेह वा अअं शे आअमवुत्तन्ते। (६)

(१) यदावुत्त: आज्ञापयति। कथय।

(२) अहं जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।

(३) विशुद्ध इदानीमाजीवः।

(४) भर्त्तः

सहजं किल यद्विनिन्दितं नहि तत्कर्म्मविवर्ज्जनीयम्।
पशुमारणकर्म्मदारुणोऽनुकम्पामृदुरपि श्रोत्रियः॥ १॥

(५) ततस्ततः।

(६) एकस्मिन् दिवसे खण्डशः रोहितमत्स्यः मया कल्पितो यावत् तस्य उदराभ्यन्तरे एतत् रत्नभासुरम् अङ्गुलीयकं दृष्टम्। पश्चादहमस्य विक्रयाय दर्शयन् गृहीतो भावमिश्रैः। मारयत वा मुञ्चत वा अयमस्य आगमवृत्तान्तः।

श्यालः। जाणुअ विस्सगन्धी गोहादी मच्छबन्धो एव्व णिस्संसअं। अङ्गुलीअअदंसणं से विमरिसिदव्वं। राअउलं एव्व गच्छामो। (१)

रक्खिणौ। तह। (२)

श्यालः। गच्छ अले गण्ठिभेदअ। (३)

सर्व्वे। परिक्रामन्ति।

श्यालः। सूअअ इमं पुरदुआरे अप्पमत्ता पाड़वालेह जाव इमं अङ्गुलीअअं जहागमणं भट्टिणो णिवेदिअ तदो सासणं पड़िच्छिअ णिक्कमामि। (४)

उभौ। पविशउ आवुत्ते शामिप्पशादश्श। (५)

निष्क्रान्तः श्यालः।

प्रथमः। जाणुअ चिलाअइ क्खु आवुत्ते। (६)

द्वितीयः। णं अवशलोवशप्पणीआ लाआणो। (७)

(१) जानुक विस्रगन्धी गोधादी मत्स्यबन्ध एव निःसंशयम् अङ्गुलीयकदर्शनं अस्य विमृष्टव्यम्। राजकुलमेव गच्छामः।

(२) तथा।

(३) गच्छ अरे ग्रन्थिभेदक।

(४) सूचक इमं पुरद्वारे अप्रमत्तौ प्रतिपालयतं यावदिदम् अङ्गुलीयकं यथागमनं भर्त्रे निवेद्य ततः शासनं प्रतीष्य निष्क्रामामि।

(५) प्रविशतु आवुत्तः स्वामिप्रासादम्।

(६) जानुक चिरयति खलु आवुत्तः।

(७) ननु अवसरोपसर्पणीया राजानः।

प्रथमः। जाणुअ फुलन्ति मे हत्था इमश्श वहश्श शुमणो पिणद्धुं। पुरुषं निर्दिशति। (१)

पुरुषः। ण अलुहदि भावे अआलणे मालणे भविउं। (२)

द्वितीयः। विलोक्य। एशे अम्हाणं शामी पत्तहत्थे लाअशाशणं पडिच्छिअ इदोमुहे देक्खीअदि। गिद्धवली हुविश्शशि शुणो मुहं वा देक्खिश्शशि। (३)

प्रविश्य

श्यालः। सूअअ मुञ्चीअउ एसो जालोवजीवी। उववण्णो किल से अङ्गुलीअअस्स आअमो। (४)

सूचकः। जह आवुत्ते भणादि। (५)

द्वितीयः। एशे जमशदणं पविशिअ पडिणिउत्ते। (६)

पुरुषं परिमुक्तबन्धनं करोति।

पुरुषः। श्यालं प्रणम्य। भट्टा अह केलिशे मे आजीवे। (७)

श्यालः। एसो भट्टिणा अङ्गुलीअअमुल्लसम्मिदो पसादो वि दाविदो। पुरुषायार्थं प्रयच्छति। (८)

(१) जानुक स्फुरत: मे हस्तौ अस्य बधस्य सुमनस: पिनद्धुम्।

(२) नार्हति भाव: अकारणं मारणो भवितुम्।

(३) एष: अस्माकं स्वामी पत्रहस्त: राजशासनं प्रतीष्य इतोमुखे दृश्यते। गृध्रबलिर्भविष्यसि शुनो मुखं वा द्रक्ष्यसि।

(४) सूचक मुच्यतामेष जालोपजीवी। उपपन्न: किलास्य अङ्गुलीयकस्यागम:।

(५) यथावुत्तो भणति।

(६) एष यमसदनं प्रविश्य प्रतिनिवृत्त:।

(७) भर्त्त: अथ कीदृश: मे आजीव:।

(८) एष भर्त्रा अङ्गुलीयकमूल्यसम्मित: प्रसादोऽपिदापित:।

पुरुषः। सप्रणामं परिगृह्य। भट्टकेण अणुग्गहिद म्हि। (१)

सूचकः। एशे णाम अणुग्गहे जे शूलादो अवदालिअ हत्थिक्कन्धे पड़िट्टाविदे। (२)

जानुकः। आवुत्त पलिदोशे कहेइ तेण अङ्गुलीअएण भट्टिणो शम्मदेण होदव्वं। (३)

श्यालः। ण तस्सिं महारुहं रदणं भट्टिणो बहुमदं त्ति तक्केमि तस्स दंसणेण भट्टिणो अभिमदो जणो सुमराविदो। मुहुत्तअं पकिदिगम्भीरो वि पस्सुअणअणो आसि। (४)

सूचकः। शेविदं णाम आवुत्तेण। (५)

जानुकः। णं भणाहि इमश्श कए मच्छिआभत्तुणो त्ति। (६)

पुरुषमसूयया पश्यति।

पुरुषः। भट्टालके इदो अद्धं तुम्हाणं शुमणोमुल्लं होउ। (७)

जानुकः। एत्तके जुज्जइ। (८)

(१) भर्त्रानुगृहीतोऽस्मि।

(२) एष नाम अनुग्रहः यत् शूलादवतार्य्य हस्तिस्कन्धे प्रतिष्ठापितः।

(३) आवुत्तः परितोषः कथयति तेन अङ्गुलीयकेन भर्त्तुः सम्मतेन भवितव्यम्।

(४) न तस्मिन् महार्हं रत्नं भर्त्तुर्बहुमतमिति तर्कयामि। तस्य दर्शनेन भर्त्तुरभिमतो जनः स्मारितः। मुहूर्त्तम् प्रकृतिगम्भीरोऽपि प्रस्नुतनयनः आसीत्।

(५) सेवितं नामावुत्तेन।

(६) ननु भण अस्य कृते मात्स्यिकभर्त्तुरिति।

(७) भट्टारकाः इतोऽर्द्धं युष्माकं सुमनोमूल्यं भवतु।

(८) एतद् युज्यते।

श्यालः। धीवर महत्तरो तुमं पिअवअस्सओ दाणिं मे संवुत्तो। कादम्बरीसक्खिअं अम्हाणं पढ़मसोहिदं इच्छीअइ ता सोण्डिआपणं एव्व गच्छामो। (१)

निष्क्रान्ताः सर्वे।

प्रवेशकः।

ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः।

सानुमती। णिव्वत्तिअं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसण्णिज्झं जाव साहुजणस्स अभिसेअकालो त्ति। संपदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सं। मेणआसम्बन्धेण सरीरभूदा दाणिं मे सउन्तला। ताए अ दुहिदुणिमित्तं आदिट्ठपुव्व म्हि। समन्तादवलोक्य। किं णु क्खु उदुस्सवे वि णिरुस्सवारम्भं विअ एदं राअउलं दीसइ। अत्थि मे विहवो पणिहाणेण सव्वं परिसादुं। किन्तु सहीए आअरो मए माणइदव्वो। होउ इमाणं एव्व उज्जाणपालिआणं तिरक्खरणीपड़िच्छसा पस्सपरिवत्तिणी हुविअ उवलम्भिस्सं। नाट्येनावतीर्य स्थिता। (२)

(१) धीवर महत्तरस्त्वं प्रियवयस्यः इदानीं मे संवृत्तः। कादम्बरीसाक्षिकम् अस्माकं प्रथमसौहृदमिष्यते तत् शौण्डिकापणमेव गच्छामः।

(२) निर्व्वर्त्तितं मया पर्य्यायनिर्व्वर्त्तनीयं अप्सरस्तीर्थसान्निध्यं यावत् साधुजनस्य अभिषेककाल इति। साम्प्रतं अस्य राजर्षेः उदन्तं प्रत्यक्षीकरिष्यामि। मेनकासम्बन्धेन शरीरभूता इदानीं मे शकुन्तला। तया च दुहितृनिमित्तं आदिष्टपूर्व्वास्मि। किं नु खलु ऋतूत्सवेऽपि निरुत्सवारम्भमिव एतत् राजकुलं दृश्यते।

ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी अपरा च पृष्ठतस्तस्याः।

प्रथमा।

आर्यावृत्तम् आतम्बहरिअपण्डुर वसन्तमासस्स जीअसब्बस्स।

दिट्ठो सि चूअकोरअ उदुमङ्गल तुमं पसाएमि॥ (१)॥ २॥

द्वितीया। परहुए किं एआइणी मन्तेसि। (२)

प्रथमा। महुअरिए चूअकलिअं देक्खिअ उम्मत्तिआ परहुदिआ होइ। (३)

द्वितीया। सहर्षं त्वरयोपगम्य। कहं उपट्ठिओ महुमासो। (४)

प्रथमा। महुअरिए तव दाणिं कालो एसो मदविब्भमगीदाणं। (५)

द्वितीया। सहि अवलम्बसु मं जाव अग्गपाअट्ठिआ हुविअ चूअकलिअं गेण्हिअ कामदेअच्चणं करेमि। (६)

अस्ति मे विभवः प्रणिधानेन सर्व्वं परिज्ञातुं किन्तु सख्याः आदरो मया मानयितव्यः। भवतु अनयोरेव उद्यानपालिकयोः तिरस्करणीप्रतिच्छन्ना पार्श्वपरिवर्त्तिनी भूत्वा उपलप्स्ये।

(१) आताम्रहरितपाण्डुर वसन्तमासस्य जीवसर्व्वस्व। दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि॥ २॥

(२) परभृतिके किमेकाकिनी मन्त्रयसे।

(३) मधुकरिके, चूतकलिकां दृष्ट्वा उन्मत्तिका परभृतिका भवति।

(४) कथमुपस्थितो मधुमासः।

(५) मधुकरिके तवेदानीं कालः एष मदविभ्रमगीतानां।

(६) सखि अवलम्बस्व मां यावदग्रपादस्थिता भूत्वा चूतकलिकां गृहीत्वा कामदेवार्च्चनं करोमि।

प्रथमा। जइ मम वि क्खु अद्धं अच्चणफलस्स। (१)

द्वितोया। अकहिए वि एदं संवज्जइ जदो एक्कं एव्व णो जीविदं दुहाट्ठिअं सरीरं। सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णती। अए अप्पडिवुद्धो वि चूअप्पसवो एत्थ बन्धणभङ्गसुरही होइ।

कपोतहस्तकं कृत्वा।

तुमं सि मए चुअङ्कुर दिस्सो कामस्स गहिअधणुअस्स। आर्या
पहिअजणजुवइलक्खो पञ्चव्भहिओ सरो होहि॥ (२)॥३॥

चूताङ्कुरं चिपति।

प्रविश्यापटीचेपेण कुपितः।

कञ्चुकी। मा तावदनात्मज्ञे देवेन प्रतिषिद्धे वसन्तोत्सवे त्वमाम्रकलिकाभङ्गं किमारभसे।

उभे। भीते। पसीददु अज्जो। अगहीअत्था वअं। (३)

कञ्चुकी। न किल श्रुतं युवाभ्यां यत् वासन्तिकैस्तरुभिः अपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्रिभिश्च। तथाहि

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरुवकं तत् कोरकावस्थया। शार्दूलविक्रीडितम्

विशेषोक्ति

(१) यदि ममापि खलु अर्द्धं अर्च्चनफलस्य।

(२) अकथितमपि एतत् सम्पद्यते। यत एकमेवावयोः जीवितं द्विधा स्थितं शरीरं। अये अप्रतिबुद्धोऽपि चूतप्रसवः अत्र बन्धनभङ्गसुरभिर्भवति।

त्वमसि मया चूताङ्कुर दत्तः कामाय गृहीतधन्वने।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरीभव॥३॥

(३) पसीदतु आर्यः अगृहीतार्थे आवाम्।

कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम् ॥ ४ ॥

उभे। णत्थि संदेहो। महाप्पहाओ राएसी। (१)

प्रथमा। अज्ज कइ दिअहाइं अम्हाणं मित्तावसुणा रट्टिएण भट्टिणीपाअमूलं पेसिदाणं। एत्थ अ णो पमदवणस्स पालणकम्म समप्पिअं। ता आअन्तुअदाए अस्सुअपुव्वो अम्हेहिं एसो वुत्तन्तो। (२)

कञ्चुकी। भवतु न पुनरेवं प्रवर्त्तितव्यम्।

उभे। अज्ज कोऊहलं णो। जइ इमिणा जणेण सोदव्वं कहेहि अअं किं णिमित्तं भट्टिणा वसन्तुस्सवो पड़िसिद्धो। (३)

सानुमती। उस्सवप्पिआ क्खु मणुस्सा। गरुणा कारणेण होदव्वं। (४)

कञ्चुकी। बहुलीभूतमेतत् किं न कथ्यते। किमत्रभवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेशकौलीनम्।

उभे। सुदं रट्टिअमुहादो जाव अङ्गुलीअअदंसणं। (५)

(१) नास्ति सन्देहः। महाप्रभावः राजर्षिः।

(२) आर्य्य कति दिवसानि आवयोः मित्रावसुना राष्ट्रियेण भर्त्तुः पादमूलं प्रेषितयोः। अत्रचावयोः प्रमदवनस्य पालनकर्म्म समर्पितम्। तदागन्तुकतया अश्रुतपूर्व्वः आवाभ्याम् एष वृत्तान्तः।

(३) आर्य्य कौतूहलं नौ। यदि अनेन श्रोतव्यं कथय अयं किं निमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः।

(४) उत्सवप्रियाः खलु मनुष्याः। गुरुणा कारणेन भवितव्यम्।

(५) श्रुतं राष्ट्रियमुखात् यावदङ्गुलीयकदर्शनम्।

कञ्चुकी। तेन हि अल्पं कथयितव्यम्। यदैव खलु स्वाङ्गुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढ़पूर्व्वा मया तत्र-भवती रहसि शकुन्तला मोहात् प्रत्यादिष्टेति तदाप्रभृत्येव पश्चात्तापमुपगतो देवः। तथाहि

उपमा

शार्दूलविक्रीडितम्

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीड़ाविलक्षश्चिरम् ॥५॥

सानुमती। पिअं मे। (१)

कञ्चुकी। अस्मात् प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः।

उभे। जुज्जइ। (२)

नेपथ्ये

एदु एदु भवं। (३)

कञ्चुकी। कर्णं दत्त्वा। अये इत एवाभिवर्त्तते देवः। स्वकर्म्मानुष्ठीयताम्।

उभे। तह। निष्क्रान्ते। (४)

ततः प्रविशति पश्चात्तापसदृशवेशो राजा विदूषकः प्रतीहारी च।

कञ्चुकी। राजानमवलोक्य। अहो सर्व्वास्ववस्थासु रमणीयत्वम् आकृतिविशेषाणाम्। एवमुत्सुकोऽपि प्रियदर्शनो देवः। तथाहि

(१) प्रियं मे।

(२) युज्यते।

(३) एतु एतु भवान्।

(४) तथा।

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
विभ्रत् काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।
चिन्ताजागरणप्रताम्रनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते॥६॥

सानुमती। राजानं दृष्ट्वा। ठाणे क्खु पच्चादेसविमाणिदा वि इमस्स कए सउन्तला किलम्मइ। (१)

राजा। ध्यानमन्दं परिक्रम्य।

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्॥७॥

सानुमती। णं एरिसाणि तवस्सिणीए भाअहेआणि। (२)

विदूषकः। अपवार्य्य। लङ्घिदो एसो भूओ वि सउन्तला-वाहिणा ण आणे कहं चिकिच्छिदव्वो होहिइ त्ति। (३)

कञ्चुकी। उपगम्य। जयतु देवः। महाराज प्रत्यवेक्षिताः प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि महाराजः।

राजा। वेत्रवति मद्वचनादमात्यमार्य्यपिशुनं ब्रूहि चिरप्रबोधान्न सम्भावितमस्माभिरद्य धर्म्मासनमध्यासितुम् यत् प्रत्यवेक्षितं पौरकार्य्यमार्य्येण तत् पत्रमारोप्य दीयतामिति।

प्रतीहारी। जं देओ आणवेइ। निष्क्रान्ता। (४)

(१) स्थाने खलु प्रत्यादेशविमानितापि अस्य कृते शकुन्तला क्लाम्यति।

(२) ननु ईदृशानि तपस्विन्याः भागधेयानि।

(३) लङ्घितः एषः भूयोऽपि शकुन्तलाव्याधिना न जाने कथं चिकित्सितव्यो भवति इति।

(४) यद्देवः आज्ञापयति।

राजा। वातायन त्वमपि स्वं नियोगमशून्यं कुरु।

कञ्चुकी। यदाज्ञापयति देवः। निष्क्रान्तः।

विदूषकः। किदं भअदा णिम्मच्छिअं। संपदं सिसिरात-वच्छेअरमणीए इमस्सिं पमदवणुद्देशे अत्ताअं रमइस्ससि। (१)

राजा। वयस्य रन्ध्रोपनिपातिनोऽनर्था इति यदुच्यते तत् अव्यभिचारि वचः।

मुनिसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं तमसा मनः।
मनसिजेन सखे प्रहरिष्यता धनुषि चूतशरश्च निवेशितः॥* ८॥

विदूषकः। चिट्ठ दाव जाव इमिणा दण्डकाट्ठेण कन्दप्पवाणं णासइस्सं। दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति। (२)

राजा। सस्मितम्। भवतु दृष्टं ब्रह्मवर्चसम्। सखे क्कोपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विलोभयामि।

विदूषकः। णं आसण्णपरिआरिआ चदुरिआ भअदा संदिट्टा माहवीमण्डवे इमं वेलं अतिवाहिस्सं तहिं अ मे चित्तफलअगदं सहत्थलिहिदं तत्तहोदोए सउन्तलाए पड़िकिदिं आणेहि त्ति। (३)

* Babu Bhuban Chandra Basak's edition reads another Sloka here :—

उपहितस्मृतिरङ्गुलिमुद्रया प्रियतमामनिमित्तनिराकृताम्।
अनुशयादनुरोदिमि चोत्सुकः सुरभिमासमुखं समुपेति च॥

(१) कृतं भवता निर्मक्षिकं। साम्प्रतं शिशिरातपच्छेदरमणीये अस्मिन् प्रमदवनोद्देशे आत्मानं रमयिष्यसि।

(२) तिष्ट तावद् यावदनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयिष्यामि।

(३) ननु आसन्नपरिचारिका चतुरिका भवता सन्दिष्टा माधवीमण्डपे इमां

राजा। ईदृशं हृदयविनोदस्थानं तत् तमेव मार्गम् आदेशय।

विदूषकः। इदो इदो भवं। (१)

उभौ। परिक्रामतः।

सानुमती। अनुगच्छति।

विदूषकः। एसो मणिसिलापट्टअसणाहो माहवीमण्डवो उवहाररमणिज्जदाए णिस्संसअं साअदेण विअ णो पड़िच्छइ। ता पविसिअ णिसीददु भवं। (२)

उभौ। प्रवेशं कृत्वा उपविष्टौ।

सानुमती। लदासंस्सिदा देक्खिस्सं सहीए पड़िकिदिं। तदो से भत्तुणो बहुमुहं अणुराअं णिवेदइस्सं। (३)
तथा कृत्वा स्थिता।

राजा। सखे सर्व्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तं कथितवानस्मि भवते च। स भवान् प्रत्यादेशवेलायां मत्समीपगतो नासीत्। पूर्व्वमपि न त्वया कदाचित् सङ्कीर्त्तितं तत्रभवत्या नाम। कच्चिदहमिव विस्मृतवानसि त्वम्।

वेलाम् अतिवाहयिष्यामि। तस्मिन् च मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति।

(१) इत इतो भवान्।

(२) एष मणिशिलापट्टसनाथः माधवीमण्डप उपहाररमणीयतया निःसंशयं स्वागतेन इव नः प्रतीच्छति। तत् प्रविश्य निषीदतु भवान्।

(३) लतासंश्रिता द्रक्ष्यामि सख्याः प्रतिकृतिम्। ततः अस्य भर्त्तुर्बहुमुखमनुरागं निवेदयिष्यामि।

विदूषकः। ण विसुमरामि। किन्तु सव्वं कहिअ अवसाणे उण तुए परिहासविअप्पओ एसो ण भूदत्थो त्ति आचक्खिदं। मए वि मिप्पिण्डबुद्धिणा तह एव्व गहीदं। अहवा भविदव्वदा बलवदी। (१)

सानुमती। एव्वं णदं। (२)

राजा। ध्यात्वा। सखे त्रायस्व माम्।

विदूषकः। भोः किं एदं अणुववण्णं क्खु, एरिसं तुइ। कदावि सप्पुरिसा सोअवत्तव्वा ण होन्ति। णं पवादे वि णिक्कम्पा गिरीओ। (३)

राजा। वयस्य निराकरणविक्लवायाः प्रियायाः समवस्थाम् अनुस्मृत्य बलवदशरणोऽस्मि। सा हि।

इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता
मुहुस्तिष्ठत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टिं वाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत् सविषमिव शल्यं दहति माम्॥ ८॥

शिखरिणी

उपमा

(१) न विस्मरामि किन्तु सर्व्वं कथयित्वा अवसाने पुनस्त्वया परिहासविजल्प एष न भूतार्थ इति आख्यातम्। मयापि मृत्पिण्डबुद्धिना तथा एव गृहीतम्। अथवा भवितव्यता बलवती।

(२) एवमेतत्।

(३) भोः किमेतत्। अनुपपन्नं खलु ईदृशं त्वयि। कदापि सत्पुरुषाः शोकवास्तव्याः (शोकवक्तव्याः) न भवन्ति ननु प्रवातेऽपि निष्कम्पा गिरयः।

सानुमती। अम्महे एरिसी सकज्जपरदा इमस्स सन्तावेण अहं रमामि। (१)

विदूषकः। भो अत्थि मे तक्को केण तत्तहोदी आआसचारिणा णोद त्ति। (२)

राजा। कः पतिदेवतामन्यः परामष्टुंमुत्सहेत। मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि। तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते।

सानुमती। सम्मोहोक्खु विम्हअणिज्जो ण पड़िवोहो। (३)

विदूषकः। जइ एव्वं अत्थि क्खु समागमो कालेण तत्तहोदीए। (४)

राजा। कथमिव।

विदूषकः। ण क्खु मादापिदरा भत्तुविओअदुक्खिदं दुहिदरं देक्खिदुं पारेन्ति। (५)

राजा। वयस्य

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम्। *

* क्लिष्टं नु तावत् फलमेव पुण्यैः इति वा क्वचित् पाठः।

(१) अम्महे ईदृशी स्वकार्य्यपरता अस्य सन्तापेन अहं रमे।

(२) भो अस्ति मे तर्कः केन तत्रभवती आकाशचारिणा नीतेति।

(३) सम्मोहः खलु विस्मयनीयः न प्रतिबोधः।

(४) यदि एवं अस्ति खलु समागमः कालेन तत्रभवत्याः।

(५) न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं पारयतः।

असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः ॥* १०

विदूषकः। मा एव्वं। णं अङ्गुलीअअं एव्व णिदंसणं। अवस्सं भाई अचिन्तणिज्जसमाअमो होइ। (१)

राजा। अङ्गुलीयकं विलोक्य। अयि इदं तावदसुलभस्थान-भ्रंशि शोचनीयम्।

तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन।
अरुणनखमनोरमासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु ॥ ११ ॥

सानुमती। जइ अस्सहत्थगअं होउ सच्चं एव्व सोअणिज्जं होउ। (२)

विदूषकः। भो इअं णाममुद्दा केण उद्देसेण तत्तहोईए हत्थब्भासं पाविआ। (३)

सानुमती। मम वि कोऊहलेण आआरिओ एसो। (४)

राजा। श्रूयताम्। स्वनगराय प्रस्थितं मां प्रिया सवाष्प-माह कियच्चिरेणार्य्यपुत्त्रः प्रतिपत्तिं दास्यतीति।

विदूषकः। तदो तदो। (५)

* मनोरथानामतटप्रपातः इति पाठान्तरम्।

(१) मैवं ननु अङ्गुलीयकमेव निदर्शनम्। अवश्यम्भावी अचिन्तनीयसमागमो भवति।

(२) यदि अन्यहस्तगतं भवेत् सत्यमेव शोचनीयं भवेत्।

(३) भो इयं नाममुद्रा केन उद्देशेन तत्रभवत्याः हस्ताभ्यासं प्रापिता।

(४) ममापि कौतूहलेन आकारित एषः।

(५) ततस्ततः।

राजा। पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता।

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम्।
तावत् प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति ॥

तच्च दारुणात्मना मया मोहान्नानुष्ठितम्।

सानुमती। रमणीओ क्खु अवही विहिणा विसंवाइदो। (१)

विदूषकः। कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भन्तले आसि। (२)

राजा। शचीतीर्थं वन्दमानयाः सख्यास्ते हस्ताद् गङ्गास्रोतसि परिभ्रष्टम्।

विदूषकः। जुज्जइ। (३)

सानुमती। अदो एव्व तवस्सिणीए सउन्तलाए अधम्मभीरुणो इमस्स राएसिणो परिणए सन्देहो आसि। अथवा एरिसो अणुराओ अहिण्णाणं अवेक्खइ कहंविअ एदं। (४)

राजा। उपालप्स्ये तावदिदमङ्गुलीयकम्।

(१) रमणीयः खलु अवधिर्विधिना विसंवादितः।

(२) कथं धीवरकल्पितस्य रोहितमत्स्यस्य उदराभ्यन्तरे आसीत्।

(३) युज्यते।

(४) अतएव तपस्विन्याः शकुन्तलायाः अधर्मभीरोरस्य राजर्षेः परिणये सन्देह आसीत्। अथवा ईदृशः अनुरागः अभिज्ञानम् अपेक्षते कथमिव एतत्।

विदूषकः। आत्मगतम्। गहीओ णेण पन्था उम्मत्तआणं। (१)

राजा।

कथं नु तं बन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि।

अथवा। अचेतनं नाम गुणं न लक्षयेत्
मयैव कस्मादवधीरिता प्रिया॥ १२॥

विदूषकः। आत्मगतम्। कहं बुहुक्खाए खाइदव्वो म्हि। (२)

राजा। अकारणपरित्यक्तो अनुशयतप्तहृदयस्तावद् अनुकम्प्यतामयं जनः पुनर्दर्शनेन।

प्रविश्यापटीक्षेपेण चित्रफलकहस्ता

चतुरिका। इअं चित्तगआ भट्टिणी। (३)

चित्रफलकं दर्शयति।

विदूषकः। साहु वअस्स। महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो खलइ विअ मे दिट्ठि णिसुसअपदेसेसु। (४)

सानुमती। अम्मो एसा राएसिणो णिउणदा। जाणे सही अग्गदो मे वट्टइ त्ति। (५)

(१) गृहीतोऽनेन पन्थाः उन्मत्तानाम्।

(२) कथं बुभुक्षया खादितव्योऽस्मि।

(३) इयं चित्रगता भर्त्री।

(४) साधु वयस्य मधुरावस्थानदर्शनीयो भावानुप्रवेशः। स्खलति इव मे दृष्टिर्निम्नोन्नतप्रदेशेषु।

(५) अम्मो एषा राजर्षेर्निपुणता। जाने सखी अग्रतो मे वर्तते इति।

राजा।

यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा।
तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम्॥

सानुमती। सरिसं एदं पच्छादावगरुणो सिणेहस्स अण वलेवस्स अ। (१)

विदूषकः। भो दाणिं तिस्सि तत्तहोदीओ दीसन्ति। सव्वाओ अ दंसणीआओ। कदमा एत्थ तत्तहोदी सउन्तला। (२)

सानुमती। अणहिण्णो क्खु एरिसस्स रूपस्स मोहदिट्ठि अअं जणो। (३)

राजा। त्वं तावत् कतमां तर्कयसि।

विदूषकः। तक्केमि जा एसा सिढ़िलकेसबन्धुव्वन्तकुसुमेण केसन्तेण उव्भिस्सस्सेअविन्दुणा वअणेण विसेसदो ओसरिआहिं वाहाहिं अवसेअसिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे इसि परिस्सन्ता विअ आलिहिआ एसा सउन्तला इदराओ सहीओ त्ति। (४)

(१) सदृशमेतत् पश्चात्तापगुरोः स्नेहस्य अनवलेपस्य च।

(२) भो इदानीं तिस्रः तत्रभवत्यः दृश्यन्ते। सर्वाश्च दर्शनीयाः। कतमात्र तत्रभवती शकुन्तला।

(३) अनभिज्ञः खलु ईदृशस्य रूपस्य मोघदृष्टिरयं जनः।

(४) तर्कयामि या एषा शिथिलकेशबन्धोद्वान्तकुसुमेन केशान्तेन उद्भिन्नस्वेदविन्दुना वदनेन विशेषतः अपसृताभ्यां बाहुभ्यां अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत् परिश्रान्ता इव आलिखिता एषा शकुन्तला इतरे सख्यौ इति।

राजा। निपुणो भवान्। अस्त्यत्र मे भावचिह्नम्।

स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः।
अश्रु च कपोलपतितं दृश्यमिदं वर्त्तिकोच्छ्वासात्॥

चतुरिके अर्द्धलिखितमेतद्विनोदस्थानम्। गच्छ वर्त्तिकां तावदानय।

चतुरिका। अज्ज माठव्य अवलम्बसु चित्तफलअं जाव आअच्छामि। (१)

राजा। अहमेव एतदवलम्बे। यथोक्तं करोति।

निष्क्रान्ता चेटी।

राजा। साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहुमन्यमानः।
स्रोतोवहां पथि निकाममजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम्॥

विदूषकः। आत्मगतम्। एसो अत्तभवं णदिं अदिक्कमिअ मअतिण्हिआए संकन्तो प्रकाशम्। भो अवरं किं एत्थ लिहिदव्वं। (२)

सानुमती। जो जो पदेसो सहीए मे अहिरूवो तं तं आलिहिदुकामो होउ। (३)

राजा। श्रूयताम्।

(१) आर्य माठव्य अवलम्बस्व चित्रफलकं यावदागच्छामि।

(२) एषोऽत्रभवान् नदीमतिक्रम्य मृगतृष्णिकायां संक्रान्तः। भो अपरं किमत्र लिखितव्यम्।

(३) यो यः प्रदेशः सख्या मे अभिरूपस्तं तमालिखितुकामो भवेत्।

कार्य्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषस्सहरिणा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य च तरोर्निर्म्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥

विदूषकः । आत्मगतम् । जह अहं देक्खामि पूरिअव्वं णेण चित्तफलअं लम्बकुच्चाणं तावसाणं कअम्बेहिं । (१)

राजा । वयस्य अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतम् अत्र विस्मृतमस्माभिः ।

विदूषकः । किंविअ । (२)

सानुमती । वणवासस्स सोउमारस्स अ जं सरिसंहोहिद ।(३)

राजा ।

कृतं न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बिकेशरम् ।
न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे ॥

विदूषकः । भो किस् तत्तहोई रत्तकुअलअपल्लअसोहिणा अग्गहत्थेण मुहं ओवारिअ चइअचइआ विअ ठिआ । सावधानं निरूप्य । आः एसो दासीए पुत्तो कुसुमरसपाडच्चरो तत्तहोदिए वअणं अहिलङ्घइ महुअरो । (४)

(१) यथा अहं पश्यामि पूरयितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः ।

(२) किमिव ।

(३) वनवासस्य सौकुमारस्य च यत् सदृशं भवति ।

(४) भोः किन्नु तत्रभवती रक्तकुवलयपल्लवशोभिना अग्रहस्तेन मुखमावृत्य

राजा। ननु कार्य्यतामेष धृष्टः।

विदूषकः। भवं एव्व अविणीआणं सासिआ इमस्स वारणे पहविस्सइ। (१)

राजा। युज्यते। अयि भोः कुसुमलताप्रियातिथे किमत्र परिपतनखेदमनुभवसि।

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति ॥ १९॥

सानुमती। अज्ज अहिजाअं क्खु एसो वारिओ। (२)

विदूषकः। पड़िसिद्धा वि वामा एसा जादी। (३)

राजा। एवं भो न मे शासने तिष्ठसि। श्रूयतां तर्हि सम्प्रति

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियायास्
त्वां कारयामि कमलोदरबन्धनस्थम् ॥२०॥

विदूषकः। एव्वं तिक्खणदण्डस्स किं ण भाइस्सइ।

चकितचकिता इव स्थिता। आः एष दास्याः पुत्रः कुसुमरसपाटच्चरः तत्रभवत्याः वदनमभिलङ्घते मधुकरः।

(१) भवानेव अविनीतानां शासिता अस्य वारणे प्रभविष्यति।

(२) आर्य्य अभिजातं खलु एष वारितः।

(३) प्रतिषिद्धापि वामा एषा जातिः।

प्रहस्य आत्मगतम् । एसो दाव उम्मत्तो । अहं वि एदस्स संगेण परिसवस्सो विश्र संवुत्तो । प्रकाशम् । भो चित्तं क्खु एदं । (१)

राजा । कथं चित्रम् ।

सानुमती । अहं वि दाणिं अवगअत्था किं उण जहलिहिदाणुभावो एसो । (२)

राजा । वयस्य किमिदमनुष्ठितं पौरोभाग्यम् ।

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।

स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥२१॥

वाष्पं विहरति ।

सानुमती । पुव्वावरविरोहो अपुव्वो एसो विरहमग्गो । (३)

राजा । वयस्य कथमेवमविश्रान्तं दुःखमनुभवामि ।

प्रजागरात् खिलीभूतस्तस्याः स्वप्ने समागमः ।

वाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥२२॥

सानुमती । सव्वहा पमज्जिश्रं तुए पच्चादेसदुक्खं सउन्तलाए । (४)

प्रविश्य

चतुरिका । जेदु भट्टा । वट्टिआकरण्डअं गेण्हिअ इदोमुहं पत्थिअ म्हि । (५)

(१) एवं तीक्ष्णदण्डात् किं न भेष्यति । एष तावदुन्मत्तः । अहमपि एतस्य सङ्गेन ईदृग्वर्ण इव संवृत्तः । भोः चित्रं खलु एतत् ।

(२) अहमपि इदानीमवगतार्था किं पुनर्यथालिखितानुभावो एषः ।

(३) पूर्व्वापरविरोधी अपूर्व्व एष विरहमार्गः ।

(४) सर्व्वथा प्रमृष्टं त्वया प्रत्यादेशदुःखं शकुन्तलायाः ।

(५) जयतु भर्त्ता । वर्त्तिकाकरण्डकं गृहीत्वा इतोमुखं प्रस्थितास्मि ।

राजा। किञ्च।

चतुरिका। सो मे हत्थादो अन्तरा तरलिआदुदिआए देईए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सबलक्कारं गहिओ। (१)

विदूषकः। दिट्टिआ तुमं मुक्का। (२)

चतुरिका। जाव देईए विड़वलग्गं उत्तरीअं तरलिआ मोचेइ ताव मए णिव्वाहिओ अत्ता। (३)

राजा। वयस्य उपस्थिता देवी बहुमानगर्व्विता च। भवानिमां प्रतिकृतिं रचतु।

विदूषकः। अत्ताणं त्ति भणाहि। चित्रफलकमादाय उत्थाय च। (४) जइ भवं अन्तेउरकालकूड़ाओ मुच्चीअइ तदो मं मेहप्पड़िच्छन्दे पासादे सद्दावेहि। द्रुतपदं निष्क्रान्तः।

सानुमती। अण्णसंकन्तहिअओ वि पटमसंभावणं अविक्खइ। सिढिलसोहओ दाणिं एसो। (५)

(१) स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्या अहमेवार्य्यपुत्रस्य उपनेष्यामि इति सबलात्कारं गृहीतः।

(२) दिष्ट्या त्वं मुक्ता।

(३) यावद् देव्या विटपलग्नं उत्तरीयं तरलिका मोचयति तावन्मया निर्व्वाहित: आत्मा।

(४) आत्मानमिति भण। यदि भवानन्तःपुरकालकूटात् मुच्यते ततो मां मेघप्रतिच्छन्दे प्रासादे शब्दायस्व।

(५) अन्यसंक्रान्तहृदयोऽपि प्रथमसम्भावनामपेक्षते। शिथिलसौहृदः इदानीमेषः।
लगे हुए प्रथमा पूर्वमहिषी तत्संभावना तद्बहुमाने

प्रविश्य पत्रहस्ता

प्रतीहारी। जेदु देओ। (१)

राजा। वेत्रवति न खल्वन्तरा दृष्टा त्वया देवी।

प्रतीहारी। अह इं। पत्थहत्थं मं देक्खिअ पड़िणिउत्ता। (२)

राजा। कार्य्यज्ञा कार्य्योपरोधं मे परिहरति।

प्रतीहारी। देअ अमच्चो विस्सवेद्‌ अत्थजादस्स गणणा-बहुलदाए एव्व एव्व पोरकज्जं अवेक्खिअं तं देओ पत्तारूढ़ पच्चक्खीकरउ त्ति। (३)

राजा। इतः पत्रिकां दर्शय।

प्रतीहारी। उपनयति।

राजा। अनुवाच्य। कथं समुद्रव्यवहारी सार्थवाहो धन-मित्रो नाम नौव्यसने विपन्नः। अनपत्यश्च किल तपस्वी। राजगामी तस्यार्थसञ्चय इत्येतदमात्येन लिखितम्। कष्टं खल्वनपत्यता। वेत्रवति बहुधनत्वात् बहुपत्नीकेन तत्रभवता भवितव्यम्। विचार्य्यतां यदि काचिदापन्नसत्त्वा तस्य भार्य्यासु स्यात्।

प्रतीहारी। देअ दाणिं एव्व सकेदअस्स सेट्ठिणो दुहिआ णिव्वुत्तपुंसवणा जाआ से सुणीअइ। (४)

(१) जयतु देवः।

(२) पत्रहस्तां मां दृष्ट्वा प्रतिनिवृत्ता।

(३) देव अमात्यः विज्ञापयति अर्थजातस्य गणनाबहुलतया एकमेव पौर-कार्य्यमवेक्षितम्। तद्देवः पत्रारूढ़ं प्रत्यक्षीकरोतु इति।

(४) देव इदानीमेव साकेतस्य श्रेष्ठिनः दुहिता निर्वृत्तपुंसवना जाया अस्य श्रूयते।

राजा। ननु गर्भः पित्र्यं रिक्थमर्हति। गच्छ एवम् अमात्यं ब्रूहि।

प्रतीहारी। जं देओ आणवेइ। प्रस्थिता। (१)

राजा। एहि तावत्।

प्रतीहारी। इअ म्हि।

राजा। किमनेन सन्ततिरस्ति नास्तीति।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥ २३॥

प्रतीहारी। एव्वं णाम घोसइदव्वं। निष्क्रम्य पुनः प्रविश्य। काले पवुट्टं विअ अहिणन्दिअं देअस्स सासणं। (३)

राजा। दीर्घमुष्णञ्च निश्वस्य। एवं भोः सन्ततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ति। ममाप्यन्ते पुरुवंशश्रियः एष एव वृत्तान्तः।*

प्रतीहारी। पड़िहअं अमङ्गलं। (४)

राजा। धिङ्मामुपस्थितश्रेयोऽवमानिनम्।

* पुरुवंशश्रीरकाल इवोप्तवीजा भूरिवंहत्ता। इति पाठान्तरं। अत्र पाठे उप्तवीजा भूरित्युपमा न सङ्गच्छते।

(१) यद्देवं आज्ञापयति।

(२) इयमस्मि।

(३) एवं नाम घोषयितव्यम्। काले प्रवृष्टमिव अभिनन्दितं देवस्य शासनम्।

(४) प्रतिहतममङ्गलम्।

सानुमती। असंसग्रं सहिं एव्व हिअए करिअ णिन्दिओ णेण अप्पा। (१)

राजा। संरोपितेऽप्यात्मनि धर्म्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तवीजा ॥२४॥

सानुमती। अपरिच्छिसा दाणिं दे सन्तइ होहिइ। (२)

चतुरिका। (जनान्तिकम्)। अए इमिणा सत्थवाहवुत्तन्तेण दिउणुव्वेओ भट्टा। णं अस्सासिउं मेहपड़िच्छन्दादो अज्जं माठव्वं गेण्हिअ आअच्छेहि। (३)

प्रतीहारी। सुट्ठु भणासि। निष्क्रान्ता। (४)

राजा। अहो दुष्यन्तस्य संशयमारूढ़ाः पिण्डभाजः कुतः
अस्मात् परं वत यथाश्रुति सम्भृतानि
को नः कुले निवपनानि नियच्छतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिवन्ति ॥२५॥

मोहमुपागतः।

(१) असंशयं सखीमिव हृदये कृत्वा निन्दितोऽनेन आत्मा।

(२) अपरिच्छिन्ना इदानीं ते सन्ततिर्भविष्यति।

(३) अयि अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्त्ता। एतमाश्वासयितुं मेघप्रतिच्छन्दादार्य्यमाठव्यं गृहीत्वा आगच्छ।

(४) सुष्ठु भणसि।

चतुरिका। ससम्भ्रमसवलम्बा। समस्ससउ भट्टा। (१)

सानुमती। हद्धी हद्धी सदि क्खु दीवे ववहाणदोसेण एसो अन्धआरदोसं अणुहोइ। अहं दाणिं एव्व णिव्वुअं करेमि। अहवा सुदं मए सउन्तलं समस्सासअन्तीए महेन्द्र-जणणीए मुहादो जस्सभाओस्सुआ देवा एव्व तह अणुचिट्टि-स्सन्ति जह अइरेण धम्मपदिणिं भट्टा अहिणन्दिस्सइ त्ति। ता ण जुत्तं कालं पड़िपालिउं जाव इमिणा वुत्तन्तेण पिअसहिं समस्सासेमि। उद्भ्रान्तकेन निष्क्रान्ता। (२)

नेपथ्ये

अव्वम्हसं। (३)

राजा। प्रत्यागतः कर्णं दत्त्वा। अये माठव्यस्येवार्त्तस्वरः। कः कोऽत्र भोः।

प्रविश्य। ससम्भ्रमम्।

प्रतीहारी। परित्ताअउ देओ संसअगअं वअस्सं। (४)

राजा। केन आत्तगन्धो माणवकः।

आत्तगन्धः अभिभूतः इत्यमरः गर्व क्षुद्रमनुष्यः

(१) समाश्वसितु भर्त्ता।

(२) हा धिक् हा धिक् सति खलु दीपे व्यवधानदोषेण एषः अन्धकारदोषं अनुभवति। अहमिदानीमेव निर्वृत्तं करोमि। अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्याः महेन्द्रजनन्याः मुखात् यज्ञभागोत्सुका देवा एव तथा अनुष्ठास्यन्ति यथा अचिरेण धर्मपत्नीं भर्त्ता अभिनन्दिष्यतीति। तन्न युक्तं कालं प्रतिपालयितुम् यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि।

(३) अब्रह्मण्यम्।

(४) परित्रायतां देवः संशयगतं वयस्यम्। जीवनसंशयमें पड़े हुए

प्रतीहारी। अदिट्ठरूवेण केण वि सत्तेण अदिक्कमिअ मेहपड़िच्छन्दस्स पासादस्स अग्गभूमिं आरोविओ। (१)

राजा। उत्थाय। मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः। अथवा विपरीतमेतादित्यर्थः

Thatmustnot beallowed

उपेन्द्रवज्रा अहन्यहन्यात्मन एव तावत् ज्ञातुं प्रमादस्खलितुं न शक्यम्।
प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः ॥२६॥

अस्तीत्यत्र काकु, नास्तीत्यर्थः

नेपथ्ये

भो वअस्स अविहा अविहा। (१)

राजा। गतिभेदेन परिक्रामन्। सखे न भेतव्यं न भेतव्यम्।

नेपथ्ये

पुनस्तदेव पठित्वा।

कहं ण भाइस्सं। एस मं को वि पच्चवणअसिरोहरं उक्खुविअ तिस्सभङ्गं करइ। (२)

राजा। सदृष्टिक्षेपम्। धनुस्तावत्। आनयेति शेषः।

प्रविश्य शार्ङ्गहस्ता

यवनिका। भट्टा एदं हत्थावावसहिअं सरासणं। (४)

राजा। सशरं धनुरादत्ते।

(१) अदृष्टरूपेण केनापि सत्वेन अतिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्य अग्रभूमिमारोपितः।

(२) भो वयस्य अविहा, अविहा।

(३) कथं न भेष्यामि एष मां कोऽपि प्रत्यवनतशिरोधरं इक्षुमिव त्रिभङ्गं करोति।

पीछे को गर्दन झुकाकर

(४) भर्त्तः इदं हस्तावापसहितं शरासनम्।

नेपथ्ये

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्त्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम् ॥ २७॥

राजा । सरोषम् । कथं मामुद्दिशति । तिष्ठ कुणपाशन त्वमिदानीं न भविष्यसि । शार्ङ्गमारोप्य । वेत्रवति सोपानमार्गमादेशय ।

प्रतीहारो । इदो इदो देओ । (१)

सर्व्वे । सत्वरमुपसर्पन्ति ।

राजा । समन्ताद्विलोक्य । शून्यं खल्विदम् ।

नेपथ्ये

अविहा अविहा । अहं अत्तभवन्तं पेक्खामि तुमं मं ण पेक्खसि । विड़ालग्गहिओ मूसओ विअ णिरासो म्हि जीविए संवुत्तो । (२)

राजा । भोस्तिरस्करणीगर्वित मदीयं शस्त्रं त्वां द्रक्ष्यति । एष तमिषुं सन्दधे

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥ २८॥

शस्त्रञ्च सन्धत्ते ।

(१) इत इतोदेवः ।

(२) अविहा अविहा । अहमत्रभवन्तं प्रेक्षे त्वं मां न प्रेक्षसे । विड़ालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः ।

ततः प्रविशति विदूषकमुत्सृज्य मातलिः ।

मातलिः ।

कृताः शरव्यं हरिणा तवासुराः*
शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥२९॥

राजा । शस्त्रम् उपसंहरन् । अये मातलिः । स्वागतं महेन्द्रसारथे ।

प्रविश्य

विदूषकः । अहं जेण इट्ठिपसुमारं मारिओ सो इमिणा साअदेण अहिणन्दीअदि । (१)

मातलिः । सस्मितम् । आयुष्मन् श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः ।

राजा । अवहितोऽस्मि ।

मातलिः । अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः ।

राजा । अस्ति । श्रुतपूर्व्वं मया नारदात् ।

मातलिः ।

सख्युस्ते स किल शतक्रतोरजय्यस्
तस्य त्वं रणशिरसि स्मृतो निहन्ता ।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्
तन्नैशं तिमिरमपाकरोति चन्द्रः ॥३०॥

(१) अहं येन इष्टिपशुमारं मारितः सोऽनेन स्वागतेन ऽभिनन्द्यते ।

* Pantankar's edition reads शरव्या, but शरव्य is always neuter.

स भवानात्तशस्त्र एव इदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम्।

राजा। अनुगृहीतोऽहमनया मघवतः सम्भावनया। अथ माढव्यं प्रति भवता किमेवं प्रयुक्तम्।

मातलिः। तदपि कथ्यते। किञ्चिन्निमित्तादपि मनःसन्तापादायुष्मान् मया विक्लवो दृष्टः। पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि। कुतः

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः (*) ॥३१॥

राजा। जनान्तिकम्। वयस्य अनतिक्रमणीया दिवस्पतेर् आज्ञा। तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि

त्वन्मतिः केवला तावत् परिपालयतु प्रजाः।
अधिज्यमिदमन्यस्मिन् कर्म्मणि व्यापृतं धनुः ॥३२॥

विदूषकः। जं भवं आणवेइ। निष्क्रान्तः। (१)

मातलिः। आयुष्मान् रथमारोहतु।

राजा। रथारोहणं नाटयति।

निष्क्रान्ताः सर्व्वे।

षष्ठोऽङ्कः।

---

* तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः is the reading of some edition.

(१) यद्भवानाज्ञापयति।

सप्तमोऽङ्कः ।

ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च ।

राजा । मातले अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये ।

मातलिः । सस्मितम् । आयुष्मन् उभयमप्यपरितोषं समर्थये ।

प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानविस्मितो भवतः सोऽपि न सत्क्रियागुणान् (*) ॥ १॥

राजा । मातले मा मैवम् । स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः । मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा ॥ २॥

मातलिः । किमिव नाम आयुष्मान् अमरेश्वरान्नार्हति ।

पश्य

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुनानतपर्वभिः पुरुषकेशरिणश्च पुरा नखैः ॥ ३॥

राजा । अत्र खलु शतक्रतोरेव महिमा स्तुत्यः ॥

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।

* अवदानतोषितः इति क्वचित् पाठः ।

किं वाभविष्यदरुणस्तमसां विभेत्ता
तञ्चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥४॥

मातलिः। सदृशमेवैतत्। लोकमन्तरमतीत्य। आयुष्मन्

इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः।

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु।
विचिन्त्य गीतक्षममर्थजातं (१) दिवौकसस्त्वच्चरितं लिखन्ति ॥५॥

राजा। मातले असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितः स्वर्गमार्गः। कतमस्मिन् मरुतां पथि वर्त्तामहे।

मातलिः।

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्त्तयति च प्रविभक्तरश्मिः।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम् (१) ॥६॥

राजा। मातले अतः खलु सवाह्यान्तःकरणो ममान्तरात्मा प्रसीदति। रथाङ्गमवलोक्य। मेघपदवीमवतीर्णौ स्वः।

मातलिः। कथमवगम्यते।

राजा।

अयमरविवरेभ्यश्चातकैर्निष्पतद्भिर्
हरिभिरचिरभासां तेजसा चानुलिप्तैः।

(१) अर्थवन्तमिति पाठः बहुषु पुस्तकेषु दृश्यते।

(२) तस्य व्यपेतरजसः प्रवहस्य वायोः
मार्गो द्वितीयहरिविक्रमपूत एषः। इति वा पाठः।

गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ॥७॥

मातलिः । क्षणादायुष्मान् स्वाधिकारभूमौ वर्त्तिष्यते ।

राजा । अधोऽवलोक्य । मातले वेगावतरणादाश्चर्य्यदर्शनः संलक्ष्यते मनुष्यलोकः । यथाहि

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।
सन्तानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः (१)
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ॥८॥

मातलिः । साधु दृष्टम् । सबहुमानं विलोक्य । अहो उदाररमणीया पृथिवी ।

राजा । मातले कतमोऽयं पूर्व्वापरसमुद्रावगाढः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते ।

मातलिः । आयुष्मन् एष खलु हेमकूटो नाम किम्पुरुषपर्व्वतस्तपसां सिद्धिक्षेत्रम् । पश्य

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ॥९॥

राजा । तेन हि अनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि ।

मातलिः । प्रथमः कल्पः ।

नाट्येनावतीर्णौ ।

(१) सन्धानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः । इति पाठान्तरम् ।

राजा। सविस्मयम्।

उपोढशब्दा न रथाङ्गनेमयः प्रवर्त्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतया निरुन्धतस्तवावतीर्णोऽपि रथो न लक्ष्यते ॥१०॥

मातलिः। एतावानेव शतक्रतोरायुष्मतश्च विशेषः।

राजा। मातले कतमस्मिन् प्रदेशे मारीचाश्रमः।

मातलिः। हस्तेन दर्शयन्।

वल्मीकार्द्धनिमग्नमूर्त्तिरुरसा सन्दष्टसर्पत्वचा (१)
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीड़ितः।
अंसव्यापि शकुन्तनीड़निचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कविम्बं स्थितः ॥११॥

राजा। नमस्ते कष्टतपसे।

मातलिः। संयतप्रग्रहं रथं कृत्वा। महाराज एतौ अदिति-परिवर्द्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।

राजा। स्वर्गादधिकतरं निर्वृतिस्थानम्। अमृतह्रद-मिव अवगाढ़ोऽस्मि।

मातलिः। रथं स्थापयित्वा। अवतरत्वायुष्मान्।

राजा। अवतीर्य्य। मातले भवान् कथमिदानीम्।

मातलिः। संयन्त्रितो मया रथः। वयमप्यवतरामः। तथा कृत्वा। इत आयुष्मन्। परिक्रम्य। दृश्यन्तामत्रभवता-मृषीणां तपोवनभूमयः।

राजा। ननु विस्मयादवलोकयामि।

(१. उरगत्वग्ब्रह्मसूत्रान्तरः। इति पाठभेदः।

२सम+दश= to adhere। cf. संदष्टवस्त्रेष्वबलानितम्बेषु रघुवंश...
संदष्ट कुसुमशयनानि, अभिज्ञान० ३ अङ्क ८ श्लो०
२ cf. लताप्रतानोद्ग्रथितैः स केशैः। रघुवंश २ सर्ग ८ श्लो०
विशेषोक्तिः — वंशस्थ
धृत-कृतः
उपलक्षित इति शेषः
शार्दूलविक्रीडितम्
वेष्टनेन
उपमा
अवतरति ... अनतरिष्यतीति ... इति शेषः
३ अर्कस्य बिम्बमभिलक्ष्याभ्यर्कबिम्बं। c.f. अभिसायंमाघ ११
अभिवेद्यं। माघ। १६। १

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्म्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी॥१२॥

मातलिः। उत्सर्पिणी खलु महतां प्रार्थना। परिक्रम्य।
आकाशे। अये वृद्धशाकल्य किमनुतिष्ठति भगवान् मारीचः।
[श्रुतिमभिनीय] किं ब्रवीषि दाक्षायण्या पतिव्रताधर्म्ममधिकृत्य
पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति।

राजा। कर्णं दत्वा। अये प्रतिपाल्यावसरः प्रस्तावः।

मातलिः। राजानमवलोक्य। अस्मिन्नशोकवृक्षमूले तावत्
आस्तामायुष्मान् यावत् त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी
भवामि।

राजा। यथा भवान् मन्यते। स्थितः।

मातलिः। आयुष्मन् साधयाम्यहम्। निष्क्रान्तः।

राजा। निमित्तं सूचयित्वा।

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा।
पूर्व्वावधीरितं श्रेयो दुःखं हि परिवर्त्तते॥१३॥

नेपथ्ये

मा क्खु चावलं करेसु। कहं गदो एव्व अत्तणो पइदिं।(१)

राजा। कर्णं दत्वा। अभूमिरियमविनयस्य। को नु
खल्वेष निषिध्यते। शब्दानुसारेणावलोक्य। सविस्मयम्। अये को
नु खल्वयम् अनुबध्यमानस्तपस्विनीभ्याम् अबालसत्त्वो बालः।

(१) मा खलु चापलं कुरु। कथं गत एव आत्मनः प्रकृतिम्।

अर्द्धपीतस्तनं मातुरामर्द्दक्लिष्टकेशरम्।
प्रक्रीड़ितुं सिंहशिशुं बलात्कारेण कर्षति ॥१४॥

ततः प्रविशति यथानिर्द्दिष्टकर्म्मा तपस्विनीभ्यां बालः।

बालः। जिम्भ सिंह दन्ताइं दे गणइस्सं। (१)

प्रथमा। अविणीद किं णो अवच्चणिव्विसेसाणि सत्ताणि विप्पअरेसि। हन्त वड्ढइ दे संरम्भो। ठाणे क्खु इसिजणेण सव्वदमणो त्ति किदणामहेओ सि। (२)

राजा। किं नु खलु बालेऽस्मिन् औरस इव पुत्त्रे स्निह्यति मे मनः। नूनम् अनपत्यता मां वत्सलयति।

द्वितीया। एसा क्खु केसरिणी तुमं लङ्घेदि जइ से पुत्तअं ण मुञ्चेसि। (३)

बालः। सस्मितम्। अम्हहे बलिअं क्खु भीदो म्हि। (४)

अधरं दर्शयति।

राजा।

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥१५॥

(१) जृम्भस्व सिंह दन्तांस्ते गणयिष्यामि।

(२) अविनीत किंनोऽपत्यनिर्व्विशेषाणि सत्वानि विप्रकरोषि। हन्त वर्द्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्व्वदमन इति कृतनामधेयोऽसि।

(३) एषा खलु केशरिणी त्वां लङ्घते यदि अस्याः पुत्रकं न मुञ्चसि।

(४) अम्महे बलीयः खलु भीतोऽस्मि।

प्रथमा। वच्छ एदं बालमइन्दअं मुञ्चसु अवरं दे कीलणअं दाइस्सं। (१)

बाल:। कहिं देसु णं। हस्तं प्रसारयति। (२)

राजा। कथं चक्रवर्त्तिलक्षणमप्यनेन धार्य्यते। तथाह्यस्य

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलि: कर:।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा * भिन्नमिवैकपङ्कजम् ॥१६॥

द्वितीया। सुव्वते ण सक्को एसो वाआमित्तेण विरमाविदुं गच्छसु तुमं ममकेरए उड़ए मक्कण्डेअस्स ईसिकुमारअस्स वस्सचित्तिओ मित्तिआमोरओ चिट्ठइ तं से उवहरसु। (३)

प्रथमा। तह। निष्क्रान्ता। (४)

तापसीं विलोक्य हसति।

राजा। स्पृहयामि खलु दुर्ललितायास्मै।

आलक्ष्यदन्तमुकुलाननिमित्तहासैर्
अव्यक्तवर्णरमणीयवच:प्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥१७॥

तापसी। होउ। ण मं अअं गणेइ। पार्श्वमवलोकयति। (५)

(१) वत्स एतं बालमृगेन्द्रं मुञ्च अपरं ते क्रीड़नकं दास्यामि।

(२) कुत्र देहि तत्।

(३) सुव्रते न शक्य एष वाङ्मात्रेण विरमयितुम्। गच्छ त्वं मदीये उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूर स्तिष्ठति तमस्मै उपहर।

(४) तथा।　　　　　(५) भवतु न मामयं गणयति।

* नवोषया इति न्यायपञ्चाननचरणा:।

ऋो एत्थ इसिकुमाराणं। राजानमवलोक्य। भद्दमुह एहि दाव मोचेसु इमिणा दुम्मोअहत्थग्गहेण डिम्भलीलाए वाहीअमाणं बालमइन्दअं। (१)

राजा। उपगम्य। सस्मितम्। अयि भो महर्षिपुत्र।

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया।
सत्त्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः॥* १८॥

तापसी। भद्दमुह णहु अअं इसिकुमारओ। (२)

राजा। आकारसदृशं चेष्टितमेवास्य कथयति। स्थान-प्रत्ययात्तु वयमेवंतर्किणः। यथाभ्यर्थितमनुतिष्ठन्। बालस्पर्शमुपलभ्य। आत्मगतम्।

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम्।
कां निर्वृतिं चेतसि तस्य कुर्य्याद् यस्यायमङ्गात् कृतिनः प्ररूढः॥ १९॥

तापसी। उभौ निर्व्वर्ण्य। अच्छरिअं अच्छरिअं। (३)

राजा। आर्य्ये किमिव।

तापसी। इमस्स बालअस्स रूवसंवादिणो दे आइदि त्ति विम्हाविअ म्हि। अवरिइदस्स वि दे अप्पाड़िलोमो संवुत्तो। (४)

(१) भवतु न मामयं गणयति। कोऽत्र ऋषिकुमाराणाम्। भद्रमुख एहि तावत् मोचय अनेन दुर्मोचहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्।

(२) भद्रमुख नहि अयम् ऋषिकुमारकः।

(३) आश्चर्य्यम् आश्चर्य्यम्।

(४) अस्य बालकस्य रूपसंवादिनी ते आकृतिः इति विस्मितास्मि। अपरिचितस्यापि ते अप्रतिलोमः संवृत्तः।

* चन्दनमिति क्वचित् पाठः।

राजा। बालकमुपलालयन्। न चेन्मुनिकुमारोऽयम् अथ कोऽस्य व्यपदेशः।

तापसी। पुरुवंसो। (१)

राजा। आत्मगतम्। कथमेकान्वयो मम। अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्।

भवनेषु रसाधिकेषु पूर्वं* क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि पश्चात् तरुमूलानि गृहीभवन्ति तेषाम्॥२०॥

प्रकाशम्। न पुनरात्मगत्या मानुषाणामेष विषयः।

तापसी। जह भद्दमुही भणाइ। अच्छरासम्बन्धेण इमस्स जणणी एत्थ देवगुरुणो तवोवणे पसूदा। (२)

राजा। अपवार्य। हन्त द्वितीयमिदमाशाजननम्। प्रकाशम्। सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी।

तापसी। को तस्स धम्मदारपरिच्चाइणो णाम संकित्तिदुं चिन्तिस्सदि। (३)

राजा। स्वगतम्। इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्नामतो मातरं पृच्छामि। अथवा अनार्यः परदारपृच्छाव्यापारः।

(१) पुरुवंशः।

(२) यथा भद्रमुखी भणति। अप्सरःसम्बन्धेन अस्य जननी अत्र देवगुरोस्तपोवने प्रसूता।

(३) कस्तस्य धर्मदारपरित्यागिनः नाम संकीर्त्तयितुं चिन्तयिष्यति।

* सुधासितेषु इति क्वचित् पाठः।

प्रविश्य मृन्मयूरहस्ता।

तापसी। सव्वदमण सउन्तलावण्णं पेक्ख। (१)

बालः। सदृष्टिक्षेपम्। कहिं वा मे अज्जू। (२)

उभे। णामसारिस्सेण वञ्चिओ माउवच्छलो (३)

द्वितीया। वच्छ इमस्स मित्तिआमोरअस्स रम्मत्तणं पेक्ख त्ति भणिदो सि। (४)

राजा। आत्मगतम्। किंवा शकुन्तलेति अस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते।

बालः। अज्जूए रोअदि मे एसो भद्दमोरओ। (५)

क्रीड़नकमादत्ते।

प्रथमा। विलोक्य सोद्वेगम्। अम्हहे रक्खाकरण्डअं मणिबन्धे से ण दीसइ। (६)

राजा। अलमावेगेन। ननु इदमस्य सिंहशावविमर्द्दात् परिभ्रष्टम्। आदातुमिच्छति।

उभे। मा क्खु एदं अवलम्बिअ। कहं गहीअं णेण। (७)

(१) सर्व्वदमन शकुन्तलावण्यं प्रेक्षस्व।

(२) कुत्र वा मे माता। (३) नामसादृश्येन वञ्चितो मातृवत्सलः।

(४) वत्स अस्य मृत्तिकामयूरस्य रम्यत्वं प्रेक्षस्व इति भणितोऽसि।

(५) मातः रोचते मे एष भद्रमयूरः।

(६) अम्महे रक्षाकरण्डकं मणिबन्धे अस्य न दृश्यते।

(७) अलं खलु एतदवलम्ब्य। कथं गृहीतमनेन।

राजा। किमर्थं प्रतिषिद्धाः स्मः।

प्रथमा। सुणाउ महाभाओ। एसा अवराइआ णाम ओसही इमस्स जादकम्मसमए भअवदा मारीएण दिण्णा। एदं किल मादापिदरा अप्पाणं अ वज्जिअ अवरो भूमिपडिअं ण गेण्हइ। (१)

राजा। अथ गृह्णाति।

प्रथमा। तदो तं सप्पो होइअ दंसइ। (२)

राजा। भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया।

उभे। अणेअसो। (३)

राजा। सहर्षम्। आत्मगतम्। कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि। बालं परिष्वजते।

द्वितीया। सुव्वदे एमु इमं वुत्तन्तं णिअमव्वावुदाए सउन्तलाए निवेदेम्ह। (४)

निष्क्रान्ते।

बालः। मुञ्चसु मं जाव अज्जूए सआसं गमिस्सं। (५)

राजा। पुत्रक मया सहैव मातरमभिनन्दिष्यसि।

(१) शृणोतु महाभागः। एषा अपराजिता नाम ओषधिः अस्य जातकर्म-समये भगवता मारीचेन दत्ता। एतां किल मातापितरौ आत्मानं च वर्ज्जयित्वा अपरो भूमिपतितां न गृह्णाति।

(२) ततस्तं सर्पो भूत्वा दशति।

(३) अनेकशः।

(४) सुव्रते एहि इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः।

(५) मुञ्च मां यावन्मातुः सकाशं गमिष्यामि।

१एको वेणी सर्पाकार शिक्षित केशवेशं शोभितम् तस्याः कबरीबन्धननिषेधात् धारित्वा सा एकवेणीधरा

बालः। मम क्खु तादो दुस्सन्तो ण तुमं। (१)

राजा। सस्मितम्। एष विवाद एव प्रत्याययति।

ततः प्रविशत्येकवेणीधरा शकुन्तला।

शकुन्तला। विआरकाले वि पइदित्यं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसि अत्तणो भाअहेएसु। अहवा जह साणुमईए आचक्खिअं तह संभावीअइ एदं। (२)

राजा। शकुन्तलां विलोक्य। अयि सेयमत्रभवती शकुन्तला, यैषा

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्त्ति ॥२१॥

शकुन्तला। पश्चात्तापविवर्णं राजानं दृष्ट्वा। ण क्खु अज्जउत्तो विअ। तदो को एसो दाणिं किअरक्खामङ्गलं दारअं मे गत्तसंसग्गेण दूसेइ। (३)

बालः। मातरमुपेत्य। अज्जूए एसो को वि पुरिसो मं पुत्त त्ति आलिङ्गइ। (४)

राजा। प्रिये क्रौर्य्यमपि मे त्वयि प्रयुक्तम् अनुकूलपरिणामं संवृत्तं यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि।

त्वं यदागतासि तदा मया न प्रत्यभिज्ञातासि। अहं पुनरागतस्त्वया प्रत्यभि[ज्ञातः] इति इत्यनुकूलपरिणामता

(१) मम खलु तातो दुष्यन्तः न त्वम्।

(२) विकारकालेऽपि प्रकृतिस्थां सर्व्वदमनस्य औषधिं श्रुत्वा न मे आशा आसीदात्मनो भागधेयेषु। अथवा यथा सानुमत्या आख्यातं तथा सम्भाव्यते एतत्।

(३) न खलु आर्य्यपुत्र इव। ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति।

(४) मातः एष कोऽपि पुरुषो मां पुत्र इति आलिङ्गति।

शकुन्तला । आत्मगतम् । हिअअ अस्ससम्सु । परिच्चत्तमच्छरेण अणुअम्पिअ म्हि देव्वेण । अज्जउत्तो क्खु एसो । (१)

राजा । प्रिये

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥ २२॥

शकुन्तला । जेदु अज्जउत्तो । अर्द्धोक्ते बाष्पकण्ठी विरमति । (२)

राजा । सुन्दरि

बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम् ॥ २३॥

बालः । अज्जूए को एसो । (३)

शकुन्तला । वच्छ दे भाअहेआइं पुच्छसु । (४)

राजा । शकुन्तलायाः पादयोः प्रणिपत्य ।

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवम्प्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥२४॥

शकुन्तला । उट्ठेदु अज्जउत्तो णूणं मे सुअरिअप्पडि-

(१) हृदय आश्वसिहि । परित्यक्तमत्सरेण अनुकम्पितास्मि दैवेन । आर्यपुत्रः खलु एषः ।

(२) जयतु आर्यपुत्रः ।

(३) मातः क एषः ।

(४) वत्स तव भागधेयानि पृच्छ ।

बन्धअं पुराकिअं तेसु दिअहेसु परिणाममुहं आसि जेण सानुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो। (१)

राजा। उत्तिष्ठति।

शकुन्तला। अह कहं अज्जउत्तेण सुमरिओ दुक्खभाई अअं जणो। (२)

राजा। उद्धृतविषादशल्यः कथयिष्यामि।

मोहान्मया सुतनु पूर्व्वमुपेक्षितस्ते
यो बद्धबिन्दुरधरं* परिबाधमानः।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
बाष्पं प्रमृज्य विगतानुशयो भवेयम्॥२५॥

यथोक्तमनुतिष्ठति।

शकुन्तला। नाममुद्रां दृष्ट्वा। अज्जउत्त एदं तं अङ्गुलीअअं। (३)

राजा। अस्याङ्गुलीयकस्योपलम्भात् खलु स्मृतिरुपलब्धा।

शकुन्तला। विसमं किअं णेण जं तदा अज्जउत्तस्स पच्चाअणकाले दुल्लहं आसि। (४)

राजा। तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम्।

(१) उत्तिष्ठतु आर्य्यपुत्रः। नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखम् आसीद् येन सानुक्रोशोऽपि आर्य्यपुत्रः मयि विरसः संवृत्तः।

(२) अथ कथमार्य्यपुत्रेण स्मृतो दुःखभागी अयं जनः।

(३) आर्य्यपुत्र एतत्तदङ्गुलीयकम्।

(४) विषमं कृतमनेन यत्तदा आर्य्यपुत्रस्य प्रत्यायनकाले दुर्लभमासीत्।

* बाष्पबिन्दुरिति बहुषु पाठः।

शकुन्तला। ण से विस्ससेमि। अज्जउत्तो एव्व णं धारेउ (१)

ततः प्रविशति मातलिः॥

मातलिः। दिष्ट्या धर्म्मपत्नीसमागमेन पुत्रमुखदर्शनेन च आयुष्मान् वर्द्धते।

राजा। अभूत् सम्पादितस्वादुफलो मे मनोरथः। मातले न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात्।

मातलिः। सस्मितम्। किमीश्वराणां परोक्षम्। एह्यायुष्मन् भगवान् मारीचस्ते दर्शनं वितरति।

राजा। शकुन्तले अवलम्ब्यतां पुत्रः। त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि।

शकुन्तला। हिरिआमि अज्जउत्तेण सह गुरुसमीवं गन्तुं।(२)

राजा। अयि आचरितव्यमभ्युदयकालेषु एहि एहि।

सर्व्वे। परिक्रामन्ति।

ततः प्रविशति अदित्या सार्द्धमासनस्थो मारीचः।

मारीचः। राजानमवलोक्य। दाक्षायणि

अतिशयोक्त्युज्जी पुत्रस्य ते रणशिरस्ययमग्रयायो
वितस्यकालंकारः दुष्यन्त इत्यभिहितो भुवनस्य भर्त्ता।
चापेन यस्य विनिवर्त्तितकर्म्म जातं
वसन्ततिलका तत् कोटिमत् कुलिशमाभरणं मघोनः॥२६॥

(१) नास्मिन् विश्वसिमि। आर्य्यपुत्र एव एतद् धारयतु।

(२) जिह्रेमि आर्य्यपुत्रेण सह गुरुसमीपं गन्तुम्।

अदितिः। संभावणीयाणुभावा से आइदी। (१)

मातलिः। आयुष्मन् एतौ पुत्रप्रीतिपिशुनेनचक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः। तावुपसर्प।

राजा। मातले एतौ

प्राहुर् द्वादशधास्थितस्य मुनयो यत्तेजसः कारणं
भर्त्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम्।
यस्मिन्नात्मभवः परोऽपि पुरुषश्चक्रे भवायास्पदं*
द्वन्द्वं दक्षमरीचिसम्भवमिदं तत् स्रष्टुरेकान्तरम्॥ २७॥

मातलिः। अथकिम्।

राजा। उपगम्य। उभाभ्यामपि वासवानुयोज्यो दुष्यन्तः प्रणमति।

मारीचः। वत्स चिरं जीव पृथिवीं पालय।

अदितिः। वच्छ अप्पडिरहो होसु। (२)

शकुन्तला। दारअसहिआ वो पादवन्दणं करेमि। (३)

मारीचः। वत्से

आखण्डलसमो भर्त्ता जयन्तप्रतिमः सुतः।
आशीरन्या न ते योग्या पौलोमीसदृशी भव॥ २८॥

(१) सम्भावनीयानुभावा अस्य आकृतिः।

(२) वत्स अप्रतिरथो भव।

(३) दारकसहिता युवयोः पादवन्दनं करोमि।

(४) * आत्मभुवः परोऽपि इति पाठः क्वचित् दृश्यते।

अदितिः। जादे भत्तुणो अहिमआ होसु। अवस्सं दीहाऊ वच्छओ उहअकुलनन्दणो होउ। उवविसह। (१)

सर्व्वे। प्रजापतिमभित उपविशन्ति।

मारीचः। एकैकं निर्दिशन्।

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्॥ २९॥

राजा। भगवन् प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनम् अतोऽपूर्व्वः खलु वोऽनुग्रहः। कुतः

उदेति पूर्व्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रमस् तव प्रसादस्य पुरस्तु सम्पदः॥ ३०॥

मातलिः। एवं विधातारः प्रसीदन्ति।

राजा। भगवन् इमामाज्ञाकरीं वो गान्धर्व्वेण विवाहविधिना उपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन् अपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य। पश्चात् अङ्गुलीयकदर्शनात् ऊढ़पूर्व्वां तद्दुहितरमवगतोऽहम्। तत् चित्रमिव मे प्रतिभाति।

यथा गजो नेति समक्षरूपे तस्मिन्नतिक्रामति संशयः स्यात्।
पदानि दृष्ट्वा तु भवेत् प्रतीतिस् तथाविधो मे मनसो विकारः॥ ३१॥

१) जाते भर्त्तुरभिमता भव। अवश्यं दीर्घायुर्वत्स उभयकुलनन्दनो भवतु। उपविश।

मारीचः। वत्स अलमात्मापराधशङ्कया। सम्मोहोऽपि त्वय्युपपन्नः श्रूयताम्।

राजा। अवहितोऽस्मि।

मारीचः। यदैव अप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि दुर्व्वाससः शापादियं तपस्विनी सहधर्म्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति। स चायम् अङ्गुलीयकदर्शनावसानः।

राजा। सोच्छ्वासम्। एष वचनीयान्मुक्तोऽस्मि।

शकुन्तला। स्वगतम्। दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो। णहु सत्तं अत्ताणं सुमरेमि। अहवा पत्तो मए स हि सावो विरहसुसहिअआए ण विदिदो जदो सहीहिं संदिट्ठ म्हि भत्तुणो अङ्गुलीअअं दंसइदव्वं त्ति। (१)

मारीचः। वत्से विदितार्थासि। तदिदानीं सहधर्म्मचारिणं प्रति न त्वया मन्युः कार्य्यः। पश्य।

शापादसि प्रतिहता स्मृतिरोधरूक्षे
भर्त्तर्य्यपेततमसि प्रभुता तवैव।
छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा॥ ३२॥

(१) दिष्ट्या अकारणप्रत्यादेशी न आर्य्यपुत्रः। नहि शप्तं आत्मानं स्मरामि। अथवा प्राप्तो मया स हि शापो विरहशून्यहृदयया न विदितो यतः सखीभ्यां सन्दिष्टास्मि भर्तुः अङ्गुलीयकं दर्शयितव्यमिति।

राजा। यथाह भगवान्।

मारीचः। वत्स कच्चिदभिनन्दितस्त्वया विधिवदस्माभिर् अनुष्ठितजातकर्म्मा पुत्त्र एष शाकुन्तलेयः।

राजा। भगवन् अत्र खलु मे वंशप्रतिष्ठा।

मारीचः। तथाभाविनमेनं चक्रवर्त्तिनमवगच्छतु भवान्।

पश्य

रथेनानुद्घातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात् सर्व्वदमनः
पुनर्य्यास्यत्याख्यां भरत इति लोकस्य भरणात्॥३३॥

भाविकालंकार
शिखरिणीवृत्तम्

राजा। भगवता कृतसंस्कारे सर्व्वमस्मिन् वयमाशास्महे।

अदितिः। भअवं इमाए दुहिदमणोरहसम्पत्तीए कसो वि दाव सुअवित्थारो करीअदु। दुहिदवच्छला मेणआ इह एव्व उवचरन्ती चिट्ठइ। (१)

शकुन्तला। आत्मगतम्। मणोगअं मे भणिअं भअवदीए। (२)

मारीचः। तपःप्रभावात् प्रत्यक्षं सर्व्वमेव तत्रभवतः।

राजा। अतः खलु मम अनतिक्रुद्धो मुनिः।

(१) भगवन् अनया दुहितृमनोरथसम्पत्त्या कण्वोऽपि तावत् श्रुतविस्तरः क्रियताम दुहितृवत्सला मेनका इहैव उपचरन्ती तिष्ठति।

(२) मनोगतं मे भणितं भगवत्या।

मारीचः। तथाप्यमी प्रियमस्माभिराप्रष्टव्यः*। कः कोऽत्र भोः।

प्रविश्य

शिष्यः। भगवन् अयमस्मि।

मारीचः। गालव इदानीमेव विहायसा गत्वा मम वचनात् तत्रभवते कण्वाय प्रियमावेदय यथा पुत्त्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृह्यतेति।

शिष्यः। यदाज्ञापयति भगवान्। निष्क्रान्तः।

मारीचः। वत्स त्वमपि स्वापत्यदारसहितः (१) सख्युराखण्डलस्य रथमारुह्य राजधानीं प्रतिष्ठस्व।

राजा। यदाज्ञापयति भगवान्।

मारीचः। अपिच

तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञः स्वर्गिणः प्रीणयालम्। (२)
युगशतपरिवर्त्तानेवमन्योन्यकृत्यैर्
नयतमुभयलोकानुग्रहश्लाघनीयैः ॥ ३४॥

राजा। भगवन् यथाशक्ति श्रेयसे यतिष्ये।

मारीचः। किन्ते भूयः प्रियमुपहरामि।

राजा। अतः परमपि प्रियमस्ति। यदि भगवान् प्रसन्नः प्रियं कर्त्तुमिच्छति तर्हीदमस्तु।

(१) सापत्यदारसहितः इति पाठान्तरम्। (२) प्रीणयस्व इति क्वचित् पाठः।

*प्रष्टव्य इति पाठो न सम्यक्। अर्थसङ्गतेरनुपपत्तेः।

भरतवाक्यम् ।

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतमहतां महीय्यताम् । (१)
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥३५॥

निष्क्रान्ताः सर्व्वे ।

सप्तमोऽङ्कः ।

(१) महीयसाम् । महीयताम् । न हीयताम् । इति पाठभेदाः ।

NOTES.

अथ कविकुलशिरोमणिः तत्रभवान् कालिदासः ग्रन्थारम्भे चिकीर्षितार्थाविघ्नपरिसमाप्तिकामः आशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमित्यालङ्कारिकवचनप्रामाण्यात् अभिमतदेवतामूर्त्तिविशेषान् कीर्त्तयन् आशीर्व्वचनरूपं मङ्गलमाचरति येति—

अन्वयः—या स्रष्टुराद्यासृष्टिः, या विधिहुतं हविः वहति, याच होत्री, ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या विश्वं व्याप्य स्थिता। यां सर्व्वबीजप्रकृतिरिति आहुः यया प्राणिनः प्राणवन्तः, प्रत्यक्षाभिः ताभिः अष्टाभिः तनुभिः प्रपन्नः ईशः वः अवतु। १

व्याख्या। या जलरूपा मूर्त्तिः स्रष्टुः जीवरूपेणानुप्रविश्य नामरूपे व्याकरवाणि इतीच्छावशात् जगदिदं निर्म्मातुम् इच्छोः ईश्वरस्य, (न तु वेधसः तस्यजलसृष्टेरर्वागुत्पत्तेः तथाचोक्तं मनुना—

> सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
> अप एव ससर्ज्जादौ तासु बीजमवासृजत्॥
> तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
> तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामहः॥)

आदौ भवा आद्या (आदिशब्दात् यत्) सृष्टिः, या वह्निरूपा तनुः विधिना शास्त्रोद्दिष्टया रीत्या हुतम् देवोद्देशेन होमाग्नौ क्षिप्तं हविः घृतादिकं होमोपकरणं वहति इष्टान् देवान् प्रापयति इत्यर्थः ; या च होत्री यजमानरूपा मूर्त्तिः, ये द्वे सूर्य्याचन्द्रमसौ मूर्त्ती कालं दिनरात्रिविभागरूपं समयं आविर्भावतिरोभावाभ्यां विधत्तः कुरुतः ; श्रूयते अनया इति श्रुतिः श्रवणं कर्ण इति यावत् तस्याः विषयः ज्ञेयः गुणः शब्दरूपो यस्याः सा श्रुतिविषयगुणा, शब्दगुणा या आकाशरूपा तनुः विश्वं समग्रं जगदिदं व्याप्य आवृत्याना इत्यर्थः स्थिता ; यां पृथ्वीरूपां सर्व्वेषां बीजानां प्रकृतिः आधारभूता इति आहुः वदन्ति विद्वांस इति शेषः,(निपातेन अभिहितत्वात् प्रकृतिरित्यत्र न द्वितीया यथाह वामनः निपातेनाप्यभिहितेकर्म्मणि न द्वितीया परिगणनस्य प्रायिकत्वात्)। यया वायुरूपया प्राणिनः जीवाः प्राणवन्तः, वायुरूपा या मूर्त्तिः प्राणापानादिरूपेण भूतानां देहेषु चरन्ती जीवनस्य निदानमित्यर्थः, ताभिः

42

प्रत्यक्षाभिः चक्षुरादिभिः इन्द्रियैः प्रेयाभिः अष्टाभिः तनुभिः प्रपन्नः अन्वितः ईशः शिवः वो युष्मान् अवतु रक्षतु। भूतार्कचन्द्रयज्वानः इति अष्टौ यस्य प्रत्यक्षाः मूर्त्तयः स शिवो युष्माकं मङ्गलं विदध्यात्। स्रग्धरावृत्तम्, तल्लक्षणम् स्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।

GRAMMAR.—होत्री हुधातोः तृच् स्त्रियांङीप्। हु लट्, जुहोति ; लुङ्, अहौषीत, लिट् जुहाव, जुहवाम्बभूव जुहवामास जुहवाञ्चकार......शतृ जुह्वत् ; क्तः हुतः।

यथा प्राणिनः इत्यत्र धान्येन धनवान् इतिवत् अभेदे तृतीया करणे वा।

अक्षम् इन्द्रियं प्रतिगताः इति प्रत्यक्षाः। यद्वा अक्ष्णोः, प्राधान्यात् अन्येषाम् इन्द्रियाणामुपलक्षणमेतत्, अभिमुखम् इति प्रत्यक्षम् "प्रतिपरसमनुभ्योऽक्ष्णः" इति अव्ययीभावसमासे समासान्तः टच् तत् आसामस्ति इति प्रत्यक्षा अर्श आदिभ्यः अच् इति अच्। The word अक्षि when compounded with सम, अनु, पर and प्रति forms a compound base of the अव्ययीभाव kind, it admits of the augment टच्। प्रपन्नः प्रपूर्व्वात् पदधातोः कर्म्मणि क्तः, अन्वितः उपलक्षितः इत्यर्थः प्रायेण प्रपन्नशब्दस्य शरणागतत्वं (दुर्गतत्वम्) इति अर्थः दृश्यते। यथा—

"देवि प्रपन्नार्त्तिहरे प्रसीद।
मायामथनिरस्ताय प्रपन्नजनसेविने।
शाधि मां त्वां प्रपन्नम्॥"

पद, लुङ् अपादि। Verbs which optionally admit of चिण् in लुङ् third person singular in the active voice, are जन्, बुध् पूर, दीप, प्याय and ताय।

ईशः – ईशधातोः इगुपधालक्षणः कः।

ईश् लट् ईष्टे लुङ् ऐशिष्ट ; लिट् ईशाञ्चक्रे...... ; शानच् ईशानः।

Change of voice.—प्रपन्नेन ईशेन यूयं अव्यध्वम्।

যে মূর্ত্তি (জল) ঈশ্বরের প্রথম সৃষ্টি ; যাহা (অগ্নি) শাস্ত্রবিধানানুসারে প্রদত্ত ঘৃতাদি বহন করে ; যে মূর্ত্তি (যজমান) হোম সম্পাদন করে ; যে মূর্ত্তিদ্বয় (চন্দ্র ও সূর্য্য) সময় বিধান করে ; কর্ণেন্দ্রিয়গ্রাহ্যগুণ যে মূর্ত্তি (আকাশ) সমস্ত বিশ্ব ব্যাপিয়া রহিয়াছে, (পণ্ডিতেরা) যাহাকে (পৃথিবী) সমস্ত বীজের মূলাধার বলিয়া থাকেন এবং যদ্দারা (বায়ু) জীবগণ জীবনবিশিষ্ট ; সেই প্রত্যক্ষ অষ্টমূর্ত্তিবিশিষ্ট শিব তোমাদিগকে রক্ষা করুন।

Let Isa (God) possessed of these eight forms perceptible by the senses ;—viz. water, the first work of the creator ; fire, that bears on high the clarified butter offered according to sacred injunctions ; the sacrificial priest ; the sun and the moon, the two, which regulate time ; ether, the property of which is the object of the sense of hearing, and which pervades the whole universe ; the earth, which is called the source of all essences ; and air by which all that is living lives :—let such Isa preserve you.

[नान्द्याः अन्ते अवसाने सूत्रधारः इदं प्रयोजितवान् इतः प्रभृति मया नाटकमुपादीयते इति कवेरभिप्रायः। अन्यथा प्रागुक्तश्लोके नान्दीलक्षणस्य अनुपपत्तिः स्यात्] नान्दीलक्षणं यथा—

आशीर्व्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मात् नान्दीति संज्ञिता॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टभिर्व्वापदैरुत॥

पूर्व्वरङ्गस्य रङ्गद्वाराभिधानमङ्गमिति यदुक्तं तदेवात्र नान्दीशब्देन लक्षितम्।

सूत्रं नाटकस्य सूत्रं धरति यः सः सूत्रधारः धरतेः कर्म्मख्यण्।

सूत्रधारः। [नेपथ्यस्य वेशरचनागृहस्य अभिमुखम् अवलोक्य] आर्य्ये स्वपत्नीसम्बोधनमेतत्, यदि नेपथ्यस्य विधानं करणं वेशरचना इत्यर्थः अवसितं समाप्तं तर्हि इतः अत्र स्थाने आगम्यतां भवत्येति शेषः।

अवपूर्व्वात् सोधातोः क्तः अवसितः। सोधातोः लट् स्यति ; लिट् ससौ ; लुङ् असात्, असासीत् ; घञ् सायः ; णिच् साययति ; ल्युट् (वा अनट्) सानम्।

[प्रविश्य]

नटी। आर्य्यपुत्रेति स्वामिसम्बोधनम्।

[নান্দীর পর]

সূত্রধার। [নেপথ্যের দিকে দৃষ্টিপাত করিয়া] আর্য্যে, যদি বেশরচনা সমাপ্ত হইয়া থাকে, তাহা হইলে এই দিকে এস।

[প্রবেশ করিয়া]

নটী। আর্য্যপুত্র, এই আমি আসিয়াছি।

[*After the recitation of benediction*].

The stage-manager [*Looking towards the tiring room*]—Lady, if you have finished dressing (yourself), come here.

[*Entering*]

The actress—Here I am, my husband.

सूत्रधार:। आर्य्ये, अभिरूपै: विद्वद्भि: भूयिष्ठा बहुला इयं परिषत् सभा। अत्र सभायां बह्वी विपश्चित: समुपस्थिता:। अद्य कालिदासेन ग्रथितं वस्तु यस्य तेन कालिदासोपनिवद्धविषयेण नवेन सद्य: प्रणीतेन, अभिज्ञायते अनेन इति अभिज्ञानम् स्मृत्युपस्थापकं वस्तु, अत्र तु अङ्गुलीयकम्, तेन सत्यमूढ़पूर्व्वासौ मुनितनयेति स्मृता शकुन्तला, तामधिकृत्य प्रवृत्तं नाटकमिति अभिज्ञानशकुन्तलम्, "अधिकृत्य कृतेग्रन्थे" इति अण् लुप् आख्यायिकाभ्य: बहुलम् इति अणोलुक् नाटकमित्यनेन सह अभेदोपचारात् नपुंसकत्वम्। यद्वा अभिज्ञानगृहीता शकुन्तला अस्मिन् नाटके इति मध्यपदलोपिनि वहुव्रीहौ अभिज्ञानशकुन्तलमिति समस्तपदं अभिज्ञानं शकुन्तलाया: यत्र इति वा विग्रह:। क्लीवत्वात् ह्रस्वत्वम् ह्रस्वो प्रातिपदिकस्य नपुंसके। अभिज्ञानशकुन्तलं नामधेय यस्य तेन नाटकेन अस्माभिरुपस्थातव्यम्। तस्य नाटकस्य अभिनयप्रदर्शनेन अत्र संसदि उपस्थितानां सामाजिकानां चेतांसि रञ्जयितव्यानि इत्यर्थ:। तस्मात् पात्रे पात्रे इति प्रतिपात्रं वीप्सार्थे अव्ययीभाव:। यत्न: आधीयतां क्रियताम्। सर्व्वे एव कुशीलवा: यथा अप्रमत्ता: स्वं स्वं नियोगमनुतिष्ठन्ति तथा क्रियतामित्यर्थ:। ननु अभिज्ञानशकुन्तलस्य नाटकेषु अन्तर्भावात् आख्यायिकासु तस्यानन्तर्भाव: अतश्च "लुवाख्यायिकाभ्यो बहुलमिति" वार्त्तिकस्यानवकाशात् "अधिकृत्य कृते ग्रन्थे" इति सूत्रेण अणि कृते आद्यचो वृद्धौ आभिज्ञानशकुन्तलमिति पदं स्यात् इति चेत् तत्र ब्रूम: आख्यायिकाशब्दस्य प्रवृत्तिरंवालङ्कारिकधृतलक्षणसम्पन्ने गद्यकाव्यभेदे केवलं रूढ़ेति न किन्तु तत्सदृशेषु प्रवन्धेष्वपि लब्धावकाशा इति वार्त्तिककृतोऽभिप्रायमुत्पश्याम: बहुवचनप्रयोगात् श्रीमद्गौरीचन्द्रतर्कवाचस्पत्योरपि तथाभिप्रेतत्वात् आख्यायिका—गद्यपद्यप्रवन्धे इति तर्कवाचस्पति:, शब्दचिन्तामणिश्च। "आख्यायिकाभ्य:" इत्यत्र वार्त्तिककारस्य विशेषाभिधित्सायाम् सत्याम् कथं विक्रमोर्व्वशीति पदं सिध्यति। नात्र द्वन्द्वसमास: अभिप्रेत: "शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छ:" इति छप्रत्ययस्यादर्शनात्। अत्रापि विक्रमसहिता उर्व्वशीति शाकपार्थिवादिवत् समासे वार्त्तिकसूत्रेण अणोलुकि अभेदोपचाराभावे विक्रमोर्व्वशीसिद्धा। आख्यायिकाशब्दस्य प्रवृत्तिराख्यायिकाभिन्नासु कथासु अपि दृष्टा, तत्र निदर्शनं कादम्बरीत्यलं विस्तरेण।

अभिरूपयन्ति निरूपयन्ति तत्त्वं ये ते अभिरूपा: पण्डिता: चुरादिगणीयात्

रूपयते: अत्र् ते; भूयिष्ठा। भूयोभूसभूयिष्ठा: इति बहुशब्दात् इष्ठप्रत्ययेन भूयिष्ठ-मिति सिद्धम्। इष्ठस्य यिट् च इति इष्ठस्य लोप: यिड़ागमश्च। चकारात् बाहोर्भूरादेश:।

परिषीदन्ति अत्र इति परिपूर्व्वात् सद्धातोरधिकरणे क्विप् सदिरप्रते: इति उपसर्गस्थान्निमित्तात् परस्य सीदते: षत्वम्।

नाम एव इति नामधेयम् स्वार्थे धेयप्रत्यय:। भागरूपनामभ्योधेय:।

निर्ज्जने तु वने यस्मात् शकुन्तै: परिवारिता। शकुन्तलेति नामास्या: कृतञ्चापि ततो मया। शकुन्तशब्दपूर्व्वात् लाते: घञर्थे क: तत: स्त्रियामाम्।

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्

... ...

... ...

पञ्चादिका दशपरास्तत्राङ्का: परिकीर्त्तिता:
प्रख्यातवंशो राजर्षि र्धीरोदात्त: प्रतापवान्
दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मत:
एक एव भवेदङ्गी शृङ्गारी वीर एव वा
अङ्गमन्ये रसा: सर्व्वे कार्य्यनिर्व्वहणेऽद्भुतम्
चत्वार: पञ्च वा मुख्या: कार्य्यव्यापृतपूरुषा:
गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्त्तितम्।

नाटयति इति नाटकम् चुरादिगणीयात् नट धातो: ण्वुल् वा णक:। नट धातु नर्त्तने घटादि:। अभिनयोऽपि अस्य अर्थान्तरम्।

Occidental scholars are of opinion that the Sanskrit drama has developed out of dancing.

সূত্রধার। আর্য্যা, এই সভায় অনেক পণ্ডিত উপস্থিত ; অদ্য অভিজ্ঞানশকুন্তল-নামে নূতন নাটক, কালিদাস যাহার বস্তুসংগ্রহ করিয়াছেন, তাহা অভিনীত করিয়া (ইঁহাদিগের) আরাধনা করিব। এই নিমিত্ত প্রত্যেক পাত্রেই যেন যত্ন করা হয়।

Stage-manager.—This assembly (audience) is mainly of learned men, we shall approach them (do them honour) with a new drama, called Abhijnana Sakuntala (Sakuntala known by the ring), the subject-matter of which has been put together (or composed) by Kalidasa. Let, therefore, every actor and actress exert themselves.

नटी। सुविहित: सम्यक् अनुष्ठित: प्रयोग: अभिनय: येन तस्य भाव: तत्ता तया प्रयोगस्य सम्यगनुष्ठानात् न किमपि परिहास्यते ; कापि हानिर्नभविष्यति ;

किमपि दोषस्पृष्टं न भविष्यति इत्यर्थः। परिहास्यते इति जहातेः कर्मकर्त्तरि लृटिरूपम्।

हा लट् जहाति ग्रत जहत्, लिट् जहौ, लुङ् अहासीत्, लोट् हि—जहाहि जहिहि जहीहि ; क्तः हीनः।

सूत्रधारः। आर्य्ये, भूतस्थासौ अर्थश्चेति कर्म्मधारयः तं भूतार्थं सत्यमर्थं वस्तु इति यावत् तुभ्यं कथयामि। युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु इत्यमरः ते इत्यत्र क्रियाग्रहणमपिकर्त्तव्यमिति चतुर्थी।

आपरितोषादिति—

विदुषाम् आ परितोषात् प्रयोगविज्ञानम् साधु न मन्ये ; बलवदपि शिक्षितानां चेतः आत्मनि अप्रत्ययम्। २

विदुषां पण्डितानाम् आ परितोषात् आ चित्तप्रसादनात् आङ्मर्य्यादाभिविध्योरिति समासस्य विभाषितत्वात् न समासः समासपक्षे आपरितोषम् इति स्यात्, प्रयोगस्य अभिनयस्य विज्ञानम् नैपुण्यम् साधु सम्यक् न मन्ये। यावत् विद्वांसः न परितुष्यन्ति तावदस्माकमभिनयः सम्यक् संवृत्तः इति न मन्ये। अत्र हेतुमुपन्यस्यति। बलवत् अत्यन्तमपि शिक्षितानां जनानां चेतः मनः आत्मनि विषये अप्रत्ययं नास्ति प्रत्ययः विश्वासः यस्य तत् ; आत्मनि न विश्वस्तम्। अतिविद्वांसः अपि के वयमिति अपरार्थः सभ्यस्तेऽपि आत्मनः कलानैपुण्यादौ न विश्वसन्ति। अर्थान्तरन्यासः अलङ्कारः।

विदेः शतुर्व्वसुः विद्वस् पक्षे विदत्। In the case of the root विद् (to know) in the place of the present participle शतृ,वसु is optionally ordered.

N. B. This Sloka reminds the reader of the "Impartial Spectator" of Adam Smith.

Change of voice.—प्रयोगविज्ञानम् साधु न मन्यते। चेतसा अप्रत्ययेन भूयते।

नटी। त्वं यत् वदसि तत् तथा सत्यमित्यर्थः। इदानीं मया यत् कार्य्यं तदेव भवानादिशतु।

নটী। আপনি সুন্দররূপে প্রয়োগবিধান করিয়াছেন, কোন ত্রুটি বা হানি হইবে না।

সূত্রধার। আর্য্যে, তোমাকে সত্য কথা বলি। যতক্ষণ পর্য্যন্ত পণ্ডিতগণের তুষ্টি না হয়, ততক্ষণ অভিনয়নৈপুণ্য উত্তম হইয়াছে বিবেচনা করি না (কারণ) অত্যন্ত শিক্ষিত ব্যক্তিগণেরও চিত্ত নিজের উপরি বিশ্বাস (নির্ভর) করিতে পারে না।

নটী। ইহা সত্য। ইহার পর আমাকে কি করিতে হইবে আদেশ করুন।

Actress.—Sir, owing to your judicious management of the performance nothing will be defective.

Stage-Manager.—Lady, I will tell you the true state of things. I deem no skill in acting perfect till the learned are satisfied. The mind of even those that are vastly and deeply read has little confidence in itself.

Actress.—It is just so And now please order what I shall have to do next.

सूत्रधार:। अस्या: परिषद: संसद: सभाया इति यावत, समवेतानां सामाजिकानामित्यर्थ: श्रुते: कर्णस्य प्रसादनत: रञ्जनात (पञ्चम्या: तसिल्) अन्यत् किं करणीयमस्तीति शेष:। न किमपि इति तात्पर्य्यम्। अन्यारादितरर्त्ते इति पञ्चमी। गीतेन सामाजिकानां श्रोत्ररञ्जनमेव ते करणीयं नान्यत् किमपि। तत् तस्मात् हेतो: अचिरं प्रवृत्त: तं, अत्यन्तसंयोगवाचिन्या द्वितीयया सह समास:। अतएव उपभोगस्य क्षम: तं; उपभोगयोग्यम्, सोढ़ुं, शक्यमित्यर्थ: ग्रीष्मसमयं ग्रीष्मर्त्तुं अधिकृत्य आश्रित्य गीयताम् ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् इत्युक्तेः ऋतुग्रहणम्। गायतेर्भावे लोट्। सम्प्रति, हि अव अवधारणे, हि हेताववधारणे इत्यमर:।

सुभगेति। अन्वये न किमपि परिवर्त्तनम्। २

सुभग: सुखोत्पादक: सलिलेषु जलाशयेषु अवगाह: अवगाहनं स्नानमिति यावत् येषु ते सुभगसलिलावगाहा: येषु दिवसेषु जलाशये निमज्जनं तापोपशमनात् अतीव प्रीतिकरम् इत्यर्थ:। पाटलानां पुष्पभेदानां संसर्गेण सम्पर्केण सुरभय: सुगन्धा: वनवाता येषु ते पाटलसंसर्गसुरभिवनवाता:; येषु दिवसेषु विकसितानां पाटलपुष्पाणां परागै: शोभनगन्धा: वायवो वहन्ति इत्यर्थ:। प्रकृष्टा छाया अनातपो येषु स्थानेषु तानि प्रच्छायानि तरुतलानि इत्यर्थ: तेषु सुलभा अकृच्छ्रेण लभ्या निद्रा स्वापो येषु ते; येषु दिवसेषु छायासुभगे तरुतले शयानस्य निद्रा स्वयमेव आपतति इत्यर्थ:— ईदृशा: दिवसा: ग्रीष्मर्त्तुवासरा: परिणामे अवसाने रमणीया: मनोहरा:। सूर्य्ये अस्ताचलोन्मुखे तापसंचयात् प्रस्निग्धसमीरणसञ्चाराच्च शुचो मनसि महान् प्रमोदो जायते। स्वभावोक्तिरलङ्कार:। स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्।

Change of voice.—सुभगसलिलावगाहै: पाटलसंसर्गसुरभिवनवातै: प्रच्छायसुलभनिद्रै: दिवसै: परिणामरमणीयै: भूयते।

সূত্র। এই সভার (সভাস্থ লোকের) শ্রবণরঞ্জন ভিন্ন আর কি? অতএব সম্প্রতি আরব্ধ, উপভোগের যোগ্য এই গ্রীষ্ম সময় অবলম্বন করিয়া গান কর। এক্ষণে গ্রীষ্মকালের দিবসে, জলে অবগাহন অতীব প্রীতিকর, পাটলপুষ্পের সংসর্গে বনসমীরণ

সুরভি, ছায়ালঙ্কৃত প্রদেশে নিদ্রা অনায়াসে আবির্ভূত হয়। এবং দিবসের শেষভাগ রমণীয়।

Stage-Manager.—What else than pleasing the ear of this assembly? Sing, therefore, taking this summer season, that has but recently commenced and (therefore) enjoyable, as your theme. Now—

The days,—when agreeable are baths in water, when the gentle sylvan wind in contact with Patala flowers becomes sweet-scented; and when in the gentle shade sleep is easily obtained,—such days are beautiful at the close.

नटी। तथा। यत् भवानाह तत् करोमीत्यर्थः [गायति]

दयमानाः सदयाः प्रमदाः नार्य्यः भ्रमरैः षट्पदैः ईषत् ईषत् चुम्बितानि स्पृष्टानि, कुसुमानां अतिपेलवतया भ्रमरभारसहनाचमत्वादितिभावः, सुकुमाराः अतिकोमलाः केसराणां किञ्जल्कानां शिखाः अग्रभागाः येषां तानि, शिरीषाख्यानि कुसुमानि अवतंसयन्ति, कर्णभूषणानि कुर्व्वन्ति। अवतंसशब्दः कर्णभूषणे रूढ़ः। अवतंसं कुर्व्वन्ति इति अवतंसशब्दात् णिच् ततो लटिरूपम् ईषदीषदित्यत्र "प्रकारे गुणवचनस्य" इति द्विर्भावः यद्वा नित्यवीप्सयोरिति नित्यार्थे द्विरुक्तिः। अव्ययमिदं क्रियाविशेषणं। Cf. "सदयालूनपल्लवाः" कुमारसम्भवम्।

নটী। যাহা বলিলেন তাহা যথার্থ। [গান করিতে লাগিলেন] প্রমদাগণ সদয়-ভাবে (ধীরে ধীরে), ভ্রমরগণ কর্ত্তৃক ঈষৎ স্পৃষ্ট, কোমল কেশরাগ্রবিশিষ্ট, শিরীষপুষ্প-গুলি কর্ণভূষণরূপে ব্যবহার করিতেছে।

Actress.—Quite so. [*sings*] Ruthful women are making with kind and gentle care ear-rings of Sirish flowers of soft and delicate filaments, slightly kissed by the bees.

सूत्रधारः। आर्य्ये साधु सुन्दरं मनोहरमिति यावत् गीतम्। अहो इति आश्चर्य्ये अव्ययम्। सर्व्वतो रङ्गः सर्व्वएव रङ्गस्थितः प्रेचकः जनः रागेण गीतस्य माधुर्य्येण वद्धा संयता आकृष्टा इति यावत् चित्तस्य वृत्तिः यस्य सः गीतापहृतचेताः आलिखितः चित्रार्पित इव आस्ते। गीतश्रवणेन तन्मयचित्तः निष्पन्दः चित्रलिखित इव श्रोतृवर्गः। तदिदानीं कतमत् प्रकरणं प्रस्तावं विषयं वस्तु इति यावत् आश्रित्य अवलम्ब्य एनं सामाजिकवर्गम् आराधयामः तोषयामः।

"घञि च भावकरणयोः" इति रञ्जेः नलोपात् राग इति पदं सिद्धम्। रज्यति अस्मिन् इति अधिकरणे घञि नलोपाभावात् रङ्गः। The न of रनज् is elided before घञ् in भाव and करण वाच्य।

सर्व्वत: इति प्रथमाया: तस् इतराभ्योऽपि दृश्यते इति सार्व्वविभक्तिक: तसि:। The suffix तसि is seen used in other विभक्तिs than the fifth.

वा बहूनां जातिपरिप्रश्ने इति किम्शब्दात् डतमच्—अद्‌ड्डतरादिभ्य: इति नपुंसके अद्‌डादेश:। प्रकरणशब्देनेह नाटकादीनामन्यतमो भेदो न विवचित:, तल्लचणानुपपत्ते: ; उक्तञ्च, भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्। शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवावणिक्।

इदमोऽन्वादेशे द्वितीयायां एनादेश:।

সূত্র। আর্য্যে, সুন্দর গান করিয়াছ। সমস্ত সামাজিকবর্গ গীতমাধুর্য্যে আকৃষ্টচিত্ত হইয়া চিত্রলিখিতের ন্যায় রহিয়াছেন। এক্ষণে কোন্ প্রকরণ অবলম্বন করিয়া ইহাঁদের আরাধনা করি ?

Stage-manager.—Lady, beautifully sung ! The audience are (motionless) as statues, their souls being rivetted by the sweetness of the strain. Now what subject shall we choose that we may please them ?

ननु प्रागेव भवद्भिरादिष्टम्, अभिज्ञानशकुन्तलस्य नाटकस्य अभिनय: क्रियतामिति। मिश्रशब्द: नाटकादौ माननीयेषु प्रयुज्यते, अत्र गौरवे बहुवचनम् ननु शब्दोऽत्र वाक्यारम्भे, "वाक्यारम्भेऽप्यनुनयामन्त्रणानुज्ञयोरपीति" हैम:।

सूत्रधार:। आर्य्ये सम्यक् सुष्ठु अनुबोधित: स्मारित: अस्मि। सर्व्वं मया विस्मृतं। कुत: यत: तवेति। अन्वय:—

हारिणा तव गीतरागेण, अतिरंहसा सारङ्गेण एष राजा दुष्यन्त: इव प्रसभं हृत: अस्मि।

हरति चित्तमिति हारी ग्रहादित्वात् णिनि: तेन मनोहरेण तव गीतस्य रागेण माधुर्य्येण, अतिशयितं रंह: वेगो यस्य तेन अतिरंहसा वेगवता सारङ्गेण एष राजा दुष्यन्त: इव, अहं प्रसभं बलात्कारेण हृतोऽस्मि, आकृष्ट: भवामि। सर्व्वात्मना तव गीतमाकर्णयन्नहं अन्यत् सर्व्वं विस्मृतवानस्मि इत्यर्थ:। उपमालङ्कार:।

Change of voice.—हृतेन मया भूयते एतेन राज्ञा दुष्यन्तेनेव।

प्रसभमिति क्रियाविशेषणम्।

निष्क्रान्ताच निष्क्रान्तश्च इति निष्क्रान्तौ पुमान् स्त्रिया इति पुंलिङ्गैकशेष:। In compound noun bases of the एकशेष kind, the masculine gender remains ; and the feminine is elided.

प्रस्तावना—लक्षणम्—

"नटी विदूषकोवापि पारिपार्श्विक एव वा
सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते ।
चित्रैर्व्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्म्मिथः
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा" ।

अत्र अवलगिताख्यः प्रस्तावनाभेदः प्रयुक्तः, तल्लक्षणम्—

यत्रैकत्रसमावेशात् कार्य्यमन्यत् प्रसाध्यते ।
प्रयोगे खलुतज्ज्ञेयं नाम्नावलगितं बुधैः ॥

নটী। কেন, আপনি প্রথমেইত আদেশ করিয়াছেন যে অভিজ্ঞানশকুন্তল নামে অপূর্ব্ব নাটক অভিনয়ের জন্য অধিকৃত হউক।

সূত্রধার। আর্য্যে ভাল মনে করিয়া দিয়াছ। এই মুহূর্ত্তে আমি ভুলিয়া গিয়াছিলাম, কারণ অতি বেগবান্ ঐ সারঙ্গ রাজা দুষ্যন্তকে যেমন আকৃষ্ট করিয়া লইয়া যাইতেছে, আমিও সেইরূপ তোমার গীতমাধুর্য্যে আকৃষ্ট হইয়াছিলাম।

[উভয়ে নিষ্ক্রান্ত]

প্রস্তাবনা।

Actress.—Why? your honour has at first ordered that the new drama called Abhijnana Sakuntala should be appointed as the subject of our performance.

Stage-manager.—Lady, I have been rightly reminded! This moment I forgot it. For, I have been carried away (by force as it were) by the transporting melody of your song; as the king Dushyanta is allured by the fast-running antelope. [*Exeunt.*]

Prologue.

प्रथमः अङ्कः ।

[तत इति चापं धनुः शरं वाणञ्च हस्तेन आदाय मृगमनुसरन् राजा रथेन प्रविशति तस्य सारथिश्च]।

सूतः। [राजानं मृगञ्च दृष्ट्वा] आयुः प्रशस्तं विद्यते यस्य स आयुष्मान् तत् सम्बोधने, "आयुष्मन् रथिनं सूतः" इति नियमात् ।

कृष्णसारे—इति, अन्वयः—

कृष्णसारे अधिज्यकार्मुके त्वयि च चक्षुः ददत् अहं मृगानुसारिणं साक्षात् पिनाकिनमिव पश्यामि । ६

कृष्णः च सारः शवलः विविधवर्णश्चेति कृष्णसारः वर्णो वर्णेनेति समासः तस्मिन् मृगे अधिरूढ़ा ज्या येन तत् अथवा ज्याम् अधिगतं इति अधिज्यम् आरोपितमौर्व्वीकं

कर्म्मणि युद्धाय इत्यर्थः प्रभवति यत् तत् कार्मुकं धनुः (कर्मणः उकञ्) यस्य तस्मिन् अधिज्यकार्म्मुके त्वयि च चक्षुः ददत् नाभ्यसात शतुर्नम् ; अर्पयन् अहं त्वां मृगञ्चेमं विलोकयन् इत्यर्थः, मृगं मृगरूपधारिणं क्रतुमित्यर्थः अनुसरति यस्तम् साक्षात् मूर्त्तिमन्तं पिनाकोऽजगवं धनुः स विद्यते यस्य तं पिनाकिनम् शिवम् इव पश्यामि। अत्र उत्प्रेक्षालङ्कारः। दक्षाध्वरे हन्तुमुद्यतं पिनाकिनं दृष्ट्वा क्रतुर्मृगरूपमास्थाय पलायमानः शिवेनानुसस्रे इति पुराणवार्त्ता।

साक्षात् इति शब्दः अव्ययम् पिनाकिनमिति पदं विशिनष्टि। मृगमनुसरति इति सरतेः णिनिः। सृ लट् ससार ; लुङ् असरत् असार्षीत्।

Change of voice.—ददता मृगानुसारी साक्षात् दृश्यते इव पिनाकी।

[তাহার পর রথারূঢ় রাজা দুষ্যন্ত সশর ধনু হস্তে মৃগের অনুসরণ করতঃ প্রবেশ করিলেন, সারথিও প্রবেশ করিল]।

সূত। [রাজা এবং মৃগকে অবলোকন করিয়া] আয়ুষ্মন্।

কৃষ্ণসার মৃগও সগুণবাণাসনধারী আপনি এই উভয়ের প্রতি দৃষ্টিপাত করিয়া আমি যেন মৃগানুসারী মূর্ত্তিমান্ পিনাকীকে অবলোকন করিতেছি।

[*Then enter chasing an antelope, king Dushyanta with a bow and arrow in hand, in a chariot, and his charioteer.*]

Charioteer. [*Looking at the king and the deer*]. Long-lived Prince, casting my eye on you whose bow is strung, and on the dark-spotted deer, I see, as it were, the God Pinaki—(having the Pinaka—the name of Siva's bow) in bodily form, chasing the deer.

राजा। हे सारथे वयमनेन मृगेण दूरं विप्रकृष्टमध्वानम् इत्यर्थः नीता अयं पुनरधुना अपि—ग्रीवेति अन्वयः।

अनुपतति स्यन्दने ग्रीवाभङ्गाभिरामं मुहुः दत्तदृष्टिः शरपतनभयात् भूयसा पश्चार्द्धेन पूर्व्वकायम् प्रविष्टः श्रमविवृतमुखभ्रंशिभिः अर्द्धावलीढैः दर्भैः कीर्णवर्त्मा अयम् उदग्रप्लुतत्वात् वियति बहुतरम् उर्व्व्यां स्तोकं प्रयाति। पश्य। ७

अनुपतति पश्चात् धावति स्यन्दने रथे ग्रीवायाः कन्धरायाः भङ्गेन परावर्त्तनेन अभिरामं मनोहरं यथा तथा मुहुः वारं वारं दत्ता न्यस्ता दृष्टिः लोचनं येन सः, कियति दूरे रथी वर्त्तते इत्याशयेन असकृत् परिवृत्य विलोकयन् इत्यर्थः शरस्य वाणस्य पतनात् भयं तस्मात् हेतोः भूयसा बहुतरेण अपरः अर्द्धः शरीरस्य अंशः इति पश्चार्द्धः (अपरस्य पश्चाद्भावः वक्तव्यः) यद्वा पश्चात् अर्द्धः इति पश्चार्द्धः पृषोदरादित्वात् साधुः। तेन पश्चार्द्धेन पश्चाद्भागेन, पूर्व्वं कायस्य इति पूर्व्वकायः (एकदेशिसमासः "परवल्लिङ्गं द्वन्द्वतत्पुरुषयो" रिति पुंलिङ्गता) तं प्रविष्टः, अस्मिन्नेवांशे शरः पति-

यति इति. भयेन सङ्कुचितपश्चाद्भाग: इत्यर्थ: ; श्रमेण वेगेन गमनजन्यक्लेशेन विवृतं व्यात्तं मुखं आननं तस्मात् भ्रंशिभि: गलितैरित्यर्थ: अर्द्धं यथा तथा अवलीढ़ाः चर्व्विता: तै: दर्भै: कुशै: कीर्णं व्याप्तं वर्त्म मार्ग: येन यस्य वा तथोक्त: अयं मृग: उदग्रं प्लुतं यस्य तस्य भाव: उदग्रप्लुतत्वं तस्मात् वियति आकाशे बहुतरम् उर्व्वर्यां पृथिव्यां तु स्तोकम् अल्पमेव प्रयाति, पश्य विलोकय। प्रायश: अत्युत्कटलम्फेन गमनात् आकाशे एव बहुचणं गच्छति, पृथिव्यान्तु अल्पचणमेवेति तात्पर्य्यम्।

वयमित्यत्र अस्मदो द्वयोरिति बहुवचनम्।

विपूर्व्वात् यमे: क्विप् वियत्। अपर: अर्द्ध इति विग्रहे अपरस्य पश्चादेश: ; अत्र करणे तृतीया। चिनोते: घञि कायशब्दोनिष्पन्न: निवासचितिशरीरोपसमाधानेषु आदेश्च क:। उपसमाधानं राशीकरणम्। अवपूर्व्वात् लिहधातो: क्त: अवलीढ़: लिह लट् लेढ़ि, लङ् अलेट, लिट् लिलेह, लुङ् अलिचत्, अलिचत, अलीढ़। यङ लेलिह्यते।

स्यन्दधातो: भौवादिकात् आत्मनेपदिन: कर्त्तरि युच् (अनोवा) स्यन्दन: चलनशब्दार्थादकर्म्मकाद्द युच्। अयमित्यत्र कथम् प्रथमा विभक्ति:, पश्येत्यस्य कर्म्मत्वं कथं नाप्नोति इति वितर्के "अपादानसम्प्रदानकरणाधारकर्म्मणां कर्त्तुश्चान्योन्यसन्देहे परमेकं प्रवर्त्तते" इति वचनात् कर्त्तृत्वम्। यद्वा इति शब्दस्य अध्याहारेण सर्व्वमवदातम्। Where there arises any doubt as to what case should be used, that which follows has the prior claim. Mark the order.

Change of voice.—दत्तदृष्टिना...प्रविष्टेन...कीर्णवर्त्मना...प्रयायते।

तदेष मृग: कथम् अनुपतत: पश्चात् धावत: एव मे प्रयत्नेन आयासेन प्रेचणीय: दर्शनीय: संवृत्त: जात: कथं मे दूरवर्त्ती भूत: इत्यर्थ:। मे इत्यत्र कृत्यानां कर्त्तरि वा इति षष्ठी।

রাজা। সারথি, আমরা এই মৃগকর্ত্তৃক বহু দূরে আনীত হইয়াছি। এই মৃগ এখনও পশ্চাৎ ধাবিত রথে বারংবার গ্রীবা ফিরাইয়া সুন্দরভাবে দৃষ্টি নিক্ষেপ করিতেছে। বাণপতন ভয়ে ইহার পশ্চাদ্ভাগের অধিকাংশ শরীরের পূর্ব্বার্দ্ধে যেন প্রবিষ্ট হইয়াছে। দ্রুত গমনজন্য পরিশ্রমবশত: উন্মুক্ত আনন হইতে পতিত, অর্দ্ধ চর্ব্বিত কুশ দ্বারা ইহার পথ আকীর্ণ হইয়াছে ; এবং দেখ অতি উৎকট লম্ফ দিয়া গমন করাতে এ অধিকক্ষণ শূন্যে গমন করিতেছে, ভূপৃষ্ঠে অতি অল্পক্ষণ যাইতেছে।

আমি ইহার পশ্চাৎ অনুসরণ করিলেও ইহাকে দেখিবার জন্য আমাকে কেন আয়াস বা যত্ন করিতে হইতেছে। (অর্থাৎ আমি অনুসরণ করিলেও, এ আমা হইতে এত দূরে কিরূপে গমন করিল)?

King.—Charioteer, this antelope has drawn us far, (brought us

to a great distance.) Even now at the pursuing car he repeatedly casts his glance gracefully by bending the neck ; and, in fear of the fall of the arrow, has entered, as it were, with the hinder part of his body into the forepart. His path is strewn with half-chewed kusagrass falling from his mouth gasping on account of labour. And, behold ! by reason of high leaps he treads greatly on the sky and very little on the earth.

Pursuing though I am, how has he become hardly visible ? (that is to say, he has to be seen with effort or difficulty).

सूतः। आयुष्मन् भूमिः उद्घातिनी, अयं भूमिभागः क्वचिदुन्नतः क्वचिदवनतः। उत्पूर्व्वात् हन्तेः घञ् उद्घातः, तद्वः मत्वर्थीय इनिः। अतएव वेगेन गमनस्यासुकरत्वात् मया रश्मीनां प्रग्रहाणां (किरणप्रग्रहौ रश्मी इत्यमरः) संयमनात् आकर्षणात् रथस्य वेगः रयः मन्दीकृतः लघूकृतः। तेन च हेतुना मृगोऽयं विप्रकृष्टम् अन्तरं यस्य सः विप्रकृष्टान्तरः संवृत्तः। अस्य मृगस्य भवतो व्यवधानं अतिमहत् संवृत्तम्। मृगोऽयमतिदूरं प्रायात् इत्यर्थः। सम्प्रति इदानीं समे उद्घातरहिते देशे वर्त्तते यस्तस्य तव ऽयं दुरासदः दुर्लभः न भविष्यति। दुर्पूर्व्वात् आङ्पूर्व्वाच्च सीदतेः कर्म्मणि खल्‌न खलर्थानामिति षष्ठीनिषेधात् अत्र शेषे षष्ठी।

राजा। तेन तस्मात् हेतोः अभीषवः रश्मयः मुच्यन्ताम्। शिथिलीक्रियन्ताम्। भूयोपि रथस्य वेगं वर्द्धय इत्यर्थः। अभीषुः प्रग्रहे रश्मौ इति मेदिन्यमरौ। अभिपूर्व्वात् इष् धातोः कुः। मुचतेः कर्म्मणि अनुज्ञायां लोट्।

সূত। আয়ুষ্মন্, এই ভূভাগ উন্নতাবনত এইজন্য রশ্মি টানিয়া রথের বেগ মন্দ করিয়াছি ; সেই নিমিত্তই এই মৃগ অতি দূরবর্ত্তী হইয়াছে। এক্ষণে সমতলপ্রদেশবর্ত্তী আপনার পক্ষে এ দুর্লভ হইবে না।

রাজা। তবে রশ্মি ছাড়িয়া দাও।

Charioteer.—Long-lived prince, the ground here is "up and down" ; I have, therefore, drawing in the reins checked the speed of the car. Hence the distance of the deer (from us) has become very great. Now that you are passing over level ground, it will not be difficult to overtake him.

King.—Slacken, then, the reins.

सूतः। [रथस्य वेगं निरूप्य लक्षयित्वा]

मुक्तेषु इति—अन्वयः—

रश्मिषु मुक्तेषु निरायतपूर्व्वकाया: निष्कम्पचामरशिखा: निभृतोर्द्ध्वकर्णा:, आत्मोद्धतै: रजोभिरपि अलङ्घनीया:, अमी रथ्या: मृगजवाक्षमया इव धावन्ति ।

रश्मिषु प्रग्रहेषु मुक्तेषु शिथिलीकृतेषु सत्सु, यस्य च भावेन भावलक्षणमिति सप्तमी, नि:शेषेण आयता: विस्तारिता: पूर्व्वकाया: पूर्व्वं कायस्य इति विग्रहे पूर्व्व-काय: ("पूर्व्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति एकदेशिना सह तत्पुरुष:, षष्ठीसमासापवाद:) येषां ते निरायतपूर्व्वकाया: निष्कम्पा: स्थिरा: चामराणां (चमरशब्दात् अण्) चमराख्यानां मृगविशेषाणां पुच्छलोमभिर्निर्म्मितानां व्यजन भेदानां, भूषणार्थम् अश्वानां शिरसि बद्धानां, शिखा: अग्राणि येषां ते तादृशा: निभृतौ निष्पन्दौ ऊर्द्ध्वौ उन्नमितौ कर्णौ येषां ते तथोक्ता: आत्मभि: स्वै: उद्धतानि उत्क्षिप्तानि तै: आत्मोद्धतै: खुरोत्क्षिप्तै: रजोभि: पांशुभि: अपि अलङ्घनीया:, अनतिक्रमणीया: तेषामपि पूर्व्वगामिन: अमी रथं वहन्ति इति रथशब्दात् यत् तद् वहति रथयुगप्रासङ्गम् (स्त्रियान्तु प्रशस्ती राजमार्ग:) रथ्या: वाहा: मृगस्य पलायमानस्य हरिणस्य जवस्य वेगस्य अक्षमया इव, सोढ़ुमशक्ततया इव इति हेतूत्प्रेक्षा धावन्ति । स्वभावोक्तिरियम् ।

Change of voice.—निरायतपूर्व्वकायै: निष्कम्पचामरशिखै: निभृतोर्द्ध्वकर्णै: ...अलङ्घनीयै: अमीभि: रथ्यै: धाव्यते ।

সূত। আয়ুষ্মন্ যেরূপ আদেশ করেন [রথবেগ নিরূপণ করিয়া] আয়ুষ্মন্, দেখুন, দেখুন—

রশ্মি শিথিল করিয়া দেওয়ায়, নিশ্চলচামরশিখ, নিষ্পন্দোন্নতকর্ণ, স্বীয় খুরোৎক্ষিপ্ত ধূলিও যাহাদিগকে লঙ্ঘন করিতে পারিতেছে না ঈদৃশ, নিশ্চলপূর্ব্বকায়, এই অশ্বগণ মৃগের বেগে গমন সহ্য করিতে না পারিয়াই যেন ধাবিত হইতেছে।

Charioteer—What the long-lived king orders (I obey). [*Marking the speed of the car*] Long-lived prince, behold !

The reins being loosened, the steeds, with the forepart of their body outstretched, with motionless plumes (made of the bushy tail of chamara) on their head, and with still and erect ears, unsurpassed even by the dust raised by themselves, run, as if, jealous of the speed of the antelope.

राजा । सत्यं ध्रुवमित्यर्थ: उत्प्रेक्षाद्योतकमिदम् ; वाजिन: मदीया: अश्वा: हरित: सूर्य्याश्वान् हरीन् इन्द्राश्वान् च अतीत्य अतिक्रम्य, रंहसा न्यक्कृत्य, वर्त्तन्ते । तेभ्योऽपि वेगवत्तरा इत्यर्थ: । अतिद्रुतं धावन्तीति भाव: । हरति तम: स्वभासा इति हरित् इति यास्क: "हसृरुहियुषिभ्य इति:" हृधातो: औणादिक: इति: ।

N. B.—Professor Max Muller is of opinion that the word

हरित् is derived from a root ह्र, which is not in use now, but traces of which can still be found is words like ह्रणि and ह्रत &c. The root ह्र has succumbed to ह। The हरित्s correspond to the Greek *charites*. Literally the word हरित् means the shining; hence apart from mythology it means the rays of the sun. (रसहरणशीला: सूर्य्यरश्मय: इति सायण: But in the language of mythology it means the seven horses of the sun (the seven rays).

तथाहि यदिति—

यत् आलोके सूक्ष्मं तत् सहसा विपुलतां व्रजति, यत् अन्त: विच्छिन्नं तत् कृतसन्धानमिव भवति, यत् प्रकृत्या वक्रं तदपि नयनयो: समरेखं, रथजवात् (इति सर्व्वेषामन्वय:) किञ्चित् क्षणमपि मम पार्श्वे न नच दूरे।

यत् वस्तु आलोकेदर्शनविषये सूक्ष्मं कृशं दूरत्वात् इति भाव: तत् वस्तु सहसा हठात् विपुलतां स्थूलत्वं व्रजति प्राप्नोति ; दवीयस्त्वात् यदिदानीमपि कृशं लक्ष्यतेस्म अतिमहता रथरयेण क्षणेनैव निकटोपगमात् तत् विपुलं दृश्यते। यच्च अन्त: मध्ये विच्छिन्नं विभक्तं पदार्थान्तरेण व्यवहितत्वादिति भाव:,तत् कृतं सन्धानं संयोग: मिलनमिति यावत् यस्य तत् कृतसन्धानम् इव अविभक्तमिव भवति, अतिवेगेन गमनात् उभयप्रान्तयो: युगपदेव दर्शनादिति भाव:। यच्च प्रकृत्या स्वभावेन वक्रं कुटिलं भुग्नमिति यावत् तदपि नयनयो: चक्षुषो: समा तुल्या रेखा यस्य तत् समरेखं ऋजु प्रतीयते। रथस्य जवात् वेगात् किञ्चित्वस्तु क्षणं मुहूर्त्तमपि मम पार्श्वे न तिष्ठति नापि दूरे वर्त्तते। यत् पार्श्वे स्थितं तत् दूरं व्रजति, यच्च दूरस्थितं तत् समीपमायाति। अनुरूपोक्ति: भट्टौ—

"अथ पुरुजवयोगान्नेदयद्दूरसंस्थम्
दवयदतिरयेण प्राप्तमुर्व्वीविभागम्।"

Change of voice.—येन सूक्ष्मेण तेन विपुलता व्रज्यते। येन अन्तर्विच्छिन्नेन तेन कृतसन्धानेन भूयते इति शेष:।

सूत सारथे एनं मृगं व्यापाद्यमानं मया निहन्यमानं पश्य बाणपथवर्त्ती अयं क्षणेनैव मया हन्यते इत्यर्थ:।

व्यापाद्यमान:—व्याङ्पूर्व्वात् णयन्तात् पद्धातो: शानच् कर्म्मणि।

[शरस्य बाणस्य सन्धानं संयोगं नाटयति अभिनयति]

রাজা। সত্য সত্যই আমার অশ্বগণ বেগে সূর্য্য ও ইন্দ্রের অশ্বদিগকেও অতিক্রম করিয়াছে। কারণ—

যাহা দেখিতে সূক্ষ্ম তাহা রথের বেগহেতু বিপুলতা প্রাপ্ত হইতেছে, যাহা মধ্যে বিভক্ত তাহা পুনঃ সংমিলিত হইতেছে ; স্বভাবতঃ যাহা বক্র তাহা ঋজু বা সমরেখ বোধ হইতেছে ; এবং কোন বস্তুই মুহূর্ত্তের জন্য আমার পার্শ্বে থাকিতেছে না, বা দূরে রহিতেছে না। সারথি দেখ, আমি ইহাকে ব্যাপাদন করি। [ধনুকে বাণ যোজনার অভিনয় করিলেন]।

King.—In sooth, the horses (seem to) outstrip the coursers of the Sun and Indra.

For,—what to the view appeared minute suddenly assumes magnitude. What was severed in the middle (obstructed), seems to be joined together. What is really crooked appears straight to the eye. And because of the speed of the chariot, nothing is by my side for a moment or far from me. Charioteer, see the deer killed by me. [*Acts the part of taking aim*].

[नेपथ्ये—यवनिकान्तराले]

भो भोः इति स्पष्टम्—अत्र सम्भ्रमे द्विरुक्तिः—

"विवादे विस्मये हर्षे खेदे दैन्येऽवधारणे, प्रसादने सम्भ्रमे च द्विस्त्रिरुक्तं न दुष्यति।"

सूतः। [आकर्ण्य अवलोक्य च] वाणस्य सायकस्य पथि वर्त्तते यः तस्य, वाण-गोचरस्य कृष्णसारस्य तव च मध्ये कैचन तापसाः सम्प्राप्ताः।

राजा। [सम्भ्रमेण सह वर्त्तमानं तथा तथा ससम्भ्रमम्, मुनिगौरवात् व्यग्रं यथा तथा] तेन हि वाजिनः अश्वाः निगृह्यन्तां निरुध्यन्तां, निपूर्व्वात् ग्रहातेः कर्म्मणि लोट्।

सूतः। तथा, यदाज्ञापयसि तत्करोमि इत्यर्थः [रथं स्थापयति रश्मीनां संयमनात् अश्वानां निरोधेन रथं संयन्त्रयति]।

নেপথ্যে—

হে রাজন্ এই আশ্রমমৃগকে বিনাশ করিবেন না।

সূত। [শ্রবণ করিয়া এবং বিলোকন করিয়া] রাজন্! আপনার বাণের পথবর্ত্তী এই কৃষ্ণসার এবং আপনার মধ্যে কয়েকজন তপস্বী আসিয়া উপস্থিত হইয়াছেন।

রাজা। [ব্যস্ত হইয়া] অশ্বদিগকে নিরোধ কর।

সূত। তাহাই করিতেছি [রথ থামাইল]।

Behind the Scenes.

Don't, don't, O king, kill this deer of the hermitage.

Charioteer.—[*Listening and looking about*] Long-lived king,

some anchorites have come between the antilopes that is within the range of your arrow (and yourself).

King.—[*hastily*] Stop the horses, then.

Charioteer.—What you command (I obey) [*stops the car.*]

[ततः प्रविशति सशिष्यः वैखानसः ; शिष्यैः सह वर्त्तमानः वैखानसः, विखानसशब्दात् स्वार्थे अण्, वि + खन् + उ ; अन—असुन् (वाचस्पतिः) वानप्रस्थे तापसभेदे वैखानसशब्दस्य प्रवृत्तिः]

वैखानसः। [हस्तं उद्यम्य—उत्तोल्य—उत्पूर्व्वात् यमेः ल्यप्]

नेति—

मृदुनि अस्मिन् मृगशरीरे तूलराशौ अग्निरिव, वाणः न खलु सन्निपात्यः ; वत हरिणकानां अतिलोलं जीवितं क्व, निशितनिपाताः वज्रसाराः ते शराश्च क्व। १०

मृदुनि अतिकोमले अस्मिन् मृगस्य शरीरे देहे वाणः शरः, तूलानां राशौ पुञ्जे अग्निः अनलः इव, न खलु न खलु सन्निपात्यः न प्रयोक्तव्यः, खलु इति अनुनयार्थकं निषेधवाक्यालङ्कारजिज्ञासानुनये खलु ; अव सम्भ्रमे, प्रसादने वा द्विरुक्तिः। वतइति खेदे अव्ययम्, हरिणकानां अनुकम्पनीयानां मृगाणां अतिलोलं लक्षणया अतिसुकुमारमित्यर्थः जीवितं प्राणाः क्व, निशितः, शाच्छोरन्यतरस्यां इति इकारोऽन्तादेशःपक्षे निशातः। उग्रः निपातः येषां ते निशितनिपाताः वज्रस्य अशनेः सार इव सारः स्थिरांशो येषां ते वज्रसाराः अतिकठिनाः ते तव शराः सायकाश्च क्व। अनयो महद्द् वैषम्यं। नोभयं सङ्घटते। विषमालङ्कारः।

तत् साधुकृतसन्धानं सायकम् प्रतिसंहर वः शस्त्रं आर्त्तत्राणाय, अनागसि प्रहर्त्तुं न। ११

तस्मात् मृगे शरनिपातस्य अवैधत्वात्, साधु सम्यक् कृतं सन्धानं संयोजनं यस्य तं स्यति नाशयति इति सायकः स्यते ण्वुल् वाणः तं प्रतिसंहरः पुनरपि इषधौ निदेशय। वः युष्माकमस्त्रं आर्त्तानां विपन्नानां त्राणाय रक्षणाय, तादर्थ्ये चतुर्थी, तुमर्थाच्च भाववचनादिति वा, आर्त्तान् त्रातुमेव तव शस्त्रस्य उपयोगित्वम्। न सन्ति आगांसि अपराधाः यस्य तस्मिन् अनागसि निरपराधे प्रहर्त्तुं न, प्रहरतेराधारविवक्षया सप्तमी। प्रहर्त्तुं न अर्हमिति गतार्थत्वात् अर्हशब्दस्य न प्रयोगः तदर्थे उपपदे हरतेः तुमुन्।

सन्निपात्यः संनिपूर्व्वात् पातयतेः यत्।

निशितः शो तनूकरणे इति धातोः क्तप्रत्ययेन सिद्धम् पदमिदम्

पक्षे निशातः, व्रते तु नित्यम् यथा सशितव्रतम्

इण् + असुन् = आगस्, इण आगोऽपराधेच। पापापराधयोरागः इत्यमरः।

Change of voice.—साधुकृतसन्धानः सायकः प्रतिसंह्रियताम्। शास्त्रेण भूयते।

শী লট্ শ্যতি, লিট্ শশৌ ; লুঙ্ অশাত্, অশাসীত্ ণিচ্ শায়যতি। আর্ত্তঃ আঙ্ পূর্ব্বাত্ ঋচ্ছতেঃ ক্তঃ।

[তাহার পর শিষ্যের সহিত বৈখানস প্রবেশ করিতেছেন]

বৈখানস। [হস্ত উত্তোলন করিয়া] রাজন্ ! এই আশ্রমমৃগকে বধ করিবেন না, বধ করিবেন না।

তূলরাশিতে অগ্নিক্ষেপের ন্যায়, এই কোমল মৃগশরীরে বাণনিক্ষেপ করিবেন না, করিবেন না, হরিণশিশুদিগের কোমল জীবনই বা কোথায়, এবং উগ্রনিপাত বজ্র-কঠিন আপনার এই শরই বা কোথায়।

অতএব সম্যকরূপে সংযোজিত এই বাণ প্রতিসংহৃত করুন ; আপনার অস্ত্র বিপন্ন-দিগকে ত্রাণ করিবার জন্য, নিরপরাধীকে প্রহার করিবার জন্য নহে।

[*Enter a hermit with disciples*].

Hermit.—[*Raising his hand*]. Don't don't o king, kill this deer of the hermitage.

On the tender body of this fawn you should not let the arrow fall, like fire on a heap of cotton. Ah ! Where is the frail (delicate) body of young fawns, and where are your arrows having the hard-ness of the thunderbolt, falling sharply ? Restore, therefore, your well-aimed arrow to the quiver. Your weapon has to shield the oppressed and not to hurt the innocent.

राजा। एषः अयं बाणः प्रतिसंहृतः तूणीरे स्थापितः। [यथोक्तं करोति]।

वैखानस। पुरोः वंशः अन्वयः तस्य प्रदीपः, यशसा वीर्य्येण च प्रदीपवत् उद्भासकः तस्य पुरुवंशावतंसस्य तव एतत् सदृशं युक्तम्। अस्मद्वचोरक्षणं तव योग्यम्।

यस्य पुरोः वंशे जन्म तस्य तव इदं युक्तरूपम् एवं गुणोपेतं चक्रवर्त्तिनं पुत्रं आप्नुहि। १२

यस्य ते पुरोः तदाख्यस्य राजर्षेः वंशे जन्म तस्य तव इदं अस्मत्प्रार्थनापरिपूरणं युक्तरूपम् अतिशयेन युक्तं प्रशंसायां रूपप् इति उत्कर्षे रूपपप्रत्ययः। एवं ईदृशः विनयादयः गुणाः तैः उपेतं युक्तं एवंगुणोपेतं ईदृग्गुणशालिनं चक्रे नीतिशास्त्रोक्तानां द्वादशविधानां नृपाणां मण्डले वर्त्तते उत्कर्षेण तिष्ठति यस्तं चक्रवर्त्तिनम् सार्व्वभौमं पुत्रं आप्नुहि लभस्व। अनुरूपोक्तौ रघौ—"भवन्तमीड्यं भवतः पितेव"।

Change of voice.—अनेन युक्तरूपेण (भूयते) एवंगुणोपेतः पुत्रः चक्रवर्त्ती आप्यताम्।

রাজা। এই প্রতিসংহৃত হইল [প্রতিসংহরণ করিলেন]

বৈখানস। পুরুবংশের প্রদীপতুল্য আপনার ইহা উপযুক্ত।

এই কার্য্য পুরুবংশজাত আপনার অতিশয় উপযুক্ত হইয়াছে। আপনি এইরূপ গুণশালী চক্রবর্ত্তী পুত্র প্রাপ্ত হউন।

King.—It is withdrawn [*does as said*].

Hermit.—This is worthy of your Highness, the light of Puru's race.

This is highly worthy of you who are sprung from Puru's race. May you have a son possessing such virtues, who will rule over the whole world.

राजा। [प्रणामेन सह इति सप्रणामम् प्रणम्य इत्यर्थः] प्रतिगृहीतं, स्वीकृतम्। शिरसि धृतमित्यर्थः भवतः आशीर्व्वाक्यमिति शेषः।

वैखानसः। राजन् समिधां यज्ञकाष्ठानां आहरणाय समिदाहरणाय "स्वादिष्वसर्व्वनामस्थाने" इति पदसंज्ञायां "झलां जशोऽन्ते" इति धस्य दः। यज्ञकाष्ठानि आहर्त्तुमित्यर्थः तुमर्थाच्चभाववचनादिति चतुर्थी, तादर्थ्ये वां, प्रस्थिताः आरम्भे क्तः। काश्यपस्य गोत्रापत्यं पुमान् काश्यपः तस्य कुलपतेः—मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः। यथोक्तलक्षणोपेतस्य कण्वस्य मालिन्याः नद्याः तीरे इति अनुमालिनीतीरम् विभक्त्यर्थे अव्ययीभावः सामीप्ये वा। उभयत्रापि तृतीयासप्तम्योर्बहुलम् इति पक्षे अम्भावो न स्यात् तत्र पक्षे अनुमालिनीतीरे इत्येवं स्यात्। आश्रमः तपोवनं दृश्यते। चेत् यदि अन्यस्य कार्य्यस्य अतिपातः अतिक्रमः अत्यय इति यावत् न भवेत् तर्हि अत्र आश्रमे प्रविश्य, अतिथये साधुः इति आतिथेयः अतिथियोग्यः सत्कारः अपचितिः प्रतिगृह्यताम् स्वीक्रियताम्।

समिध्—इन्धी दीप्तौ इति धातोः क्विप्—काष्ठं दार्व्विन्धनं त्वेधः इध्ममेधः समित् स्त्रियाम्; लट् इन्धे, लिट् ईधे इन्धाञ्चक्रे......लुङ् ऐन्धिष्ट; क्तः इद्धः।

आतिथेयः—अतति सातत्येन गच्छति इति अतिथिः अतधातोः उणादिः इथिन्प्रत्ययः। यद्वा नास्ति द्वितीया तिथिर्यस्य सः अतिथिः तत्र हितः इति आतिथेयः पथ्यतिथिवसतिस्वपतेर्ढञ् (एय प्रत्ययः)।

सत् इति आदरार्थे अव्ययम् तत्पूर्व्वात् करोतेः घञ् सत्कारः।

अपिच रम्या इति—

अन्वयः—प्रतिहतविघ्नाः रम्याः तपोधनानां क्रियाः समवलोक्य मौर्व्वीकिणाङ्कः मे भुजः कियत् रक्षति इति ज्ञास्यसि। १३

प्रतिहताः निवारिताः विघ्नाः अन्तरायाः यासां ताः प्रतिहतविघ्नाः निर्व्विघ्नाः

रम्या: अङ्गवैकल्यरहिता: यथाशास्त्रमनुष्ठितत्वादिति भाव:। तपोधनानां तापसानां क्रिया: इज्या: समवलोक्य मूर्व्वा तृणविशेष: तन्निर्म्मिता ज्या मौर्व्वी मौर्व्वीज्याशिञ्जिनी गुण: इत्यमर:। तस्या: किण: स एव अङ्क: चिह्नं यस्य स: ज्याघर्षणजन्यचिह्नसनाथ:, विशेषणेनानेन राज्ञो महावीरत्वं सूचितं, मे भुज: बाहु: कियत् रक्षति पालयति इति ज्ञास्यसि। किंशब्दात् परिमाणे वतुप् कियिदंभ्यां वोध: इति वतुपो वस्य घ:। तवैव भुजबलेन रक्षिता मुनयो निष्प्रत्यूहमिज्यादिकमनुतिष्ठन्तीतिभाव:।

Change of voice.—ज्ञास्यते कियद्भुजेन मे रक्ष्यते मौर्व्वीकिणाङ्केन इति।

রাজা। [প্রণাম করিয়া] আপনার আশীর্ব্বচন প্রতিগ্রহণ করিলাম।

বৈখানস। রাজন্ আমরা যজ্ঞকাষ্ঠ আহরণের জন্য প্রস্থান করিতেছি। ঐ মালিনী-তীরে কুলপতি কাশ্যপের আশ্রম দৃষ্ট হইতেছে ; যদি অন্য কার্য্যের ব্যাঘাত না হয় তাহা হইলে আশ্রমে প্রবেশ করিয়া অতিথিযোগ্য পূজা গ্রহণ করুন। এবং তপোধনদিগের নির্ব্বিঘ্ন রমণীয় যজ্ঞাদি অবলোকন করিয়া, ধনুগু্ণসংঘর্ষজনিতকৃষ্ণচিহ্নান্বিত ত্বদীয় বাহু কি পরিমাণ রক্ষা করিতেছে ইহা জানিতে পারিবেন।

King.—[*with a bow*] I accept it (benediction.)

Hermit.—We are going, o king, to collect sacrificial woods. Here on the bank of the Malini, the hermitage of Kasyapa (a descendant of Kasyapa), the teacher and supporter of the thousand disciples, is seen. If other duties are not transgressed (or neglected), (be pleased to) enter and accept (the hermit's) hospitality.

And,—beholding the charming sacrifices performed without impediment by hermits whose riches is devotion, you will know what your arm scarred by the bow-string guards.

राजा। अपि प्रश्ने, गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि इत्यमर: तत्रभवान् कण्व: आश्रमे वर्त्तते किम्? सन्निहित इति दधाते: अविवक्षिते: कर्म्मणि कर्त्तरि क्त:।

वैखानस:। दुहितर कन्यां शकुन्तलां अतिथिसत्काराय, अभ्यागतानां पूजार्थं सन्दिश्य आदिश्य अस्या: शकुन्तलाया: प्रतिकूलं अननुकूलं प्रतीपपरिणामं इत्यर्थ: दैवं भाग्यं दिष्ट भागधेयमित्यमर: शमयितुं प्रतिकर्त्तुं निवारयितुमितियावत् सोमाख्यं तीर्थं पुण्यक्षेत्रं गत:।

अतिथिसत्काराय इति तादर्थ्ये चतुर्थी। अनुपसृष्टात् शमधातो: णिचिकृते शमयति, शामयति इति पदद्वयं भवति उपसृष्टात्तु नित्यह्रस्व: प्रशमयति। When the root शम is prefixed by any उपसर्ग, it has always the vowel short in the causal form ; otherwise its vowel becomes long alternately.

রাজা। কুলপতি আশ্রমে আছেন কি ?

বৈখানস। কন্যা শকুন্তলাকে অতিথিসৎকারের জন্য আদেশ করিয়া, শকুন্তলার প্রতিকূল দৈবের শান্তি করিবার জন্য সম্প্রতি সোমতীর্থে গিয়াছেন।

King —Is the chief of the Rishis at home ?

Hermit.—Having asked his daughter Sakuntala to entertain guests with hospitality, he has gone to Somatirtha to avert her unfavourable fate.

राजा। भवतु इति स्पष्टम्—सा शकुन्तला विदिता भक्तिः कण्वे अनुरागः यस्य तं विदितभक्तिं भावविहितभक्तिशब्देन सह समासे न पुंवद्भावप्रतिषेधः ; प्रियादिगणे पठितस्य भक्तिशब्दस्य विशेषणत्वं, साहचर्य्यात् कर्म्मविहितत्वमुन्नेयम् तेनैव समासे पुंवद्भावप्रतिषेधः। यद्वा विदितमिति सामान्ये नपुंसकम् तेन सह समासः कार्य्यः। मम भक्तिं विदित्वा इत्यर्थः महर्षेः कण्वस्य, विवक्षया षष्ठी महर्षये इति सम्यक्, कथयिष्यति, विज्ञापयिष्यति। In a compound of the बहुव्रीहि kind, if भक्ति (formed by the suffix क्ति in the भाववाच्य) becomes the last member of the compound, then the rule prohibiting the masculine form of the first member of the compound does not apply.

वैखानसः। साधयामः गच्छामः। प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते (नाटकादौ)।

राजा। सारथे अश्वान् वाजिनः नोदय प्रेरय पुण्यः पवित्रः आश्रमः तस्य दर्शनेन आत्मानं पुनीमहे, पवित्रीकुर्म्महे।

पूधातोः क्रैयादिकात् लटिरूपम्—लिट्—पुपाव, पुपुवे ; लुङ् अपावीत्, अपविष्टः क्तः पूतः, पवितः, नाशे तु पूनः।

রাজা। ভাল, তাঁহারই সহিত সাক্ষাৎ করি ; তিনি আমার ভক্তি অবগত হইয়া মহর্ষির নিকট বিজ্ঞাপন করিবেন।

বৈখানস। আমরা যাই [শিষ্যের সহিত নিষ্ক্রান্ত]

রাজা। সারথি, অশ্বগণকে চালাও, পবিত্র আশ্রম দর্শন করিয়া আত্মাকে পবিত্র করি।

King —Well, I will visit her. She knowing my reverence (for the hermit), will tell the sage of me.

Hermit.—We will depart. [*Exit with disciples*].

King.—Charioteer, urge on the horses ; we will purify ourselves by a sight of the holy hermitage.

सूत:। [भूय: पुनरपि रथस्य वेगं निरूपयति, लचयति, करोति इत्यर्थ:]।

राजा। [समन्तात् अव्ययमिदं, सर्व्वासु दिचु इत्यर्थ: विलोक्य] स्पष्टमन्यत्।

सूत:। कथमिव केन प्रकारेण ज्ञायते इवाव वाक्यालङ्कारे।

राजा। भातेर्डवतुप्रत्ययेन भवच्छन्द: सिद्ध: युष्मदर्थे प्रयुज्यते। इह अव तपोवने ; इदम्शब्दस्य सप्तम्यां सिद्धम् निपातनात्। हि अव अवधारणे।

नीवारा इति।

अन्वय:। शुकगर्भकोटरमुखभ्रष्टा: नीवारा: तरूणां अध: ; क्वचित् प्रस्निग्धा: उपला: इङ्गुलीफलभिदएव सूच्यन्ते। विश्वासोपगमात् अभिन्नगतय: मृगा: शब्दं सहन्ते। तोयाधारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किता:। १४

शुका गर्भे अभ्यन्तरे येषां तानि शुकगर्भाणि "गड्वादि: परा सप्तमी" इति सप्तम्यन्तस्य परनिपात:। (आकृतिगणोऽयं गड्वादि:) यद्वा शुका: गर्भ: अभ्यन्तरस्थ पदार्थ इत्यर्थ: येषां तानीति समानाधिकरणो वहुव्रीहि:। कोटराणि तेषां मुखेभ्य: अग्रभागेभ्य: भ्रष्टा: पतिता नीवारा: तरूणां वृचाणां अध: तले दृश्यन्ते इति शेष:। क्वचित् कुत्रचिद्भागे प्रस्निग्धा: स्नेहसद्भावात् चिक्कणा: मसृणा इति यावत् उपला: दृषत्खण्डा: इङ्गुलीनां (तापसतरूणां) वृचविशेषाणां फलानि भिन्दन्ति तैलार्थमितिभाव: (भिदे: क्विप्) इति इङ्गुलीफलभिद: एव सूच्यन्ते ज्ञाप्यन्ते। विश्वासस्य उपगमात् हिंसावृत्तेरभावात् विश्वस्तत्वात् इत्यर्थ:, तथाच भट्टौ "विशश्वसे पचिगणै: समन्तात्" भारवावपि, "इहवीतभयास्तपोऽनुभावाज्जहति व्यालमृगा: परेषुवृत्तिम्" ; अभिन्ना अव्याकुला यथाभ्यस्तमित्यर्थ: गति: सञ्चार: येषां ते मृगा: शब्दं रथस्य घर्घरध्वनिं अश्रुतपूर्व्वमपि सहन्ते ; तच्छ्रवणेन भीता नापयान्ति इत्यर्थ: तोयस्य जलस्य आधारा: तेषां तोयाधाराणां जलाशयानां पन्थान: इति तोयाधारपथा: "ऋक्पूरब्धूर्पथामानचे" इति समासान्त: अ:। वल्कलानां परिधेयभूतानां तरुत्वचां शिखाभ्य: अन्तेभ्य: निस्यन्दानां अनुविपर्य्यभिनिभ्य: स्यन्दतेरप्राणिषु इति षत्वप्रतिषेध: पाचिक:। प्रस्रुतजलानां रेखाभि: अङ्किता: चिह्निता दृश्यन्ते इति शेष: ; स्नानात् उत्तीर्णानां मुनीनां वल्कलान्तेभ्य: नि:सृतानां तद्रागरक्तानां सलिलानां धाराभिर्लाञ्छिता इत्यर्थ:। एषां लिङ्गानां तपोवने एव सद्भावात् तपोवनमिदमित्युन्नीयते इति भाव:। स्वभावोक्ति:।

Change of voice.—नीवारान्...भ्रष्टान्...(लचयामि)। प्रस्निग्धान्... सूचयति (इदं)...उपलान्। अभिन्नगतिभि: मृगै: शब्द: सह्यते तोयाधारपथै... रेखाङ्कितै: (भूयते)।

সূত। যাহা আজ্ঞা করিতেছেন [পুনর্ব্বার বেগে রথ চালাইতে লাগিল]।

রাজা। [চতুর্দ্দিক অবলোকন করিয়া] সারথি, যদিও-কেহ বলিয়া দিতেছে না, তথাপি ইহা তপোধনের আশ্রম ইহা বুঝিতে পারিতেছি।

সূত। কিরূপে ?

রাজা। তুমি কি দেখিতেছ না এই স্থানে নীবারধান্য শুকসনাথ বৃক্ষকোটরের মুখ হইতে ভ্রষ্ট হইয়া তরুতলে পতিত রহিয়াছে। কোনস্থলে স্নেহলিপ্ত মসৃণ প্রস্তরখণ্ড ইঙ্গুলীফলভেদক সূচিত হইতেছে। বিশ্বস্তভাবাপন্ন হওয়ায় মৃগগণ রথশব্দ সহ্য করিতেছে। জলাশয়ের পথ সকল (মুনিদিগের পরিধেয়) বল্কলপ্রান্ত হইতে বিগলিত জলধারায় অঙ্কিত।

Charioteer.—What the long-lived king commands (I obey). [*Drives the car again with velocity*].

King.—[*Looking around*], charioteer, that this is the hermitage of the sage whose riches is devotion is known (by me), even without being told.

Charioteer.—How so ?

King.—Don't you see ? Here—grains of rice fallen from the hollows of trees, within which are parrots, (lie scattered) beneath the trees. In some places smooth and polished slabs of stones are seen and known to be cleavers of the fruit of Inguli. The deer, from trust (in man), with unaltered pace, hear the (rumbling) noise (of the car). The paths of tanks (reservoirs of water) are marked with drops of water trickling down the ends of barks (used as vests .

सूत:। सर्व्वमुपपन्नम्—सर्व्वमेव युज्यते ; यत्भवान् आह तत् युक्तियुक्तमित्यर्थ:।

राजा। [स्तोकं अल्प दूरं गत्वा] तपस: वनं तव निवसन्ति ये तेषां उपरोध: पीड़ा मा भूत् इति हेतो: एतावति एव अत्रैव रथं स्थापय यावत् अवतरामि अवरोहामि। Cf. माभूदाश्रमपीड़ेति रघु:।

उपरोध:—उपपूर्व्वात, रुधे: घञ् ; रुध् लट् रुणद्धि, रुन्धे ; लिट् रुरोध, रुरुधे ; लङ् अरौत्सीत्, अरुधत, अरुद्ध।

अवतरामि—तृधातो: लटिरूपम्। लिट ततार, लुङ् अतारीत् ; क्त: तीर्ण:। मा भूदित्यत्र माङ् योगात् लुङ् ; अड़ागमश्चन भवति।

सूत:। प्रग्रहा: रश्मय: धृता: आकृष्य अवलम्बिता मयेति शेष: भवान् रथादवरोहतु।

राजा। [अवतीर्य्य] सूत, विनीत: अनुद्धत: वेश: यस्य तेन तादृशेन सता

तपोवनानि आश्रमपदानि प्रवेष्टव्यानि नाम। नाम कोपेऽभ्युपगमे विस्मये स्मरणे ऽपिच सम्भाव्यकुत्सापाकाम्यविकल्पेष्वपि दृश्यते इति मेदिनी। अभ्युपगमः स्वीकारः; नाव "सहेषाङ्गीकार"; अस्मिन्नर्थे नामशब्दोऽव प्रयुक्तः यद्वा अभ्यस्तस्य आचारस्य स्मरणात् अव नामशब्दः स्मरणार्थेवर्त्तते। इदं आयुधादिकं गृह्यताम् [सूताय—सारथये, सम्प्रदानविवचया चतुर्थी, अर्पयति] सूत यावदहं आश्रमवासिनः तापसान् प्रत्यवेच्य विलोक्य उपावर्त्ते प्रत्यागच्छामि तावत् वाजिनः अश्वाः आर्द्रं जलसिक्तं पृष्ठं येषां ते आर्द्रपृष्ठाः क्रियन्ताम्। पृष्ठे जलसेकेन अङ्गमर्द्दनादिना च अश्वानां परिश्रमविनोदः क्रियतामित्यर्थः।

সূত। সকলই যথার্থ।

রাজা। [অল্পদূর গমন করিয়া] তপোবনবাসিগণের ক্লেশ না হয় এই জন্য এই স্থানেই রথরক্ষা কর, আমি অবতরণ করি।

সূত। আমি রশ্মি (রাশ) ধরিয়াছি, আপনি রথ হইতে অবতরণ করুন।

রাজা। [অবতরণপূর্ব্বক] সারথি, বিনীতবেশে তপোবনে প্রবেশ করা কর্ত্তব্য। এইগুলি গ্রহণ কর [সারথিকে অলঙ্কার ও ধনু আনিয়া দিলেন] সূত, আমি আশ্রমবাসীদিগকে দেখিয়া যতক্ষণ প্রত্যাগত না হই ততক্ষণ অশ্বদিগের পৃষ্ঠ জলসিক্ত কর।

Charioteer.—All this is true (or right).

King.—[*Advancing a little*]. Let there be no disturbance of the hermitage. Stay the chariot here that I may descend.

Charioteer.—The reins are drawn in (Be pleased to) get down.

King.—[*Alighting*] Charioteer, hermitages should be entered in humble attire. Take this. [*Delivers his ornaments and bow to the charioteer*]. Charioteer, while I come back from visiting the inhabitants of the hermitage, let the horses be watered. (Literally,—let the horses have their back wet with water.)

राजा। [परिक्रम्य गत्वा अवलोक्य दृष्ट्वाच] इदं आश्रमस्य तपोवनस्य द्वारं प्रवेशमार्गं प्रविशामि [प्रविश्य निमित्तं शकुनं लक्षणं वाहुस्फुरणरूपं सूचयन् अभिनयन्] शान्तमिति, इदं आश्रमपदं शान्तं वाहुश्चस्फुरति, इह अस्य फलं कुतः। अथवा भवितव्यानां द्वाराणि सर्व्वत्र भवन्ति। १५

इदं आश्रमपदं आश्रमस्थानं पदंव्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु इत्यमरः शान्तं शमरसप्रधानम्; तपोनिरताः ऋषयः अत विद्यन्ते इत्यर्थः, वाहुः सव्येतरः भुजः च स्फुरति स्पन्दते। अत चशब्दः समुच्चयवचनः विरोधवचनश्च; तथाच रघौ, लक्ष्मान्तरा सावरणेऽपिगेहे योगप्रभावो न च दृश्यते ते। अस्य वाहुस्पन्दनस्य फलं दिव्यस्त्रीलाभरूपं इह आश्रमे कुतः सम्भवति न कुतोऽपि इत्यर्थः अथवा पचान्तरे भवितव्यानां

अवश्यम्भाविनां पदार्थानां द्वाराणि उपायाः सर्व्वत्रैव भवितुमर्हन्ति न तेषां आश्रमे कश्चित् व्याघातः।

"कोनाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमिष्टे"। भवभूतिः।

Change of voice.—अनेन आश्रमपदेन शान्तेन (भूयते); स्फुर्य्यते च बाहुना;...फलेन [भूयते]...द्वारैः – [भूयते]।

রাজা। [গমন করিয়া এবং অবলোকন করিয়া] এই আশ্রমের দ্বার, প্রবেশ করি। [প্রবেশ করিয়া এবং বাহুস্পন্দনরূপ নিমিত্ত অনুভব করিলেন এইরূপ অভিনয় করিয়া] শান্ত এই আশ্রম, অথচ আমার দক্ষিণ বাহু স্পন্দন করিতেছে, এস্থানে (দিব্য স্ত্রীলাভরূপ) ইহার ফল কিরূপে সম্ভব হয়। অথবা অবশ্যম্ভাবী বিষয়ের উপায় সর্ব্বস্থানেই হইয়া থাকে।

King.—[*Walking and looking about*]. This is the entrance to the hermitage. I will enter (it). [*Entering and feeling a sensation of throbbing in his arm*]—Calm is this hermitage; and yet my right arm throbs; how could its consequence be (or take place) here? Or the means of what are destined to be are possible everywhere.

राजा। [कर्णं दत्वा—आकर्ण्य इत्यर्थः] अयि इति आमन्त्रणपदं अत्र राजा आत्मानमेवामन्त्रयते; वृक्षाणां वाटिका इति वृक्षवाटिका तां पुष्पोद्यानमित्यर्थः दक्षिणेन वृक्षवाटिकायाः दक्षिणे भागे दक्षिणेन इति अव्ययम् दक्षिणशब्दात एनप्, एनबन्यतरस्यामदूरेऽपञ्चम्याः। इति सामीप्ये उत्तराधरदक्षिणशब्देभ्यः एनप् वा। पक्षे अतसुच् आतिश्च दक्षिणतः, दक्षिणात्। एनपाद्वितीया इति वृक्षवाटिकामित्यत्र द्वितीया, षष्ठी अपि सम्भवति। पुष्पोद्यानस्य दक्षिणे भागे सम्भाषणं इव श्रूयते, तर्हि तत्रैव गन्तुमुचितम्। [परिक्रम्य अवलोक्य च] एताः तापसकुमार्य्यः स्वासां प्रमाणस्य अनुरूपैः स्वप्रमाणानुरूपैः स्वशक्त्यनुरूपैः वृत्तिमात्रे सर्व्वनाम्नः इति पुम्वद्भावः। सेचनार्थाः घटाः सेचनघटाः शाकपार्थिवादिवत्समासः, तैः करणैः क्षुद्रेभ्यः वृक्षेभ्यः जलं दातुं इतएव अभिवर्त्तन्ते अत्रैवागच्छन्ति। [निपुणं अवधानेन सह, निरूप्य दृष्ट्वा] अहो इति विस्मयसूचकमव्ययम् आसां कन्यकानां दर्शनं मधुरं प्रीतिकरं नैवसुभगमित्यर्थः।

अनुक्तपुंस्कात् कन्याशब्दात् कप्रत्यये कन्याका, कन्यका, कन्यिका इति पदत्रयं भवति। "अभाषितपुंस्काच्च," आत् आचार्य्याणाम् इति सूत्रद्वयमत्रानुसन्धेयम्।

शुद्धान्तेति, यदि आश्रमवासिनः जनस्य इदं वपुः शुद्धान्तदुर्लभम् उद्यानलताः वनलताभिः गुणैः दूरीकृताः खलु। १६

यदि यतः इत्यर्थः आश्रमे वसति यः तस्य आश्रमवासिनः अरण्यसदः जनस्य इदं वपुः शरीरं शुद्धान्ते राज्ञः अन्तःपुरे अपि दुर्लभं ; अरण्यवासिनः असंस्कृतमपि एतत् कान्तिमत् शरीरं नैसर्गिकसौन्दर्य्येण राजान्तःपुरस्त्रीवर्गस्य भूषणादिभिरुत्कर्ष-मापादितमपि रूपं यदि न्यक्करोति इत्यर्थः । ततः उद्यानस्य लताः यत्नेन परिपालिताः अपि इति भावः वनस्य लताभिः गुणैः सौकुमार्य्यमाधुर्य्यादिभिः करणैः दूरीकृताः तिरस्कृताः खलु खल्विति निश्चये, वाक्यालङ्कारे वा निषेधवाक्यालङ्कारजिज्ञासानुनये खलु इत्यमरः । शुद्धान्तदुर्लभत्वस्य, उद्यानलतानां तिरस्करणस्य च ऐकरूप्यात् अत्र प्रतिवस्तूपमालङ्कारः । प्रतिवस्तूपमा साम्यात् वाक्ययोर्गम्यसाम्ययोः एकोऽपिधर्म्मः सामान्यः यत्र निर्द्दिश्यते पृथक् इति लक्षणम् ।

यावदिमां छायां अनातपं आश्रित्य प्रतिपालयामि अपेक्षे [विलोकयन् स्थितः]

নেপথ্যে—সখীদ্বয় এদিকে এদিকে—

রাজা। [কর্ণ দিয়া] বৃক্ষবাটিকার দক্ষিণদিকে আলাপের ন্যায় শুনা যাইতেছে ; এই দিকেই যাই (কিছুদূর গমন করিয়া এবং অবলোকন করিয়া) তপস্বিকন্যারা আপন আপন শক্ত্যনুরূপ জলকলস লইয়া ক্ষুদ্র ক্ষুদ্র বৃক্ষে জল দিবার জন্য এইদিকেই আসিতেছে (বিশেষরূপে দর্শন করিয়া) আহা, ইহাদিগের দর্শন কি মধুর ।

যদি এই আশ্রমবাসীজনের দেহ (সৌন্দর্য্য) রাজান্তঃপুরেও দুর্লভ তাহা হইলে বনলতা (স্বীয়) গুণে উদ্যানলতাকে পরাভূত করিয়াছে ।

এই ছায়ায় দাঁড়াইয়া অপেক্ষা করি (দাঁড়াইয়া দেখিতে লাগিলেন) ।

Behind the scenes.

This way friends, this way.

K ng.—[*Listening*] Hark ! Voices are heard to the right of the garden. I will go there. [*Walking and looking about*] Ah ! the maidens of the hermits are coming in this direction to water the plants (small trees) with watering-pots proportioned to their size (strength). [*Looking attentive ly a: them*] Oh ! How graceful is their appearance !

If the beauty (body) of an inhabitant of the hermitage is rare in the king's harem, surely do the wood-land :creepers outdo in virtues the creepers of the garden.

I will wait here, betaking myself :to this shade. [*Stands looking at them*].

[ततः उक्तमनतिक्रम्य इति यथोक्तं, व्यापारः कर्म्म यस्याः सा यथोक्तव्यापारा जलसेचनार्थं घटहस्ता, शकुन्तला, सखीभ्यां सह प्रविशति) ।

हण्ड, हञ्जे, हलाह्वाने नीचां चेटीं सखींप्रति इत्यमरवचनात् हलेति सख्या आमन्त्रणपदम्। अयि शकुन्तले एषु आश्रमपादपेषु पितुः कन्वस्य यावान् स्नेहः त्वयि तु तावान्नेति शङ्के, कुत एतदिति चेत् तर्हि ब्रवीमि—यतः सः नवमल्लिकापुष्पवत् सुकुमाराङ्गीमपि त्वामेषां वृक्षाणामाधारवन्धस्य जलैः परिपूरणे नियुक्तवान्।

अम्भसां यत्र धारणम्। स्यादालवालमावालमावापः इत्यमरः आसमन्तात् लवं (जलविन्दुं) आलाति इति आलवालम्। (आ + लव + आ + ला—क) त्वत्तः इत्यत्र पञ्चमी विभक्ते—इति पञ्चमी। Where distinction is intended that from which something is distinguished takes the fifth case-ending.

शकुन्तला। पितुराज्ञया केवलमेतान् न सिञ्चामि, किन्तु भ्रातृषु यः स्नेहः स मम एतेषु अस्ति। तत्स्नेहपारवश्यात् अपि सिञ्चामि।

समाने उदरे शयितः सः सोदर्य्य, पक्षे समानोदर्य्यः बहुव्रीहौ समानस्य पक्ष सादेशः—"विभाषा उदरे" [नाट्येन सिञ्चति जलसेकं नाटयति]। In a compound of the बहुव्रीहि kind, the word समान is optionally changed into स, when compounded with उदर having the affix यत् added to it. But the word सोदर is derived from सह and उदर; where सह means सदृश। Later grammarians derive सोदर from समान and उदर; they hold that समान is changed into स when उदर follows it in a बहुव्रीहि compound.

(তাহার পর পূর্ব্বোক্তব্যাপাররত শকুন্তলা সখীদ্বয়ের সহিত প্রবেশ করিলেন)

শকুন্তলা। সখীদ্বয় এদিকে এস, এদিকে এস।

অনসূয়া। সখি শকুন্তলে, আমার বোধ হইতেছে আশ্রম-বৃক্ষগুলি তোমা অপেক্ষাও তাত কণ্বের প্রিয়তর। যেহেতু নবমল্লিকাকুসুমের ন্যায় কোমলাঙ্গী তোমাকেও তিনি ইহাদের আলবালপূরণে নিযুক্ত করিয়াছেন।

শকুন্তলা। কেবল পিতার আদেশ এমন নহে, ইহাদের প্রতি আমার ভ্রাতৃস্নেহ ও আছে। [জলসেচন অভিনয় করিলেন]।

[*Then enter Sakuntala with her two friends, employed in the aforesaid manner*].

Sakuntala.—This way, my friends, this way.

Anasuya.—Dear Sakuntala, methinks, these trees of the hermitage are more dear to father Kanwa than you. Because you

delicate as the jasmine flower, have been employed in filling the trenches round them.

Sakuntala.—Not that is my father's command alone; but I have affection for them as for a brother. [*Act the part of watering the plants*].

राजा। कथमियं सा कण्वस्य दुहिता। सभवान् इति तत्रभवान् सहसुपा इति समास:, इतराभ्योऽपि दृश्यते इति प्रथमाया: त्रप्रत्यय:। In विभक्ति other than the सप्तमी the suffix त्र is seen (to be used). अत्रभवान्, तत्रभवान् पूज्ये। पूज्य: स काश्यप: कण्व: न साधु सम्यक् पश्यति य: स: असाधुदर्शी य: इमां शकुन्तलां आश्रमस्य धर्म्मे तपश्चरणे इत्यर्थ: नियुङ्क्ते रौधादिकात् युजे: लटिरूपम—स्वराद्यन्तोपसर्गादिति वक्तव्यम् इति आत्मनेपदम्। With prefixes (उपसर्ग) beginning with or ending in vowels, the root युज् takes the आत्मनेपद। "यच्छब्दस्य उत्तरवाक्यगतत्वे नोपादाने सामर्थ्यात् पूर्व्ववाक्ये तच्छब्दस्यार्थत्व" अतएवात्र पूर्व्ववाक्ये तच्छब्दस्य न पृथक् ग्रहणम्।

इदमिति—अव्याजमनोहर इदं वपु: तप: क्षमं साधयितुं य इच्छति स ऋषि: ध्रुवं नीलोत्पलपत्रधारया शमीलतां छेत्तुं व्यवस्यति। अव्याजेन व्याजं छलं अन्तरेणैव आहार्य्यशोभां विनैव इत्यर्थ: मनोहरं इति अव्याजमनोहरं निसर्गसुन्दरं इदं वपु: शरीरं क्षमते इति क्षमं (पचाद्यच् इति अच्) योग्य तपस: क्षमं तप:क्लेशसहनसमर्थं साधयितुं कर्त्तुं य: इच्छति अभिलषति, स ऋषि: मुनि: कण्व: ध्रुवं निश्चितमेव नीलमुत्पलं तस्य पत्रं तस्य धारा तया शमीलतां सक्ने शाखालते इत्यमरवचनात् शमीवृक्षस्य शाखां छेत्तुं कर्त्तितुं व्यवस्यति उद्यच्छते। कोमलोत्पलदलेन शमीशाखाच्छेदनमिव शकुन्तलया सुकुमाराङ्ग्या तपश्चरणमतीव दुष्करं कर्त्तुमीहते अतो नायं समीक्ष्यकारीति भाव:। असम्भवन् वस्तुसम्बन्ध: उपमापरिकल्पक: इति लक्षणात् अत्र निदर्शनालङ्कार:।

Change of voice—येन इष्यते तेन ऋषिणा व्यवसीयते।

भवतु इति, पादपै: पादै: मूलै: पिबन्ति रसमाकर्षन्ति ये ते पादपा: तै: वृक्षै: अन्तरित: प्रच्छन्नविग्रह: एव विस्रब्धं स्वस्था: छन्दत: वर्त्तमानां एनां शकुन्तलां पश्यामि। [तथाकरोति]।

N. B.—This act of the king was rather unbecoming. The poet, however, is not to blame for it. He has drawn the picture of a noble king; but he never forgets that his hero is a human being. Like other men, the hero has his shortcomings,

and obeys the impulses of his youthful nature, when the worm is already working within him.

রাজা। ইনি কি সেই কণ্বদুহিতা শকুন্তলা? পূজনীয় কাশ্যপের বিবেচনা নাই, তিনি ইহাকে আশ্রমধর্ম্মে নিযুক্ত করিয়াছেন।

এই প্রকৃত সুন্দর দেহকে তপস্যার যোগ্য করিতে যিনি ইচ্ছা করেন, নিশ্চয় সেই ঋষি নীলোৎপলের পত্রদ্বারা শমীবৃক্ষের শাখাচ্ছেদনে উদ্যুক্ত।

ভাল, বৃক্ষের অন্তরালে লুকাইয়া স্বচ্ছন্দভাবে বিচরণশীলা ইহাকে বিলোকন করি। (সেইরূপ করিলেন)।

King—Can this be the daughter of Kanwa?; This respectable descendant of Kasyapa, Kanwa, must be wanting (literally, not good) in judgment, who lays on her the practices of the hermitage, (literally, who employs her in the practices of the hermitage).

The sage who wishes to make this artlessly graceful form capable of penance, surely attempts to cut a branch of the Sami-tree with the edge of a blue lotus-leaf.

Well, concealed by the trees, I will see her free from all formalities (stood upon in the presence of a stranger). [*Does the same*].

शकुन्तला। सखि अनसूये, अत्यर्थं पिनद्धेन इदं बद्धेन वल्कलेन कारणेन प्रियंवदया नियन्त्रिता पीड़िता अस्मि, अतः एतत्वल्कलं शिथिलं कुरु।

अपिपूर्व्वात् नहधातोः क्तः पिनद्धः, वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति अकारलोपः पाक्षिकः। नह् लट् नह्यति, नह्यते ; लिट् ननाह, नेहे ; लुङ् अनात्सीत्, अनद्ध। Bhaguri, a grammarian. wishes the elision of the अ of अपि and अव।

नियन्त्रिता—यन्त्रशब्दात् तत्करोति तदाचष्टे इति णिच्, ततः कर्म्मणि क्तः। यमेः ष्ट्रन् इति यन्त्रम्।

शिथिलय—शिथिलशब्दात् णिच् ततः लोटिरूपम्।

अनसूया। [शिथिलयति]।

प्रियंवदा। विपूर्व्वात् स्तृधातोः णिचि तन्प्रत्यये क्लीविरूपम्। यूनः भावः इति यौवनं युवादित्वात् अण्। उपालभस्व, तिरस्कुरु, भर्त्सय इति यावत्।

শকুন্তলা। সখি অনসূয়ে, প্রিয়ংবদা অতি দৃঢ়রূপে বন্ধন বাঁধিয়া দিয়াছে এইজন্য যন্ত্রণা পাইতেছি, বন্ধন শিথিল করিয়া দাও।

অনসূয়া। আচ্ছা (শিথিল করিয়া দিলেন)।

প্রিয়ংবদা। এ বিষয়ে স্তনের বিস্তৃতিসম্পাদক আপনার যৌবনকে তিরস্কার কর।

Sakuntala.—Dear Anasuya, I have been pained by Priyambada, having drawn this piece of bark (used as vest) too tightly about me. Loosen it.

Anasuya. - I will, [*loosens it*].

Priyambada —In this matter, blame rather your youthfulness which has rendered your bosom full (literally, expanded your breast).

N. B, Observe, the skilful dramatist lets the characters speak for themselves. Anasuya, a meek maid, does what she is requested to do. But Priyambada would not let matters pass in this smooth way. She retorts the charge laid at her door with a ready wit. With one stroke of the pen the masterly hand has revealed the difference between the two companions of the heroine.

राजा। काममिति—अस्याः शकुन्तलाया वयसः तारुण्यस्य कामम् अत्यर्थं अननुरूपं सर्व्वथा असदृशमपि इदं वल्कलं अलङ्कारस्य भूषणस्य श्रियं शोभां न पुष्यति, न वर्द्धयति इति न अपितु वर्द्धयत्येव। सम्भाव्यनिषेधनिवर्त्तने नञ्द्वयमिति वामनः। कुतः—सरसिजमिति।—शैवलेनापि अनुविद्धं सरसिजं रम्यम्। मलिनमपि लक्ष्म हिमांशोः लक्ष्मीं तनोति; इयं तन्वी वल्कलेनापि अधिकमनोज्ञा, मधुराणां आकृतीनां किमिव मण्डनं न। १८

शैवलेन जलजातेन तृणभेदेन अनुविद्धं अन्तरा अन्तरा ग्रथितं संसक्तं वा सरसि। कासारे जायते यत् तत् सरसिजं कमलं रम्यं मनोहरम्। मलिनमपि लक्ष्म चिह्नं कलङ्क इति यावत् हिमाः तुहिनाः अंशवः किरणाः यस्य तस्य हिमांशोः चन्द्रस्य लक्ष्मीं शोभां तनोति विस्तारयति इयं तन्वी कृशाङ्गी शकुन्तला वल्कलेनापि, अनुपादेयेन इति अपेरर्थः वृक्षत्वगूपपरिधेयेन अधिकं मनोज्ञा इति अधिकमनोज्ञा सुप्सुपेति समासः अधिकसुन्दरी। मधुराणां स्वभावतः सुन्दरीणां आकृतीनां किमिव मण्डनं भूषणं न। अपितु सर्व्वमेव भूषणतां प्रपद्यते. वक्ष्यति चाग्रे अहो सर्व्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम् इति। विशेषेण सामान्यसमर्थनम् अर्थान्तरन्यासः। अत्र श्लोके द्वितीयचरणस्य रचनायां क्रमो न रक्षितः इति केचिन्मन्यन्ते तेषां मते सः अन्यथा, घटयितव्यः। तद्यथा—विधुरपि परिभिन्नो लक्ष्मणा लोभनीयः।

Change of voice.—सरसिजेन अनुविद्धेन...रम्येण (भूयते) मलिनेनापि...

लक्ष्मणा लक्ष्मीः तायते तन्यतेवा। अनया अधिकमनोज्ञया...तन्वा भूष्यते केन मण्डनेन न भूष्यते इति शेषः।

अनुविद्धम्—अनुपूर्व्वात् व्यधधातोः क्तः ; व्यध लट् विध्यति, लिट् विव्याध ; लुङ् अव्यात्सीत्।

सरसि जायते इति सप्तम्यां जनेर्डः तत्पुरुषे कृतिबहुलम् इति सप्तम्याः वैभाषिकः अलुक्। The root जन् takes the affix ड, when it is preceded by a noun in the seventh case. In such compounds of the तत्पुरुष kinds as favour the taking place of कृदन्त suffixes, the विभक्ति of the उपपद noun is sometimes elided, sometimes retained and sometimes optionally elided.

রাজা। এই বল্কল ইহার বয়সের অত্যন্ত অযোগ্য হইলেও অলঙ্কারের শোভা সম্পাদন করিতেছে না এমন নহে। যেহেতু—শৈবলের সহিত গ্রথিত কমলও রমণীয় দেখায়, মলিন ও কলঙ্ক হিমাংশুর শোভা বর্দ্ধন করে; এই তন্বঙ্গী বল্কলেও অধিক সুন্দরী। স্বভাবতঃ সুন্দর আকৃতির পক্ষে কোন্ পদার্থ ভূষণ না হয়?

King.—That this bark, though quite ill-suited to her age, does not display the beauty of an ornament, is not (true). Because, the lotus entwined even with the Saivala is beautiful; the black spots enhance the beauty of the cold-rayed moon. This maiden of slim limbs in her dress of bark is all the lovelier. What there is that is not an ornament to forms really graceful?

N. B.—This is an instance of Poetic Induction. This stanza is an illustration of the Law of Relativity.

शकुन्तला वातेन ईरिताः सञ्चलिताः पल्लवा एव अङ्गुल्यः ताभिः केसरवृक्षकः ह्रस्वार्थे कन् वकुलवृक्षः मां त्वरयति, सत्वरं यातु आह्वयतीव, एनं वृक्षं सम्भावयामि मानयामि जलेन सिञ्चामि इत्यर्थः अङ्गुलीसञ्चालनेनाह्वानं प्रसिद्धम्।

ईरधातोः क्तः ईरितः ; ईर लट् ईरयति, लिट् ईरयामास... लुङ् ऐरिरत्। त्वर णिच् त्वरयति घटादित्वात् ह्रस्वः। त्वर् लट् त्वरते, लिट् तत्वरे, लुङ् अत्वरिष्ट ; क्तः तूर्णः त्वरितः।

प्रियंवदा। शकुन्तले क्षणमेव वकुलतले तिष्ठ त्वया मिलितोऽयं केसरः लतया आश्रितः इव शोभते इत्यर्थः। लतया सनाथः इति तृतीयातत्पुरुषः।

शकुन्तला। प्रियं मधुरं वदति या सा, इति वदेः खच्। प्रियवशे वदः खच्।

শকুন্তলা। [অগ্রভাগে দৃষ্টিপাত করিয়া] এই ক্ষুদ্র বকুল বৃক্ষটি বায়ুসঞ্চালিত

পল্লবরূপঅঙ্গুলী দ্বারা আমাকে ত্বরিত যাইবার জন্য যেন আহ্বান করিতেছে ; ইহাকে সম্মানিত করি [গমন করিলেন]।

প্রিয়ংবদা। শকুন্তলে এইস্থানে মুহূর্ত্তকাল অপেক্ষা কর ; তুমি সমাগত হওয়ায় এই বকুল বৃক্ষ লতা দ্বারা বেষ্টিতের ন্যায় শোভা পাইতেছে।

শকুন্তলা। এই জন্যই তুমি প্রিয়ংবদা।

Sakuntala.—(*Looking forwards*).—Yonder Kesara tree with its finger-like twigs waved by the breeze, urges me, as it were, forward. I will honour it (attend to it) [*walks*].

Pr yambada.—Dear Sakuntala, stay here for a moment ; for you being here, the tree seems to be wedded, as it were, to a creeper.

Sakunta'a.—And for this reason you are (named) Priyambada, (speaker of sweet and flattering things).

राजा। प्रियंवदा शकुन्तलां मधुरमपि तथ्यं सत्यमाह। हितं मनोहारि च दुर्लभं वचः इत्युक्तेः प्रायेण प्रियवचनस्य असत्यत्वसिद्धेः प्रियेण तथ्यस्य विरोधः अपिःकारेण द्योत्यते। तथा अनपेतमिति तथा यत् तथ्यं। अस्याः खलु अधरः किसलयरागः, वाहू कोमलविटपानुकारिणौ, कुसुममिव लोभनीय यौवनं अङ्गेषु सन्नद्धम्।

अस्याः शकुन्तलायाः अधरः किसलयस्य नवपल्लवस्य इव रागः रक्तिमा यस्य सः किसलयमिव अधरः इत्यर्थः। वाहू भुजौ कोमलौ ललितौ विटपौ शाखे अनुकुरुतः इति कोमलविटपानुकारिणौ सुप्यजातौ ताच्छील्ये णिनिः, सुकुमारशाखासदृशौ ; कुसुममिव लोभनीयं चित्ताकर्षकं, रमणीयादिवत् कर्त्तरि अनीयप्रत्ययेन निपातनात् सिद्धम् लोभनीयमिति पदम्, यौवनं तारुण्यं अङ्गेषु गात्रेषु सन्नद्धम् उज्जृम्भितम् आविर्भूतमित्यर्थः। अतो लतया सह यत्शकुन्तलाया प्रतिविम्बनं प्रियंवदया कृतं तन्नायुक्तमिति तात्पर्य्यम्। उपमालङ्कारः। १८

রাজা। প্রিয়ংবদা শকুন্তলাকে প্রিয় অথচ সত্যকথা :বলিয়াছে—ইহার অধর অচিরোদ্গত পল্লবের ন্যায় আতাম্র, বাহুদ্বয় কোমলশাখাসদৃশ, এবং কুসুমের ন্যায় মনোহর যৌবন সর্ব্বাঙ্গে বিকাশ পাইতেছে।

King.—Priyambada has told Sakuntala a truth though a compliment.

Her lip has the ruddiness of a fresh, grown sprig ; the arms imitate tender boughs, and youth alluring as flower has pervaded her body.

अनसूया। स्वयं वृणुते या सा स्वयंवरा, संज्ञायां भृतृवृ इत्यादिना खच् स्त्रियामाप् स्वयंवरा चासौ वधूश्चेति स्वयंवरवधूः सहकारस्य आम्रस्य—वनस्य

अरण्यस्य ज्योत्स्ना ज्योत्स्नातमिस्रेत्यादिना ज्योतिषउपधालोप: नश्च प्रत्यय: वनज्योत्स्ना इति त्वया कृतं नामधेयं यस्या: सा नवमालिका लता किमेनां विस्मृतासि विस्मृतवती भवसि ; ज्ञानार्थस्यापिगत्यर्थे पर्य्यवसानात् कर्त्तरि क्त: यद्वा आदिकर्म्मणि कर्त्तरि क्त: । अस्या अपि सम्भावनं न्याय्यमिति भाव: ।

तदेति आत्मन: विस्मरणमिव वनज्योत्स्नाया: विस्मरणं दुष्करं आत्मनि इव अस्यां मे प्रीतिरिति भाव: । व्यतिकर: समागम: मिलनमिति यावत् । मिथुनं द्वन्द्वं ; स्त्रीपुंसयुगलमित्यर्थ: । नवं कुसुममेव यौवनं यस्या: सा नवकुसुमयौवना । यौवनेनेव कुसुमेनालङ्कृता वनज्योत्स्ना । बद्धा: सम्भूयजाता: कृत्यर्थ: पल्लवा यस्य तस्य भाव: तत्ता तया, सञ्जातकिशलयतया ; उपभोगस्य क्षम: समर्थ: । अङ्कैरिव पल्लवै: परिपुष्टतया भोगसमर्थ: सहकार: । [शोभासन्दर्शनेन विस्मयरसाप्लुता पादपमिथुनं विलोकयन्ती तिष्ठति] । The sentiments breathed in this speech show that Sakuntala was not a girl ; she was fast advancing to be a youthful woman.

অনসূয়া। সখি শকুন্তলে তুমি যাহার বনজ্যোৎস্না নাম দিয়াছিলে,—সহকার বৃক্ষের স্বয়ম্বরবধূ সেই এই নবমালিকা লতা; ইহাকে কি ভুলিয়াছ ?

শকুন্তলা। তাহা হইলে আপনাকেও ভুলিয়া যাইব। [লতার নিকট গমন করিয়া এবং অবলোকন করিয়া] সখি অতি সুন্দর সময়ে এই লতাপাদপযুগলের সমাগম হইয়াছে, বনজ্যোৎস্না নবকুসুমরূপযৌবনে শোভিত ; এবং সহকারপল্লবশোভিত হওয়ায় উপভোগ সমর্থ।

Anasuya.—Dear Sakuntala, here is the jasmine, named by you, "Vanajyotsna," the Moonlight of the grove, the self-elected wife of the mango tree. Have you forgotten it ?

Sakuntala.— Then I will forget myself [*going to the plant and seeing it.*] The union of this couple, the jasmine and the mango tree, has taken place in a delightful season. The blossoms of the Moonlight of the grove is her blooming youth ; and the mango tree, with its newly put-forth sprouts, is capable of enjoying. [*Stands looking at it.*]

प्रियंवदा । किंनिमित्तं शकुन्तला चूतसङ्गतां नवमालिकां अतिमुक्तेन सह पश्यति तदवधारयसि किं ?

अनसूया । न खलु विभावयामि कथय । नाहंहेतुमवधारयामि ।

प्रियंवदा । अनुरूपं योग्यं ; वरं वोढ़ारम् स्वामिनमिति यावत् । आद्य: अपि: प्रश्ने ; द्वितीय: समुच्चये । नाम सम्भावनायां लिङपि ।

शकुन्तला। अयं ते मामधिकृत्य स्वकीयः अभिलाषः न मम। [आवर्ज्जयति सेचनार्थं अवनमयति]।

প্রিয়ংবদা। অনসূয়ে, শকুন্তলা বনজ্যোৎস্নাকে আগ্রহের সহিত কেন দেখিতেছে জান কি ?

অনসূয়া। আমি স্থির করিতে পারিতেছি না ; তুমি বল।

প্রিয়ংবদা। বনজ্যোৎস্না যেরূপ যোগ্যপাদপের সহিত মিলিত হইয়াছে আমিও সেইরূপ উপযুক্ত বর প্রাপ্ত হইব কি ? (এই ভাবিয়া)।

শকুন্তলা। নিশ্চয়ই এ তোমার নিজমনোরথ [জল ঢালিবার জন্ম কলস নত করিলেন]।

Priyambada.—Anasuya, do you know why Sakuntala looks so intently at the jasmine.

Anasuya —No, I cannot imagine it. Tell it.

Priyambada.—"As the jasmine is united with a suitable tree, so may I too get a husband becoming me"?

Sakuntala. —Surely this is your own wish. [*Bends the pitcher down.*]

राजा। इयं शकुन्तला कुलपतेः कण्वस्य समानः वर्णः यस्य तत् सवर्णं, ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु इति बहुव्रीहौ समानस्य सादेशः, तन्नभवति इति असवर्णं क्षेत्रं पत्नी तस्मात् सम्भवः उत्पत्तिः यस्याः सा असवर्णक्षेत्रसम्भवा, ब्राह्मणेतरवर्णस्त्रीसम्भूता भवेत् किम्, अथवा संशयेन कृतं अलम्, कृतमिति निषेधे अव्ययम् गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीया संशयेन इत्यव। क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोरिति मेदिनीविश्वप्रकाशौ।

असंशयमिति—असंशयं (इयं) क्षत्रपरिग्रहक्षमा, यदार्य्यं मे मनः अस्यां अभिलाषि सन्देहपदेषु वस्तुषु सतां अन्तःकरणप्रवृत्तयः प्रमाणं हि। २०

संशयस्य अभावः इति असंशयम् (अर्थाभावेऽव्ययीभावः) यद्वा नास्ति संशयः सन्देहः यस्मिन् कर्म्मणि तत् यथा तथा इयं शकुन्तला क्षत्रस्य क्षतः नाशात् त्रायते इति क्षत्रः तस्य परिग्रहः "परिग्रहः कलत्रे च मूलस्वीकारयोरपि, शपथे परिवारे च राहुवक्त्रस्थभास्करे" इत्यजयः। पत्नी तस्य क्षमा योग्या नूनमियं क्षत्रपत्नी भवितुं अर्हति। यत् यस्मात् हेतोः आर्य्यं शुद्धशीलं कदापि नोत्पथप्रवृत्तमित्यर्थः मे मनः अस्यां शकुन्तलायां अभिलाषि साभिलाषं एनां वोढ़ुमिच्छु इत्यर्थः। मनसः आर्य्य॰ परिग्रहक्षमत्वाक्षमत्वनिर्णये प्रमाणमित्याह सतामिति सन्देहस्य पदानि स्थानानि तेषु सन्देहपदेषु संशयाश्रितेषु वस्तुषु कार्य्यं अकार्य्यं वेति संशयभाजनेषु विषयेषु इत्यर्थः सतां साधूनां कर्त्तव्यनिष्ठानां महतां अन्तःकरणस्य चेतसः प्रवृत्तयः

-गतय: प्रमाणम्—सन्देहनिरासाय प्रकल्पन्ते इत्यर्थ:। साधूनां चेतो यत्र वलते तदेव कार्य्यमिति तात्पर्य्यम्। अर्थान्तरन्यास: अलङ्कार:।

अत्र मनु:—वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदां।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥

एकेनैव प्रमाणेन सन्देहस्य सम्यङ्निवृत्तेरभावात् प्रमाणान्तरानुसन्धितसा एव समीक्ष्यकारित्वमिति ज्ञापयितुमाह तथापीति—अस्या: मत्परिग्रहक्षमत्वे निर्णीते सत्यपि तत्त्वत: अञ्जसा याथार्थ्येनेतियावत् एनां उपलभ्य ज्ञास्यामि। ब्राह्मणेतर-वर्णस्त्रीसम्भूता इयंनवेति निरूपयिष्यामि। तत्त्वत: इत्यत्र तृतीयाया: तसि:, प्रकृत्यादिभ्यश्चेति तृतीया। अभिलाषि—अभिलाष: विद्यते यस्य तत् मत्वर्थीय: इनि:।

রাজা। ইনি কুলপতির কোন অসবর্ণ পত্নী হইতে উৎপন্ন হইয়াছেন কি: অথবা সন্দেহে প্রয়োজন নাই।

নিশ্চয়ই ইনি ক্ষত্রিয় কর্ত্তৃক বিবাহের যোগ্যা। যেহেতু শুদ্ধশীল আমার মন ইহার প্রতি সাভিলাষ হইয়াছে। সন্দেহাশ্রিত বিষয়ে সাধুদিগের চিত্তবৃত্তিই প্রমাণ। তথাপি যথার্থরূপে ইহার বিষয় অবগত হইব।

King.—May she be sprung from a wife of a different caste of the chief of the hermitage? Or away with doubt.

Undoubtedly she is fit to be married by a Kshatria (of the warrior caste); because my noble mind has a desire for her. In doubtful matters the propensities of good men's minds are decisive proof.

Nevertheless I will know the truth about her.

शकुन्तला। [ससम्भ्रमम्—व्यग्रं यथा तथा]

सलिलस्य सेकेन य: सम्भ्रम: वेग: सञ्चलनमिति यावत् तेन उद्गत: मधुकर: भ्रमर: नवमालिकां उज्झित्वा विहाय मे वदनं अभिवर्त्तते, अभिलक्ष्य धावति।

उज्झ् लट्—उज्झति, लिट् उज्झामास··· ; लुङ् औज्झीत्। अभिवर्त्तते इत्यत्र वृतेरभिपूर्व्वस्य सकर्म्मकत्त्वम्; यद्वा अभिरभागे इति कर्म्मप्रवचनीयसंज्ञा—, तद्योगे वदनमित्यत्र द्वितीया।

শকুন্তলা। [ব্যস্ত হইয়া] (ওমা), সলিলসেকে লতা কম্পিত হওয়ায় উৎপতিত একটি মধুকর নবমালিকা পরিত্যাগ করিয়া আমার মুখের দিকে আসিতেছে। [ভ্রমর কর্ত্তৃক পীড়া অভিনয় করিলেন]।

Sakuntala.—[*In a flurry*] Ah! by reason of the motion caused

by the pouring of water, a bee has flown up and leaving the jasmine is flying at my face. [*Acts as if teased by a bee*].

राजा। [स्पृहया सह वर्त्तमानं इति मस्पृहं सतृष्णं विलोक्य] चलेति।

चलापाङ्गां वेपथुमतीं दृष्टिं बहुशः स्पृशसि; रहस्याख्यायीव कर्णान्तिकचरः मृदु स्वनसि करौ व्याधुन्वत्याः अस्याः रतिसर्व्वस्वमधरं पिबसि, वयं तत्त्वान्वेषात् हताः हे मधुकर त्वं कृती खलु।

चलः चञ्चलः अपाङ्गः प्रान्तः यस्याः तां चलापाङ्गां चञ्चलप्रान्तां, वेपथुः कम्पः (ट्वितोऽथुच् इति वेपधातोः अथुच् भावे) विद्यते यस्याः तां वेपथुमतीं कम्पमानां दृष्टिं बहुशः बहुवारान् स्पृशसि चुम्बसि इत्याशयः। रहसिभवं इति रहस्यं गोप्यं तस्य आख्यायी इति रहस्याख्यायी इव, किमपिगोप्यं कथयितुमिव इत्यर्थः कर्णस्य श्रुतेः अन्तिके समीपे चरति इति कर्णान्तिकचरः कर्णमूले इत्यर्थः मृदु मन्दं स्वनसि गुञ्जसि। करौ हस्तौ व्याधुन्वत्याः कम्पयन्त्याः भ्रमरनिरासाय उत्क्षिपन्त्याः अस्याः रतेः सर्व्वस्वं सारभूतं अधरं पिबसि धयसि, कामिनामधरास्वादः सुरतादतिरिच्यते इतिभावः। वयं तत्त्वस्य किमियं मत्परिग्राह्या नवेति स्वरूपस्य अन्वेषात् हताः; हे मधुकर त्वं कृती कृतकार्यः खलु। शिखरिणीवृत्तम्। रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी इति लक्षणम्। अन्योऽपि कामुकः प्रियायाः लोलां दृष्टिं चुम्बति पुनः कपोलतले लपितुं किमपि श्रुतिमूले चारुचुम्बति दयितां पुलकैरनुकूले। किञ्च मामा मानद इति क्षामाक्षरोल्लापिनीं सरभसमालिङ्ग्य अधरं धयति इति हृदयम्। अत्र मधुकरे नायकव्यवहारसमारोपात् समासोक्तिः साच उपमया अङ्गाङ्गिभावेन सङ्कीर्य्यते।

समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥ इति लक्षणम्।

बहुशः बहुशब्दात् शस तत्त्वान्वेषात्, तत्त्वान्वेषं अवलम्ब्य ल्यब्लोपे कर्म्मण्यधिकरणे इति पञ्चमी हेत्वर्थे वा। आख्यातुं शीलमस्य इति आख्यायी सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिः रहस्यस्य आख्यायी इति रहस्याख्यायी।

Change of voice.—चलापाङ्गा दृष्टिः वेपथुमती स्पृश्यते। रहस्याख्यायिनेव स्वन्यते कर्णान्तिकचरेण...रतिसर्व्वस्वं अधरः पीयते। अस्माभिः हतैः त्वया कृतिना भूयते।

রাজা। [স্পৃহার সহিত নিরীক্ষণ করিয়া] হে ভ্রমর, তুমি ইহার কম্পমান, চঞ্চলপ্রান্ত নয়ন বহুবার স্পর্শ করিতেছ, কোন গোপনীয় কথা বলিবে এই হেতু যেন কর্ণের নিকট উড়িয়া উড়িয়া মৃদুভাবে গুন্ গুন্ করিতেছ; হস্তসঞ্চালন করিয়া

নিবারণ করিলেও রতির সারভূত ইহার অধর পান করিতেছ। আমরা তত্ত্বান্বেষণ করিতে গিয়া হত হইলাম (গেলাম) ; তুমিই কৃতী।

King.—[*Looking wistfully at her*].—Many a time you kiss her trembling eye with rolling corner ; as if to tell some secrets, hovering near her ear, softly do you hum. While she waves her hands, you kiss her lip, the highest essence of sexual pleasure. We are done for in ascertaining the fact or truth ; you must be very lucky.

शकुन्तला। नायं धृष्टः दुष्टः धृष्णक इति यावत् धृष्टे धृष्णग्वियातश्च इत्यमरः। धृषिशसावैजात्ये इति अविनये अर्थे धृषिः निष्ठायां मनिट्, अन्यत्र धर्षितः। विरतोभवति अन्यस्मिन् स्थाने गमिष्यामि [कतिचित् पदानि गत्वा विलोक्य] कथं अत्रापि आगच्छति, सखि अनसूये, सखि प्रियंवदे दुरात्मना अनेन भ्रमरेण पीड्यमानां मां रक्षतम्। व्याङ्परिभ्यः रमः इति विपूर्व्वात् रमेः परस्मैपदम् अभिभवतेः सकर्म्मकत्वात् कर्म्मणि शानच्। किम्शब्दात् डतिप्रत्ययेन कतिशब्दः सिद्धः। "डतिश्च" इति डतिप्रत्ययान्तस्य शब्दस्य षट् संज्ञायां "षड्भ्यो लुक्" इति शसोलुकि कति इति पदं तत्रश्चित प्रत्ययः अनिश्चयार्थे।

उभे [स्मितेन (ईषद्धासेन) सह वर्त्तमानं यथातथा] यतः खलु आश्रमपदानि राज्ञः विषयस्थितानि अतो राज्ञा आश्रमवासिनां पीड़ाहरेण भाव्यं। त्वमिदानीं आत्मत्राणाय पृथिवीपतिं दुष्यन्तमाह्वय।

শকুন্তলা। এই দুষ্ট বিরত হইতেছে না ; আমি অন্য স্থানে যাই [কয়েক পদ, গমন করত দৃষ্টিনিক্ষেপ করিয়া] এস্থানেও আসিতেছে ; সখীগণ ! এই দুঃশীল ভ্রমর আমাকে পীড়া দিতেছে, তোমরা পরিত্রাণ কর।

সখীদ্বয়। (ঈষৎ হাস্য করিয়া) আমরা ত্রাণ করিবার কে ? দুষ্মন্তকে আহ্বান কর, রাজা তপোবন রক্ষা করেন।

Sakuntala.—This impertinent bee will not desist. I will go elsewhere [*going a few steps and glancing around*]. How now here also it comes. My friends, deliver me from the attack of this ill-behaved bee.

Both the companions.—[*Smiling*] Who are we to deliver you ? Call Dushyanta (to your aid). The groves of penance are to be protected by the King.

राजा। आत्मानं प्रकाशयितुं दर्शयितुं अयं अवसरः अवकाशः समय इति यावत् "कालसमयवेलासु" तुमुन्। इति तुमुन्। न भेतव्यमिति [अर्द्धोक्ते स्वगतम् अर्द्धमुच्चार्य्य आत्मगतम्] अधुना गच्छेयम् चेत् मम राजभावः नृपतित्वं—अहं दुष्यन्त इति—अभिज्ञातः परिज्ञातः भवेत्।

राजा। [त्वरया सह उपसृत्य गत्वा] क इति अन्वयः—

दुर्विनीतानां शासितरि पौरवे वसुमतीं शासति कः अयं मुग्धासु तपस्विकन्यासु अविनयं आचरति ?— २३

दुर्विनीतानां दुष्टानां शासितरि नियन्तरि पौरवे, पुरुवंशीये दुष्यन्ते वसुमतीं पृथिवीं शासति पालयति सति, यस्य च भावेन भावलक्षणमिति सप्तमी ; कोऽयं मुग्धासु रम्यासु यद्वा अप्रबुद्धमनःसु बालासु इत्यर्थः तपस्विकन्यासु अविनयं दौरात्म्यं आचरति।

दुर्विनीतानामित्यत्र शेषे षष्ठी न कृद्योगलक्षणा ; शासितरि इत्यत्र शीलार्थतृन्-प्रयोगात्।

Change of voice.—अविनयः आचर्य्यते केन अनेन।

রাজা। নিজকে প্রকাশ করিবার এই সময়। ভয় নাই [অর্দ্ধ উচ্চারণ করিয়া স্বগত] ইহাতে আমি রাজা ইহা জানিতে পারিবে। ভাল এইরূপ বলিব।

শকুন্তলা। [কয়েকপদ গমন করিয়া দৃষ্টিনিক্ষেপ করতঃ] এস্থানেও আমার অনুসরণ করিতেছে।

রাজা। [সত্বর গমন করিয়া] দুষ্টদিগের শাসনকর্ত্তা পুরুবংশীয় দুষ্যন্ত যখন পৃথিবী পালন করিতেছেন, তখন কোন্ (দুরাত্মা) সুন্দরী তাপসকন্যাদিগের প্রতি অবিনয় আচরণ করিতেছে।

King.—This is the opportunity for showing myself. Don't fear, don't fear ; [*half uttering ; aside*] that I am king (literally my king-ship) will be known. Well ! Thus I shall speak (to them).

Sakuntala.—[*Moving a few steps further and glancing around*]. What ? It still follows me.

King.—[*Advancing hastily.*] When the descendant of Puru, (Dushyanta), a chastiser of the ill-behaved, rules the earth, who is it that behaves rudely towards pretty young maidens of the hermits ?

अनसूया। अत्याहितं महान् अनर्थः, अत्यन्तं आधीयते, तन्निवारणार्थं मनो दीयते अस्मिन् इति अत्याहितम्, अत्याङ्पूर्व्वात् दधातेः अधिकरणे क्तः। अकातरा कातरा भूता इति कातरीभूता कातरशब्दात् अभूततद्भावे च्विः।

राजा। अयि इति कोमलामन्त्रणपदम्। अपीति पाठे अपिः प्रश्ने।

शकुन्तला। [साध्वसं भयं तस्मात् हेतोः अवचना तूष्णीं तिष्ठति। साधु सम्यक् अस्यति विक्षिपति चित्तं यत् तत् साध्वसं भयं। साधु + अस् + अच्]।

अनसूया। अतिथिविशेषस्य भवादृशस्य विशिष्टस्य अतिथेः, लाभेन तपः इदान

वर्द्धते। शकुन्तले उटजं पर्णशालां गच्छ ; फलेन मिश्रं तत् फलमिश्रं "पूर्व्वसदृश-समोनार्थकलहनिपुणमिश्रश्लक्ष्णैः" इति तृतीयातत्पुरुषः। फलसहितं अर्घ्यं अर्च्चन-द्रव्यं उपहर अस्मै देहि। इदं सेचनार्थं कलसस्थितं जलं पादोदकं पाद्यं पाद-प्रक्षालनार्थं जलमित्यर्थः भविष्यति। पाद्येन अर्घ्येण च अतिथिः सम्पूज्यते इत्या-चारः। मूल्ये पूजाविधौ अर्घः इत्यमरः। अर्घाय इदं अर्घ्यं पादार्घाभ्याञ्चेति यत् प्रत्ययः।

आपः क्षीरं कुशाग्रञ्च दधि सर्पिः सतण्डुलम्।
यतः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकल्पितः॥

[সকলে রাজাকে দেখিয়া কিঞ্চিৎ সন্ত্রস্ত হইলেন]

অনসূয়া। আর্য্য! কোন অত্যাহিত নহে। আমাদের এই প্রিয়সখী ভ্রমর কর্ত্তৃক পীড়িত হইয়া কাতর হইয়াছেন। [শকুন্তলাকে দেখাইয়া দিলেন।]

রাজা। [শকুন্তলার দিকে ফিরিয়া] ঋষি তপস্যা বৃদ্ধি পাইতেছে কি ?

শকুন্তলা। [ভয়ে মৌনভাবে রহিলেন।]

অনসূয়া। বিশিষ্ট অতিথিলাভে এক্ষণ তপস্যার বৃদ্ধি। শকুন্তলে, পর্ণশালায় গমন কর এবং ফলসহিত অর্ঘ্য আনয়ন কর। এই কলসস্থিত জল পাদপ্রক্ষালনের উপযোগী হইবে।

[*All the maidens, on seeing the king, became a little startled*].

Anasuya.—No great calamity, sir ! This friend of ours, teased by a bee, has been a little frightened. [*Points to Sakuntala*].

King.—[*Turning to Sakuntala*] Do the devotional rites, good maiden, prosper ?

Sakuntala.—[*Stands silent and confused*].

Anasuya.—(Yes, they prosper), now that we have got a distinguished guest. Dear Sakuntala, go and bring from the cottage a respectful offering of (rice, fruit &c....) This (water in the water-pot) will do as water for the feet.

राजा। भवतीनां सूनृतया सत्यया प्रियया च गिरा वाचा आतिथ्यं अतिथि-सत्कारः कृतम्। अर्घ्यादिना अलामतिभावः। अतिथये इदं इति ष्यञ्। सुशोभनं नृत्यति अनेन इति नृत्धातोः करणे घञर्थे कः। बाहुलकात् उपसर्गदीर्घत्वम्। सूनृतं सत्यं ; तद्वति त्रिषु। यद्वा सुष्ठु ऊनयति प्रीणयति इति सून् ऊनयतेः क्विप्। सून च ऋता च इति सूनृता, सत्याप्रिया चेत्यर्थः।

प्रियंवदा। प्रकृष्टा छाया यत्र सा प्रच्छाया, साच शीतलाच इति प्रच्छायशीतला कर्म्मधारये पूर्व्वपदस्यपुम्वद्भावः ; तस्यां, सप्त पर्णानि पर्व्वसु यस्य सः सप्तपर्णः

(वृत्तिविषये संख्याशब्दस्य वीप्सार्थत्वं ज्ञेयम्। सप्तपर्णोविशालत्वक् शारदो विषमच्छद: इत्यमर:) तस्य वेदिकायां मुहूर्त्तं उपविश्य परिश्रमस्य अध्वविलङ्घन-जन्यखेदस्य विनोद:, अपनयनं तं करोतु।

राजा। यूयमपि अनेन जलसेचनरूपेण कर्म्मणा निश्चितमेव परिश्रान्ता:। यूयमपि अत्रोपविश्य क्लमापगमं कर्त्तुमर्हथ इत्यभिप्राय:।

अनसूया। पर्य्युपासनं—समीपे उपवेशनादिना अभिप्रायस्यानुवर्त्तनम्।

सर्व्वे—[उपविशन्ति] सर्व्वाश्च सर्व्वेश्च इति सर्व्वे पुमान् स्त्रिया इति द्वन्द्वे पुंलिङ्गैकशेष:। In compounds of the एकशेष kind the masculine remains , the feminine is elided.

রাজা। আপনাদের সত্য মিষ্টবাক্যেই আতিথ্য করা হইয়াছে।

প্রিয়ংবদা। তবে অতিছায়াযুক্ত শীতল, এই সপ্তপর্ণ বৃক্ষের বেদিতে মুহূর্ত্তকাল উপবেশন করিয়া ক্লান্তি দূর করুন।

রাজা। আপনারাও এই কার্য্যদ্বারা পরিশ্রান্ত হইয়াছেন।

অনসূয়া। শকুন্তলে অতিথির উপাসনা করা আমাদিগের উচিত; এস এইস্থানে উপবেশন করি।

সকলে। [উপবেশন করিলেন।]

King.—The rites of hospitality have been performed by your true and sweet words.

Priyambada.—Then, good sir, be pleased to sit for a while on the elevated ground (round the Saptaparna tree, and rest yourself.

King.—Surely you, too, must have been fatigued by this employment, (action or task).

Anasuya.—Dear Sakuntala, we ought to sit by the side of our guest. Let us sit down here.

All—[*Sit down together*].

शकुन्तला। [आत्मगतम्] तपोवनविरोधिन: आश्रमविरुद्धस्य, विकारस्य चेतस: अन्यथाभावस्य, मदनभावस्य इत्यर्थ.; गमनीया आश्रयणीया, विषयीभूता इत्यर्थ:।

राजा। [सर्व्वा: विलोक्य] अहो इत्याश्चर्य्ये अव्ययं, वयश्च रूपञ्चेति वयोरूपे समे तुल्ये वयोरूपे ताभ्यां रमणीयम् शोभनम् भवतीनां सौहार्द्दम् प्रणय:।

सुहृदयस्य भाव: इति सौहार्द्दम पक्षे सौहृदय्यम् "वा शोकष्यञ्रोगेषु—इति पक्षेहृदयस्य हृदादेश:। हृदादेशपक्षे "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च" इत्युभयपद वृद्धि इति काशिका।

The forms सौहार्द्दम्, सौहार्द्दम and सौहृदय्यम् (this last form is

rarely used) are all used by writers in the sense of friendship. But with due deference to grammar they can not be used in the sense of friendship. The authors of the *Kasika* and, in their wake, Bhattoji derive them from the base सुहृदय:. But सुहृदय does not mean a friend. For it has been laid down by Panini that in the sense of a friend the form सुहृद and not सुहृदय is available. ("सुहृद्दुर्हृदौ मित्रामित्रयो:") । Under this rule the Kasika observes that सुहृदय: means कारुणिक:, (a kind-hearted man). Hence सौहार्द्दम् &c. should, strictly speaking, be used to connote kind-heartedness and not friendship. Mallinatha in explaining क्षणभिन्नसौहृद: in the Kumarsambhavam, Canto IV. seems to be inclined to derive सौहृद from सुहृदय and सौहार्द्द from सुहृद । And the authority he quotes there is indisputable. (सौहृददौर्हृदशब्दावणि हृद्भावात् वामनसूत्रवृत्ति.) । From a logical point of view also the form सुहृद should yield the derivatives सौहार्द्दम् and सौहार्द्दम । For the rule "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च" requires that the compound should end in हृद् and not हृदय। To hold that the two rules "हृदयस्य हृल्लेखयदण्लासेषु- " and "हृदभगसिन्धन्ते पूर्व्वपदस्य च" will operate simultaneously in the instance सुहृदयस्य भाव: सौहार्द्दम्, seems to be expecting too much. It is perverse logic to maintain that सुहृद् with अण् should yield सौहृदम् though the rule explicitly lays down that compounds ending in हृद् will have the vowels of both the members of the compound prolonged in the presence of तद्धित affixes having an indicatory, ण, ञ or क Padmanabha, the author of the Supadma, simplifies the matter by saying सौहृदमिति पदं बाहुलकात् सिद्धम ।

प्रियंवदा । [जनान्तिकम्] मधुरा मनोहरा प्रीतिकरी इति यावत् गम्भीराच दुरधिगमान्तरभावाच आकृति: आकार: यस्य, स: चतुरं निपुणं प्रियं सुन्दरं च आलपन् अयं प्रभाव: प्रताप: विद्यते यस्य स: इव लक्ष्यते। अनुपसृष्टात् सुवां घञ् विधानात प्रकृष्टोभाव: इति प्रभाव: स विद्यते अस्य इति प्रभाववान् अत्रपचे न कर्म्मधारयान्मत्वर्थीय: इत्यस्य अनुशासनस्य वाध: कथचित् सोढ़व्य: ।

अनसूया। यत् त्वं जिज्ञाससे तज्ज्ञाने, ममापीच्छा वर्त्तते...[प्रकाशं राजानं प्रतीत्यर्थः] भवतः मधुरेण आलापेन जनितः उत्पादितः विश्वास मां मन्त्रयते मुखरयति। कतम इति कस्मिन् राजवंशे जन्म परिगृहीतं भवता इत्यर्थः। विरहेण भवता वियोगेन पर्य्युत्सुकः दुर्म्मनायमानः जन यस्मिन सः विरहपर्य्युत्सुकजनः ; कुत्र भवतो निवास इत्यर्थः। सुकुमारतरः अतिकोमलः अपि आत्मा देहः "आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि" तपोवनपरिश्रमस्य आश्रमागमनजन्यखेदस्य पदं स्थानं उपनीतः प्रापितः। तपोवनागमनप्रयोजनं किमिति तात्पर्य्यम्। मन्त्रयते इत्यत्र चौरादिकस्य धातोः हेतुमति णिचि रूपम्।

N. B. This courteous address of Anasuya reflects great credit upon the woman of the time of Kalidasa.

শকুন্তলা। [আত্মগত] ইঁহাকে দেখিয়া কেন আশ্রমবিরুদ্ধভাবের বিষয় হইলাম (অর্থাৎ আশ্রমবিরুদ্ধভাব কেন আবির্ভূত হইতেছে ?)

রাজা। [সকলকে অবলোকন করিয়া] আহা, বয়স এবং রূপ তুল্য হওয়ায় আপনাদের সৌহার্দ্দ অতিশয় মনোজ্ঞ হইয়াছে।

প্রিয়ংবদা। [জনান্তিকে] অনসূয়ে, মধুরগম্ভীরাকৃতি এই ব্যক্তি সুন্দর এবং নিপুণভাবে আলাপ করিতেছেন এবং ইঁহাকে প্রভাবসম্পন্ন বলিয়া বোধ হইতেছে ; ইনি কে ?

অনসূয়া। সখি আমারও এ বিষয়ে কৌতূহল হইয়াছে। ইঁহাকে জিজ্ঞাসা করি। [প্রকাশ্যে রাজার প্রতি] আপনার মধুর আলাপজনিত বিশ্বাসে (সাহসে) আমাকে বলিবার জন্য প্রণোদিত করিতেছে। মহাশয় কোন্ রাজর্ষি বংশ অলঙ্কৃত করিয়াছেন ; কোন্ দেশের লোক আপনার বিরহে উৎকণ্ঠিত হইয়াছে ? এবং কি নিমিত্তই বা এই সুকুমার দেহকে তপোবনগমনের পরিশ্রম স্বীকার করাইয়াছেন !

Sakuntala.—How is it that at the sight of this man I have become accessible to emotions inconsistent with penance or religious vows ?

King.—[*Looking at them all*] Ah ! Sweet is your friendship on account of your age and your appearance being equal.

Priyambada.—[*Aside*] Anasuya, who is this person of sweet and solemn appearance, of clever and charming address, and seeming to have majestic power ?

Anasuya.—Mine, too, my friend, is the same curiosity. I will ask him. [*Aloud*] Your kind words have begotten (a kind of) confidence which prompts me to speak. What royal family has been adorned (ornamented) by your honour ? The people of what coun-

try is now mourning your honour's absence? and why has this delicate person been exposed to the fatigue of (coming to) this grove of penance?

शकुन्तला । [आत्मगतम्] हृदय मा उत्ताम्य एषा त्वया चिन्तितानि अनसूया मन्त्रयते । उत्ताम्य खिद्यस्व; दैवादिकात् तमेर्लोट् । मन्त्रयते, उच्चारयति, वदति इत्यर्थः ।

राजा । [आत्मगतम्] केन प्रकारेण आत्मनः परिचयं दास्यामि कथं वा आत्मनः राजभावस्य गोपनं विधास्यामि, भवतु अनेन प्रकारेण एनामभिधास्ये [प्रकाशम्] पौरवेण राज्ञा दुष्यन्तेन धर्म्माधिकारे धर्म्मादीनां अवेक्षणार्थं यः नियुक्तः सोऽहं कश्चित राजपुरुषः इत्यर्थः कृतः । पक्षान्तरे पौरवेण राज्ञा दुष्यन्तपित्रा यः लब्धवर्णोजनः धर्म्माधिकारे, धर्म्मपालनार्थं राज्ये इत्यर्थः नियुक्तः अभिषिक्त इत्यर्थः सोऽहं न सन्ति विघ्नाः यासां तासां अविघ्नानां क्रियाणां इज्यादीनां उपलम्भाय ज्ञानाय इदं धर्म्मारण्यं तपोवनमायातः । भवति इति सम्बोधनपदं यद्वा नियुक्तः भवति इत्यन्वयः ।

उपपूर्व्वात् लभेः घञ् लभेश्च इति नुम् तुमर्थाच्च भाववचनादिति चतुर्थी तादर्थ्ये वा । लभ् लट् लभते; लिट् लेभे; लुङ् अलब्ध; सन् लिप्स । धर्म्मस्य अरण्यं इति धर्म्मारण्यं अश्वघासादिवत् षष्ठीसमासः । विहन्यते एभिः इति विघ्नाः अन्तरायाः विपूर्व्वात् हन्धातोः घञर्थे कः ।

শকুন্তলা। [আত্মগত] হৃদয় উদ্বিগ্ন হইও না। তুমি যাহা ভাবিতেছ, অনসূয়া তাহাই বলিতেছে (জিজ্ঞাসা করিতেছে)।

রাজা। [আত্মগত] কিরূপে আপনার পরিচয় প্রদান করি, কিরূপেই বা আত্ম-গোপন করি। ভাল ইহাকে এইরূপ বলি [প্রকাশ্যে] যাহাকে পুরুবংশীয় নরপতি ধর্ম্মাধিকারে নিযুক্ত করিয়াছেন আমি সেই। (মুনিদিগের) যজ্ঞাদি নির্ব্বিঘ্নে অনুষ্ঠিত হইতেছে কি না জানিবার জন্য এই তপোবনে আসিয়াছি।

Sakuntala.—[*Aside*] Don't be distressed, my heart. Anasuya utters (asks) what you are thinking of.

King.—[*Aside*] How shall I make myself known and shall (at the same time) disguise myself? Well! Let me tell her in this way; "I am the person charged by his majesty, the descendant of Puru, with the administration of justice and religion; and am come to this sacred grove to know if the rites (of the hermits) are performed without obstruction."

अनसूया । सनाथा इदानीं धर्म्मचारिणः । साम्प्रतं भवदागमनेन धर्म्मानुष्ठान-रताः तापसाः नाथवन्तः सहायवन्त इत्यर्थः ।

शकुन्तला। [शृङ्गारलज्जां राज्ञि अनुरागजन्यां लज्जां रूपयति नाटयति तव लज्जानुभवे नाथशब्दस्य पतिरिति व्यङ्ग्योऽर्थः निमित्तं]।

सख्यौ। [उभयोः शकुन्तलायाः दुष्यन्तस्यच आकारं आकृतिं लक्षणया आकृतिगतं आन्तरविकारलक्षणं विदित्वा ज्ञात्वा जनान्तिकम्]।

शकुन्तला। [रोषेण क्रोधेन सहवर्त्तमानं यथा तथा]]।

सख्यौ। जीवितस्य सर्व्वस्वस्वरूपया त्वया अपि ; त्वामपि सम्प्रदाय इत्यभिप्रायः।

शकुन्तला। अपेतम् दूरीभवतम्। इण्गताविति धातोः लोटि मध्यमपुरुषस्य द्विवचनम्।

राजा। सखीं गतमिति सखीगतं श्रितातीतेत्यादिना द्वितीयातत्पुरुषः। सखीसम्बन्धि किमपि वस्तु पृच्छामः। वयमिति वहुवचनम् अस्मदो द्वयोः इति सूत्रेण। अत्र अपिः समुच्चये। यथा त्वं पृच्छसि तथा अहञ्च प्रक्ष्यामि।

सख्यौ। अनया प्रार्थनया अनुगृहीता वयमित्यर्थः।

অনসূয়া। এক্ষণে ধর্ম্মচারিগণ সনাথ।

শকুন্তলা। [রাজার প্রতি অনুরাগ বশতঃ সলজ্জভাব অভিনয় করিলেন]।

সখীদ্বয়। [উভয়ের আকারগত বিকারলক্ষণ জানিয়া জনান্তিকে] সখি শকুন্তলে যদি তাত কণ্ব অদ্য এস্থানে উপস্থিত থাকিতেন?

শকুন্তলা। [সক্রোধে] তাহা হইলে কি হইত?

সখীদ্বয়। এই বিশিষ্ট অতিথিকে জীবিতসর্ব্বস্বও দিয়া কৃতার্থ করিতেন।

শকুন্তলা। তোমরা দূর হও, কিছু মনে করিয়া বলিতেছ, তোমাদের কথা শুনিব না।

রাজা। আমিও আপনাদের সখী সম্বন্ধে কিছু জিজ্ঞাসা করিব।

সখীদ্বয়। মহাশয় আপনার এই প্রর্থনা আমাদের প্রতি অনুগ্রহস্বরূপ।

Anasuya —The righteous, then, have now a guardian.

Sakuntala.—[*Acts the part of being bashful as manifested in the amour*]

The two friends.—Perceiving the feeling as manifested in the appearance of Sakuntala and the king.] Dear Sakuntala, if father Kanwa were here to-day.—

Sakuntala.—[*Angrily*] What then ? (What if he were here) ?

The two companions —He would make this guest of distinction happy with all that is most dear to his life.

Sakuntala.—Go to ! with some idea in your mind you speak (thus). I won't listen to your words.

King.—I too will ask some thing regarding your friend (Sakuntala).

The two friends —Sir this request is a favour (shown to us).

राजा। भगवान् काश्यपः कण्वः शश्वत् भवं इति शाश्वतं तस्मिन् शाश्वते नित्ये ब्रह्मणि तपसि नैष्ठिकब्रह्मचर्य्ये स्थितः। अदारः सन् तपःपरायण इत्यर्थः इति प्रकाशः इति प्रसिद्धिः, इति वयं जानीम इत्यर्थः। इयञ्च युवयोः सखी शकुन्तला तस्य आत्मजा कन्या एतत् कथम् अकृतदारस्य कथं कन्योत्पत्तिसम्भवः।

यद्यपि 'कालात् ठञ्' इति सूत्रेण शश्वत् शब्दात् ठञि कृते शाश्वतिकमित्येव पदं व्याकरणसङ्गतम् अतएव सूत्रकारोऽपि, येषाञ्च विरोधः शाश्वतिक: इत्याह, तथापि प्रयोगवशात् शाश्वतमिति पदं साधु इति वामनः। वेदस्तत्त्वं तपो ब्रह्म इत्यमरः।

अनसूया। कुशिकस्य गोत्रापत्यं पुमान् इति कौशिकः, राजा चासौ ऋषिश्चेति राजर्षि: ; जात्या क्षत्त्रियः तपःप्रभावेण ब्राह्मणः विश्वामित्रः, अतोऽस्य राजर्षिरिति संज्ञा। गोत्र वंशः तस्य (तस्मात् प्राप्तमित्यर्थः) नामधेयं यस्य: सः गोत्रनामधेयः। अन्ववायोऽन्वयोवंशोगोत्रञ्चाभिजनः कुलमित्यमरः। गोत्रः शैले, गोत्रं कुलाख्ययोरिति मेदिनी।

अनसूया। प्रभवति अस्मात् इति प्रभवः कारणम् (भवतेरपादाने अप् वा अत्र जनकः इत्यर्थः। उज्झितायाः पितृभ्यां परित्यक्तायाः अस्याः शरीरस्य संवर्द्धनादिभिः पालनादिभिः कण्वः अस्याः पिता। उज्झ + क्त (कर्म्मणि)= उज्झित स्त्रियां उज्झिता उज्झति, उज्झामास उज्झाम्बभूव...औज्झीत्।

রাজা! ভগবান্ কাশ্যপ নিত্য ব্রহ্মচর্য্য অবলম্বন করিয়াছেন এইরূপ প্রসিদ্ধ। ইনি তাঁহার কন্যা ইহা কিরূপে হয়?

অনসূয়া। মহাশয় শুনুন; কৌশিক যার গোত্রনাম, ঈদৃশ একজন প্রভাবসম্পন্ন রাজর্ষি আছেন।

রাজা। আছেন শুনিয়াছি।

অনসূয়া। তিনি আমাদের প্রিয়সখীর পিতা জানিবেন। ইহাকে পরিত্যাগ করিলে তাত কাশ্যপ ইহার শরীরের লালন পালন করায় পিতা হইয়াছেন।

K ng —It is a noted fact that the holy sage Kanwa, a descendant of Kasyapa, has all along been observing celibacy ; and this friend of yours is his daughter. How is it ?

Anasuya. – Be pleased, sir, to hear. There is a sage of high powers sprung from the Kshatriya caste whose family name is Kusika.

King.—It is heard that there is (such a one).

Anasuya.—Know him to be the father of our dear friend.—Father Kasyapa is her father by reason of bringing her up (when) deserted (by parents).

राजा। उज्झित इति शब्द: तेन मे कौतूहलं जनितं उत्पादितं पितृभ्यां दुहिता कथं त्यक्ता इति ज्ञातुं कौतूहलं सम्भवतीव आ मूलात् समासस्य विभाषितत्वात् न समास:, आमूलं सर्व्वमनुक्रमेण इत्यर्थ: श्रोतुमिच्छामि।

अनसूया। किलेति वार्त्तायां वार्त्तासम्भाव्ययो: किल इत्यमर: उग्रे कठोरे; राजर्षेरिति नियमपदेन सह सम्बन्ध: नियमस्य तपश्चरणस्य व्याघातं करोति या सा नियमविघ्नकारिणी। विपूर्व्वात् हनधातो: घञर्थे कप्रत्ययेन विघ्न इति पदं सिद्धम्। मेनकानाम्नि अप्सरभेदे अप्सर: शब्दस्य प्रवृत्तिवशात् अत्र एकत्वम्। प्रायेणायं शब्द: भूम्नि प्रयुज्यते तथाच—

आप: सुमनसो वर्षा: अप्सर: सिकता: समा:।
एता: स्त्रियां वहुत्वे स्युरेकत्वेऽपि क्वचिन्मता॥

রাজা। উজ্ঝিত এই শব্দে আমার কৌতুহল উৎপাদিত হইল। সমস্ত আমূল শুনিতে ইচ্ছা করি।

অনসূয়া। মহাশয় শুনুন। পূর্ব্বে অতি কঠোর তপস্যানিরত সেই রাজর্ষির সমাধির ব্যাঘাত করিবার নিমিত্ত সন্ত্রস্ত দেবগণ মেনকা নামে অপ্সরাকে প্রেরণ করিয়াছিলেন।

King.—My curiosity has been awakened by the word "deserted." I should like to hear it from the beginning.

Anasuya.—Hear, sir. Some time ago while that sage of the Kshatriya caste had been performing a very severe penance, the gods alarmed sent a nymph named Menaka as an interruption of his devotions.

राजा। अन्येषां समाधे: तपस: भीरव: इति अन्यसमाधिभीरव: तेषां भाव: अन्यसमाधिभीरुत्वम्। देवा: अन्येषां कठोरं तपो विलोक्य स्वपदविलोपशङ्किन: जायन्ते। सम् + आङ् + कि समाधि। उपसर्गे घो: कि:। समाधि र्ना समर्थने। ध्याननीवाकनियमे काव्यस्य च गुणान्तरे। इति मेदिनी।

अनसूया। वसन्तस्य ऋतो: अवतार: आविर्भाव: तस्य समय: तस्मिन्। वसन्तोदार इति पाठे वसन्तेन उदार: रमणीय: समय: तस्मिन्। उन्मादयितृ यद्दर्शनेन लोका उन्मत्ता भवन्ति तादृशम्। उत्पूर्व्वात् माद्यते. णिच् तत: कर्त्तरि तृच्।

राजा। परस्तात् इतःपरं यदवृत्तं तदित्यर्थः गम्यते ज्ञायते। "विभाषा परावराभ्यां" इति परशब्दात् अस्ताति: ; पक्षे परतः। अप्सरसः मेनकायाः सम्भव उत्पत्तिः यस्याः सा अप्सरःसम्भवा ; अवज्जर्यो व्यधिकरणो बहुव्रीहिर्जन्माद्युत्तरपदः।

राजा। उपपद्यते युज्यते, अन्यथा कथमस्याः ईदृक् रूपमित्यर्थः मानुषीषु इति। मानुषीषु अस्य रूपस्य कथं वा सम्भवः स्यात् प्रभातरलं ज्योतिः वसुधातलात् न उदेति। २४

मानुषीषु मानवीगर्भसम्भूतासु नारीषु अस्य ईदृशस्य रूपस्य सम्भवः उत्पत्तिः कथं वा स्यात् न कथमपि ईदृक्सौन्दर्य्यसम्भवः। प्रभया दीप्त्या तरलं चञ्चलं ज्योतिः अचिरप्रभा वसुधायाः तलं तस्मात् वसुधातलात् क्षौणीपृष्ठात् न उदेति। धातलात् यथा विद्युन्नोत्पद्यते तथा मानवीगर्भात् एतादृशं रूपं न सम्भवति इत्यर्थः। प्रतिवस्तूपमालङ्कारः। मनोर्जातावञ्यतौ षुक् च। मनु+अञ् (षुक् is the augment) = मानुष। It means the human kind; when the affix यत् is used, the form मनुष्य is obtained. The feminine affix ङीप् is applied to मानुष and the form मानुषी is obtained; it means a female of the human kind.

Change of voice.—सम्भवेन कथं भूयते प्रभातरलेन ज्योतिषा उदीयते। २४

রাজা। অন্যের তপস্যা দেখিয়া দেবতাদিগের এইরূপ ভয় পাওয়া প্রসিদ্ধ আছে।

অনসূয়া। তাহার পর বসন্তহেতু রমণীয় সময়ে তাহার উন্মাদন রূপ অবলোকন করিয়া (অর্দ্ধ উচ্চারণ করিয়া লজ্জায় বিরত হইলেন)।

রাজা। তাহার পর যাহা যাহা ঘটিয়াছিল তাহা বুঝিতে পারিয়াছি। ইনি অপ্সরোগর্ভসম্ভূতা।

অনসূয়া। হাঁ।

রাজা। ইহা যুক্তিযুক্ত বটে—মানুষীতে ঈদৃশ রূপের সম্ভব কিরূপে হইতে পারে? ক্ষণপ্রভাজ্যোতিঃ ভূপৃষ্ঠ হইতে উত্থিত হয় না।

শকুন্তলা। (অধোমুখী হইয়া রহিলেন)।

King.—That the gods are alarmed at the devotions of others is (a fact).

Anasuya.—Then seeing her maddening beauty at that time, beautiful because of spring—(*Half uttering, stops short on account of bashfulness*).

King.—What followed (*i. e.* the rest) is understood. She is, then, born of a nymph.

इत्युन्मेदवस्यमः कृत्ये तु काममनसोरपि। समो वा हिततततयोः मांसस्य पचि युड्घञोः
तत्वबोधिनी ६।३।१०९ पर। अवश्यगन्तव्यः अवश्यसेव्यः। गन्तुकामः। गन्तुमनाः।

सहितः। संहितः। सततः। संततः। मांसपचनी। मांसपाकः।

Anasuya.—Yes.

King.—It is quite proper. How could such beauty (as this) spring from mortal women? The tremulously radiant lightning does not rise from the earth.

Sakuntala.—[*Sits with her face bent down*].

राजा। [आत्मगतम्] मे मनोरथः शकुन्तलागतः अभिलाषः लब्धः अवकाशः अवसरो येन तादृशः। अप्सरःसम्भूतत्वात् इयं मे परिग्रहयोग्या। किन्तु सख्या प्रियंवदया परिहासेन नर्म्मणा उपहासच्छलेन इत्यर्थः अहमपि आत्मनः अनुरूपं वरं लभेय इति उदाहृतां उक्तां वरस्य वोढ़ुः प्रार्थनां लिप्सां श्रुत्वा मे मनः चित्त धृतः द्वैधीभावो येन तत् धृतद्वैधीभावं किमियं अन्यस्मिन कस्मिन् सौभाग्यशालिनि पुरुषे आसक्तचेता इति चिन्ताकुलं अतएव कातरं विक्लवं संवृत्तम्।

द्विशब्दात् प्रकारे धाच् प्रत्ययः, द्विधा इति अव्ययम्। द्विधा एव इति स्वार्थे अणि द्वैधम् यद्वा द्विधाभावः इति द्वैधम्; अद्वैधस्य द्वैधस्य भावः इति द्वैधीभावः; अभूततद्भावे च्विः अस्य च्वौ इति अस्य ईत्वम्। धृतः द्वैधीभावो येन तत् तच्चतत् कातरञ्चेति इति विशेषणं विशेष्येणेति समासः। ईषत् तरति इति कातरं कोरीषदर्थे इति कादेशः। कु+तॄ+अच्=कातर।

রাজা। (আত্মগত) আমার মনোরথের অবকাশ হইয়াছে, কিন্তু ইহার সখী (প্রিয়ংবদা) পরিহাসচ্ছলে যে বরপ্রার্থনার কথা বলিয়াছিলেন তাহা শুনিয়া আমার চিত্ত সংশয়াকুল হইয়াছে।

King.—[*Aside*] My desire has got room for its play, but my mind is distracted by doubts at hearing her wish for a husband as referred to in jest by her companion.

प्रियंवदा। [सस्मितं शकुन्तलां विलोक्य, नायकस्य राज्ञः अभिमुखी भूत्वा अभिगतं मुखं यस्याः सा अभिमुखी प्रादिभ्यो धातुजस्येति बहुव्रीहिः स्त्रियां ङीप्। पचे टाप्]। वक्तुं कामो यस्य स वक्तुकामः तुमः [1] काममनसोरिति मलोपः। The म of तुमुन् is elided when it is compounded with काम and मनस्।

शकुन्तला। [सखीं प्रियंवदां अङ्गुल्या तर्ज्जयति तर्ज्जन्या भयप्रदर्शनं प्रसिद्धम्]।

राजा। भवत्या सम्यक् यथार्थमित्यर्थः उपलक्षितम्—अववुद्धम सतचरितं तस्य श्रवणं तस्मिन् लोभः तस्मात् यद्वा सतां चरितं इति विग्रहः, अन्यत् किमपि प्रष्टव्यमस्ति।

अनसूया। अत्र विषये विचिकित्सया अलम्। तपस्विजनः स्वेच्छया सर्व्वमेव पृच्छ्यते तत्र काचिदपि बाधा न वर्त्तते।

नास्ति नियन्त्रणं प्रतिबन्धो यस्मिन् सः अनियन्त्रणः तादृशः अनुयोगः पृच्छा यस्य यस्मै वा इति विग्रहः। विचार्य्य इत्यत्र निषेधार्थालंयोगेन क्त्वाचः ल्यप्। अलंखल्वोः प्राचां क्त्वेति प्रतिषेधयोः। In deference to the opinion of anterior grammarians ल्यप् is substituted for क्त्वाच् in connection with अलं and खलु having the import of negation. नामेति सम्भावनायाम्। वाक्यशोभावर्द्धने वा। यमेः ष्ट्रन्=यन्त्रम्। नियन्त्र शब्दात् तत् करोति तदाचष्टे इति णिच् ततः ल्युट् नियन्त्रणम्।

প্রিয়ংবদা। [ঈষৎহাস্যের সহিত শকুন্তলার দিকে দৃষ্টিপাত করতঃ, নায়কের অভিমুখী হইয়া] মহাশয়ের আরও কিছু যেন বলিবার ইচ্ছা আছে।

শকুন্তলা। [সখীকে অঙ্গুলিদ্বারা তর্জ্জন করিল]।

রাজা। আপনি ঠিক অনুমান করিয়াছেন। সচ্চরিত্রশ্রবণলোভবশতঃ আমি আরও কিছু জিজ্ঞাসা করিব।

অনসূয়া। বিবেচনা করিবার (ইতস্ততঃ করিবার) প্রয়োজন নাই ; তপস্বিজনকে অবাধে জিজ্ঞাসা করা যাইতে পারে।

Priyambada.—[*Looking at Sakuntala with a smile, and then turning towards the hero.*] You seem to be desirous of asking some thing more.

Sakuntala.—[*Threatens her companion with her finger.*]

King —You guess rightly. Because of a longing for hearing an account of the good, I have something more to ask.

Anasuya.—No use hesitating. Hermits may be asked without reserve and restraint.

राजा। ते सखीं इति ज्ञातुमिच्छामि—तव सखीसम्बन्धिनं इमं विषयं ज्ञातुमिच्छामि। वैखानसमिति। अनया आप्रदानात् मदनस्य व्यापाररोधि वैखानसं व्रतं किं निषेवितव्यम्। आहो सदृशचक्षुर्वल्लभाभिः हरिणाङ्गनाभिः समं अत्यन्तमेव निवत्स्यति। २५।

अनया शकुन्तला आप्रदानात् प्रदानपर्य्यन्तम् समासस्य विभाषितत्वादसमासः पाक्षिकः यावदसौ कस्मैचित् गुणवते वराय न दीयते तावदित्यर्थः मदनस्य मनोभवस्य व्यापारं कर्म प्रसरमित्यर्थः रुणद्धि इति मदनव्यापाररोधि (रुधेः णिनिः) मन्मथव्यापारं भावप्रतिबन्धकम् वैखानसानां वानप्रस्थानां इदमिति वैखानसं पुण्यमारण्यकं व्रतं किं निषेवितव्यम् अनुचरितव्यम्। परिनिविभ्यःसेवसितसयसिवुसह सुट्स्तु स्वञ्जाम् इति षत्वं। आहो (अव्ययम्) अथवा सदृशं (समानपूर्व्वात् दृशेः कन्) ईक्षणं नयनं यासां ताः सदृशेक्षणाः अतएव वल्लभाः प्रियाः ताभिः हरिणानां

अङ्गनाभिः स्त्रीभिः मृगीभिः समं सह (सममिति अव्ययेन योगात् तृतीया) अत्यन्तमेव चिरमेव निवत्स्यति स्थास्यति। किमनया आविवाहमारम्भकं व्रतमनुष्ठास्यते, उताहो यावज्जीवनमिति सरलार्थः।

Change of voice.—व्रतेन निषेवितव्येन भूयते अनया...वत्स्यते।

वस निवासे इति धातोः लृटि रूपम् वत्स्यति। लट् वसति, लिट् उवास ; लुङ् अवात्सीत्, क्तः उषितः।

इति ज्ञातुमिच्छवज्ञाधातुः पृच्छार्थे वर्त्तते धातूनामनेकार्थत्वात्। तेन च द्विकर्म्मकत्वम्। तव सखीं इति प्रष्टुमिच्छामि। पृच्छायाः परमार्थतः पात्रं शकुन्तला सखीत्वावहारमात्रम्।

राजा। আপনাদের সখী সম্বন্ধে এই বিষয় জানিতে ইচ্ছা করি। ইনি কি যতদিন বিবাহ না হয় তত দিন পর্য্যন্ত মদনব্যাপারবিরুদ্ধ বানপ্রস্থব্রত অবলম্বন করিবেন, অথবা তুল্যাক্ষিবিশিষ্ট, প্রীতিভাজন মৃগীগণের সহিত চিরকাল বাস করিবেন ?

King This I should like to know regarding your friend. Will the vow of a recluse, opposed to the operation of love, be observed by her till she is given away (in marriage) ? Or will she dwell for ever with her favourite does whose eyes equal hers ?

प्रियंवदा। पुनस्त्वर्थे ; गुरोः पितुः कण्वस्य। धर्म्मस्य आश्रमधर्म्मस्य चरणे अनुष्ठाने का कथा विवाहरूपस्य द्वितीयाश्रमोचितस्य व्यापारस्य इति अपेरर्थः।

राजा। [आत्मगतम्] इयं प्रार्थना शकुन्तलां वोढ़ाहे इत्ययं मनोरथः, न दुरवापा (अवाप्तेनः कर्म्मणि खल्) ; अस्य मनोरथस्य सिद्धिर्न दुष्करा। भवेति—

अन्वयः—हे हृदय सम्प्रति सन्देहनिर्णयः जातः, साभिलाषं भव। यदग्निं आशङ्कसे तदिदं स्पर्शक्षमं रत्नम्।

हे हृदय सम्प्रति अधुना सन्देहस्य किमियं क्षत्रपरिग्रहक्षमा न वेत्याकारस्य संशयस्य निर्णयः निश्चयः निरास इत्यर्थः जात ; सर्व्वथा इयं क्षत्रपरिग्रहक्षमेति निर्णीतम्। अतः त्वं अभिलाषेण स्पृहया सह वर्त्तमानं इति साभिलाषं शकुन्तलां प्रति अभिलाषवत भव। यत् वस्तु अग्निं आशङ्कसे अग्निवत् दाहकमिति तर्कयसि तदिदं स्पर्शस्य क्षमं योग्यं कण्ठधारणयोग्यमिति भावः रत्नम्। ऋषितनयात्वेन, अचिरेण मया अग्निरिवेयं स्प्रष्टुमशक्येति या शङ्का समुत्पन्ना सा आपास्ता क्षत्रसम्भूतत्वात् रत्नमिव कण्ठधारणयोग्येति भावः। विशेषे प्रस्तुते सामान्यनिर्देशरूपा अप्रस्तुतप्रशंसा।

Change of voice.—साभिलाषेण भूयताम्......यत् अग्निः आशङ्क्यते तेन अनेन स्पर्शक्षमेण रत्नेन भूयते।

প্রিয়ংবদা। মহাশয় ইনি (এই ব্যক্তি) ধর্ম্মাচরণ বিষয়েও পরাধীন। ইঁহার পিতার কিন্তু যোগ্য বরে সম্প্রদান করিবার ইচ্ছা।

রাজা। [আত্মগত] এই প্রার্থনা দুর্লভ নহে। হে হৃদয় এক্ষণে সন্দেহ নির্ণয় হইয়াছে ; তুমি (শকুন্তলার প্রতি) সাভিলাষ হও। যাহাকে অগ্নি বলিয়া আশঙ্কা করিতেছিলে, তাহা স্পর্শযোগ্য রত্ন।

Priyambada.—This person, good sir, is subject to another, even in the practice of religious duties ; but the wish of her father is to give her away to a worthy husband.

King.—[*Aside*] This wish (of mine) is not surely then impracticable.

Be hopeful, O my heart, now the doubts have been resolved (removed). What you suspect to be fire is a gem that can be touched.

अनसूया। "निमित्तपर्य्यायप्रयोगे सर्व्वासांप्रायदर्शनम्" इति प्रथमा, इतरा अपि विभक्तय: सम्भवन्ति। All the case-endings are generally seen to be used in connection with words meaning reason or निमित्त।

शकुन्तला। असंबद्धं असंलग्नं यथेच्छमित्यर्थ: प्रलपति या ताम्।

अनसूया। न कृत: सत्कार: अभ्यर्थनं यस्य तम् अकृतसत्कारम्। स्वस्या: छन्द: अभिप्राय: इति स्वच्छन्द: वृत्तिमात्रे सर्व्वनाम्न: इति पुम्वद्भाव:। तेन इति स्वच्छन्देन प्रकृत्यादिभ्य: उपसंख्यानम् इति तृतीया। तत: तसि:। सार्व्वविभक्तिक: तसि:। अतिथे: अर्च्चनामकृत्वा स्वेच्छया अन्यत्र गमनं न न्याय्यम्।

शकुन्तला। [नेति...तूष्णीमेव प्रस्थिता]।

শকুন্তলা। [যেন ক্রোধের সহিত] অনসূয়ে আমি চলিয়া যাইব।

অনসূয়া। কেন?

শকুন্তলা। এই অসংবদ্ধভাষিণী প্রিয়ংবদার বিষয় আর্য্যা গৌতমীর নিকট বলিয়া দিব।

অনসূয়া। সখি এই বিশিষ্ট অতিথির অভ্যর্থনা না করিয়া ইঁহাকে পরিত্যাগ করিয়া ইচ্ছানুসারে চলিয়া যাওয়া উপযুক্ত হইতেছে না।

শকুন্তলা। [কিছু না বলিয়াই চলিলেন]।

Sakuntala.—[*As if angry.*] Anasuya, I will go.

Anasuya.—Why ?

Sakuntala.—I shall report of Priyambada, who talks impertinently and at random, to the venerable Gautami.

Anasuya.—Friend, it is not proper to go away wilfully, quitting this distinguished guest to whom the rites of hospitality have not been done.

Sakuntala.—[*Without saying a word, goes away.*]

राजा। [गृहीतुमिच्छन् आत्मानं निगृह्य इच्छायाः प्रतिरोधं कृत्वा आत्मगतम्] अहो इति विस्मये अव्ययम् कामिजनानां मनसः वृत्तिः व्यापारः, चेष्टा कायकृतः व्यापारः प्रतिरूपकं प्रतिबिम्बं यस्याः सा। मनसो यादृशी इच्छा प्रवर्त्तते चेष्टा अपि तदनुरूपा भवति।

N. B. In an impulsive nature the ideas have a tendency to become actualities. Although in every act of volition there is a nervous discharge through the motor nerves corresponding to every feelling or emotion in a nature ruled by impulses, instantly as the emotion is felt, the physical movements required for its fruition take place, leaving no room for deliberation to put in its claims. This was about to take place in the king Dushyanta.

अहं हि मुनितनयां अनुयास्यन् सहसा विनयेन वारितप्रसरः स्थानात् अनुच्चलन्नपि गत्वा पुनः प्रतिनिवृत्त इव।

शकुन्तलां अनुगमिष्यन् अहं सहसा हठात् विनयेन शीलेन सदाचारेण इति यावत् वारितः निषिद्धः प्रसरो तस्य तथोक्तः नेदं सदाचारानुमोदितं इति विविच्य अनुगमनात् विरत इत्यर्थः, अस्मात् स्थानात् अनुच्चलन्नपि अत्रैव स्थितोऽपि इत्यर्थः गत्वा पुनः प्रतिनिवृत्तः इव ; पुनः प्रत्यागत इव। उत्प्रेक्षालङ्कारः। २८

Change of voice.—अनुयास्यता वारितप्रसरेण अनुच्चलता......प्रतिनिवृत्तेन भूयते।

রাজা। [শকুন্তলাকে ধরিতে ইচ্ছা করিয়া, ইচ্ছাপ্রতিরোধপূর্ব্বক আত্মগত] কি আশ্চর্য্য, কামিজনদিগের চেষ্টা চিত্তবৃত্তির অনুরূপ হইয়া থাকে।

আমি এই মুনিকন্যার অনুগমন করিব ; (এমন সময়ের) হঠাৎ বিনয় আমার গতিরোধ করিল। যদিও আমি এস্থান হইতে গমন করি নাই, তথাপি যেন বোধ হইতেছে আমি ফিরিয়া আসিয়াছি।

King.—[*Wishing to catch hold of her, but checking himself, aside.*] Ah! a lover's feelings have a counterpart in his movements.

About to follow the daughter of the sage, but suddenly checked (*arrested*) by the sense of decorum, I seem to have come back after following her, though I have not moved from this place.

प्रियंवदा। [शकुन्तलां निरुध्य निवार्य्य धृत्वा इत्यर्थः]।

शकुन्तला। [सभ्रूभेदम्...भ्रूभेदेन भ्रूभङ्गेन सह भ्रुकुटीं कृत्वा इत्यर्थः]

प्रियंवदा। [वलादेनां निवर्त्तयेति] मे इत्यत्र धारेः उत्तमर्णः इति चतुर्थी। In

connection with the root धारि, the creditor takes the fourth case-ending.

প্রিয়ংবদা। [শকুন্তলাকে নিরোধ করিয়া] সখি, তোমার যাওয়া উচিত হইতেছে না।

শকুন্তলা। [ভ্রূভঙ্গের সহিত] কেন?

প্রিয়ংবদা। তুমি আমার নিকট দুইটী বৃক্ষে জল দেওয়া ধার (অর্থ তোমার যে দুই বৃক্ষে জল দেওয়া উচিত ছিল, তাহাতে আমি জল দিয়াছি)। এস আপনাকে ঋণমুক্ত কর ; তারপর যাইবে (বলপূর্ব্বক ফিরাইলেন)।

Priyambada.—[*Holding Sakuntala back.*] Dear friend, it does not become you to go away.

Sakuntala.—[*With a frown.*] Why?

Priyambada.—You owe me the watering of two trees. Come, pay off your debts (literally, free yourself from debts), then go. [*Brings her back forcibly*]

राजा। भद्रे, प्रियंवदासम्बोधनमेतत्—अवभवतीं शकुन्तलां वृक्षसेचनात् वृक्षेभ्यः जलदानात् परिश्रान्तां क्लान्तां लक्षये तथाहि अस्याः बाहू घटोत्क्षेपणात् स्रस्तांसौ, अतिमात्रलोहिततलौ ; प्रमाणाधिकः श्वासः अद्यापि स्तनवेपथुं जनयति ; वदने कर्णशिरीषरोधि घर्म्माम्भसां जालकं स्रस्तं ; बन्धे संसिनि एकहस्तयमिताः मूर्द्धजाः पर्य्याकुलाः।

अस्याः शकुन्तलायाः बाहू करौ घटस्य जलहितस्य कलसस्य उत्क्षेपणात्, उन्नमनात् स्रस्तौ नतौ विस्रस्तौ इति यावत् अंसौ बाहुमूले ययोः तौ तथोक्तौ, अतिमात्रं लोहितं घटसंघर्षणात् अतीवताम्रं तलं ययोः तौ तादृशौ जातौ। प्रमाणात् अधिकः इति प्रमाणाधिकः ; अतिप्रमाणः श्वासः निश्वासमारुतः अद्यापि इदानीमपि, जलसेकाद्दूर्द्धमपि स्तनयोः वक्षोजयोः वेपथुं कम्पं जनयति। किञ्च वदने आनने कर्णयोः श्रवणयोः शिरीषे भूषणार्थं परिहिते शिरीषपुष्पं रुणद्धि यत् तत्, कर्णशिरीषरोधि, घर्म्मात्रेनाचितं कर्णावतंसीकृतं शिरीषपुष्पं गण्डसंलग्नं हतश्रीकं भवति तदित्यर्थः, घर्म्माम्भसां स्वेदजलानां जालकं समूहः जालंसमूहः आनायगवाक्षजालकेष्वपि इत्यमरः। स्वार्थे कन् स्रस्तं विगलितं। बन्धे, कवरीबन्धने, धम्मिल्ले इति यावत् संसिनि विगलिते सति एकेन हस्तेन, अन्यहस्तस्य घटधारणे व्यापृतत्वात् यमिताः (यमेर्णिच् ततः कर्म्मणि क्तः), मूर्द्ध्नि जायन्ते ये ते मूर्द्धजाः सप्तम्यां जनेर्डः इति ड प्रत्ययः। शिरोरुहाः केशाः इति यावत् पर्य्याकुलाः इतस्ततः विक्षिप्ताः।

स्रन्सु च्युतौ इति धातोः क्तः स्रस्तः लट् संसते ; लिट् सस्रंसे ; लङ् असंसिष्ट, अस्रसत्।

Change of voice—प्रमाणाधिकेन श्वासेन स्तनवेपथुः जन्यते ।

तस्मात् अहं एनां शकुन्तलां नास्ति ऋणं यस्याः तां अनृणां ऋणमुक्तां करोमि ।
[अङ्गुलीयं दातुमिच्छति] ।

রাজা। ভদ্রে, ইঁহাকে জলসেচনহেতু পরিশ্রান্ত দেখিতেছি।

ঘটোৎক্ষেপণ হেতু ইঁহার বাহুদ্বয়ের মূল শিথিল হইয়া পড়িয়াছে, এবং করতল অত্যন্ত লোহিত হইয়াছে। অতি দীর্ঘশ্বাসবশতঃ এক্ষণ পর্য্যন্তও ইঁহার স্তনদ্বয় কম্পিত হইতেছে। কর্ণভূষণশিরীষপুষ্পের রোধক স্বেদজলবিন্দুসমূহ আননে বিগলিত হইতেছে; এবং কবরীবন্ধন উন্মুক্ত হওয়ায় এক হস্তের দ্বারা নিবদ্ধ কেশপাশ ইতস্ততঃ বিক্ষিপ্ত হইয়াছে অতএব আমি ইঁহাকে ঋণমুক্ত করি। [অঙ্গুরীয় দিতে ইচ্ছা করিলেন]

King.—Good maiden, I see her already fatigued on account of watering the trees.

By reason of raising the pitcher, her arms, with drooping shoulders, have become deeply red in the palm. Even now her nordinate breath produces tremor in her heaving breast. And drops of perspiration obscuring the Sirisha in her ear are gathering in her face. The fillet of hair having given way, the locks of hair fastened by one hand hang disordered.

Therefore let me free her from her debt. [*Wishes to offer the ring.*]

उभे । [नाम्नः राज्ञः नामधेयस्य मुद्राक्षराणि, उत्कीर्णानि अक्षराणि अनुवाच्य पठित्वा परस्परमवलोकयतः विस्मयात् अन्योन्यं पश्यतः]।

"परस्परम्"—कर्म्मव्यतीहारे सर्व्वनाम्नः द्वे वाच्ये इति परशब्दस्य द्विर्भावः ; 'समासवच्च बहुलम्" इति बाहुलकात् विभक्तेरलुक् ; बहुलग्रहणादन्यपरयो र्न समासवद्भावः असमासवद्भावे पूर्व्वपदस्थस्य सुपः सुर्वक्तव्यः। कस्कादिषु इति विसर्ज्जनीयस्य सः। When reciprocity of action is implied, pronominal bases are reduplicated, and the विभक्ति of the first is sometimes elided and sometimes not ; and when the विभक्ति is not elided the case-ending of the first member, whatever it may be, is replaced by the case-ending of the nominative singular.

राजा। अस्मान्—अन्यथा अयं दुष्यन्त इति सम्भाव्य विविच्य अलम्—मनसि एवं मा कुरुतम् अयं राज्ञः दुष्यन्तात् परिगृह्यते लभ्यते इति राज्ञः परिग्रहः राजसका-

शात् प्राप्तमिदमङ्गुलीयकम् इति द्वितीः राज्ञः पुरुषं कर्म्मचारिणं कञ्चित् माम् अवगच्छतं। इत्यात्मापहारः। अयं राज्ञ दुष्यन्तपितुः परिग्रहः परिजनः—अयं अहमित्यर्थः ; मां राजाचासौ पुरुषश्चेति राजपुरुषः (कर्म्मधारयः) तं अवगच्छतं अहमेव राजा इति जानीतं, इति आत्मनिवेदनम्।

উভয়ে। [রাজার নামাক্ষর পাঠ করিয়া পরস্পরের মুখের দিকে দৃষ্টি নিক্ষেপ করিব]।

রাজা। আমাকে অন্যরূপ বিবেচনা করিবেন না, ইহা রাজার নিকট হইতে প্রাপ্ত ; আমাকে রাজপুরুষ বলিয়া জানিবেন।

Both.—[*Reading the king's name on the seal look at each other*].

King.—Do not suspect me otherwise. This is but a favour of the king. Know me to be an officer of the king.

प्रियंवदा। राजसकाशात् यतो लब्धं तस्मात् यस्मै कस्मैचिद्दातुं न योग्यमिदमङ्गुलीयकम्। दयापरवशेन अनेन भद्रमुखेन अथवा महाराजेन त्वं ऋणमुक्ता कृता ; इदानीं स्वच्छन्दतः गन्तुं शक्यसे।

शकुन्तला। यदि गन्तुं मे शक्तिः स्यात् ततो गच्छेयम्। अस्मिन् जने खलु विगलितं मे आत्मनः उपरि प्रभुत्वम्। आत्मनः इत्यत्र चतुर्थी अपि सम्भवति ; "प्रभ्वादियोगे षष्ठ्यापि साधुः"।

विपूर्ब्बात् सृजतेः तव्यप्रत्ययः भावे—विसृष्टव्यम्—विसर्ज्जनम् ;—सृज् लट् सृजति, लिट् ससर्ज्ज ; लुङ् असाक्षीत्।

राजा। [शकुन्तलां विलोक्य आत्मगतम्] वयम् यथा अस्यां अनुरक्ताः किमियं तथा मयि भवेत् ; नु वितर्के ; नु पृच्छायां विकल्पे च इत्यमरः। अथवेति स्पष्टम्—वाचमिति।

यद्यपि मद्वचोभिः वाचं न मिश्रयति, मयि भाषमाणे अवहिता कर्णं ददाति ; कामं मदाननसंमुखीना न तिष्ठति ; किन्तु अस्याः दृष्टिः भूयिष्ठमन्यविषया न।

यद्यपि, इयं शकुन्तला मम वचोभिः वाक्यैः सह वाचं न मिश्रयति (मिश्र इति अदन्तः चुरादिः मया सह आलापं न करोति इत्यर्थः तथापि मयि भाषमाणे कथयति सति अवहिता (विवक्षया अकर्म्मकत्वात् धाजः कर्त्तरि क्तः) दत्तमनः संयोगा सती कर्णं ददाति आकर्णयति इत्यर्थः। विकारो नैसवक्त्रस्य तद्वाक्यश्रवणादरः। अन्यव्याजेन तद्वीक्षा अनुरागेङ्गितं भवेत्। किञ्च कामं अत्यर्थं मम आननस्य संमुखीना सम्मुखवर्त्तिनी इत्यर्थः (यथासुखसम्मुखस्य दर्शनः इति खप्रत्ययः) न तिष्ठति,—किमियं तर्हि मयि उदासीना इति शङ्कां निरस्यन्नाह किन्त्विति—किन्तु अस्याः दृष्टिः भूयिष्ठं यथा तथा अन्यः पदार्थान्तरं विषयः दर्शनीयः यस्याः सा न

भवति, अन्तरा अन्तरा मामवलोकयति इत्यर्थः। बहुग्रब्दादिष्ठन प्रत्ययः। क्रिया-विशेषण मिदम्।

Change of voice.—...वाक् न मिश्र्यते (अनया) कर्णः दीयते अवहितया, ...मदाननसम्मुखीनया स स्थीयते।

प्रियংবদা। সেই জন্য এই অঙ্গুরীয়টাকে অঙ্গুলী হইতে বিযুক্ত করা উপযুক্ত হইতেছে না। মহাশয়ের বাক্যেই ইনি মুক্তা হইলেন। [ঈষৎ হাস্য করিয়া] শকুন্তলে অনুকম্পাপরবশ এই মহাশয় অথবা মহারাজ তোমাকে ঋণমুক্ত করিয়াছেন; তুমি এক্ষণে যাইতে পার।

শকুন্তলা [আত্মগত] যদি নিজের উপর প্রভুত্ব থাকিত। [প্রকাশ্যে] তুমি বিদায় দিবার বা নিরোধ করিবার কে?

রাজা। [শকুন্তলাকে দেখিয়া আত্মগত] আমি ইহার প্রতি যেরূপ আসক্ত ইনি কি আমার প্রতি সেইরূপ? অথবা আমার মনোরথের অবকাশ হইয়াছে—কারণ-যদিও ইনি আমার বাক্যের সহিত নিজ বাক্য মিশ্রিত করিতেছেন না (অর্থাৎ আমার সহিত কথা কহিতেছেন না), কিন্তু আমি কথা কহিলে, মনোযোগপূর্ব্বক শুনিতেছেন: ইহার দৃষ্টি অধিকক্ষণ আমার আননের সম্মুখবর্ত্তিনী নহে বটে, কিন্তু বহুক্ষণ অন্য বিষয়ে আসক্ত নয়।

Priyambada.—Therefore this ring should not be parted from your finger. She is released from her debts by (or at) your word [*Smiling.*] Dear Sakuntala, you have been released by this kind gentleman or rather the king. Now you may go.

Sakuntala —[*Aside.*] If I had control over myself. [*Aloud*] Who are you to prevent me or to send me away?

King —[*Looking at Sakuntala ; aside.*] Is she affected towards me in the same way as I am towards her? Or, there is room for my wishes (to play.) Because—

Though she does not mingle her words with mine, yet she lends her ear attentively when I am speaking. Although her eye does not stand my gaze, yet it is not cast upon other objects for a long time.

नेपथ्ये (यवनिकान्तराले कस्यचित् ऋषेः उक्तिः)।

भोः भोः तापसाः आश्रमस्य प्राणिनां रक्षार्थं यूयं तपोवने आसन्ना भवत ; यतः मृगयार्थं परिभ्रमन् राजा दुष्यन्तः समुपस्थितः। मृगोपपदात् यातर्घञर्थेकः स्त्रियां टाप् मृगया। यद्वा मृग अन्वेषणे इति अदन्तचुरादिः ततः भावे शप्रत्ययः निपातनात् मृगयेति सिद्धम्।

तथाहि—तुरगखुरहत: परिणतारुणप्रकाश: रेणु: शलभसमूह इव विटपविषक्त-जलार्द्रवल्कलेषु आश्रमद्रुमेषु पतति ।

त्वरया तुरं वा गच्छन्ति ये ते तुरगा: (त्वरा वा तुरशब्द: शीघ्रार्थ: तयोरन्य-तरोपपदात् गमे: डप्रत्ययेन निपातनात् सिद्ध: तुरगशब्द:) अश्वा: तेषां खुरै: हत: निष्पिष्ट: उत्क्षिप्त इत्यर्थ: ; परिणत: अस्ताचलोन्मुख: अरुण: सूर्य: स इव प्रकाशते इति परिणतारुणप्रकाश: आलोहित: इत्यर्थ:, गैरिकबहुलासु पर्वतसन्नि-हितासु भूमिषु सञ्चरणात् पांशूनां शोणत्वमनुसन्धेयम् । रेणु पांशु: रेणुर्द्वयो: स्त्रियां धूलि: पांशुर्नानद्वयो रज: इत्यमर: । शलभानां पतङ्गानां समूह इव विटपेषु शाखासु विषक्तानि विशोषणार्थं लम्बितानि जलार्द्राणि वल्कलानि मुनीनां परिधेयानि येषां तेषु विटपविषक्तजलार्द्रवल्कलेषु शाखाविलम्बितार्द्रतरुत्वचु आश्रम-द्रुमेषु तपोवनवृक्षेषु पतति ।

अपिच, स्यन्दनालोकभीत: तीव्राघातप्रतिहततरु: स्कन्धलग्नैकदन्त: पादाकृष्ट-व्रततिवलयासङ्गसञ्जातपाश:, भिन्नसारङ्गयूथ: गज: न: तपस: मूर्त: विघ्न: इव, धर्मारण्यं प्रविशति ।

स्यन्दनस्य रथस्य आलोकात् दर्शनात् भीत: त्रस्त: अदृष्टपूर्वत्वादितिभाव: । तीव्रेण अतिप्रचण्डेन आघातेन प्रतिहता: विरुग्णा: भग्ना इति यावत् तरवो येन स: तीव्राघातप्रतिहततरु: ; एक दन्त: तादृश, स्कन्धे अंसदेशे लग्न: संसक्त: परिवृत्यावलोकनेन इति भाव: ; एक दन्त: विषाणं यस्य स: तथोक्त: ; पादेन आकृष्ट: यो व्रततीनां लतानां वलय: (वलयवा) तस्य आसङ्गेन संसर्गेण सञ्जात: पाश: रज्जु: यस्य स: पादाकृष्टव्रततिवलयासङ्ग-सञ्जातपाश:, भिन्नानि शङ्कया वेगवर्द्धितगतीनि इत्यर्थ: यद्वा भिन्नानि भयात् इतस्ततो विद्रुतानीत्यर्थ: सारङ्गाणां सारं शवलं विचित्रमित्यर्थ: अङ्गं गात्रं येषां ते सारङ्गा: हरिणा:, शकन्ध्वादित्वात् पररूपत्वं ; सारङ्ग: पशुपक्षिणो: तेषाम् । मृगाणां यूथानि दलानि यस्मात स: गज: नोऽस्माकं तपस: धर्माचरणस्य मूर्त: (मूर्च्छधातो: क्त:) शरीरी विघ्न: अन्तराय: इव धर्मारण्यं धर्मस्य अरण्यं (अश्वघासादिवत् तादर्थ्ये षष्ठ्या समास:) प्रविशति । पूर्वं कदापि न विलोकितस्य रथस्य दर्शनेन भीत: पलायमान: गमनस्य सौकर्यं विधातुं पुरं पतितान आश्रमस्य तरून् रयेण विरुजन् कियति दूरे रथी वर्त्तते इति विलोकयितुं परावर्त्तिते स्कन्धे स्वस्य दन्तेनैकेनासज्यमान:, वृक्षानाश्रितानां लतानां मण्डलस्य पादैराकर्षणेन निगडैश्चरणेषुनिबद्ध इव लक्ष्यमाण: हरिणानां यूथानि वित्रासयन् गजोऽयमाश्रमं मूर्त्या सञ्चरमाणस्तपस: प्रत्यूह इव अभिधावति इति समासरहितै: पदैर्व्याख्या ।

Change of voice.—हतेन...प्रकाशेन रेणुना......समूहेन इव...पत्यते ॥...

भीतेन...तरूणा...दन्तेन...पार्श्वन...यूथेन गजेन...मूर्त्तेन विघ्नेन इव धर्म्मारण्यं प्रविश्यति ।

নেপথ্যে—হে তপস্বিগণ তোমরা তপোবনের জন্তুগণের রক্ষার নিমিত্ত সন্নিহিত হও, মৃগয়াবিহারী রাজা দুষ্যন্ত সমুপস্থিত ।

যাহাদিগের শাখায় (পরিধেয়) আর্দ্র বল্কল বিশোষণার্থ লম্বিত রহিয়াছে সেই আশ্রমবৃক্ষে অস্তোন্মুখ সূর্য্যের ন্যায় লোহিতবর্ণ অশ্বক্ষুরোৎক্ষিপ্ত ধূলিপটল, পতঙ্গসমূহের ন্যায় পতিত হইতেছে ।—এবং রথদর্শনে ভীত হস্তী, আমাদিগের তপস্যার মূর্ত্তিমান বিঘ্নের ন্যায় ধর্ম্মারণ্যে প্রবেশ করিতেছে; ইহার ভয়ে হরিণযূথ ইতস্ততঃ পলায়ন করিতেছে; এবং গমনসময়ে ঐ হস্তী প্রচণ্ড আঘাতে আশ্রমের বৃক্ষগুলি বিপাটিত করিয়া চরণ দ্বারা লতামণ্ডল আকর্ষণ করতঃ যেন রজ্জুবন্ধের ন্যায় দৃষ্ট হইতেছে; (রথ কতদূরে আছে দেখিবার নিমিত্ত স্কন্ধ ফিরাইয়া দেখিবার সময়) ইহার স্কন্ধের উপর একটী দন্ত সংলগ্ন হইয়াছে ।

Behind the Scenes.

O hermits, be ready to protect the animals of the hermitage. King Dushyanta in a hunting excursion has come near at hand.

Like a swarm of locusts, the dust, raised by the feet of the horses, red as the glow of the setting sun, falls on the trees of the hermitage, on the branches of which are hung barks wet with water.

And,—sacred by the sight of the chariot, an elephant, with one of his tusks stuck fast on his shoulder, breaking the trees with a furious onset and drawing a coil of creeper clinging round his feet like a tangled chain, and at whose sight the startled deer are flying away, enters our sacred grove like an embodied hindrance to our rites.

राजा। [आत्मगतम्] अहोधिक् पुरवासिन: मदनुयायिन: मां अन्विष्यन्त: इहागतास्तपोवनस्य पीड़ां जनयन्ति, भवतु प्रतियास्यामि ।

अनसूया। अरण्ये भव: इति अरण्यक: अरण्यशब्दात् वुञ् कण् आरण्यकशब्देनाव वन्यगज: अभिप्रेत:। "पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम्" इति वार्त्तिकेन हस्त्यर्थे अव अरण्यशब्दात् वुञ्। The affix वुञ् is applied to अरण्य to mean पथिन्, अध्याय, न्याय, विहार, मनुष्य and हस्ती। उटेभ्य: तृणेभ्य: जायते इति उटज: पर्णशाला तत्र गमनं तस्मै तादर्थ्ये चतुर्थी।

राजा। [असम्भ्रमम् अनुद्विग्नं यथा तथा वीरपुरुषत्वात्] भवत्य: गच्छन्तु

यथाच आश्रमस्य उपरोधो न भवति तथा चेष्टिष्ये। भौवादिक: यति रात्मनेपदी क्त: यत्त:, यतत: इति केचित्।

সকলে। (শকুন্তলা প্রভৃতি) [শুনিয়া কিছু সন্ত্রস্ত হইলেন]।

রাজা। [আত্মগত] আহা ধিক্ পুরবাসিগণ আমার অন্বেষণক্রমে আসিয়া তপোবনের পীড়া জন্মাইতেছে ; ভাল আমি প্রতিগমন করি।

অনসূয়া। মহাশয়, এই বন্যগজের বৃত্তান্ত শুনিয়া আমরা উদ্বিগ্ন হইয়াছি, আমাদিগকে পর্ণকুটীরে যাইবার অনুমতি দিউন।

রাজা। [অনুদ্বিগ্নভাবে] আপনারা গমন করুন, আমিও যাহাতে আশ্রমের পীড়া না হয় তদ্বিষয়ে চেষ্টা করি।

সকলে। [উঠিলেন]।

All.—[*Listening,—a little alarmed*].

King.—[*Aside.*] Out upon it ! The inhabitants of the city coming in quest of me are disturbing this grove of penance. Well, I must go back.

Anasuya.—Sir, we are terrified by this matter of the wild elephant. Permit us to go back to the cottage.

King.—[*Unperturbed.*] Go you please. I shall look to it that the hermitage is not disturbed.

All.—[*Rise up*].

सख्यौ। न सम्भावित: कृत: अतिथे: सत्कार: पूजनं याभि:_ ता: तादृश्य वयं पुनरपि अस्मभ्यं दर्शनं दास्यसि इति निवेदयितुं लज्जिता भवाम:।

लज्जधातो: लट् लज्जते, लिट् ललज्जे, लुङ् अलज्जिष्ट ; क्त: लग्न:।

राजा। युष्माकं अवलोकनेनैव अहमर्चितोऽस्मि अत: अतिथिसत्कार: न कृत: एवं मा वादिष्टम्।

शकुन्तला। अभिनवा अचिरोद्गता कुशस्य सूची अग्रभाग: तया मे चरणं पदं परिक्षतं विद्धं ; कुरवकस्य क्षुपविशेषस्य शाखायां मे वल्कलं उत्तरीयभूतं लग्नं [आसक्तं ; अत: नाहं गन्तुं समर्था ; यावदुत्तरीयं शाखाभ्रष्टं करोमि तावत् युवाम- पेक्षेयाम [व्याजेन छलेन सह इति सव्याजं राज्ञ: विलोकनार्थं छल कृतम्।]

সখীদ্বয়। মহাশয়, আমরা আপনার কোনরূপ অতিথিসৎকার করি নাই। পুনর্ব্বার আমাদিগকে দেখা দিবেন এরূপ বলিতে লজ্জিত হইতেছি।

রাজা। এরূপ বলিবেন না, এরূপ বলিবেন না, আপনাদের দর্শনেই আমি পুরস্কৃত হইয়াছি।

শকুন্তলা। অনসূয়ে, অভিনবকুশাগ্রে আমার চরণ বিদ্ধ হইয়াছে কুরবকশাখায় আমার বল্কল সংযুক্ত হইয়াছে, যে পর্য্যন্ত বল্কল মোচন না করি, ততক্ষণ তোমরা

অপেক্ষা কর। [ছলপূর্ব্বক বিলম্ব করিয়া রাজাকে দেখিতে সখীদ্বয়ের সহিত নিষ্ক্রান্ত হইলেন।]

The two companions of Sakuntala.—Sir, we have shown no hospitality to you, we are ashamed to request you to visit us again.

King.—Don't don't say so, I have been honoured by the very sight of you.

Sakuntala. – Anasuya, the new-grown blade of a Kusagrass has pricked my foot, and my bark has got entangled in the branch of a Kuravaka tree. Wait for me till I disentangle it. [*Exit with her friend, making pretext for delay,*—[*and looking at the king.*]

राजा। नगरगमनं प्रति मन्दं औत्सुक्यं (उत्सुकस्य भाव: इति ष्यञ्) यस्य स: तादृश: संवृत्तोऽस्मि। अनु पश्चात् यात्रा गमनं प्रयोजनमेषां इति अनुयात्रिका: (यात्राशब्दात् ठन्) अनुचरा: तान् तपोवनस्य नातिदूरेण समीपे इत्यर्थ: निवेशये·यम्—स्थापयेयम। समेत्य तै: सह मिलित्वा। शकुन्तलाव्यापारात् शकुन्तलारूपात् वस्तुन: आत्मानं निवर्त्तयितुं निवृत्तं कर्त्तुं न शक्नोमि।

ममहि –शरीरं पुर:गच्छति, असंस्थितं चेत: प्रतिवातं नीयमानस्य केतो: चीनांशुकमिव पश्चात् धावति।

शरीरं देह: पुर: अग्रे गच्छति किन्तु असंस्थितं चञ्चलम् चेत:, वातं अभिलक्ष्यी·कृत्य इति प्रतिवातं लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभाव:। वाताभिमुखं नीयमानस्य उह्यमानस्य केतो: ध्वजस्य चीनांशुकमिव, * चीनदेशीङ्गवं उतकृष्ट ध्वजवसनमिव पश्चात् धावति। शकुन्तलागतेन चेतसा विहीनेनेव शून्येन देहेन गच्छामि इति भाव:। उपमालङ्कार:।

* "In the Mahabharata and elsewhere the *Chinas* are mentioned among the Dasyus or non-Aryan races in the North and in the East of India. King Bhagadatta is said to have had an army of Chinas and Kiratas, and the Pandavas are said to have reached the town of the king of the Kulindas, after having passed through the countries *Chinas*, Tukharas and Daradas. All this is as vague as ethnological indications generally are in the late epic poetry of India·········Chinese scholars tell us that the name of China is of modern origin and only dates from the Thsin dynasty or from the famous Emperor Shi-hoang-ti, 247 B. C." Max Muller's India, what can it teach us

"दूरान्तिकार्थेभ्यः द्वितीयाच, एभ्यो द्वितीया स्यात् पञ्चमीतृतीयेच" इति नातिदूरेणेत्यत्र तृतीया। "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" इति तपोवनस्य इति षष्ठी; पञ्चमी अपि भवति।

Change of voice.—शरीरेण गम्यते। असंस्थितेन चेतसा चीनांशुकेनेव धाव्यते।

রাজা। নগরগমনের প্রতি আমার ঔৎসুক্য শিথিল হইয়াছে; অনুচরবর্গের সহিত মিলিত হইয়া তপোবনের অনতিদূরে শিবির সন্নিবেশ করি। শকুন্তলাব্যাপার হইতে আপনাকে নিবৃত্ত করিতে পারিতেছি না।

আমার শরীর সম্মুখদিকে যাইতেছে, কিন্তু চঞ্চলচিত্ত বাতাভিমুখে নীয়মান ধ্বজবসনের ন্যায় পশ্চাদ্দিকে ধাবিত হইতেছে।

King.—My eagerness for returning to the city has been slackened. I will go and encamp with my followers somewhere near (literally, not very far from(this grove of penance. In sooth, I can not turn myself away from this matter touching Sakuntala.

My body goes onward, but the restless heart runs back-ward like the silken cloth of a flag borne against the wind. [*Exeunt all*].

अथ नाट्योक्तयः: अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्।
सर्व्वश्राव्यं प्रकाशं स्यात् तद्भवेदपवारितम्॥
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते।
त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्॥
अन्योन्यामन्त्रणं यत् स्यात जनान्ते तज्जनान्तिकम्।
किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते॥
श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम्।

यः कश्चिदर्थो यस्माद्गोपनीयः तस्यान्तरतः ऊर्द्धसर्व्वाङ्गुलि नामितानामिकं त्रिपताकलक्षणं करं कृत्वा अन्येन सह यन्मन्त्र्यते तज्जनान्तिकम्; परावृत्य अन्यस्य रहस्यकथनमपवारितम्। स्पष्टमन्यत्।

स्वगतम्, आत्मगतम्, अपवार्य्य and जनान्तिकम् are all translated into English by "aside"; प्रकाशम् by "aloud" आकाशे in the sense of "in the air" is used in dramas as a stage direction when a character on the stage asks questions to some one not on the stage, and listens to an imaginary speech supposed to be a reply, usually introduced by the words किं ब्रवीषि इत्यादि।

द्वितीयोऽङ्कः ।

[ततः प्रविशति विषसो विदूषकः] ।

कुसुमवसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः ।
हासकरः कलहरतिः विदूषकः स्यात् स्वकर्म्मज्ञः ॥

स्वकर्म्म भोजनादि । वयसि भव इति वयस्यः स्निग्धः सुहृदित्यर्थः तस्य भावः तेन, हेतौ तृतीया, निर्व्विणः अत्यर्थं खिन्नः क्लेशितः इत्यर्थः । मध्यमङ्गः इति मध्याङ्गः, इति एकदेशिसमासः, "अङ्गोऽङ्गः एतेभ्यः" इति अङ्गादेशः, "रात्राह्नाहाः पुंसि" इति पुंस्त्वम् । ग्रीष्मे शुचौ विरला पत्राणां पतनेन यद्वा छायायाः सङ्कुचितत्वात् अल्पा पादपस्य छाया यासु तासु ग्रीष्मविरलपादपच्छायासु । आहिण्ड्यते गम्यते भ्रम्यते इति यावत् भौवादिकात् (हिडि) हिण्डधातोः गत्यर्थात् भावे लट् ।

पत्राणां वृक्षगलितानां पर्णानां सङ्करेण व्यतिकरेण सम्पर्केण इति यावत् कषायाणि कषायरसवन्ति अतएव कटुकाणि विस्वादानि । नास्ति नियता निश्चिता निर्द्धारिता इति यावत् वेला समयः यस्मिन् कर्म्मणि तत् यथा तथा अनियतवेलम् । शूलेन पक्वं इति शूल्यम् ; शूलात् पाके इति यत् प्रत्ययः । शूल्यं मांसं तेन भूयिष्ठः इति शूल्यमांसभूयिष्ठः, मृगयाहतानां पशूनां मांसं शूलेन संस्कृत्य अभ्यवह्रियते इत्यर्थः । तुरगेण अश्वेन अनुधावनं राज्ञः पश्चाद्गमनं तेन कण्डिताः छिन्नप्रायाः जातव्यथा इत्यर्थः सन्धयः प्रत्यङ्गसंयोगस्थलानि यस्य तस्य, मम इत्यस्य विशेषणम्, क्तानां कर्त्तरि वेति षष्ठी । दास्याः पुत्रैः इत्यत्र "पुत्रेऽन्यतरस्याम्" इति निन्दायाम् षष्ठ्या अलुग्भावः पाक्षिकः । गण्डस्य स्फोटकस्य उपरि पिण्डकः विस्फोटकः व्रण इत्यर्थः जातः । अवहीनेषु राज्ञः वेगेन गमनात् पश्चात् दूरस्थितेषु । मृगानुसारेण इत्यत्र प्रकृत्यादिभ्यश्चेति तृतीया । तत्रभवतः इति विवक्षया षष्ठी । तत्रभवते राज्ञे इति चतुर्थीप्रयोगः साधीयान् ; यद्वा तत्रभवन्तं राजानं इति द्वितीयाप्रयोगः । "दृशेश्च" इति वार्त्तिकेन अणिकर्त्तुः कर्म्मत्वात् शकुन्तलेति उक्तकर्म्म ; तत्र पक्षे प्रयोज्यकर्म्मणः राज्ञः नोक्तत्वं । दृशिरत्र ज्ञानसामान्यार्थ इत्यूहनीयः । तत्रश्चोक्तत्वं वक्तुरिच्छाधीनं तथाच कारिका गौणे कर्म्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् । बुद्धिभक्षार्थयोः शब्दकर्म्मणाञ्च निजेच्छया । प्रयोज्यकर्म्मण्यन्येषां ण्यन्तानां लादयोमताः ।

धनं लब्धा इति धन्य: धनगणाल्लब्धा इति यत् तस्य भाव: धन्यता सा नभवति इति अधन्यता तया दुर्भाग्येण अनुक्ते कर्त्तरि तृतीया। "अक्ष्णो:" निषसोरिव नयनयो: प्रभातमासीत् "यस्य च भावेन भावलक्षणमिति" सप्तमी यद्वा "षष्ठी-चानादरे" इति अनादरे सप्तमी, षष्ठी वा।

आचारस्य सद्भिरनुष्ठेयस्य कर्त्तव्यस्य परिक्रम: रीति: परिपाटीतियावत् स क्रमो येन तं। बाणा: शरा: अस्यन्ते क्षिप्यन्ते अनेन इति बाणासनं .इष्वास: धनु: इति यावत् असधातो: ल्युट्—(अनट् वा) तत् हस्ते यासां ताभि: प्रहरणार्थेभ्य परं निष्ठासप्तम्योभवत: इति हस्तशब्दस्य परनिपात:। यवनीभि: यवनानां म्लेच्छजाति-भेदानां, ययातिशप्तस्य तुर्व्वसो: वंशे उत्पन्नानां वा स्त्रीभि: ; यवनशब्दस्य स्त्रियां रूपद्वयम् (१) यवनी, यवनरमणी इत्यर्थ: (२ यवनानी लिपेर्भेदे (a particular kind of alphabet ; the Assyrian alphabet). अङ्गानां पादादीनां भङ्गेन विकल: विधुर इव ; यदि एवं अनुष्ठाय अपि विश्राम: .मृगयाविरामादिति-भाव: लभेय: ; सम्भावनायां लिङ्।

[তাহার পর বিষণ্ণ বিদূষক প্রবেশ করিল]

বিদূষক। [নিশ্বাস পরিত্যাগ করিয়া] দেখিলে, মৃগয়াশীল এই রাজার বয়স্য হইয়া অত্যন্ত কষ্ট পাইতেছি। ঐ মৃগ ঐ শূকর ঐ ব্যাঘ্র এইরূপ করিয়া মধ্যাহ্নকালেও গ্রীষ্ম-নিবন্ধন বিরলচ্ছায়া বনশ্রেণীতে কানন হইতে কাননান্তরে ভ্রমণ করিতে হইতেছে। বৃক্ষপত্রাদির সংসর্গে কষায় ও কটু গিরিনদীর জলপান করিতে হয়। শূলপক্ক মাংসই প্রধান আহার, তাহার আবার সময়ের কোন স্থিরতা নাই। অশ্বপৃষ্ঠে অনুধাবনহেতু অঙ্গপ্রত্যঙ্গাদির সন্ধিস্থল ব্যথিত ; সুতরাং রাত্রিতে সুখে শয়ন হয় না। তারপর অতি প্রত্যূষে দাসীর পুত্র পক্ষিলুব্ধকদিগের অরণ্যপ্রবেশের কোলাহলে জাগিয়া উঠি—ইহাতেই যে যন্ত্রণার শেষ তাহা নয়। ইহার পর স্ফোটকের উপর বিস্ফোটক হইয়াছে (গোদের উপর বিষফোড়া হইয়াছে) ; গতকল্য আমরা পশ্চাৎ পড়িলে মৃগের অনুসরণক্রমে আশ্রমে প্রবিষ্ট নরপতিকে আমার দুর্ভাগ্যদেবতা শকুন্তলানামক তাপসকন্যা দেখাইয়াছেন। এক্ষণে কোনরূপেই নগরগমনের মন করেন না। আজও সেই কন্যাকে চিন্তা করিতে করিতে নরপতির চক্ষুর উপর রাত্রি প্রভাত হইল। উপায় কি? নরপতি প্রাতঃকালের কর্ত্তব্যাদি সম্পন্ন করিয়াছেন, তাঁহার সহিত সাক্ষাৎ করি। [কিছুদূর গমন করিয়া এবং অবলোকন করিয়া] এই যে কার্ম্মুক-হস্ত বনপুষ্পমালাধারিণী যবনীপরিবেষ্টিত প্রিয়বয়স্য এইদিকেই আসিতেছেন, অঙ্গভঙ্গবিকলের ন্যায় দাঁড়াইয়া থাকি, যদি এরূপেও বিশ্রামলাভ করিতে পারি। [নিজের যষ্টি অবলম্বন করিয়া দাঁড়াইয়া রহিল]।

[*Enter* Bidushaka (the jester) *in a melancholy mood.*]

Bidushaka —[*Sighing*] Have you seen? I am emaciated with

sorrow on account of being an attendant of this king of sporting propensities. Here's a deer ; there's a boar ; yonder is a tiger ! In this way we have to toil on in the noontide from forest to forest, where in the woods there is no shade in this summer. We have to drink the foul water of the mountain-streams, having an acrid taste by reason of being filled with (dry) leaves. Then we have to swallow down food consisting mainly of flesh roasted on spits, at irregular hours. With joints all strained by running (after the king) on horse-back, I cannot sleep peacefully even at night. Then at the earliest dawn I am awakened by the rascals, the hunts-men, with their din, while entering the forest. Nor do my troubles end here. A fresh boil has risen upon another. Yesterday while we were lagging behind, the king entering the hermitage after a deer was shown by my ill-luck the hermit's daughter, named Sakuntala. Now he does not think of returning to the city. Last night wore away over his eyes wide awake, thinking of the damsel. What is to be done ? Let me visit him who (by this time) has done his morning duties. [*Walking and look ng about*]. Here comes my friend attended by the Yavana women with bows in their hands and wearing garlands of wild flowers. Well ! Let me stand here as though my limbs have been crippled and maimed ; if thus I may get rest, [*stands leaning on h s staff.*]

[तत इति—निर्द्दिष्टमनतिक्रम्य इति यथानिर्द्दिष्टम (अव्ययीभावः) यथानिर्द्दिष्ट परिवारः यस्य सः (घञि उपसर्गस्य वहुलमनुष्येष् इति परैर्नदीघत्व मनुष्यत्वात)।

राजा। काममिति—कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि मनसिजे अकृतार्थेऽपि उभयप्रार्थना रतिं कुरुते। २१

कामं अकामेनापि मया एतत् अनुमन्तव्यमितार्थः अकामानुमतौ काममित्यमरः इति विद्यासागरकृतव्याख्यानमेव सम्यक् कामं अतार्थं प्रिया इति राघवभट्टव्याख्यानं न मनोरमं कामं चानुमतौ स्मृतमिति मेदिनी ;—प्रिया शकुन्तला न सुलभा न अनायासलभ्या ; किन्तु मनः ममचित्तं तस्याः प्रियायाः भावस्य चित्ताभिप्रायस्य भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु इति मेदिन्यमरौ दर्शने परिज्ञाने आयस्यति चेष्टते इति तद्भावदर्शनायासि यस्यतेः णिनिः। कीदृक् अस्याः चेतो मां

प्रति इति ज्ञातुमुत्सुकं मे मनः इत्यर्थः। यदीयं न सुलभा किन्तर्हि अस्याः भावज्ञानेन प्रयोजनमिति शङ्कां निरस्यन्नाह—मनसि जायते इति मनसिजः (सप्तम्यां जनेर्डः तत्पुरुषे कृति बहुलम् इति सप्तम्या अलुक्) तस्मिन् मनसिजे मनोभवे कन्दर्पे इति यावत् अकृतार्थे अपि अचरितार्थे अपि उभयोः परस्परस्य प्रार्थना अन्योन्यसमागमेच्छा रतिं अनुरागं सन्तोषं मुदमिति यावत् रतिः कामस्त्रियां रागे सुरतेऽपि रतिः स्मृता इति धरणिः "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययो" रिति मेदिनी। कुरुते तनोति। इच्छायामचरितार्थायामपि इतरेतरस्य अनुरक्तिव्यञ्जकव्यापारावलोकनेनोभयोरेव मुन्नितरां वर्द्धते इत्यर्थः।

Change of voice.—उभयप्रार्थनया रतिः क्रियते।

[स्मितं हास्यं कृत्वा] एवं आत्मनः स्वस्य अभिप्रायेण अभिलाषानुसारेण सम्भाविता उन्नीता अनुमिता इति यावत् इष्टजनस्य दयितजनस्य चित्तवृत्तिः मनोवृत्तिः येन सः आत्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते प्रायेण प्रतार्य्यते। यः खलु कस्याश्चित् अनुरक्तः सन् तस्याः चेष्टादिकं अनुरागान्धः स्वाभिप्रायानुकूलं तर्कयति स वञ्चितो भवति।

एतदेव प्रपञ्चेनाह स्निग्धमिति—तया अन्यतोऽपि नयने प्रेरयन्त्या यत् स्निग्धं वीक्षितं, नितम्बयोः गुरुतया विलासादिव मन्दं यच्च यातम्, मा गा इति उपरुद्धया तया सा सखी सासूयं यत् उक्ता तत्सर्व्वं मत्परायणं किल ; अहो कामी स्वतां पश्यति।

अन्यतः अन्यस्मिन् विषये नयने लोचने प्रेरयन्त्या प्रेषयन्त्या यथा यत् स्निग्धं प्रीतिपूर्णं वीक्षितं दृष्ट अन्यवस्तुदर्शनावसरे सानुरागं यत् विलोकितं ; नितम्बयोः गुरुतया वैपुल्यात् विलासादिव तात्कालिकी विशेषस्तु विलासोऽङ्गक्रियादिषु इत्युक्तात् रतिव्यञ्जकचेष्टाभेदादिव मन्दं धीरं यच्च यातम् गतम् ; मा गाः (इणोलुङीति गादेशः) मा गच्छ इति उपरुद्धया निषिद्धया अपि तया सा सखी प्रियंवदा असूयया सह वर्त्तमानं यथा तथा इति सासूयम् सक्रोधम् यच्च उक्ता "का त्वं विसृष्टव्यस्येति" कथिता तत् सर्व्वं मत्परायणं अहमेव परं अयनं आश्रयः यस्य तत् मामेव उद्दिश्य कृतमित्यर्थः ; अत किलेति सम्भावनायाम् अहो आश्चर्य्यम् कामी जातपूर्व्वरागी जनः स्वतां पश्यति नायिकाकृतगमनप्रमुखं चेष्टितं आत्मनि अनुरागहेतुकं मन्यते इत्यर्थः। शार्द्दूलविक्रीड़ितं छन्दः तल्लक्षणं। सूर्य्याश्वैर्मसजास्तताः सगुरवः शार्द्दूलविक्रीड़ितम्।

Change of voice.—प्रेरयन्ती...वीक्षितवती...यातवती ; "मा गायि" इत्युपरुद्धा तां सखीं यदुक्तवती ; तेन सर्व्वेण मत्परायणेन (भूयते) ; कामिना स्वता दृश्यते।

[তাহার পর যথানির্দ্দিষ্ট পরিবার রাজা প্রবেশ করিলেন]

রাজা। প্রিয়া সুলভ নহেন ইহা স্বীকার করিতে হইবে। কিন্তু আমার চিত্ত তাঁহার অভিপ্রায়াদিপরিজ্ঞানের জন্য উৎসুক। (কারণ) মনোভাব (অভিলাষ) চরিতার্থ না হইলেও, উভয়ে উভয়ের প্রতি প্রার্থনাশীল ইহা জানিতে পারিলে আহ্লাদ অনুভূত হয়। [ঈষৎ হাস্য করিয়া] যে কামী ব্যক্তি নিজ অভিপ্রায়ানুসারে বল্লভজনের চিত্ত-বৃত্তির অনুমান করেন তিনি বঞ্চিত হন।

তিনি অন্য বস্তুতে নয়ন ফিরাইবার সময় যে স্নেহপূর্ণ দৃষ্টিপাত করিয়াছেন, নিতম্বের গৌরবহেতু, যেন বিলাসের সহিত, ধীরভাবে যে গমন করিয়াছেন ; গমন করিও না এইরূপে নিষিদ্ধ হইয়া সখী প্রিয়ংবদাকে যেরূপ ক্রুদ্ধভাবে বলিয়াছিলেন সে সমস্তই আমার উদ্দেশে করিয়াছেন। কি আশ্চর্য্য, কামান্ধ ব্যক্তি সমস্তই স্বাভিপ্রায়ানুকূল বিবেচনা করেন।

[*Enter king Dushyanta, attended by a retinue described above.*]

King.—True, the object of my love is not to be easily obtained ; yet my mind is eager to know the disposition of her heart. Though desires are not satisfied, yet (the knowledge of) mutual attraction is (itself) gratifying. [*Smiling*] Thus a lover, judging of the feeling of his beloved one by his own desires, is deluded.

The affectionate glances she stole at me while directing her eyes towards other object ; the slow paces with which she went because of the largeness of her hips ; (but appearing to move) in a gait indicative of her amorous sentiment, and what she in anger said to her companion (Priyambada), when she was forbidden with (such words as) "do not go",—all these are (intended) for me. Ha ! A lover looks upon (everything) to be centred in himself.

विदूषकः। [तथेति यष्टिमवलम्ब्य स्थित एव] हस्तौ च पादौ च इति हस्तपादं प्राण्यङ्गत्वात् द्वन्द्वे एकवद्भावः न प्रसरति आशीर्व्वचनावसरे ब्राह्मणानां दक्षिणहस्तोत्तोलनं प्रसिद्धम्। व्यथितत्वात् नाहं हस्तं उत्तोलयितुं समर्थः अतः वागेव इति वाङ्मात्रं स्वार्थे मात्रच् प्रत्ययः क्वचित् स्वार्थिकाः प्रकृतेर्लिङ्गवचनान्यति-वर्त्तन्ते इति भाष्यवचनात् क्लीबत्वम् तेन जीवयिष्यामि जयति भवान् इति आशीर्व्वचनं प्रयोक्ष्ये इत्यर्थः। जाप्यसे इति ण्यन्तात् जयतेः कर्म्मणि लट् "क्रीङ्जीनां णौ" इति इकारस्य आत्त्वे पुगागमः। In the presence of the affix णिच् the final vowels of the roots क्री, इङ् and जि are changed into आ and पुक् is the augment.

राजा। कुत इति गावाणां अङ्गानां उपघात: वैक्लव्यम्। सञ्चालनासामर्थ्यम् इत्यर्थ:।

विदूषक:। अनाकुलं आकुलं कृत्वा इति।

राजा। तस्य हेतु: सरितो रय:।

বিদূষক। [সেইরূপে দাঁড়াইয়া] হে বয়স্য আমার হস্তপদ নড়াইবার শক্তি নাই। কেবল বাক্যের দ্বারা আশীর্ব্বাদ করি।

রাজা। এইরূপ অঙ্গবৈকল্য কি নিমিত্ত হইল?

বিদূষক। "কেন" জিজ্ঞাসা করিতেছেন; স্বয়ং চক্ষুতে আঘাত করিয়া জল পড়িতেছে কেন ইহা জিজ্ঞাসা করার ন্যায় আপনার প্রশ্ন।

রাজা। আমি বুঝিতে পারিলাম না।

বিদূষক। হে বয়স্য বেতসবৃক্ষ যে কুব্জের ন্যায় হয় সে কি স্বীয় প্রভাবে অথবা নদীর বেগপ্রভাবে।

রাজা। নদীবেগ তাহার কারণ।

Bidnshaka.—[*In the same attitude.*] Ah ! friend, my hands and feet cannot move ; so by words alone I will offer benediction.

King.—Whence is this paralysis of your limbs ?

Bidushaka.—You ask "whence?" This is as much as to ask the cause of tears in the eye after having yourself pricked it.

King.—I don't understand you.

Bidushaka.—Does the cane imitate the action of a humpback because of its own force or of that of the current of a stream ?

King.—The cause thereof is the current of the river.

विदूषक:। ममापि भवान्।

विदूषक:। प्रजापालनादीनि राज्ञ: कर्त्तव्यानि विहाय हिंस्रै: शार्दूलप्रभृतिभि: पशुभि: सङ्कुलतया भीषणे अस्मिन् अरण्ये किरातानां वृत्तिमास्थाय भवतोऽवस्थानमयुक्तमित्यर्थ:। प्रतिदिनं पशूनामनुधावनै: जातव्यथानां गावाणां नाहं प्रभु:। अतो याचे भवन्तमेकमपिदिनं विश्रामाय।

वने चरन्ति ये तेषां (चरेष्ट:) वृत्तिरिव वृत्ति: यस्य तेन; उपमानपूर्व्वपदो बहुव्रीहिरुत्तरपदलोपश्च; अह्नि अह्नि इति प्रत्यहं वीप्सार्थे अव्ययीभाव: नपुंसकादन्यतरस्याम् इति पाक्षिक: टच् प्रत्यय:; तदभावे प्रत्यह इति पदं स्यात्। श्वापदा: श्वन इव पदानि एषां इति श्वापदा: उपमानपूर्व्वपदो बहुव्रीहिरुत्तरपदलोपश्च। श्वनी दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषुदीर्घोवाच्य: इति पूर्व्वपदस्य दीर्घत्वम्। The penult vowel अ of श्वन् is lengthened when दन्त, दंष्ट्रा, कर्ण, कुन्द

वराह, पुच्छ and पद enter into a compound form with it, forming the last member of the compound. यद्वा शुनः इव आपद एभ्यः इति (श्वन् + आपद् + अच्) तेषां समुत्सारणैः अनुधावनैः संक्षोभितः सञ्चलितः श्लथीभूतः इति यावत् व्यथितः इत्यर्थः सन्धिबन्धः संयोगस्थलं येषां तेषाम्। गात्राणामित्यत्र कृद्योगलक्षणा षष्ठी कर्म्मणि। एकश्चतत् अहश्चेति एकाहः ; राजाङ्गाहाः पुंस्त्वम्। राजाहः सखिभ्यष्टच् इति टच्। उत्तमैकाभ्याञ्च इति निषेधात् न अह्नादेशः। अत्यन्तसंयोगे द्वितीया।

বিদূষক। আমারও আপনি।

রাজা। কিরূপে?

বিদূষক। আপনি রাজকার্য্য পরিত্যাগ করিয়া ঈদৃশ ভীষণ স্থানে বনচরের বৃত্তি অবলম্বন করিলেন, সত্যই প্রতিদিন শ্বাপদদিগের অনুসরণ করিয়া আমার গাত্রের সন্ধিস্থল সঙ্কলিত প্রায় হইয়াছে; অঙ্গপ্রত্যঙ্গাদির উপর আমার প্রভুত্ব নাই। অতএব প্রার্থনা একদিনও বিশ্রাম করিবার জন্য আমাকে বিদায় দিউন।

Bidushaka.—Mine too are you.

King.—How so?

Bidushaka.—Here in this awful region you are living the life of a man of the forest, (a forester), neglecting your duties as king. In sooth, I am no master of my own limbs, the joints of which have been shaken by pursuing every day the wild animals. I request you, therefore, to let me have one day at least for rest.

राजा। [स्वगतम्] काश्यपस्य कण्वस्य सुतां शकुन्तलां अनुस्मृत्य मम चेतः मृगयायां विक्लवं अनुत्सहमानं अनुत्सुकमित्यर्थः। स्मरणकर्त्तृकत्वम् चेतसि उपचरितम्, ततः समानकर्त्तृकत्वनिर्व्वाहात् ल्यप्प्रयोगः।

कुतः नेति—अधिज्यं आहितसायकं इदं धनुः मृगेषु नमयितुं न शक्तः अस्मि ; यैः प्रियायाः सह वसतिमुपेत्य मुग्धविलोकितोपदेशः कृतः इव। ३१

अधिरूढ़ा ज्या येन तत् अधिज्यं सगुणं, आहितः सहितः संयोजित इति यावत सायकः वाणो यस्मिन् तत् इदं धनुः शरासनं मृगेषु हरिणेषु नमयितुं सन्नतं कर्त्तुं मृगान् लक्षीकृत्य आक्रष्टुमित्यर्थः न शक्तः समर्थोऽस्मि। कुत एतदशक्तत्वं इति चेत् तत्राह यैः हरिणैः प्रियायाः शकुन्तलायाः सह वसतिः इति सहवसतिः तां "सह सुपा" इति समासः उपेत्य प्राप्य, प्रियया सह उषित्वा इत्यर्थः मुग्धं चित्ताकर्षकं यत् विलोकितं प्रेक्षणं तस्य उपदेशः कृतः ; मधुरचकितप्रेक्षणं प्रियया हरिणेभ्यः शिक्षितमतस्तेन वधार्हाः—

तथाच कुमारे—अधीरविप्रेचितमायताच्या
तया गृहीतं नु मृगाङ्गनाभ्य:
ततो गृहीतं नु मृगाङ्गनाभि: ॥

अनुपसृष्टात् नमे र्णिचि नमयति, नामयति, इति पदद्वयं भवति उपसृष्टात् नु नित्यं ह्रस्व:। विलोकितमिति नपुंसके भावे क्त:। सो नाशे इत्यस्मात् ण्वुल् (णक) प्रत्ययेन सायक: सिद्ध: अत्र यच्छब्दस्य उत्तरवाक्यगतत्वेनोपादानेन सामर्थ्यात् पूर्व्ववाक्ये तच्छब्दस्यार्थत्वम्।

Change of voice.—शक्तेन न भूयते। यै...मुग्धविलोकितोपदेश: कृतवन्त:।

রাজা। [স্বগত] এ এইরূপ বলিল, কাশ্যপসুতাকে মনে করিয়া আমারও চিত্ত মৃগয়ায় অনুৎসুক ; কারণ—

যে মৃগগণ প্রিয়ার সহিত বাস করিয়া মধুর বিলোকনে উপদেশ দিয়াছে তাহাদের প্রতি, সগুণ, বাণসহিত এই ধনুঃ আকর্ষণ করিতে পারিতেছি না।

King.—[*Aside*] He says so. My mind too, recollecting the daughter of the hermit Kasyapa, is disinclined to hunting.

I cannot bend my bow, well-strung and with an arrow set to it, against the deer, which, enjoying the companionship of my beloved one, have taught her, as it were, the sweet glances.

विदूषक:। [राज्ञ: मुखं विलोक्य] अन्यतकिमपि चिन्तयति भवान् नमेवच: श्रुतम् भवता। जनशून्ये अरण्ये रुदितमिव ममेदं निवेदनं निष्फलं जातम्।

राजा। [सस्मितम्] भवादृशस्य प्रियसुहृद: वचनं नातिक्रमितुं शक्यमिति मृगयाविरतस्तिष्ठामि।

राजा। वयस्य चणमपेचस्व न मे वाक्यमवसितं किमपि अवशिष्टमस्ति।

राजा। लब्धविश्रामसुखेन त्वया कस्मिंश्चित् अक्लेशकरे व्यापारे साहाय्यकं मे कार्य्यम्।

नास्ति आयास: क्लेश: यस्मिन् तस्मिन्। यसु चये इति धातो: आङ्पूर्व्वात् घञि आयास:। यस्—लट् यस्यति यसति, लिट् ययास, लुङ् अयासीत्, अयसीत्, अयसत् ; क्त: यस्त:। सह अयते एति वा इति सहाय: ; अयधातो: इणधातो: वा पचाद्यच् इति अच्। सहायस्य भाव: इति साहाय्यं सहायशब्दात् ष्यञ् तत: स्वार्थे कन्। वुञ् प्रत्यये साहायकं इति पदं भवति।

বিদূষক। [রাজার মুখের দিকে দৃষ্টিপাত করিয়া] আপনি অন্য কিছু ভাবিতেছেন, আমার অরণ্যে রোদন হইল।

রাজা। [ঈষৎ হাস্য করিয়া] অন্য আর কি মনে করিব, বন্ধুবাক্য অতিক্রম করিবার যোগ্য নহে, এইজন্য দাঁড়াইয়া রহিয়াছি।

বিদূষক। দীর্ঘজীবী হউন [গমন করিতে ইচ্ছুক হইল]!

রাজা। বয়স্য, অপেক্ষা কর, আমার বাক্যের শেষ হয় নাই।

বিদূষক। আজ্ঞা করুন।

রাজা। তুমি বিশ্রান্ত হইয়া আমার একটি অনায়াসকর কার্য্যে সহায় হইবে।

Bidushaka—[*Looking in the kin'g face*]. You have something on your mind and are uttering it to yourself. I have wept in a forest ; (my prayer has been made to no purpose).

King.—[*With a smile*]. What else ? The request of a friend should not be neglected ; and therefore I stay.

Bidushaka.—May you live long ! [*wishes to go away*].

King.—Stop (a moment) my friend ; what I have to say is not done.

Bidushaka.—Be pleased to command.

King.—When you have rested yourself, you must assist me in a business which is not fatiguing.

विदूषक:। मोदकस्य खाद्यभेदस्य खण्डिकायां भोजने मया सहायेन भाव्यं कश्चित् ; तेन हि अयं जन: अहमित्यर्थ: सुगृहीत: विचार्य्य गृहीत:। अहमेव तत्र व्यापारे योग्यतम:।

राजा। यत्र विषये वक्ष्यामि ; कोऽत्र द्वारदेशे वर्त्तते।

दौवारिक:। [प्रणम्य]।

द्वारं रक्षति तत्र नियुक्तो वा इति दौवारिक: द्वारशब्दात् ठक् "द्वारादीनां च" द्वार इत्येवमादीनां य्वाभ्याम् उत्तरपदस्याचामादेरच: स्थाने वृद्धिर्न भवति पूर्वौ तु ताभ्यामैजागमौ भवत:॥ काशिका। ऐच् *i. e.* ऐ and औ are the augment just before the य and व respectively of words such as द्वार and others.

Similar instances—वैयासिकी, शौवापद &c.।

राजा। रैवतक इति दौवारिकस्य नाम। आङ्पूर्व्वात् ह्वयते: कर्म्मणि लोट्। आह्वयताम्।

स्पर्द्धायामाङ् पूर्व्वात् ह्वयते: कर्त्तरि आत्मनेपदं भवति। ह्वे लट्—ह्वयति, लिट् जुहाव, लुङ् अह्वत्, क्त: हूत:।

दौवारिक:। [निष्क्रम्य सेनापतिना सह पुन: प्रविश्य]। आज्ञावचनं प्रदातुं उत्कण्ठ: उद्ग्रीव: इतएव दत्ता दृष्टिर्येन तादृश:। ऋधातोर्ण्यन्तिक्तेे आर्य्य इति पदं सिद्धम्।

বিদূষক। মোদকভোজনে কি (সহায়তা করিতে হইবে)? তাহা হইলে এই ব্যক্তিকে গ্রহণ করা উত্তম হইয়াছে।

রাজা। যে বিষয়ে বলিব। এখানে কে আছ?

দৌবারিক। [প্রবেশ করিয়া প্রণামপূর্ব্বক] স্বামী আদেশ করুন।

রাজা। রৈবতক, সেনাপতিকে আহ্বান কর।

দৌবারিক। (যাহা আদেশ করিলেন) তাহা (করিতেছি) ;[নির্গত হইয়া সেনাপতির সহিত পুনঃ প্রবেশ করিয়া] এই যে প্রভু আজ্ঞা প্রদানের জন্য উৎকণ্ঠ হইয়া এইদিকে দৃষ্টিপাত করিয়া রহিয়াছেন। আপনি সমীপে গমন করুন।

Bidushaka.—In eating sweetmeats? Then this person has been rightly chosen.

King.—In what I will tell you. "Ho! who is there?"

Warder.—[*Entering and bowing*]. Let my liege be pleased to command.

King—Raibataka, call in the general of the army.

Warder.—What your majesty commands (I obey). [*Exit and re-entering with the commander*]. There is his majesty on the point of giving out his words of command, and looks this way. Be pleased to go near him.

सेनापतिः। दृष्टाः दोषाः यत्र सा दृष्टदोषा अपि मृगया स्वामिनि प्रभौ दुष्यन्ते केवलं गुणः एव संवृत्ता। यद्यपि मृगयायां बहवो दोषा दृश्यन्ते, तथापि अस्मद्भर्त्तरि तु सा केवलं गुणपरिणामिनी भूता। मृगयतेः भावे शः स्त्रियां मृगया।

तथाहि देवः दुष्यन्तः गिरिचरः नागः इव, अनवरतधनुर्ज्यास्फालनक्रूरपूर्व्वं रविकिरणसहिष्णु, स्वेदलेशैः अभिन्नं, अपचितमपि व्यायतत्वात् अलक्ष्यं प्राणसारं गात्रं विभर्त्ति। ४।

गिरौ पर्व्वते चरति इति गिरिचरः (चरेष्टः) नागः गजइव अनवरतं निरन्तरं धनुषः कार्म्मुकस्य ज्यायाः गुणस्य मौर्व्वी ज्या शिञ्जिनी गुण इत्यमरः, आस्फालनेन विस्फुरीर्णौ इति णिचि आत्वे आस्फारयति (आस्फालयति) इति रूपम्। ततो ल्युटि आस्फालनम् तेन आकर्षणेन क्रूरः कठिनः कर्कश इति यावत् पूर्व्वः नाभेरारभ्य मूर्द्धानं यावत् देहभागः यस्य तत् अनवरतधनुर्ज्यास्फालनक्रूरपूर्व्वम्, रवेः किरणान् रश्मीन् सहिष्णु, सोढुं समर्थम् "नलोकेत्यादिना" षष्ठीनिषेधात्, "गम्यादीनामुपसंख्यानम्" इति द्वितीयया समासः। स्वेदानां घर्म्मजलानां लेशैः कणैः अभिन्नम् अमिश्रं बलिष्ठत्वात् अखिन्नतया स्वेदेन अनाप्लुतम् अपचितमपि कृशमपि सत् व्यायतत्वात् दीर्घत्वात् अलक्ष्यं कृशत्वेन न ज्ञायमानं, प्राणः बलं, शक्तिः पराक्रमः

प्राण: इत्यमर: प्राणो हृन्मारुते वीले काव्यजीवेऽनिले बले। पुंलिङ्ग: पुरिते वाच्यलिङ्ग: पुंभूम्निचात्मसु॥ इति मेदिनी। सारो यस्य तत् प्राणसारं वलिष्ठं गात्रं वपु: विभर्त्ति धारयति।

व्याङ् पूर्व्वात् यमे: क्त: व्यायत:, तस्य भाव: व्यायतत्वम्। यम् लट् यच्छति, लिट् ययाम ; लुङ् अयंसीत्। अपपूर्व्वात् चिनोते: क्त: अपचित:।

चि लट् चिनोति चिनुते ; लिट् चिकाय, चिचाय ; चिक्ये, चिच्ये ; लुङ्— अचैषीत् अचेष्ट ;—चिनोति: द्विकर्म्मक: ; दुहादिषु अन्तर्भवति।

सम् + चि—सञ्चय:।
उप + चि—उपचय: वृद्धि:।
अप + चि—अपचय: क्षय।
————अपचिति: पूजा।
परि + चि—परिचय: संस्तव:।

उत + चि—उच्चय: राशि:।
नि + चि—निचय: समूह:।
आ + चि—आचिति: व्याप्ति:।
प्र + चि—प्रचय: वृद्धि:।
वि + चि—विचिति:। अन्वेषणम्।
निर् + चि—निश्चय:, संशयच्छेद:।

Change of voice.—देवेन दुष्यन्तेन गिरिचरेण नागेन इव...भ्रियते।

[उपेत्य] गृहीता: परिज्ञाता: श्वापदा: लक्षणया श्वापदानां प्रचारा: अवस्थानानि इत्यर्थ: यत्र तत् तादृशं अरण्यम्—अन्यत्र अत्र स्थाने इत्यर्थ:।

राजा। मृगयां अपवदति निन्दति इति मृगयापवादी (वदे: णिनि:) तेन माठव्येन विदूषकेण मन्द: हत: उत्साह: मृगयां प्रति आग्रह: यस्य तादृश: कृत:।

সেনাপতি। [রাজাকে অবলোকন করিয়া] মৃগয়ায় অনেক দোষ দৃষ্ট হয় সত্য কিন্তু এই মৃগয়া প্রভুতে কেবল গুণরূপে পরিণত হইয়াছে।

পর্ব্বতীয় গজের ন্যায় প্রভুর দেহ অতি বলিষ্ঠ নিরন্তর ধনুর্গুণাকর্ষণে ইঁহার দেহের পূর্ব্বার্দ্ধ কর্কশ হইয়াছে; শরীর সূর্য্যকিরণ সহ্য করিতে সমর্থ। (এত পরিশ্রমেও) গাত্রে স্বেদবিন্দুর সম্পর্ক নাই এবং যদিও অঙ্গাদি কৃশ হইয়াছে তথাপি দীর্ঘতাহেতু কার্শ্যের উপলব্ধি হইতেছে না।

[সমীপে গমন করিয়া] প্রভুর জয় হউক। অরণ্যে শ্বাপদাদির অবস্থান পরিজ্ঞাত হইয়াছে ; অন্য স্থানে কি নিমিত্ত অবস্থান করিতেছেন ?

রাজা। মাঠব্য মৃগয়ার নিন্দা করিয়া আমার উৎসাহভঙ্গ করিয়াছে।

General.—Though there are to be seen evil consequences of hunting, yet to our lord it has been productive of benefit alone. For, our lord, the king, like an elephant that roams over mountains, bears a frame full of vigour and life. The fore-part of his body has become rough and hard by reason of frequently pulling the

bow-string ; it can sustain the heat of the sun ; and never do drops of perspiration spread over it (for any amount of toil). And though it has become a little thin and wasted, yet, because of its vast proportions, it is not perceived to be so.

[*Going near*]. Victory to our lord the king. The wild beasts have been traced in the forest ; why does your majesty stay elsewhere ?

King.—Disparaging the chase, Mathavya has lessened my zest for it.

सेनापतिः। [जनान्तिकम्] स्थिरः दृढ़ः प्रतिबन्धः, निर्बन्धे अभिप्रायदार्ढ्यमित्यर्थः अस्य तादृशः भव। अहं तावत् प्रभोः अभिप्रायं परिज्ञातुं छन्दानुवर्त्तनं करिष्ये [प्रकाशम्] विधीयते यः सः स एव विधेयः वैधेयः मूर्ख विप्रत्वात् दधातेः कर्म्मणि यत् ततः स्वार्थे अण्। एष माठव्यः प्रलपतु उन्मत्तवत् प्रलापवाक्यं वदतु ; तत्र आस्थां माकार्षीरितिभावः। अत्र विषये मृगया श्रेयसी न वेति निर्णयाय प्रभुरेव प्रमाणम्।

वपुः मेदश्छेदकृशोदरं लघु उत्थानयोग्यं भवति। सत्त्वानां भयक्रोधयोः विकृतिमत् चित्तं लक्ष्यते। धन्विनां स च उत्कर्षः यत् चले लक्ष्ये इषवः सिध्यन्ति ; मृगयां मिथ्यैव व्यसनं वदन्ति ईदृक् विनोदः कुतः।

सम्प्रति मृगयागुणान् स्तुवन्नाह —वपुः मृगयाशीलस्य जनस्य शरीरं मेदसां वपानां वसानामिति यावत् मेदस्तु वपा वसा इत्यमरः छेदेन क्षयेण कृशं अस्थूलं उदरं यस्मिन् तत् तादृशं अतएव लघु भवतु उत्थानस्य सर्व्वकर्म्मसु उद्यमस्य योग्यं समर्थं भवति किञ्च सत्वानां मृगयायां हन्यमानानां जन्तूनां भयञ्च क्रोधश्च तौ तयोः भयक्रोधयोः सम्बन्धिनी या विकृतिरन्यथाभावः सा विद्यते यस्य तत् ; यद्वा भय-क्रोधयोः समुत्पन्नयोः सतोः (भावे सप्तमी) विकृतिमत् विकारयुक्तं चित्तं लक्ष्यते अनुमीयते ज्ञायते इत्यर्थः। प्राणभयेन पलायनपराणां सत्त्वानां कीदृशी चेतोविकृतिः ; पलायनाक्षमाणां, प्राणरक्षार्थे बद्धपरिकराणां क्रुद्धानां प्राणिनाञ्च कीदृशी मनसो विकारः इत्येतत् सर्व्वं मृगयया एव परिज्ञायते। धन्विनां (धनुःशब्दात् मत्वर्थीये-निप्रत्ययेन निपातितमिदं पदम्) धानुष्काणां स एव उत्कर्षः नैपुण्यातिशयः यत् चले चञ्चले धावमाने इति यावत् लक्ष्ये वेधनीये मृगादौ इषवः वाणाः सिध्यन्ति सफला भवन्ति लक्ष्यं विध्यन्ति इत्यर्थः। ईदृशां बहूनां गुणानां हेतुभूतां मृगयां मिथ्यैव व्यसनं कामजं दोषं, व्यसनं विपदि भ्रंशे दोषे कामजकोपजे इत्यमरः, वदन्ति ; ईदृक् विनोदः चित्तविनोदनोपायः कुतः न कुतोऽपि सम्भवति इत्यर्थः।

कार्श्यापादनेन देहस्य सर्व्वकर्म्मक्षमत्वम्, प्राणिनां भयक्रोधजन्यचित्तविकृतिलक्षण-परिज्ञानं धनुर्भृतां लक्ष्यभेदोत्कर्षविधानञ्च साधयति मृगया नेयमतो निन्द्येत्यर्थः।

Change of voice.—कृशोदरेण लघुना उत्थानयोग्येन वपुषा भूयते।··· चित्तं लक्षयन्ति मृगयाशीलाः)।...इषुभिः सिध्यते। मृगया...उच्यते। ईदृशा विनोदेन (भूयते)।

प्रकृतिं आपन्नः प्रकृतिस्थः नराणां नासिकायां नासिकाभक्षणे इत्यर्थः लोलुपः लोलुभः लुब्धः इति यावत् तस्य कस्यापि, जीर्णश्चासौ ऋक्षश्चेति जीर्णर्क्षः वृद्धभल्लूकः तस्य मुखे पतिष्यसि। यङ्लुगन्तात् लुभधातोः कर्त्तरि अच् भस्य पत्व पाक्षिकम् लुब्धोऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभावित्यमरः। जृ वयोहानौ इत्यस्मात् क्तः जीर्णः।

সেনাপতি। [জনান্তিকে] সখে, তুমি স্থিরপ্রতিজ্ঞ হও, আমি প্রভুর অভিপ্রায়ের অনুবর্ত্তন করি। [প্রকাশ্যে] এই মূর্খ প্রলাপবাক্য বলুক। আপনিই প্রমাণ।

মৃগয়ায় বসাক্ষয় হেতু উদর কৃশ হয়, এইজন্য দেহ লঘু হইয়া (সকল বিষয়ে) উদ্যমের যোগ্য হয়। প্রাণিগণের ভয় এবং ক্রোধজনিত চিত্তের বিকার পরিজ্ঞাত হওয়া যায়। ধনুর্দ্ধরদিগের উৎকর্ষের বিষয় এই যে ধাবমান লক্ষ্যে বাণপ্রয়োগ সফল হয়; মৃগয়া মিথ্যাই ব্যসন নামে অভিহিত হয় এরূপ বিনোদ আর কোথায়?

বিদূষক। [কৃত্রিম ক্রোধের সহিত] ইনি প্রকৃতিস্থ। তুমি বন হইতে বনান্তরে ভ্রমণ করিতে করিতে, নরনাসিকালোলুপ কোন এক বৃদ্ধ ভল্লুকের মুখে পতিত হইবে।

General.—[*aside*]. Persevere, my friend, in your opposition. I will sail close to the humour of the king. [*aloud*]. Let the fool talk nonsense. Your majesty is the proof hereof.

By reason of the decay of the fatty portion, the belly getting thin, the body becomes light and fit for activity. The mental state of animals, undergoing the changes due to anger and dismay, is known. The superiority of the skill of archers lies in the fact that arrows become successful in moving marks. Falsely do they call hunting a vice. Where is such a diversion as this?

Bidushaka [*with affected anger*].—His majesty is in his senses. You wandering about from forest to forest shall fall into the mouth of some old bear greedy of the nose of men.

राजा। तपोवनस्य सन्निकृष्टे, समीपवर्त्तिनि स्थाने वयं वर्त्तामहे अतस्ते वचो नाद्रियामहे। अद्य—

महिषाः शृङ्गैः मुहुः ताड़ितं निपानसलिलं गाहन्तां ; छायाबद्धकदम्बकं मृगकुलं रोमन्थं अभ्यस्यतु, वराहततिभिः पल्वले विस्रब्धं मुस्ताक्षतिः क्रियतां, शिथिलज्याबन्धं इदं अस्मद्धनुश्च विश्रामं लभतां।

महिषाः शृङ्गैः विषाणैः मुहुः वारंवारं ताड़ितं, आलोड़ितं निपीयते अत्र इति निपानं कूपसमीपस्थः जलाशयः तस्य सलिलं गाहन्तां तत्र सलिले यथेच्छं निमज्जनसुखं लभन्तामित्यर्थः, छायासु तरुतलेषु इत्यर्थः बद्धं कदम्बकं येन तत् तरुतले संघशः उपविष्ट उद्वेगराहित्यात् इति भावः मृगकुलं मृगयूथं रोमन्थं चर्व्वितचर्व्वणं अभ्यस्यतु करोतु इत्यर्थः वराहाणां ततयः श्रेणयः समूहा इति यावत् ताभिः वराहततिभिः पल्वले क्षुद्रजलाशये विस्रब्धं निर्भयं यथा तथा मुस्तानां तृणमूलानां क्षतिः उत्पाटनं क्रियताम्। शिथिलः श्लथः ज्यायाः गुणस्य बन्धः यस्य तत् इदं अस्माकं धनुश्च विश्रामं लभतां पशूनां वधात् विरमतु इत्यर्थः। अत्रश्लोके तृतीयपादे रचनाक्रमस्य विपर्य्ययः जातः, सर्व्वत्रैव कर्त्तरि प्रयोगः तृतीये केवलं कर्म्मणि प्रयोगः कृतः, स न युक्तः, तत्रापि क्रमानुरोधात् कर्तृवाच्यप्रयोग एव न्याय्यः। "विस्रब्धं कुरुतां वराहनिवहो मुस्ताक्षतिं पल्वले" इति परिवृत्तौ उक्तदोषापहारः स्यात्।

Change of voice.—महिषैः गाह्यतां।...कदम्बकेन मृगकुलेन रोमन्थः अभ्यस्यताम्। वराहततयः मुस्ताक्षतिं कुर्व्वन्तु।...ज्याबन्धेन अस्मद्धनुषा विश्रामः लभ्यतां।

गाहधातुः भौवादिकः आत्मनेपदी लट् गाहते, लिट् जगाहे ; लुङ् अगाहिष्ट, अगाढ़ ; क्तः गाढ़ः अभिपूर्व्वात् अस् धातोः लट् अभ्यस्यति, लिट् अभ्यास। लुङ अभ्यास्थत्। तन् धातो क्तिप्रत्ययेन सिद्धं ततिरिति पदम्।

রাজা। সেনাপতে আমরা আশ্রমের সমীপে রহিয়াছি, এইজন্য আপনার বাক্য আদরপূর্ব্বক গ্রহণ করিতে পারিলাম না। অদ্য মহিষগণ শৃঙ্গদ্বারা নিপানসলিল বারংবার আলোড়িত করিয়া তাহাতে অবগাহন করুক। মৃগসমূহ দলে ছায়ায় উপবিষ্ট হইয়া রোমন্থাভ্যাস করুক; বরাহনিকরকর্ত্তৃক পল্বলে নির্ভয়ে মুস্তা উৎপাটিত হউক ; এবং আমাদের এই ধনু ও গুণবন্ধননির্ম্মুক্ত হইয়া বিশ্রাম লাভ করুক।

King.—Good general, we are in the neighbourhood of the hermitage, therefore what you say is not welcome. Today—

Let the buffaloes plunge into pools, disturbing their water again and again with their horns. Let the deer sitting in herds beneath the shades chew the cud. Let herds of boars unroot fearlessly the sedge (grown) in muddy pools. And let this bow of ours with the tie of its string unloosened have rest.

सेनापतिः। प्रभविष्णवे प्रभवे; रुच्यर्थानां प्रीयमाण इति चतुर्थी। "भुवश्च" इति सूत्रस्य छन्दोविषयत्वात् भाषायां भवतेरिष्णुज्विधानम् मृग्यम्। निरङ्कुशाहि कवयः। In connection with verbs having the sense of रुचि (liking), he who is pleased takes the fourth case-ending. The rule भुवश्च that is to say the root भू takes the suffix इष्णुच् pertains to the language of the Vedas. In profane languge such uses are rare.

राजा। तेन पूर्व्वमरण्यप्रविष्टान् मदनुचरानरण्यात् प्रत्यावर्त्तय, यथा च मम योधाः आश्रमपीड़ां न जनयन्ति तथा ते निवारयितव्याः सेनायां समवेता इति सेनाशब्दात् ठक्--सैनिकाः।

पश्य शमप्रधानेषु तपोधनेषु गूढ़ं दाहात्मकं तेजः अस्ति ते स्पर्शानुकूलाः सूर्य्यकान्ता इव अन्यतेजोऽभिभवात् तत् वमन्ति। ७

शमः शान्तिः प्रधानं येषां तेषु शमप्रधानेषु शान्तिपरेषु तपोधनेषु तापसेषु गूढ़ं प्रच्छन्नं दाहः आत्मा स्वभावो यस्य तत् दाहात्मकं शेषात् विभाषा इति समासान्तः कः, दहने समर्थमित्यर्थः तेजः शक्तिः अस्ति। ते मुनयः स्पर्शस्य अनुकूलाः योग्याः स्प्रष्टुं शक्याः सूर्य्यकान्ता मणिविशेषा इव अन्येषां तेजसा शक्त्या अभिभवात् घर्षणात् तत्तेजः दहनसामर्थ्यं इत्यर्थः वमन्ति उद्गिरन्ति प्रकाशयन्ति; निसर्गतः शीतला अपि सूर्य्यकान्ताः सूर्य्यकिरणसम्पातोष्णाः सन्तो दहन्ति, अतः ऋषीणामभिभवः न कार्य्यः। उपमालङ्कारः। अत्र वमधातो र्वमनार्थाभावात् तत्प्रयोगे न ग्राम्यतादोषः प्रत्युत गुण एव यथाह दण्डी—निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यापाश्रयम्। अतिसुन्दर मन्यत्र ग्राम्यकक्षां विगाहते। इति। ८

अनुरूपोक्तिरुत्तरचरिते—

> न तेज स्तेजस्वी प्रसृतमपरेषां प्रसहते
> स तस्य स्वोभावः प्रकृतिनियतत्वादकृतकः।
> मयूखैरश्रान्तं तपति यदि देवो दिनकरः
> किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति॥

गुहधातोः क्तः गूढ़ः लट् गूहति, लिट् जुगूह, लुङ् अगूहीत् अघुचत् अगूढ़ अघुचत।

Change of voice.—गूढ़ेन दाहात्मकेन तेजसा भूयते। तैः स्पर्शानुकूलैः सूर्य्यकान्तैरिव तत् वम्यते।

সেনাপতি। প্রভুর যেরূপ অভিরুচি।

রাজা। তবে পূর্ব্বগত অরণ্যপ্রবিষ্ট অনুচরদিগেকে নিবৃত্ত করুন। আমার সৈনিক-গণ যাহাতে তপোবনের পীড়া উৎপাদন না করে এরূপ নিষেধ করিবেন। দেখুন—

শান্তিপরায়ণ তপোধনগণে, দহনে সমর্থ তেজ প্রচ্ছন্নভাবে আছে ; তাঁহারা অন্যের তেজ দ্বারা অভিভূত হইলে, স্পর্শযোগ্য সূর্য্যকান্তের ন্যায়, সেই তেজ আবির্ভূত করিয়া থাকেন।

General.—(It shall be) as your lordship desiies.

King.—(Please) call back, then, those that have gone before and entered the forest. My soldiers must be told that they should not disturb the grove of penance. Know,—

That in these calm and quiet hermits there is a lurking flame having the potency of burning. When overpowered by the energy of others, they put forth this flame like lens that are (otherwise) agreeable to the touch.

विदूषक:। उत्साहरूप: वृत्तान्त: प्रोत्साहनव्यापार: ध्वंसतां नाशं गच्छतु ध्वन्सु: चयं भ्वादिगणीय: आत्मनेपदी प्रायेणायं अकर्म्मक:। क्वचित् सकर्म्मकोऽपि दृश्यते ; यथा "येन ध्वस्तमनोभवेन बलिजित्काय: पुरास्त्रीकृत:" ध्वन्स्—लट्—ध्वंसते लिट् दध्वंसे ; लुङ् अध्वंसिष्ट, अध्वसत् ; क्त: ध्वस्त:।

राजा। [परिजनं विलोक्य] भवन्त: मृगयाया वेशं अपनयन्तु त्यजन्तु ; यवनीं उद्दिश्य प्रोक्तमेतत्। रैवतक, त्वमपि स्वस्य नियोगं अधिकारं कर्त्तव्यमित्यर्थ: अशून्यं कुरु, स्वकर्त्तव्ये अवधानं देहीत्यर्थ:।

সেনাপতি। প্রভু যাহা আদেশ করেন।
বিদূষক। তোমার প্রোৎসাহনব্যাপার ধ্বংস প্রাপ্ত হউক।

রাজা। [পরিজনের দিকে দৃষ্টিপাত করিয়া] তোমরা মৃগয়া বেশ পরিত্যাগ কর। রৈবতক তুমিও নিজকর্ত্তব্য অনুষ্ঠান কর।
পরিজন। দেব যেরূপ আদেশ করেন [চলিয়া গেল]।

General.—What your majesty commands (shall be obeyed).
Bidushaka.—Down with your instigation !

King.—[*Looking at the attendants*]. Put off your hunting attire. Raibataka, you too attend your duties.

Attendants.—What your majesty commands (shall be obeyed)

[*Exeunt*].

यस्त उत्तीचे विस्तारे पुंनपुंसकमिति मेदिनी। तेन दर्शनीया तस्याम् अस्याम् वृक्षच्छायायां आसने भवान् उपविशतु, अहमपि सुखेन आसीन: उपविष्ट: भवामि।

आस् धातोः शानच् (ईदास:) आसीन: ; आस् लट् आस्ते लिट् आसाञ्चक्रे लुङ् आसिष्ट ; क्त: आसित:, पादपस्य छाया इति पादपच्छाया ननु पादपानां छाया, तथात्वे नपुंसकत्वापत्ति: ।

राजा। माठव्य चक्षुष: चक्षुष्मत्ताया: फलं न लब्धं त्वया यत: दर्शनार्हं शकुन्तलारूपं वस्तु इत्यर्थ:, नावलोकितम् ।

विदूषक:। ननु भवानेव कान्ततया दर्शनार्ह: तव दर्शनेन अवाप्तं मया चक्षुष: फलमिति विदूषकस्याशय:।

राजा। सर्व्व: आत्मानं आत्मीयं जनमित्यर्थ: कान्तं सुन्दरं पश्यति स्नेहवशादिति भाव:। अहन्तु आश्रमस्य ललामभूतां भूषणभूतां तां शकुन्तलां अधिकृत्य ब्रवीमि:।

ललाम भूता इति ललामभूता "सहसुपा" इति समास: यद्वा ललाम्ना भूषणेन तुल्या इति ललामभूता नित्यसमास: अस्वपदविग्रहस्य ।

বিদূষক। এমন করিয়াছেন যে মাছিটি পর্য্যন্তও নাই। এক্ষণে লতানির্ম্মিত-চন্দ্রাতপমনোহর এই বৃক্ষচ্ছায়ায় আসনে উপবিষ্ট হউন ; আমিও সুখে উপবিষ্ট হই।

রাজা। অগ্রে চল।

বিদূষক। আপনি আসুন।

উভয়ে। [কিছুদূর গিয়া উপবিষ্ট হইলেন]।

রাজা। মাঠব্য, তুমি চক্ষুর ফল পাও নাই ; কারণ দর্শনযোগ্য বস্তু দর্শন কর নাই।

বিদূষক। কেন আপনিত আমার সম্মুখে রহিয়াছেন ?

রাজা। সকলেই আত্মীয়কে সুন্দর দেখে ; আমি সেই আশ্রমের অলঙ্কারতুল্য শকুন্তলাকে মনে করিয়া এ কথা বলিতেছি।

Bidushaka.—You have done so that not a fly even is to be seen here. Now beneath the shade of (yonder) tree charming because of a canopy of creepers overhead, do sit on a seat, while I too will sit comfortably.

King.—Go before.

Bidushaka.—Come, please.

Both.—[*Walking a few steps, sit down*].

King.—Mathavya, you have derived no profit from your eyes ; for you have not seen what is worth seeing.

Bidushaka.—Why ? You stand before me.

King—Every one thinks his own friend beautiful. But I am telling so, alluding to Sakuntala, the ornament of the hermitage.

विदूषकः। अनुचिते तापसकन्यारूपे वस्तुनि ते अभिलाषः न युक्तः इति तिरस्कारगर्भवचनेन राजानं निवर्त्तयितुमिच्छति।

राजा। परिहार्य्ये परिहर्त्तुं योग्ये, अनुचिते इत्यर्थः। हरतेः ऋहलोरिति कर्म्मणि ण्यत्। मुनेः तत् अपत्यं सुरयुवतीसम्भवं उज्झिताधिगतम्; (अतएव) शिथिलं अर्कस्य उपरि च्युतं नवमल्लिकाकुसुममिव, स्थितमितिशेषः।

मुनेः कण्वस्य तत् अपत्यं न पतन्ति पितरोऽनेन इति (नञ्पूर्व्वात् पत्धातोर्यत्) कन्यारूपं सुराणां युवतिः मेनका नाम अप्सराः तस्याः सम्भवः उत्पत्तिः यस्य तत् तादृशं उज्झितं आदौ त्यक्तं पितृभ्यां ततः अधिगतं कण्वेन इति उज्झिताधिगतम् अतएव शिथिलं वृन्तात् स्रंसं अर्कस्य वृक्षविशेषस्य उपरि च्युतं भ्रष्टं पतितमिति यावत् नवमल्लिकायाः कुसुममिव स्थितमितिशेषः। यथा नवमल्लिकाकुसुमं वृन्तच्युतं सत् अर्कवृक्षस्य उपरि पतितं अतत्त्वज्ञेन अर्ककुसुमं मन्यते दूरादेव उग्रत्वभिया परिक्रियतेच, तथेयं शकुन्तला मेनकागर्भसम्भूता मात्रा त्यक्ता कण्वेन पालिता तापसकन्येति ज्ञायते अतत्त्वज्ञेन भवता मे परिहार्य्येति मन्यतेच। उपमालङ्कारः।

विदूषकः। [विहस्य] सुन्दरीः अन्तःपुरिकाः विहाय अरण्यभवां स्त्रियं कामयमानः त्वं सुमिष्टपिण्डखर्ज्जूरविरतः तिन्तिडीभक्षणे उत्सुकः इव उपहास्यतां गतः इत्यर्थः।

বিদূষক। [স্বগত] ইহাঁকে উৎসাহ দিব না [প্রকাশ্যে] বয়স্য তাপসকন্যার তোমার প্রার্থনা দেখিতেছি।

রাজা। সখে, পুরুবংশীয়দিগের চিত্ত পরিহার্য্য বিষয়ে প্রবৃত্ত হয় না।

সেই মুনির অপত্য শকুন্তলা অপ্সরার গর্ভসম্ভূত; (জননী কর্ত্তৃক) পরিত্যক্ত হইলে (কণ্ব) তাহাকে পাইয়া পালন করিয়াছেন; (এই হেতু তাপসকন্যা)। যেরূপ নবমল্লিকাপ্রসূন বৃন্তচ্যুত হইয়া অর্কবৃক্ষের (আকন্দার) উপর পতিত হইয়া (অর্ককুসুম) বলিয়া প্রতীত হয়।

বিদূষক। [হাস্য করিয়া] যেরূপ কোন ব্যক্তি পিণ্ডখর্জ্জুরে বিরক্ত হইয়া তিন্তিড়ী—(তেঁতুল) ভক্ষণে অভিলাষী হয়, স্ত্রীরত্নের অবমাননা করিয়া আপনিও সেইরূপ তাপসকন্যাতে সাভিলাষ হইয়াছেন।

রাজা। তাঁহাকে দেখ নাই তাই এরূপ বলিতেছ।

বিদূষক। যাহা আপনারও বিস্ময় উৎপাদন করে, তাহা নিশ্চয় রমণীয়।

Bidushaka.—[*Aside*]. Well! I will give him no encouragement. [*Aloud*]. I see that you are desirous of (marrying) a hermit's daughter.

King.—Friend, never does the heart of a descendant of Puru incline towards an object which should be avoided. That off-spring of the sage is born of a nymph and being deserted was found and brought up (by the hermit) :—just as the jasmine flower severed from its stalk and falling on the sun flower (is supported).

Bidushaka.—This desire of yours (for a maiden of the wood). setting at nought so many gems of women (at home), is much the same as that of one who has got tired of dates and longs for tamarind.

King —You have not seen her ; and therefore you talk thus.

Bidushaka.—What excites your admiration must surely be attractive.

राजा। वयस्य वहुना उक्तेन किम्—

विधिना चित्रे निवेश्य परिकल्पितसत्त्वयोगा, रूपोच्चयेन मनसा कृता नु ; धातुः विभुत्वं तस्याः वपुश्च अनुचिन्त्य सा अपरा स्त्रीरत्नसृष्टिः मे प्रतिभाति।

शकुन्तला विधिना विधात्रा चित्रे आलेख्ये निवेश्य समर्प्य चित्रयित्वा परिकल्पितः कृतः सत्वस्य असूनां योगः सम्बन्धः यस्याः सा तथाविधा "द्रव्यासुव्यवसायेषु सत्वमस्त्रीतु जन्तुषु" इत्यमरः। सत्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः पिशाचादौ आत्मभावे बले प्राणेषु जन्तुषु इति हेमचन्द्रः। प्रागियं चित्रार्पिता ततः जीवन-सम्बन्धं प्रापिता अन्यथा कथमीदृशं रूपं सम्भवति। अथवा रूपाणां उच्चयेन राशिना "सर्व्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन एकस्थसौन्दर्य्यदिदृक्षयेव" विधात्रा मनसा कृता नु। इयं विधातुर्मानसी सृष्टिः अन्यथा ईदृशं मार्द्दवमाधुर्य्यादिकं न सम्भवेत्। किञ्च धातुः विभुत्वं निर्म्माणनैपुण्यं तस्या वपुश्च लोकातिगं सौन्दर्य्यमित्यर्थः अनुचिन्त्य इदं मे मनसि प्रतिभाति यत् सा अपरा अन्या स्त्रीरत्न सृष्टिः जातौ जातौ यदुत्कृष्टं तद्रत्नमिह कथ्यते। नेयं विधातुः सृष्टिः विधातृविहितं नैवं मनोरमम्मिति भावः। उक्तञ्च कविना उर्व्वशीरूपवर्णनावसरे—

अस्याः सर्गविधौ प्रजापतिरभूत चन्द्रोनु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनोमासोनु पुष्पाकरः।
वेदाभ्यासजड़ः कथं नु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥

नुशब्दः वितर्के भावे अर्द्धे सन्देहालङ्कारः। उत्तरार्द्धे कविप्रौढ़ोक्तिसमुत्थापित-निश्चयोत्तरः उत्प्रेक्षालङ्कारः। सम्भावनमथोत्प्रेक्षा प्रकृतस्य परेण यत् इति लक्षणात्।

अनुचिन्त्य स्थितस्य मे इत्यध्याहारेण व्याख्येयः श्लोकः। तथात्वे चिन्तयतेः तिष्ठतेश्च एककर्त्तृकत्वनिर्व्वाहः। यद्वा चिन्तयतेः हेतुमति चेति प्रेरणार्थे णिच् ततः ल्यप्। तथात्वे स्त्रीरत्नसृष्टिरिति पदं प्रेरणार्थण्यन्तस्य चिन्तयतेः प्रतिभातेश्च कर्त्तृकारकम्।

Change of voice.—विधिः···सत्वयोगां...कृतवान्...तया अपरया स्त्रीरत्न-सृष्ट्या प्रतिभायते।

রাজা। বয়স্য অধিক বলিবার প্রয়োজন নাই। ইঁহাকে বিধাতা চিত্রে অর্পিত করিয়া পরে জীবনদান করিয়াছেন; অথবা সৌন্দর্য্যরাশিদ্বারা মনে মনে নির্ম্মাণ করিয়াছেন, বিধাতার নির্ম্মাণসামর্থ্য এবং তাঁহার দেহসৌন্দর্য্য ভাবিয়া আমার এই বোধ হয় যে তিনি অন্যবিধ স্ত্রীরত্নসৃষ্টি।

বিদূষক। যদি এইরূপ হয় তাহা হইলে (তাঁহার নিকট) সকল রূপবতীর পরাভব।

King.—Friend, why say much ?

The Creator brought her to existence by at first drawing a picture and then infusing life into it, or fashioned in idea her form with an assemblage of all lovely things. When I think of the Creator's power (of creating) and her (beautiful) form, she seems to me to be an extraordinary creation of a gem of a woman.

Bidushaka.—If this be the case, she puts all other beauties to shame.

राजा। अनाघ्रातं पुष्पं, कररुहैः अलूनं किसलयम्, अनाविद्धं रत्नं, अनास्वादितरसं नवं मधु, पुण्यानां अखण्डं फलमिव अनघं तद्रूपं भोक्तारं कं विधिः इह समुपस्थास्यति न जाने। अनाघ्रातं न गृहीतगन्धं सद्यः प्रस्फुटितं वृन्तस्थित-मित्यर्थः पुष्पं कुसुमं, करे हस्ते रोहन्ति ये ते कररुहाः पुनर्भवा नखा इति यावत् तैः अलूनं अच्छिन्नं किसलयं पल्लवं, न आविद्धं इति अनाविद्धं अनाप्तवेधदोषं, गात्र-संसर्गेणादूषितमिति तात्पर्य्यम् रत्नं, न आस्वादितः रसो यस्य तत् अनास्वादितरसं नवं मधु, पुण्यानां सुकृतानां अखण्डं समग्रं, अनुपभुक्तमित्यर्थः फलं; अनघं अपापं दोषलेशशून्यमिति यावत् तत् रूपं शकुन्तलासौन्दर्य्यं भोक्तारं, यस्तस्याः पति र्भूत्वा तद्रूपमुपभोक्ष्यते तादृशं कं जनं विधिः प्रजापतिः इह जगति समुपस्थास्यति घटयिष्यति, न जाने। ईदृशस्य लोकोत्तरसौन्दर्य्यस्य अनुरूपो भोक्ता जगति प्रायेण न दृश्यते। पुण्योपचयप्रवृद्धसौभाग्यशालिनस्तादृशस्य पुरुषस्य दुर्लभत्वाद् विधाता चिन्तानिमीलिताक्षः स्थास्यति इत्यहं मन्ये इत्यर्थः। मालोपमालङ्कारः। सर्व्वैरे-वोपमानैः शकुन्तलारूपस्य उपभोगाभावहेतुकपाविव्यजन्यलोभनीयत्वं द्योत्यते। फलमपिव इति पाठे मालारूपकालङ्कारः।

Change of voice.—भोक्ता कः विधिना समुपस्थास्यते। इति मया न ज्ञायते।

घ्रा क्तः घ्राणः, घ्रातः, लट्, जिघ्रति ; लिट् जघ्रौ। लुङ् अघ्रात्, अघ्रासीत्।

लू क्तः लूनः लट् लुनाति, लुनीते ; लिट्, लुलाव लुलुवे ; लुङ्, अलावीत् अलविष्ट। रुह क्तः रूढ़ः ; लट् रोहति, लिट् रुरोह, लुङ् अरुहत्। व्यध क्तः विद्धः लट्, विध्यति ; लिट् विव्याध ; लुङ् अव्यात्सीत्। रूपमिति कर्म्मणि द्वितीया न लोकाव्ययनिष्ठाखलर्थतनाम् इति निषेधात् षष्ठी नाप्नोति। समुपस्थास्यति इत्यत्र अन्तर्भूत ण्यर्थः। The root ज्ञा is used in the आत्मनेपद because it is not preceded by any उपसर्ग, and the agents reaps the consequence of the action. अनुपसर्गाज्ज्ञः।

विदूषकः। इङ्गुलीफलनिष्पन्नं तैलं तेन मिश्रं लिप्तं इत्यर्थः अतएव चिक्कणं स्नेहं स्रवदिव मस्तकं यस्य तस्य। लघु आशु शीघ्रमिति यावत्।

लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत् क्लीवम्।
शीघ्रे कृष्णागुरुणि च पृक्कानामौषधौ तु स्त्री॥
इति मेदिनी।

राजा। सा पराधीना, तस्या गुरुः पिता कण्वः इत्यर्थः अत्र न वर्त्तते कथमेनां शीघ्रं परिणेष्यामि इति अभिप्रायः।

विदूषकः। चक्षुरागः कीदृशः। त्वयि अनुरक्ता सा न वेति स्पष्टार्थः।

"अत्रभवन्तमिति सप्तम्यर्थे द्वितीया सप्तम्या द्वितीया" इति सूत्रेण। तेनात्रभवति पूज्ये अन्तरेण विशेषेण कीदृशः तस्याः दृष्टिरागः। "अन्तरं रन्ध्रावकाशयोः मध्ये विनार्थे, तादर्थ्ये विशेषेऽवसरेऽवधौ इति हैमः। अत्र अन्तरेण अत्रभवन्तमिति द्वितीया इति तु यत् स भ्रम एव। तस्य "अन्तरान्तरेण" इति सूत्रे निपातस्यैव ग्रहणात् तेनार्थासंगतेः इति राघवभट्टः।

রাজা। আমার মনে হইতেছে—বিধাতা কোন্ ব্যক্তিকে অনাঘ্রাত পুষ্প, নখের দ্বারা অচ্ছিন্ন অচিরোদ্গত পত্র, অনাবিদ্ধ রত্ন, অনাস্বাদিত রস অভিনব মধু, ও অনুপভুক্ত পুণ্যফলের ন্যায় দোষসম্পর্কশূন্য সেই রূপের ভোগকর্ত্তা ঘটাইবেন জানি না।

বিদূষক। সেই হেতু আপনি শীঘ্র ইঁহাকে ত্রাণ করুন; যেন ইঙ্গুদীফলপ্রস্তুত-তৈলমর্দ্দনে চিক্কণমস্তক কোন ঋষির হস্তে পতিত না হন।

রাজা। তিনি পরাধীনা; তাঁহার গুরুজনও এখানে নাই।

বিদূষক। আপনার প্রতি তাঁহার নয়নানুরাগ কিরূপ?

King.—Thoughts (like this) are crossing my mind :—

I do not know who has been destined by fate to enjoy her

beauty spotless and pure as a flower the aroma of which has not been smelled, as a new shoot not torn (defiled) by finger-nails, as a gem not yet bored through, as fresh honey which has not been tasted, and as an entire fruit of virtuous actions (done) in former lives.

B dushaka.—Make haste then to rescue her that she may not fall into the hands of some ascetic with his head unctuous with the oil of the Inguli.

King.—She is dependent on another ; and her father is not at home.

Bidushaka.—Regarding you what is the state of her affection as expressed by glances ?

राजा । स्वभावादेव तापसकन्या न प्रगल्भा लज्जाशीला इत्यर्थः । तथापि मयि अभिमुखे ईक्षितं संहृतं, अन्यनिमित्तकृतोदयं हसितं ; अतः तया विनयवारित वृत्तिः मदनः न विवृतः न च संवृतः । मयि अभिमुखे तस्या लोचनपथवर्त्तिनि सति ईक्षितं लोचनं संहृतं अन्यतः प्रेरितं तया इति शेषः । अन्यत् निमित्तं कारणं तेन कृतः जनितः उदयः उत्पत्तिः यस्य तत् यथा तथा (क्रियाविशेषणमेतत्) हसितं हास्यं कृतम् । अतः तया शकुन्तलया विनयेन शीलेन लज्जया इत्यर्थः वारिता निषिद्धा वृत्तिः प्रसरः यस्य सः मदनः मन्मथभावः मां प्रति अनुराग इत्यर्थः न विवृतः न प्रकटीकृतः न च संवृतः गुप्तः मां प्रति तस्याः अनुरागः ऊहनयोग्यः कृतः नतु सुष्ठु व्यक्तीकृतः इत्यर्थः । द्रुतविलम्बितवृत्तम्—तल्लक्षणं द्रुतविलम्बितमाह नभौ भरौ । ११

Change of voice.—ईक्षितं संहृतवती...हसितवती ।...वारितवृत्तिं सा मदनं न विवृतवती न संवृतवती ।

वृधातोः क्तः वृतः लट्, वृणोति, वृणुते, वृणाति वृणीते ; वरति, वरते ; वरयति, वरयते ; लिट् ववार, वव्रे ; लुङ्, अवारीत्, अवरिष्ट, अवरीष्ट, अवृत । वरयामास...अवीवरत् ; यङ्, वेव्रीयते ; सन्, विवरीषति, विवरिषति, वुवूर्षति, आत्मनेपदमपि ।

विदूषकः । दृष्ट एव इति दृष्टमात्रः तस्य । स्वार्थे मात्रच्प्रत्ययः यद्वा मयूरव्यंसकादयश्चेति समासः ।

राजा । मिथः प्रस्थाने परस्परं प्रस्थानसमये शालीनतया लज्जाशीलतया अपि तया शकुन्तलया मयि भावः अनुरागः कामं अत्यर्थं सम्यक् इत्यर्थः आविष्कृतः प्रकटितः ।

शालां प्रवेष्टुमर्हति इत्यर्थे शालीना, "शालीनकौपीने अधृष्टाकार्ययोः" ताभ्याम्

प्रवेशनं अर्हति, कूपावतारमर्हति इति खञ्प्रत्यय उत्तरपदलोपश्च निपात्यते शालीनो जड़ः, कौपीनं पापमिति काशिका,—तस्याः भावः शालीनता।

तथा हि तन्वी कतिचिदेव पदानि गत्वा दर्भाङ्कुरेण चरणः क्षतः इति अकाण्डे स्थिता ; द्रुमाणां शाखासु असक्तमपि बल्कलम्, विमोचयन्ती विवृत्तवदना आसीच्च। १२

तन्वङ्गी सा शकुन्तला कतिचिदेव पदानि गत्वा दर्भस्य कुशस्य अङ्कुरस्तेन दर्भाङ्कुरेण, अभिनवकुशसूच्या मे चरणः अङ्घ्रिः क्षतः विद्धः इति उक्त्वा इत्यर्थः अकाण्डे अनवसरे स्थिता गमनात् विरता। द्रुमाणां कुरवकवृक्षाणां शाखासु विटपेषु असक्तं अलग्नमपि वल्कलं उत्तरीयभूतां तरुत्वचं विमोचयन्ती विवृत्तं परावृत्तं मदभिमुखमिति शेषः वदनं आननं यस्याः सा विवृत्तवदना तथाभूता आसीत्। माम् विलोकयितुं छलनाश्रित्य विलम्बं कृतवती एतेनैव तस्याः भावः सम्यक् विवृत इति तात्पर्य्यम्। १२

Change of voice.— तन्व्या स्थितं।...विमोचयन्त्या विवृत्तवदनया अभूयत। मिथः इति अव्ययम्। किम्शब्दात् डतिप्रत्ययेन सिद्धः कतिशब्दः संख्यावचनः भूम्नि प्रयुज्यते। "षड्भ्योलुक्" इति जस्सोर्लुक्।

রাজা। তপস্বিকন্যা স্বভাবতঃ লজ্জাশীলা ; কিন্তু তথাপি আমি সম্মুখবর্ত্তী হইলে তিনি নয়ন ফিরাইয়াছেন, অন্য কোন কারণে হইয়াছে এই ভাবেই যেন হাসিয়াছেন অতএব লজ্জাবশতঃ নিরুদ্ধপ্রসর মন্মথভাব প্রকাশও করেন নাই অথবা গোপনও করেন নাই।

বিদূষক। দর্শনমাত্রেই আপনার ক্রোড়েত আরোহণ করিতে পারে না।

রাজা। লজ্জাশীলা হইলেও যখন পরস্পর প্রস্থান করি, সেই সময়ে তিনি অনুরাগ স্পষ্টই প্রকাশ করিয়াছেন। কারণ তন্বঙ্গী কয়েক পদ গমন করিয়া আমার চরণ কুশসূচীবিদ্ধ হইয়াছে এই বলিয়া অনবসরে গমনবিরত হইয়াছিলেন ; এবং বৃক্ষের শাখায় বল্কল লগ্ন না হইলেও তাহাই মুক্ত করিতেছেন এই ভাবে মুখ ফিরাইয়া দাঁড়াইয়াছিলেন।

King.—The maidens of hermits are naturally modest ; but yet—

When my face was turned towards her, she withdrew her eyes ; and smiled as if it was occasioned by some other cause. She has therefore neither unveiled, nor concealed her love—the progress whereof has been checked by modesty.

Bidushaka.—Just at the sight of you she can not (come and) sit on your lap.

King.—At our parting from each other, she clearly indicated her affection in spite of her bashfulness.

For instance ;—That fair maiden of slim figure stopped when

there was no occasion for it, saving that her foot had been pricked by the sharp blade of a Kusagrass ; and stood with her face turned (towards me) disentangling her bark, though it was not caught in the boughs of trees.

विदूषक:। पथि हितं इति पाथेयं ; पथ्यतिथिवसतिस्वपतेर्ढञ् इति ढञ् (एय) प्रत्यय: गृहीतं पाथेयं सम्बलं येन स: गृहीतपाथेय:। त्वया तपोवनं पुण्यं धर्म्मारण्यं उपवनं विहारकाननं कृतम्।

राजा। परिज्ञात: मम राजभाव: तपस्विभिरवगत:। केन अपदेशेन व्याजेन छलेनेति यावत् प्रकृत्यादिभ्यश्चेति तृतीया (करणे वा), सकृत् एकवारमपि आश्रमे वसाम: गच्छाम: इत्यर्थ:।

विदूषक:। "षष्ठाष्टमाभ्यां ञ च" ; चकारादन् अतएव भागार्थे वर्त्तमानस्य अस्य अपूरणार्थत्वात् पूरणगुणेत्यादिना षष्ठीसमासप्रतिषेधो न भवति। नीवारस्य षष्ठ: भाग: इति विग्रह: नीवारषष्ठभाग: तम्।

राजा। मूर्ख एतेषां ऋषीणां रक्षणे पालने अन्यत् भागधेयम् नीवारषष्ठभागादन्य: अंश: निपतति समुद्भवति ; यत् रत्नानां राशीन् समूहान् विहाय परित्यज्य अभिनन्द्यं सादरं गृहीतव्यम्। अत्र भागधेयशब्दस्य पुंसिप्रयोग: साधु:। भाग्यार्थे भागधेयशब्दस्य क्लीवत्वं आभिधानिकानां सम्मतं। तथाच मेदिनी "भागधेयं मतं भाग्ये भागप्रत्याययो: पुमान्"। अमरश्च दैवं दिष्टं भागधेयं भाग्यं स्त्री नियति र्विधि:। भागधेय: करोवलि:। भागशब्दात् स्वार्थे धेयच्, स्वार्थिका: प्रकृतिलिङ्गवचनान्यतिवर्त्तन्ते इति क्लीवत्वम्। कथञ्चिदभ्युपेतव्यम् भागरूपनामभ्य: धेय: यद्वा अन्यद् भागधेयं अपूर्व्वपुण्यरूपं शुभावहं दैवं निपतति अर्ज्जितं भवति इति व्याख्येयम्।

नृपाणां वर्णेभ्य: यत् उत्तिष्ठति तत् फलं क्षयि आरण्यका: अक्षय्यं तप:षड्भागं न: ददाति हि। नृपाणां वर्णेभ्य: विषयवासिभ्य: ब्राह्मणादिवर्णेभ्य: यत् फलं लाभ: फलं हेतुकृते जातीफले फलकशस्त्रयो:। विफलायां च कक्कोले शस्त्राग्रे व्युष्टि लाभयो: इति हैम: ; उत्तिष्ठति तत्क्षयि नश्वरम्, "जिदृक्षिविश्रिण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च" इति इनि:। वर्णचतुष्टयस्य पालनेन राजा षष्ठांशरूपं यत् धनं लभते तत् नश्वरं खलु। अरण्ये निवसन्ति ये ते आरण्यका:, मुनय: अरण्यान् मनुष्य इति अरण्यशब्दात् वुञ् (कण्) अक्षय्यं चेतुं अशक्यं इति क्षय्यजय्यौ शक्यार्थे यत् प्रत्ययेन निपातितम् तपस: षड्भागं षष्ठभागमित्यर्थ:, वृत्तिविषये संख्याशब्दस्य पूरणार्थत्वं शतांशवत्, न: अस्मभ्यं ददति प्रयच्छन्ति, पुत्त्रस्य निधनेऽपि अनुगमनात् अक्षय्यत्वमापेक्षिकमित्यनुसन्धेयम्। व्यतिरेकालङ्कार:।

Change of voice.—अक्षय्य: तप:षड्भाग: आरण्यकै: न: दीयते।

Here षष् (six) is used in the sense of षष्ठी (sixth). Such usage is sanctioned in the case of compounds.

বিদূষক। তবে আপনি পথের সম্বল গ্রহণ করুন; আপনি তপোবনটিকে বিহার-কানন করিয়া তুলিয়াছেন দেখিতেছি।

রাজা। সখে, কোন কোন তপস্বী আমাকে চিনিতে পারিয়াছেন। কি ছলে একবারও আশ্রমে যাইতে পারি চিন্তা কর।

বিদূষক। আপনি রাজা আপনার আবার অন্য ছল কি? আপনার (প্রাপ্য) নীবারের ষষ্ঠ অংশ ঋষিগণ আনিয়া দিউন (এই ছল)।

রাজা। মূর্খ, ইহাদিগের রক্ষণে আমাদের যে অংশ উত্থিত হয় তাহা রত্নরাশিও পরিত্যাগ করিয়া সাদরে গ্রহণ করিতে হয়। দেখ, ব্রাহ্মণাদি বর্ণ হইতে নৃপতি-দিগের যে ধনলাভ হয় তাহা নশ্বর, অরণ্যনিবাসী ঋষিগণ আমাদিগকে অক্ষয় তপঃ-ষষ্ঠভাগ প্রদান করেন।

Bidushaka.—Have, then, your viaticum. I see you have made a pleasure garden of this sacred grove of penance.

King.—I have been recognised friend, by some of the anchorites. Under what pretext I may at least once go to the hermitage? Think of it.

Bidushaka.—King as you are, you need no other pretext than (saying)—"Give me the sixth part of your Nibara paddy (my revenue).

King.—Fool! In protecting these hermits we get a share of a very different kind which is to be welcomed, setting aside even heaps of jewels.

Look:—What kings get from the several castes is susceptible of decay. But these pious men of the woods give us a sixth part of their penance which is imperishable.

नेपथ्ये—हन्त इति हर्षे अव्ययम् हन्त वाक्यारम्भखेदविषादहर्षसम्भ्रमे इति मेदिनी। सिद्ध: सफल: अर्थ: प्रयोजनं ययो: तौ तथोक्तौ स्व: भवाव:।

राजा। [कर्णं दत्त्वा आकर्ण्य] धीर: आमन्द्र: प्रशान्त: अनुद्वेगकर: स्वर: येषां तै: तादृशै: एभि: तापसै: भाव्यम्।

प्रविश्य—दौवारिक:। प्रतिहारस्य द्वारस्य भूमि: तां द्वारदेशम् प्रतिहारो द्वारि द्वा:स्थे द्वा:स्थितायान्तु योषिति। इति मेदिनी। उपपूर्व्वक: तिष्ठतिरत्र सकर्म्मक:।

प्रथम: । दीप्ति: तेजोविशेष: विद्यते अस्य इति दीप्तिमत् तस्य तादृशस्य अस्य राज्ञ: वपुष: विश्वसनीयता अनुद्वेगकरत्वम् । अथवा ऋषिभ्य: (अन्यार्थयोगे पञ्चमी) मुनिभ्य: नातिभिन्ने ऋषिकल्पे अस्मिन् राजनि दुष्यन्ते एतत् उपपन्नम् युज्यते ।

कुत: अमुना अपि सर्व्वभोग्ये आश्रमे वसति: अध्याक्रान्ता अयमपि रक्षायोगात् प्रत्यहं तप: सञ्चिनोति ; वशिन: अस्यापि चारणद्वन्द्वगीत: केवलं राजपूर्व्व: पुण्य: मुनिरिति शब्द: मुहु: द्यां स्पृशति ।

अमुना दुष्यन्तेनापि यथा मुनिभि: तथा इति अपेरर्थ: सर्व्वेषां भोग्ये उपजीव्ये आश्रयस्वरूपे इत्यर्थ: आश्रमे गृहस्थाश्रमे वसति: वास: (वसधातो:औणादिक: अति:) अध्याक्रान्ता अवलम्बिता । मुनिनामपि आश्रमा: सर्व्वेषां आश्रयभूता: । अयं राजा अपि रक्षाया: योगात् पालनात् (मुनीनामित्यर्थ:) प्रत्यहं प्रतिदिनं तप: सञ्चिनोति अर्ज्जयति षष्ठांशरूपमिति भाव: तथाच मनु: यदधीते यद्यजते यद्ददाति यदर्च्चति । तस्य [illegible] सम्यग् भवति रक्षणात् । वशिन: जितेन्द्रियस्य अस्यापि चारयन्ति प्रसारयन्ति कीर्त्तिमिति (ण्यन्तात् चरे: कर्त्तरि ल्यु:) चारणा: स्तुतिपाठका: वैतालिका इति यावत् तेषां द्वन्द्वानि युगलानि तै: गीत: केवलं राजा इति पूर्व्वं यस्य स: राजपूर्व्व: राजोपपद: पुण्य: पवित्र: मुनिरिति शब्द: मुहु: प्रतिक्षणमित्यर्थ: द्यां दिवं आकाशं स्पृशति । मुनीनां आश्रमा: यथा सर्व्वेषामतिथीनां मृगपक्ष्यादीनाञ्च आश्रयभूता: क्षेमङ्कराश्च, यथा च ते प्रत्यहं तपस्तप्यन्ते, ऋषिरिति पवित्रं नाम च दधते तथानेन परिगृहीतो द्वितीय: आश्रम: सर्व्वेषामुपजीव्य: कल्याणकरश्च अयमपि प्रतिदिनं तप: षड्भागेन युज्यते ; किञ्च राजर्षिरिति पुण्यं नाम बिभर्त्ति, सर्व्वथा ऋषितुल्योऽयमिति भाव: ।

Change of voice.—असौ वसतिं अध्याक्रान्तवान् । अनेन तप: सञ्चीयते । द्यौ: स्पृश्यते...गीतेन पुण्येन मुनिरिति राजपूर्व्वेण शब्देन ।

द्वितीय: । बलं तदाख्यं असुरं भिन्नवान् इति बलभित् (सत्सूद्विषेत्यादिना क्विप्) इन्द्र: तस्य सखा इति बलभित्सख: राजाह:सखिभ्यष्टच् ।

द्वितीय: । तेनहि—नगरपरिघप्रांशुबाहु: अयं एक: उदधिश्यामसीमां कृत्स्नां धरित्रीं भुनक्ति इति यत् नैतत् चित्रं ; दैत्यै: सक्तवैरा: सुरा: समितिषु अस्य अधिज्ये धनुषि पौरुहूते वज्रे च विजयं आशंसन्ते । नगरस्य परिघ: पुरद्वारार्गलं तद्वत् प्रांशु: बाहु: यस्य स: नगरपरिघप्रांशुबाहु: अतिदीर्घबाहु: अयं एक: अद्वितीय: अन्यस्य साहाय्यमन्तरेणेत्यर्थ: उदकानि धीयन्ते एषु इति उदधय: (उदकशब्दपूर्व्वात् धाधातो: कि: उदकस्योद: संज्ञायामिति उदादेश:) समुद्रा: एव श्यामा सीमा प्रान्तभागो यस्या: तां समुद्रै: श्यामा सीमा यस्या: तां इति केचित् । (उदधिश्यामसीमानं) कृत्स्नां समग्रां धरित्रीं (धरते: इत्रप्रत्यय: स्त्रियामीप्) पृथिवीं भुनक्ति अवति पालयति इति

यावत् (भुनक्तीऽनवने इत्यस्य प्रत्युदाहरणमेतत्) इति यत् एतत् न चित्रं विस्मयकरं न। कुतः एतदुच्यते इत्यत आह हि यस्मात् दितेः अपत्यानि पुमांसः दैत्याः तैः सह सक्तं वैरं प्रवृत्ता येषां ते सक्तवैराः नित्यप्रसक्तवैरभावाः सुराः देवाः समितिषु संग्रामेषु अस्य राज्ञः अधिज्ये आरोपितमौर्व्वीके धनुषि, पुरूणि बहूनि हूतानि नामानि यस्य सः पुरुहूत इन्द्रः तस्य इदं इति पौरुहूतं तस्मिन् ऐन्द्रे वज्रे च विजयं समरजयं आशंसन्ते प्रार्थयन्ते प्रार्थनायां आङ्पूर्व्वः शंसिरात्मनेपदी महावीरोऽयमिति भावः। वज्रधनुषोः समुच्चितत्वात् समुच्चयालङ्कारः इति यद्राघवभट्टेनोक्तम् तच्चिन्त्यम् एते हि गुणक्रियायौगपद्ये समुच्चयप्रकारा नियमेन कार्य्यकारणकालनियमविपर्य्ययरूपाति-शयोक्तिमूलाः, दीपकस्य चातिशयोक्तिमूलत्वाभावः। दौष्यन्ते चापे, ऐन्द्रे वज्रे च विजयकामना पुराणाद्यनुगतत्वात् न कविप्रतिभामूलातिशयोक्तिसमुत्थापिता अतएव प्रस्तुताप्रस्तुतयोः एकधर्म्माभिसम्बन्धात् दीपकालङ्कारः। मन्दाक्रान्ता वृत्तम् तल्लक्षणम् मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ तौ गुरुचेत्।

Change of voice.—अनेन...सीमा धरित्री एकेन कृत्स्ना भुज्यते इत्येतेन चित्रेण न भूयते। सुरैः सक्तवैरैः विजयः आशस्यते। ९५

परिघः परिपूर्व्वात् हन्तेः अप् निपातनात् सिद्धम् परौ घः। समितिः सम्पूर्व्वात् इण् धातोः क्तिः।

[उपगम्य] विजयस्व—विपराभ्यां जेः इति आत्मनेपदम्।

নেপথ্যে—আমাদের প্রয়োজন সিদ্ধ হইয়াছে।

রাজা। [শ্রবণ করিয়া] এই ধীরপ্রশান্তস্বরবিশিষ্ট ব্যক্তিগণ তপস্বী (বোধ হইতেছে)।

দৌবারিক। [প্রবেশ করিয়া] স্বামীর জয় হউক; দুইজন ঋষিকুমার দ্বারদেশে উপস্থিত হইয়াছেন।

রাজা। শীঘ্র তাঁহাদিগকে প্রবিষ্ট করাও।

দৌবারিক। এই আমি তাঁহাদিগকে প্রবিষ্ট করাইতেছি। [নিষ্ক্রান্ত হইয়া ঋষি-কুমারদ্বয়ের সহিত প্রবেশ করিয়া] মহাশয়গণ এ দিকে আসুন।

উভয়ে। [রাজাকে নিরীক্ষণ করিতে লাগিলেন]।

প্রথম। আহা ইঁহার দেহ তেজস্বী হইলেও কেমন বিশ্বাসোৎপাদক, অথবা ঋষি হইতে অনতিভিন্ন এই নরপতিতে ইহা উপযুক্তই বটে। কারণ ইনিও সকলের উপ-জীব্য আশ্রমে বাস করিতেছেন, পালনহেতু ইনিও প্রত্যহ তপঃসঞ্চয় করিতেছেন। এবং জিতেন্দ্রিয় এই নরপতির পবিত্র রাজপূর্ব্ব মুনিশব্দ স্তুতিপাঠকযুগলকর্ত্তৃক গীত হইয়া গগনস্পর্শ করে।

দ্বিতীয়। ইনিই কি ইন্দ্রের সখা দুষ্যন্ত ?

প্রথম। হাঁ।

দ্বিতীয়। তাহাহইলে—পুরদ্বারার্গলের ন্যায় দীর্ঘবাহু এই নরপতি একাকী সাগরবেষ্টিত সমগ্র পৃথিবী পালন করেন ইহা আশ্চর্য্যের বিষয় নহে। কারণ দৈত্যদিগের সহিত প্রসক্তবৈরভাব দেবগণ সংগ্রামে ইঁহার আরোপিতচাপে এবং ইন্দ্রের বজ্রে বিজয়কামনা করিয়া থাকেন।

[সমীপে গমন করিয়া]। রাজন্ বিজয় লাভ করুন!

[*Behind the scenes*]. Oh! our desired object has been accomplished.

King.—[*Listening*]. These men of deep and tranquil voice must be hermits.

Warder.—[*Entering*]. Victory to our lord, the king! Two young hermits are at the gate.

King.—Admit them without delay.

Warder.—I will introduce them. [*Exit and re-entering with the two young hermits*]. This way, holy sirs, this way.

Both.—[*Begin to look at the king*].

First.—Oh! His form, though majestic, yet inspires confidence! On it is just what should be in a king, not differing much from hermits. Because:—He too has occupied an *Asrama* (a stage of life) which is enjoyed by all; and lays up every day (a store of) penance by protecting (the saints); and his too, who has control over his self, is the holy title "saint" having the word রাজন্ (king) preceding it,—which chanted by pairs of bards rises up and reaches the heavens.

Second.—Gautama, is he Dushyanta, the friend of Indra the slayer of Bala?

First.—Yes.

Second.—Well then,—

No wonder that he, with arms long as the iron bar for locking a city-gate, alone rules the whole earth, the blue boundary whereof are the oceans. For, even the gods having contracted confirmed hostilities with the sons of Dity look to his well-strung bow as well as to the thunderbolt of Indra for victory in their wars.

[*Approaching*]. Victory to the king!

उभौ। आश्रमे सीदन्ति ये ते आश्रमसदः तेषां (सत्सूद्विषेत्यादिना सदधातोः

क्विप) "क्तस्य च वर्त्तमाने" कर्त्तरि षष्ठी। The nominative case of verbs which admit of क्त in the present tense takes the sixth case-ending.

उभौ। सन्निधिरेव इति सान्निध्यं,क्वचित् स्वार्थिका प्रकृतेः लिङ्गवचनान्यति-वर्त्तन्ते इति क्लीवत्वम्। असान्निध्यात् अनुपस्थितत्वात्। इष्टिः यागः (यजधातोः क्तिन्) तस्याः विघ्नं व्याघातं जनयन्ति। तत् तस्मात् सारथिः द्वितीयः यस्य तेन सारथिमात्रसहायेन भवता कतिपयाः रात्रयः समाहृताः इति कतिपयरात्रं अत्यन्त-संयोगे द्वितीया ; "अहः सर्व्वैकदेशसंख्यातपुण्याच्च रात्रेः" चकारात् संख्याव्ययादेः" इति रात्रिशब्दात् अच् in a compound of the तत्पुरुष kind the word रात्रि admits of the augment अच् if it follows the words अहन् सर्व्व, संख्यात, पुण्य and एकदेशवाचक words or words meaning its parts or watches, and also numerals and indeclinable particles. कतिपयशब्दः संख्यायां वर्त्तते ; कतिशब्दात् अयच् प्रत्ययः पुगागमश्च। नाथेन सह वर्त्तमानः इति सनाथः असनाथः सनाथः क्रियताम् इति सनाथीक्रियताम् अभूततद्भावे च्विः अस्य च्वौ इति अकारस्य ईत्वं अध्यास्यतामित्यर्थः।

विदूषकः। [अपवार्य्य]। मुनीनामियं प्रार्थना ते अभिलाषसिद्धेरुपयोगिनी।

राजा। मद्वचनात् इत्यत्र ल्यब्लोपे पञ्चमी।

दौवारिकः। यत् देवः आज्ञापयति। [निष्क्रान्तः]।

রাজা। [আসন হইতে উঠিয়া] আপনাদিগকে প্রণাম করি।

উভয়ে। আপনার মঙ্গল হউক। [ফল দান করিলেন]।

রাজা। [প্রণামপূর্ব্বক গ্রহণ করিয়া] আপনাদের আদেশ শুনিতে ইচ্ছা করি।

উভয়ে। আপনি এখানে আছেন ইহা মুনিরা অবগত হইয়াছেন। এবং সেই নিমিত্ত আপনাকে প্রার্থনা করিতেছেন।

রাজা। কি আদেশ করিতেছেন।

উভয়ে। এই প্রার্থনা করেন, যে মহর্ষি কণ্বের অনুপস্থিতিবশতঃ রাক্ষসেরা আমাদের যজ্ঞবিঘ্ন সম্পাদন করিতেছে; অতএব আপনি সারথিমাত্র সমভিব্যাহারে কতিপয় রাত্রি এই আশ্রমে অবস্থান করুন।

রাজা। অনুগৃহীত হইলাম।

বিদূষক। [জনান্তিকে] এই প্রার্থনা আপনার অনুকূল।

রাজা। [ঈষৎ হাস্য করিয়া] রৈবতক, আমার বচন অনুসারে সারথিকে বল যে ধনুর সহিত রথ উপস্থাপিত করুক।

দৌবারিক। প্রভু যেরূপ আদেশ করেন [নিষ্ক্রান্ত হইল]।

King—[*Rising from his seat*] I bow to you both.

Both.—May you be blessed [*offer fruits*].

King.—[*Receiving them with a respectful bow*] I wish (to hear) your commands.

Both.—The dwellers of the hermitage have known that you are here. Therefore they request you.

King.—What do they command ?

Both.—Because of the absence of the great sage Knawa, demons are creating a disturbance of our sacrifices. Therefore you would be pleased to occupy the hermitage, with the charioteer as your second, for a few nights.

Kings.—I have been much favoured.

Bidushaka.—[*Aside*]. This request is favourable to you.

King.—[*Smiling*] Raibataka, tell the charioteer, using my words, to bring the chariot with (my) bow.

Warder.—As your lordship commands. [*Exit.*]

उभौ । [सहर्षम्] पूर्व्वेषाम् अनुकारिणि त्वयि इदं युक्तरूपं ; पौरवाः आपन्नाभयसत्रेषु दीक्षिताः खलु ।

पूर्व्वेषां पुरुवंशीयानां अनुकारिणि सदृशे त्वयि इदं अस्मत्प्रार्थनापरिपूरणं युक्तरूपम् अतिशयेन युक्तम् । पौरवाः पुरोः वंशभवाः आपन्नानां अभयमेव लक्षणया अभयदानमित्यर्थः सत्राणि यज्ञाः सत्रमाच्छादने यज्ञे सदा दाने वनेऽपि चेत्यमरः तेषु आपन्नाभयसत्रेषु विपन्नेभ्य अभयदानरूपेषु यज्ञेषु दीक्षिताः कृतदीक्षाः निरता इत्यर्थः ।

राजा । पदस्य पश्चात् इति अनुपदम पश्चादर्थे अव्ययीभावः अन्वक् पश्चादित्यर्थः आगतः एव ; अत्र आसंसायां भूतवच्च इति भाविनि भूतस्य (क्तप्रत्ययस्य) प्रयोगः ।

राजा । शकुन्तलायाः दर्शने कुतूहलं औत्सुक्यमस्ति किम्, अपि प्रश्ने, रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम् ।

विदूषकः । परिवाहेण ओघेन पूर्णेनेतियावत् सह इति सपरिवाहं आसीत् पयःपूर इव समौत्सुक्यं उच्छलितमभूत् । अधुना राक्षसानां उदन्तं श्रुत्वा विन्दुरपि न वर्त्तते, सर्व्वमेव औत्सुक्यं विलयं गतम् ।

Metaphor taken from an overflowing mountain stream.

राजा । मम समीपे अवस्थानेन राक्षसात् तव भयं न भविष्यति ।

विदूषकः । तव समीपे अवस्थानेन यदि राक्षसभयं निवारितं भवति, तर्हि इदानीमपि त्वत्पार्श्वावस्थानेन राक्षसात् त्रातोऽस्मि ।

উভযে। [আহ্লাদের সহিত] পূর্ব্বপুরুষদিগের অনুকারী আপনার এ কার্য্য অতীব উপযুক্ত হইয়াছে ; পুরুবংশীয়গণ বিপন্ন ব্যক্তিদিগকে অভয়দানরূপ যজ্ঞে নিরত ।

রাজা। [প্রণাম করিয়া] আপনারা অগ্রে চলুন, আমিও আপনাদের পশ্চাৎ পশ্চাৎ চলিলাম।

উভয়ে। জয় হউক [নির্গত হইলেন]।

রাজা। মাঠব্য, শকুন্তলাদর্শনে কৌতূহল আছে কি?

বিদূষক। প্রথমে জলোচ্ছ্বাসের ন্যায় ইচ্ছা বেগবতী ছিল; কিন্তু এক্ষণে রাক্ষস-বৃত্তান্ত শ্রবণে এক বিন্দুও অবশিষ্ট নাই।

রাজা। ভীত হইও না, আমার নিকটে থাকিবে।

বিদূষকঃ। এই আমি রাক্ষস হইতে রক্ষিত হইয়াছি।

Both.—[*Joyfully*] This is quite becoming you who follow your ancestors. The descendants of Puru have devoted themselves (in the same way as to sacrificial rites) to giving succour to the dis tressed.

King.—[*With a bow*]. Be pleased to go before. I am coming immediately after you.

Both —Victory to you ! [*Exeunt.*]

King.—Mathavya, have you any longing for seeing Sakuntala ?

Bidushaka.—Yes. At first it was overflowing, but now at this news about the demons, not a drop is left.

King.—Don't fear, you shall keep close to me.

Bidushaka.—I am protected from the demons.

दौवारिकः। [प्रविश्य]।

सज्जधातोः कर्त्तरि अच् सज्जः अयं भौवादिकः परस्मैपदी ; आत्मनेपदीति केचित्। हरति वहति इति हरः हरतेरनुद्यमने इति अच् ; आज्ञप्तेः हरः इति आज्ञप्तिहरः सन्देशहरः दूत इत्यर्थः।

राजा। अस्माभिरित्यत्र गौरवे बहुवचनम्।

करभकः। पारणा व्रतान्तभोजनम् ; प्रवृत्ता पारणा यस्य सः प्रवृत्तपारणः। चतुर्थे दिवसे व्रतोद्यापनं भविष्यति ; तस्मिन् दिने वत्सेनाव उपस्थातव्यमित्यर्थः।

राजा। एकतः तपस्विनां यज्ञरक्षणं अपरतः मातुः आज्ञा ; इयमपि लङ्घयितु मशक्यम्। इयञ्च समं सम्पादयितुं न शक्यते तदत्र किं कर्त्तव्यम्।

विदूषकः। सूर्य्यवंशीयो नरपतिः त्रिशङ्कुः सशरीरः स्वर्गं गमिष्यामीति कृतसङ्कल्पः क्रतवे वशिष्ठं वव्रे। तेनच शप्तश्चण्डालत्वमगमत् चण्डालदशां गतः विश्वामित्रेणानुष्ठितसवस्तत्प्रभावेण स्वर्गमारोढ़ुमुपचक्रमे। अवान्तरे दिवस्पतिना, रे गुरुशापहत न ते स्वर्गे स्थानमितिनिषिद्धोऽवाङ्मुखः पतितुमारब्धो विश्वामित्रेणागत्य तिष्ठेत्युक्तः अन्तराले स्थितः इति पौराणिकी कथा।

विषु अवयवेषु शङ्कुरिव इति व्युत्पत्तिः ।

राजा । सत्यं अनाकुलः आकुलः भूतः इति आकुलीभूतः । कर्त्तव्यमवधारयितुं नालम् ।

कृत्ययोः कार्य्ययोः तपस्विकार्य्यस्य मातृकार्य्यस्य च भिन्नः पृथक् देशः ययोः ते भिन्नदेशे तयोः भावः भिन्नदेशत्वम् तस्मात्, समकालं पृथक्देशसम्पाद्यत्वात् मनः चित्तं पुरः अग्रे शैले पर्व्वते प्रतिहतं निरुद्धगति, स्रोतसा वहति या सा स्रोतोवह् (वहः क्विप्). तस्याः स्रोतोवहः नद्याः स्रोतः यथा प्रवाह इव अद्वैधं द्वैधं भवति इति द्वैधीभवति, कर्त्तव्यानवधारणादनवस्थितं मे चेतः उपमालङ्कारः । द्विधा एव इति द्वैधम् स्वार्थे अण् ततः च्विः । ১৫

Change of voice.—द्वैधीभूयते मे मनसा प्रतिहतेन स्रोतसा यथा ।

[विचिन्त्य] तपस्विनां कार्य्ये यज्ञरक्षणे व्यग्रं मनो यस्य तम् तपस्विकार्य्यव्यग्रमनसम् मां ज्ञापयित्वा । पुत्रस्य कृत्यम् इति पुत्रकृत्यम् व्रतोद्यापनदिने मन्मया कर्त्तव्यम् तत् तत्स्थानीयो भूत्वा भवान् करोतु ।

विदूषकः । रक्षसः भीरुः इति पञ्चमीतत्पुरुषः ।

राजा । [सस्मितम्] महान् ब्राह्मणः तस्मिन् त्वयि भीरुत्वस्य कथं सम्भवः ।

দৌবারিক । [প্রবেশ করিয়া] রথ প্রস্তুত ; মহারাজের বিজয়প্রস্থানের অপেক্ষা করিতেছে । কিন্তু নগর হইতে দেবীর আজ্ঞাবাহক করভক আসিয়াছে ।

রাজা । [আদরের সহিত] জননী পাঠাইয়াছেন কি ?

দৌবারিক । আজ্ঞা হাঁ—

রাজা । প্রবেশ করাও ।

দৌবারিক । যে আজ্ঞা [নিষ্ক্রান্ত হইয়া করভকের সহিত প্রবেশ করিয়া] এই যে প্রভু, উঁহার নিকট গমন কর ।

করভক । প্রভুর জয় হউক ; দেবী আদেশ করিয়াছেন যে আগামী চতুর্থ দিবসে আমার উপবাসের পারণা হইবে সেই দিন দীর্ঘায়ু বৎস অবশ্য উপস্থিত হইবে ।

রাজা । এদিকে তপস্বিকার্য্য, অন্যদিকে গুরুজনের আজ্ঞা ; দুইটিই লঙ্ঘন করিবার যোগ্য নহে : এ বিষয়ে কি কর্ত্তব্য ।

বিদূষক । ত্রিশঙ্কুর ন্যায় অন্তরালে থাকুন ।

রাজা । সত্যই আমি আকুল হইয়াছি ।

দুইটি কার্য্য পৃথক্ পৃথক্ স্থানে (এক সময়ে) সম্পাদন করিতে হইবে এই নিমিত্ত আমার চিত্ত, অগ্রপতিত শৈলদ্বারা নিরুদ্ধগতি সরিৎপ্রবাহের ন্যায়, দোলায়মান হইয়াছে । [চিন্তা করিয়া] সখে জননী তোমাকে পুত্ররূপে গ্রহণ করিয়াছেন, তুমি এ স্থান হইতে প্রতিগমন করিয়া, আমি তপস্বিগণের কার্য্যে ব্যস্তচিত্ত এইরূপ নিবেদন পূর্ব্বক তাঁহার পুত্রকর্ত্তব্য সম্পাদন কর ।

বিদূষক। আমাকে রাক্ষস-ভীরু মনে করিবেন না।

রাজা। [ঈষৎহাস্য করিয়া] হে মহাব্রাহ্মণ, তোমাতে ইহা কিরূপে সম্ভব হইতে পারে?

Warder.—[*Entering.*] Ready is the chariot and awaits your march to victory. But bearing a message from the queen (your mother), Karabhaka has come from the city.

King.—[*Respectfully*]. What? sent by my mother?

Warder.—Yes.

King.—Admit him.

Warder.—I will. [*Exit and re-enters with Karabhaka*]. Here is the lord, our king. Go near (him).

Karabhaka.—Victory to the king! "On the coming fourth day" bids the queen-mother, "my fasting will be concluded. On that day I should like to be honoured by you, my long-lived son."

King.—Here is the affair of the hermits; and there the command of my mother. Both these cannot be neglected. What is to be done?

Bidushaka.—Like Trisanku, stay in the midway.

King.—In sooth, I am perplexed. The two duties happening (simultaneously) in two different places, my mind is oscillating like the stream of a river obstructed (in its course) by a rock. [*Reflectihg*]. You have been adopted, my friend, as a son by my mother. So go back from this place, and telling her that I am busy in looking after the affairs of the hermits, do the duties of a son to her.

Bidushaka.—Do not think that I am afraid of demons.

King.—[*Smiling*]. Mighty Brahmin, how can it be possible with you?

राजा। तपोवनस्य पीड़ा सर्व्वथा परिहर्त्तव्या इति हेतोः सर्व्वानेव अनुचरान् त्वया सह प्रेषयिष्यामि।

विदूषकः। युवाचासौ राजा चेति युवराजः राजाहःसखिभ्यष्टच्। In compounds of the तत्पुरुष, कर्म्मधारय and द्विगु kind, the bases, राजन् अहन् and सखि admit of the augment टच्।

राजा। [आत्मगतम्] अयं ब्राह्मणकुमारः चञ्चलः शकुन्तलागतं मम अभिलाषं मम पत्नीभ्यः कदाचित् वदेत; अतोऽहमेनमिदंवक्ष्ये। [विदूषकं हस्ते गृहीत्वा]

वयस्य ऋषिषु भक्तिवशात् तेषां कार्य्यं साधयितुं अहं तपोवनं गच्छामि नतु शकुन्तला-दर्शनलोभात् यत तत्त्वतः तस्यां मेऽनुरक्तिर्नास्ति। किं तर्हि त्वया यत् पूर्व्वं कथितं तन्मिथ्या इत्याशङ्क्याह पश्येति।

वयं क्व, परोक्षमन्मथः मृगशावैः समं एधितः जनः क्व। सखे परिहासविजल्पितं वचः परमार्थतः न गृह्यताम्। १८

वयं मादृशाः विषयासक्तचेतसः पुरुषाः क्व, परोक्षः, इन्द्रियाणामगोचरः मन्मथः कन्दर्पभावः यस्य स तथोक्तः, न कदाप्यनुभूतमन्मथविकारः, मृगाणां हरिणानां शावैः शिशुभिः समं एधितः वृद्धिंगतः जनः शकुन्तलारूपः क्व। एतदुभयं न संघटते इत्यनयोर्महदन्तरं क्वद्वयेन सूच्यते। हे सखे परिहासे नर्म्मणि विजल्पितं यद्वा परिहासेन विजल्पितं इति तृतीयासमासः। कथितं नर्म्मकलिनोक्तं वचः परमार्थतः तत्त्वतः न गृह्यतां। परिहासोक्तं वाक्यं सत्यं नावगच्छ। आद्ये अर्द्धे विषमा-लङ्कारभेदः—विरूपयोः सङ्घटना याच तद्विषमं मतम्।

× "अक्ष्णः परिमितिविग्रहे समासान्तविधानसामर्थ्यादव्ययीभावः निपातनात् परस्य ओकारादेशः" (प्रतिपरसमनुभ्योऽक्ष्णः) परोक्षमस्यास्तीति परोक्ष (अर्श आदिभ्यः अच् इति अच्) एध वृद्धौ इति धातोः कर्त्तरि क्तः एधितः एध लट् एधते ; लिट् एधाञ्चक्रे ......लुङ् ऐधिष्ट।

परमार्थेन इत्यत्र प्रकृत्यादिभ्यश्चेति तृतीया।

N. B. This duplicity of the king, properly speaking, might be looked upon as a blot or stain in his character, but judged by the common standard of ethics it is nothing serious. If it has produced any harm affecting any body; it was the king himself. Besides the saying goes :—

"न नर्म्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्नविवाहकाले।
प्राणात्यये सर्व्वधनापहारे पञ्चानृतान्याहुरपातकानि ॥

महाभारतम्।

विदूषकः। अथ किम—[निष्क्रान्ताः सर्व्वे द्वितीयोऽङ्कः।]

বিদূষক। রাজার অনুজ যে ভাবে গমন করে আমিও সেইভাবে যাইব।

রাজা। তপোবনপীড়া যাহাতে না হয় তাহা কর্ত্তব্য এই নিমিত্ত সমস্ত অনুচরবর্গকে তোমার সহিত প্রেরণ করিতেছি।

বিদূষক। তবে আমি এক্ষণে যুবরাজ হইলাম।

রাজা। [আত্মগত] এই ব্রাহ্মণকুমার চঞ্চলপ্রকৃতি, আমার অভিলাষ অন্তঃপুরের স্ত্রীবর্গকে বলিতেও পারে ; ভাল, ইহাকে এইরূপ বলি। [বিদূষকের হস্ত ধারণ

করিয়া প্রকাশ্যে] বয়স্য ঋষিদিগের প্রতি ভক্তিবশতঃ আমি আশ্রমে যাইতেছি। প্রকৃত-পক্ষে তাপসকন্যায় আমার অভিলাষ নাই। দেখ—

শকুন্তলার ন্যায় ব্যক্তি মৃগশিশুদিগের সহিত বৃদ্ধিপ্রাপ্ত, কন্দর্পভাব কখনও তাহার ইন্দ্রিয়গোচর হয় নাই। ঈদৃশ ব্যক্তিই বা কোথায় এবং মাদৃশ ব্যক্তিই বা কোথায়। আমি পরিহাস করিয়া যে কথা বলিয়াছি তাহা সত্যভাবে গ্রহণ করিও না।

বিদূষক। আজ্ঞা হাঁ।

[সকলে নিষ্ক্রান্ত হইল]

দ্বিতীয় অঙ্ক সমাপ্ত।

Bidushaka.—I should like to travel in the same way as a king's-brother ought to do.

King.—The disturbance of the hermitage is to be avoided; hence, I am going to send all my retinue with you.

Bidushaka.—Well, then I have now become the heir-apparent.

King.—[*Aside*]. This young Brahmin is fickle. He may give out my desire to the females of the harem. Well, let me tell him in this way. [*Taking Bidushaka by the hand, aloud*]. Friend I am going to the hermitage out of regard for the holy saints. Really I have no liking for the hermit's daughter. See—

Where are we and where is a creature brought up with young fawns and all ignorant of love? Friend, "take not in earnest what was said in jest."

Bidushaka.—Yes. (I understand you).

[*Exeunt*]. End of the Second Act.

तृतीयोऽङ्कः।

विष्कम्भकः।

[ततः यजमानस्य शिष्यः (शास् धातोः क्यप्) कुशान् यागार्थं दर्भान् आदाय प्रविशति]।

शिष्यः। महान् अनुभावः तेजोविशेषः, यस्य सः। प्रविष्टः इति प्रविष्ट-मात्रः तस्मिन् (लोपः शाकल्यस्य इति सन्धौ यकारलोपः) न सन्ति उपद्रवाः उपप्लवाः विघ्ना इति यावत् येषां तानि।

वाणसन्धाने का कथा, स दूरतः हुङ्कारेण इव धनुषः ज्याशब्देनैव विघ्नान् अपोहति। वाणानां शराणां सन्धाने योजने विषये का कथा तेन प्रयोजनं नास्ति इत्यर्थः। स राजा दूरतः (पञ्चम्यास्तसिल्) दूरादेव हुं इति अव्यक्तः शब्दः हुङ्कारः तेन इव धनुषः ज्यायाः गुणस्य शब्देन टङ्कारेण विघ्नान् अन्तरायान् राक्षसान् अपहति विदूरीकरोति, निरस्यतीति यावत्। तस्य धनुष्टङ्कारं श्रुत्वा राक्षसाः भीताः प्रद्रवन्ति इत्यर्थः।

Change of voice.—तेन विघ्नाः अपोह्यन्ते।

ऊह वितर्के इति धातोः लट्, अयं भौवादिकः आत्मनेपदी। उपसर्गादस्यत्यूह्योर्वेति वाच्यम्। The roots ऊह, and अस when preceded by any prefix (उपसर्ग) are optionally in the आत्मनेपद ॥१॥

इमान् दर्भान्, कुशान्, वेदिः परिष्कृता भूमिः तस्याः यजनवेद्याः संस्तरणार्थं आच्छादनार्थं ऋतौ यजन्ति ये ते (ऋतुशब्दोपपदात् यजतेः कर्त्तरि क्विन्) तेभ्यः याजकेभ्यः उपनयामि उपनीय ददामि। [परिक्रम्य अवलोक्य च आकाशे] प्रियंवदे इदं उशीरस्य तृणमूलस्य अनुलेपनं, मृणालसहितानि पद्मपत्राणि च कस्य जनस्य कृते त्वया नीयन्ते [श्रुतिमभिनीय कर्णं दत्वा इव] किं ब्रवीषि आतपस्य सूर्यकिरणस्य रौद्रस्य कर्त्तुः लङ्घनं अभिभवः तस्मात् हेतोः शकुन्तला बलवत् अत्यर्थं अस्वस्था पीड़िता। तस्याः शरीरस्य निर्व्वापणं (ण्यन्तात् वातेः) तापोपशमनं तस्मै, तादर्थ्ये चतुर्थी। तर्हि त्वरितं शीघ्रं (तरधातोः क्तः पक्षे तूर्णम्) गम्यताम्। सा खलु भगवतः कण्वस्य उच्छ्वसितं जीवितमिव। अहमपि वितानस्य यज्ञस्य इदं इति वैतानिकं शान्त्युदकं शान्तिजलं अस्यै अस्याः कृते इत्यर्थः गौतम्याः कण्वभगिन्याः हस्ते ("आलाने गृह्यते हस्ती" "रश्मिष्विवादाय नगेन्द्रसक्ताम्" इतिवत् करणस्य विवक्षता आधारत्वम्) विसर्ज्जयिष्यामि, प्रेरयिष्यामि (स्वार्थे णिच्) [निष्क्रान्तः]।

शुद्धविष्कम्भकः।

विष्कम्भकलक्षणम्—

वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः।
मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः
शुद्धः स्यात् सतु सङ्कीर्णो नीचमध्यमकल्पितः॥

प्रवेशकलक्षणमपि अत्र लिख्यते

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा।

[তাহার পর যজমানশিষ্য কুশ লইয়া প্রবেশ করিতেছেন]

শিষ্য। পার্থিব দুষ্যন্তের কি প্রভাব? তিনি আশ্রমে প্রবিষ্ট হইবামাত্র, আমাদিগের যজ্ঞাদি নির্ব্বিঘ্নে আরব্ধ হইয়াছে। বাণসংযোজনের কথা দূরে থাক্; তিনি দূর হইতে হুঙ্কারের ন্যায় ধনুর্গুণের শব্দদ্বারাই বিঘ্ন দূর করিতেছেন।

আমি বেদির আচ্ছাদনের জন্য এই কুশগুলি যাজকদিগকে প্রদান করিব। [কিয়দ্দূর গমন করিয়া এবং অবলোকন করিয়া আকাশে] প্রিয়ংবদে কাহার নিমিত্ত এই উশীরানুলেপন এবং মৃণালসহিত নলিনীপত্র লইয়া যাইতেছ? [শ্রুতি অভিনয় করিয়া] কি বলিলে, শকুন্তলা রৌদ্রাভিভব জন্য অত্যন্ত অসুস্থশরীর হইয়াছেন, তাঁহার শরীরের তাপশান্তির জন্য? তবে শীঘ্র শীঘ্র যাও! তিনি কুলপতির জীবনস্বরূপ। আমিও ইহার নিমিত্ত গৌতমীর হস্তে শান্তিজল পাঠাইয়া দিব।

[নিষ্ক্রান্ত] শুদ্ধবিষ্কম্ভক।

[*Enter a disciple of the Sacrificial priest with Kusagrass*].

Disciple—Oh! Of great prowess and puissance is the King Dushyanta!—

For, immediately on his entering the hermitage our sacrificial rites are going on free from all molestation.

What to speak of setting an arrow to the bow! With the roaring-like sound of his bow-string he removes all impediments (the demons).

I will deliver to the sacrificial priests these (bundles of) kusa-grass for strewing on the sacrificial altar. [*Walking and looking about in the air*] Priyambada, for whom do you bring that ointment of *usira* and those lotus-leaves with lotus-stalks? [*Acting as if he heard something*]. What do you say? For cooling the body of Sakuntala, who is very much indisposed for being exposed to the sun. Go then quickly. She is the life of our holy chief Kanwa. I too will send the soothing water belonging to the sacrifice through the hands of Gautami. [*Exit.* Prelude to Act III.]

[ततः प्रविशति कामयानस्य इव अवस्था यस्य स कामयानावस्थः राजा] कमेर्णिङ् ततः शानच् कामयमानः; "अनित्यमागमानुशासनमिति मुकि अकृते कामयानः साधुः"; तथाच वामनाचार्य्यसूत्रम् "कामयानशब्दः सिद्धोऽनादिश्च" इति। यद्वा "कामस्य याने उद्गमने आरोहणे वा याः अवस्था अभिलाषाद्याः ताः यस्य सः" इति राघवभट्टः, कामयानः जातानुरागः।

राजा। [निश्वस्य] तपसी वीर्य्यं जाने, सा बाला परवती इति मे विदितम् तथापि, इदं हृदयं ततः निवर्त्तयितुं न अलमस्मि।

तपसः वीर्य्यं शक्तिं जाने तपःप्रभावेण मुनयः किं साधयितुं समर्थाः तन्मे विदित मस्ति। यदीमां शकुन्तलां बलेन घर्षयामि तपःप्रभावेण मुनि र्मां भस्मसात् करिष्यतीति राज्ञः आशयः। सा बाला शकुन्तला परवती पराधीना इति मे विदितम्, (क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी) न खलु सा गुरोरनुज्ञां विना मेऽभिलाषं पूरयिष्यति इति तात्पर्य्यम् सर्व्वथा इदानीं मे अभीष्टसिद्धिः दूरापास्ता ; किं तर्हि अनेनायासकारिणा निष्फलानुरागेण इति वितर्कयन्नाह, तथापि अभिलाषसिद्धिर्दूरे इति जानन्नपि इत्यर्थः इदं हृदयं ततः तस्याः शकुन्तलायाः (विरामार्थानां यतो विरतिरिति पञ्चमी (निवर्त्तयितुं विरमयितुं न अलं समर्थोऽस्मि, अलं भूषणपर्य्याप्तिशक्तिवारणवाचकमित्यमरः ; अलमर्थेषु इति तुमुन्।

जाने इति निरुपसर्गात् जानातेः कर्त्रभिप्राये क्रियाफले आत्मनेपदम्। अनुपसर्गाज्ज्ञः।

Change of voice.—वीर्य्यं ज्ञायते...विदितेन (भूयते) मया अलं न भूयते। [मदनस्य बाधां पीड़ां निरुप्य अनुभूय इत्यर्थः] ॥२॥

आयुध्यते अनेन इति आयुधं युधधातोः घञर्थे कः।

कुसुममेव आयुधं यस्य स सुकुमायुधः कन्दर्पः, मौर्व्वी रोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतोः इति कविसमयप्रसिद्धिः। विश्वसनीयाभ्यां, विश्वासयोग्याभ्यां शराणां कुसुमघटितत्वात् रश्मीनां शीतलत्वाच्च भवद्भ्यां कामिजनानां सार्थः समूहः सार्थो वणिक्समूहे स्यादपि सङ्घातमात्रके इति मेदिनी। अतिसन्धीयते प्रतार्य्यते (अति सम्पूर्व्वात् दधातेः कर्म्मणि लट्) कुतः।

तव कुसुमशरत्वं इन्दोः शीतरश्मित्वं च इति द्वयं मद्विधेषु अयथार्थं दृश्यते। इन्दुः हिमगर्भैः अग्निं विसृजति ; त्वमपि कुसुमवाणान् वज्रसारीकरोषि।

तव, कुसुमान्येव शराः यस्य तस्य भावः कुसुमशरत्वम् ; कुसुमघटितत्वात् तव शराणां सौकुमार्य्यम् ; इन्दोः चन्द्रस्य शीता रश्मयः यस्य तस्य भावः शीतरश्मित्वम्, रश्मीनां शीतलत्वञ्च इति द्वयं ममेव विधा प्रकारो येषां तेषु मद्विधेषु मादृशेषु कामिजनेषु, यथागतः अर्थः यस्य तत् यथार्थं तन्नभवति इति अयथार्थं मिथ्या दृश्यते अनुभूयते इत्यर्थः। इन्दुः हिमं गर्भे येषां तैः हिमगर्भैः शीतलैः मयूखैः किरणैः किरणोस्रमयूखांशुगभस्तिघृणिघृणयः इत्यमरः अग्निं विसृजति उद्गिरति वमति इति यावत्। गुणद्रव्ययोर्विरोधः। विप्रलम्भस्वाभाव्यादाभासत्वमिति विरोधाभासः अलङ्कारः। इन्दुकिरणाः स्वभावशीतला अपि विरहिणामग्निवत् सन्तापका इत्यर्थः—यथाचोक्तं "यस्य स सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य"। त्वमपि कुसुमवाणान् पुष्पघटितान् शरान् वज्रस्येव सारः स्थिरांशो येषां ते वज्रसाराः अवज्रसारान् वज्र-

सारान् करोषि इति वज्रसारीकरोषि। कामिजनैः इन्दुकिरणाः सन्तापकाः, कन्दर्पस्य कुसुमवाणाश्च वज्रवच्चण्डनिपाताः अनुभूयन्ते इत्यर्थः।

Change of voice.—इयं अयथार्थं पश्यति (लोकः)। इन्दुना अग्निः विसृज्यते। त्वया कुसुमवाणाः वज्रसारीक्रियन्ते।

"द्रवमूर्त्तिस्पर्शयोः श्यः"—द्रवस्य मूर्त्तौ काठिन्ये स्पर्शेचार्थे श्यैङः सम्प्रसारणं स्यान्निष्ठायाम्। "श्योऽस्पर्शे" श्यैङःनिष्ठातस्य नः स्यादस्पर्शेऽर्थे। "इक्यणः सम्प्रसारणम्"—यवरस्थाने यथाक्रमं इ उ ऋ भावः सम्प्रसारणसंज्ञः स्यात्। In the presence of the suffix क्त, the root श्यै undergoes the change known as सम्प्रसारण, when it implies "touch" and the "solidification of liquids". In senses other than touch the क्त of श्यै is changed into न। The transformation of य into इ, व into उ and र into ऋ, etc is termed सम्प्रसारण। सम्प्रसारणाच्च इति पूर्व्वरूपमेकादेशः। हलश्च इति दीर्घः।

श्यै क्तः—शीतः (स्पर्शः)—शीनः (प्राक्द्रवीभूतस्य घृतादेः घनभावः) अन्यत्र —श्यानः (यथा संश्यानः वृश्चिकः सङ्कुचित इत्यर्थः) लट् श्यायते; लिट् शश्ये; लुङ् अश्यास्त ॥३॥

अनुक्रोशः दया। कुत इति अतिकोमलानि कुसुमानि आयुधानि वाणाः यस्य तस्यापि भवतः कथमीदृशं तीक्ष्णत्वं सन्तापकत्वम्। पुष्पमयाणां वाणानां सम्पातेन सन्तापादेः सम्भवः सर्व्वथा नास्ति तथापि कथमयं संज्वरः, अत्र केनापि कारणेन भाव्यमिति चिन्तायाः अवसरः। आं इति स्मरणे अव्ययम्।

अद्येति अम्बुराशौ और्व्वइव हरकोपवह्निः अद्यापि त्वयि ज्वलति नूनं; अन्यथा हे मन्मथ, भस्मावशेषः त्वं मद्विधानां कथं एवं उष्णः।

अम्बुराशौ सागरे और्व्वः वाड़वानलइव हरस्य कोप एव वह्निः इति हरकोपवह्निः तपःपरामर्शविह्वलमन्योः भवस्य तृतीयादक्ष्णः समुद्भूतः क्रोधानलः अद्यापि इदानीमपि वहुषु दिवसेषु अतीतेष्वपि इत्यर्थः नूनं त्वयि ज्वलति, सुगूढ़ं त्वयि अवतिष्ठते; अन्यथा यद्येवं नस्यात् तर्हि कथं भस्म एव अवशेषः यस्य सः भस्मावशेषः भस्मीभूतः सन्नपि त्वं मद्विधानां कामिजनानां सम्बन्धे कथं एवं ईदृक् उष्णः सन्तापकः अनुभूयसे इति वाक्यशेषः। भस्माच्छादिते अङ्गारे वह्निरिव दाहमवास्तवति त्वयि हरकोपानलः प्रच्छन्नं तिष्ठतीति तात्पर्य्यम्। स एव तापहेतुरितिभावः। उत्प्रेक्षालङ्कारः। और्व्वइवेति उपमया सह नैरपेक्ष्येणावस्थानात् संसृष्टिः।

Change of voice.—हरकोपवह्निना...और्व्वेणेव...ज्वल्यते। भस्मावशेषेण त्वया उष्णेन कथं भूयते।

श्रौर्व्वः भृगुवंशीयः मुनिविशेषः। कार्त्तवीर्य्यसन्ततिसन्त्रस्ता काचित् भृगुकुलवधूः स्वस्याः गर्भमूरौ समानीय दारकं रक्षितवती निर्व्विघ्नं प्रसूतवतीच। तेनच बालकस्य श्रौर्व्व इति संज्ञा। पितॄणां निग्रहश्रवणेन कषायितलोचनस्य दारकस्य महान् कोपः समजनि वेलोक्यं दग्धुमुपचक्रमेच। पितृभिरनुरुद्धः सोऽनलमिव सम्भूतं तं कोपमुदधौ समुत्ससर्ज्ज। तत्र च वाड़वाग्निरूपेण श्रौर्व्वसमुत्पन्नत्वात् श्रौर्व्वानल इति प्रसिद्धिं गतः स कोपवह्निरिदानीमपि वर्त्तते इति पुराणवार्त्ता। मदनभस्मवृत्तान्तः सर्व्वत्र बहुलीभूतः विस्तरभयान्नात्र लिखितः ॥ ४ ॥

[परिक्रम्य] कर्म्मणि यज्ञे संस्थिते समाप्तिं गते सति इदानीं, सीदति अत्र इति सदः सद्धातोः श्रौणादिकः असुन् सभा तत्र साधवः इति सदस्याः, सदस्शब्दात् यत्।—यज्ञा यथाविधि अनुष्ठीयन्ते नवेति परिदर्शनार्थं नियुक्ताः विधिज्ञाः तपस्विनः सदस्याः तैरनुज्ञातः अहं श्रमेण क्लान्तं आत्मानं कुत्र विनोदयामि कुत्रावस्थितः परिश्रमापनोदन करिष्यामि।

[निश्वस्य] प्रियायाः शकुन्तलायाः दर्शनात् ऋते विना (ऋतेयोगात् पञ्चमी द्वितीया च) अन्यत् शरणं आश्रयः नास्ति।

[सूर्य्यमवलोक्य] उग्रः आतपः यत्र सा उग्रातपा, तां, वेलां निदाघसूर्य्यस्य प्रौढ़किरणसम्पातैः दुःसहोत्तापं इमं समयं लतानां वलयानि विद्यन्ते येषु तेषु लतावलयवत्सु लताकुञ्जसनाथेषु मालिनीतीरेषु सखीजनेन सह गमयति यापयति ; तत् तत्रैव गच्छामि [परिक्रम्य स्पर्शं रूपयित्वा वायुस्पर्शमनुभूय] प्रकृष्टः वातः इति प्रवातः तेन सुभगः, वायुसद्भावात् सुखकरः अयमुद्देशः—भूभागः प्रदेशः इति यावत् शक्यमिति—

अरविन्दसुरभिः मालिनीतरङ्गाणां कणवाही पवनः अनङ्गतप्तैः अङ्गैः अविरलमालिङ्गितुं शक्यम—

अरं शीघ्रं लघुक्षिप्रमरं द्रुतमित्यमरः। विदन्ते वृद्धिं लभन्ते इति अरविन्दानि (अरपूर्व्वात् विन्दतेः शः कर्त्तरि) कमलानि तैः सुरभिः सुगन्धः पद्मरेणुभिः सुरभिगन्धः मालिन्याः नद्याः तरङ्गाणां वीचीनां कणान् क्षुद्रोदबिन्दून् वहति इति कणवाही, मालिन्याः शीकरैः पृक्तः इत्यर्थः पवनः वायुः अनङ्गेन तप्तानि अनङ्गतप्तानि मदनसन्तप्तानि तैः अङ्गैः अविरलं गाढं आलिङ्गितुं स्प्रष्टुं शक्यम्। "शक्यमिति रूपं विलिङ्गवचनस्यापि कर्म्माभिधायां सामान्योपक्रमात् ; शके: शक्तिसहोर्य्येति कर्म्मणि यति कृते शक्यमिति रूपं भवति इति वामनः तथाच महाभाष्ये—"शक्यं श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्।"

अनुरूपप्रयोगः कुमारे—शक्यमोषधिपतेर्नवो दयाः
कर्णपूररचनाकृते तव।

अप्रगल्भयवसूचिकोमला:
छेत्तुमग्रनखसंपुटै: करा: ॥

"शक्योऽरविन्दसुरभि:" इति केचित् साहसिका: पठन्ति ॥५॥

[परिक्रम्य अवलोक्य च] वेतसै: वानीरलताभि: परिक्षिप्ते परिवेष्टिते अस्मिन् लताकुञ्जे शकुन्तला वर्त्तते। तथाहि—

पुरस्तात् अभ्युन्नता जघनगौरवात् पश्चात् अवगाढ़ा अभिनवा पदपङ्क्ति: अस्य पाण्डुसिकते द्वारे दृश्यते।

पुरस्तात् अग्रे (पूर्व्वशब्दात् अस्ताति:) "दिक्शब्देभ्य: सप्तमीपञ्चमीप्रथमाभ्योदिग्-देशकालेष्वस्ताति।" "अस्ताति च" अस्तातौ परे पूर्व्वाधरावराणाम् यथाक्रमं पुरधव: स्यु:। अभ्युन्नता अगभीरा, जघनस्य स्त्रीकट्या पुरोभागस्य गौरवात् वैपुल्यात् पश्चात् अवगाढ़ा निम्ना गभीरेतियावत् अभिनवा प्रत्यग्रा सुव्यक्ता इत्यर्थ: पदपङ्क्ति: पदचिह्नं अस्य लतामण्डपस्य पाण्डव: सिकता: वालुका: यत्र तस्मिन् पाण्डुसिकते द्वारे दृश्यते एषा पदपङ्क्ति: शकुन्तलाया: एव, अत: शकुन्तला अत्रैवास्ते।

Change of voice.—अभ्युन्नतां...अवगाढ़ां अभिनवां पदपङ्क्तिं पश्यामि ॥६॥

विटपानां वेतसशाखानां अन्तरेण पत्रान्तरवर्त्तिना अवकाशेन इत्यर्थ: विलोकयामि। [परिक्रम्य तथा कृत्वा सहर्षम्] अये नेत्रयो: नयनयो: निर्व्वाणं निर्वृति: सुखमिति यावत् "निर्व्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने" लब्धं अधिगतम् मया—उक्तञ्च भवभूतिना "इयममृतवर्त्तिर्नयनयो:"। एषा मे मनोरथप्रियतमा यस्यां मे भावानुवन्ध: सेयं कुसुमानां आस्तरणं उत्तरच्छद: तेन सह वर्त्तमानं शिलापट्टं शिलाखण्डम् (अधिशीङ्स्थासां इति कर्म्मत्वम्) अध्यास्य सखीभ्यां अन्वास्यते सेव्यते परिचर्य्यते। अनुपूर्व्वात् आस्धातो: सकर्म्मकत्वम् तेन च कर्म्मणि प्रयोग:। आसां विश्रम्भकथितानि विश्वासपूर्णानालापान् श्रोष्यामि [विलोकयन् स्थित:]।

[তদনন্তর কামযানাবস্থ রাজা প্রবেশ করিলেন]

রাজা। [নিশ্বাস ত্যাগ করিয়া] তপঃপ্রভাব জানি, সেই বালিকা শকুন্তলা পরাধীনা ইহাও আমি অবগত আছি। তথাপি আমার হৃদয় তাহা হইতে নিবৃত্ত করিতে পারিতেছি না, [মদনপীড়া অনুভব করিয়া]

ভগবন্ কুসুমায়ুধ, আপনি এবং চন্দ্রমা বিশ্বাসযোগ্য এই দুই জনে কামিজনসমূহকে প্রতারিত করিতেছেন। কারণ আপনার শর পুষ্পঘটিত এবং ইন্দুর রশ্মি শীতল, এ উভয় আমাদের নিকট মিথ্যা বোধ হইতেছে। চন্দ্র শীতলময়ূখের দ্বারা অগ্নিবর্ষণ করেন ; এবং আপনারও কুসুমবাণ বজ্রসার।

ভগবন্ কামদেব, আমার প্রতি আপনার দয়া নাই। আপনি কুসুমায়ুধ হইলেও আপনার এরূপ তীক্ষ্ণতা কিরূপে হইল ; [চিন্তা করিয়া] হাঁ বুঝিয়াছি।

সমুদ্রে বাড়বানলের ন্যায়, এখনও হরকোপানল আপনাতে জ্বলিতেছে। তাহা না হইলে আপনি ভস্মাবশেষ হইয়াও মাদৃশ ব্যক্তির নিকট কেন ঈদৃশ উষ্ণ অনুভূত হন ?

[কয়েক পদ অগ্রসর হইয়া] যজ্ঞ সমাপ্ত হইয়াছে, সদস্যগণ অনুমতি দিয়াছেন, এক্ষণে কোন্ স্থানে পরিশ্রান্ত আত্মার শ্রমবিনোদন করি। [নিশ্বাস ত্যাগ করিয়া] প্রিয়াদর্শন ভিন্ন আর উপায় কি ? তাঁহাকেই অন্বেষণ করি। [সূর্য্যের দিকে দৃষ্টি-পাত করিয়া] এই প্রখর রৌদ্রের সময় প্রায়ই তিনি সখীজনের সহিত মালিনীতীরে লতাকুঞ্জে অবস্থান করেন, সেই স্থানেই যাই। [কিয়দ্দূর গমন করিয়া বায়ুস্পর্শ অনুভব করিয়া] সুন্দর বায়ুহেতু এই স্থান সুখসেব্য।—

মালিনীনদীর তরঙ্গের শীকরবাহী, পদ্মরেণুসম্পর্কে সুগন্ধ এই সমীরণ অনঙ্গতপ্ত অঙ্গের পক্ষে গাঢ়ভাবে স্পর্শযোগ্য। [কিয়দ্দূর গমন করিয়া অবলোকন করিয়া] বেতসপরিক্ষিপ্ত এই লতাকুঞ্জে শকুন্তলা সন্নিহিত আছেন ; কারণ—লতাকুঞ্জের শ্বেতবালুকাময় দ্বারে অভিনব পদচিহ্ন রহিয়াছে ; পদচিহ্নগুলির অগ্রভাগ অগভীর এবং পশ্চাদ্ভাগ স্থূলজঘনভারে গভীর রহিয়াছে ; শাখামধ্যস্থিত অবকাশ দ্বারা দেখি [কয়েক পদ অগ্রসর হইয়া বিলোকন করিয়া আহ্লাদের সহিত] আঃ নয়ন জুড়াইল, আমার মনোরথপ্রিয়া কুসুমশয্যাসনাথ শিলাতলে শয়ন করিয়া আছেন ; সখীদ্বয় তাঁহার সেবা করিতেছেন। ইঁহারা বিস্রব্ধভাবে যে কথোপকথন করেন তাহা শুনিব [দাঁড়াইয়া নিরীক্ষণ করিতে লাগিলেন]।

[*Enter the king with the air of one in love.*]

King.—[*Sighing*]. I know the power of penance, and it is also known to me that she is dependent on another ; yet I cannot turn my heart away from her.

[*Feeling the pangs of love.*]

God of flowery shafts ! lovers are deceived by you and the Moon ; though you are deserving of confidence (as harmless.)

Because,—that your arrows are made of flower and that the rays of the moon are cold do not appear true to men in my position. (To us) the moon pours down fire through cold rays ; and you make your flowery arrows hard as adamant. God of love, you have no pity on me. Whence is this sharpness of your, being, as you are, of flowery shafts ? [*Reflecting*]. Oh ! I see. Surely the fire of the wrath of Hara (Siva) burns even now in you, as the submarine fire in the ocean : otherwise, how could you, O God of love, (literally, the tormentor of mind),—of whom ashes were the only

remains, could be thus hot to men in my condition? [*walking*]. Now the sacrificial rites being over and the superintending priests having given me leave, where shall I rest my wearied limbs? [*Sighing*]. What else is my refuge than the sight of my beloved one? I will seek her. [*Looking at the sun*]. This part of the day when heat becomes intense, she generally passes with her attendants in the arbours made of creepers on the bank of the Malini. I will go there. [*Walking and feeling a breeze*]. How charming is this spot with its sweet breeze!

The gentle breeze fragrant with lotuses and charged with the sprays of the rippling Malini may be closely embraced by (my) burning limbs. [*Walking a little further and looking about*]. Sakuntala must be here in this grove of creepers enclosed by canes. For—

प्रियंवदा। आकृतीनां विशेषाः इति आकृतिविशेषाः विशिष्टाः आकृतयः इत्यर्थः कृदभिहितभावो द्रव्यवत् प्रकाशते इति। गुणस्य शीलस्य विरोधिनः इति गुणविरोधिनः गुणहीनाः दुर्वृत्ताः इत्यर्थः।

अनुरूपोक्तिः—"यत्राकृतिस्तत्र गुणा वसन्ति" "यदुच्यते पार्व्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः॥"

प्रतिपत्स्यते करिष्यति इत्यर्थः।

अनसूया। प्रतिपादनीया देया। प्रथमः मुख्यः सङ्कल्पः कन्यायाः पितुः इच्छा। दैवं दिष्टं भागधेयमित्यमरः। कृतार्थः सफलकामः। न प्रयासः इति अप्रयासः तेन आयासं विनैव। प्रपूर्व्वात् यस्य ते घञ् प्रयासः।

प्रियंवदा। [पुष्पस्य भाजनं पात्रं विलोक्य] वलिकर्म्मणः पूजायाः पर्य्याप्तानि प्रभूतानि निर्व्वाहयोग्यानीत्यर्थः।

अनसूया। सुभगायाः भावः इति सौभाग्यं "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च" इत्युभयपदवृद्धिः सौभाग्यस्य देवता अधिष्ठात्री देवी।

यानि खलु कुसुमान्यवचितानि तानि न पर्य्याप्तानि ; इतोऽप्यधिकानि चेतव्यानीति आशयः।

नेपथ्ये—अयमहं भोः कोऽत्र वर्त्तते अतिथिरहमुपस्थितः इत्यर्थः।

अनसूया। ण्यन्तात् विदेः भावे क्तः नपुंसके भावे उपसंख्यानम् इति षष्ठी पक्षे तृतीया।

प्रियंवदा। शकुन्तला पर्णशालायां वर्त्तते सा एव अतिथेः सत्कारं विधास्यति। पुनः किन्तु हृदयेन असन्निहिता, अनन्यचित्ता दुष्यन्तमेव चिन्तयति इत्यर्थः।

अनसूया। एतावद्भिः अवचेतुमिष्टैः इत्यर्थः पुष्पैः अलं प्रयोजनं नास्ति। यत् खलु अनिष्टादिकं अवश्यम्भावि तस्य सूचकमौन्मनस्यं प्रागेव किमप्यनुभूयते अतः अनसूया उद्वेलचित्ता उटजमेवगन्तुमीहते। [प्रस्थिते]

नेपथ्ये—आः इति क्रोधे अव्ययम् अतिथिं परिभवति अवजानाति या सा अतिथिपरिभाविणी तत् सम्बोधने, सकर्म्मकात् परिभवतेः कर्त्तरि णिनिः।

अनन्यमानसा यं विचिन्तयन्ती उपस्थितं तपोधनं मां न वेत्सि ; स बोधितः सन् अपि प्रमत्तः प्रथमं कृतां कथां इव त्वां न स्मरिष्यति॥ १॥

नास्ति अन्यस्मिन् विषये मानसं यस्याः तथोक्ता सा अनन्यचित्ता यं दुष्यन्तं विचिन्तयन्ती भावयन्ती उपस्थितं समागतं तपः एव धनं यस्य तं तपोधनं तपस्विनं सत्काराहमिति भावः मां न वेत्सि जानासि, गणयसि इति यावत्, न सत्करोषि इत्यर्थः स ते भर्त्ता बोधितः स्मारितः सन्नपि, प्रमत्तः उन्मत्तः प्रथमं पूर्व्वं कृतां उच्चारितां कथामिव त्वां न स्मरिष्यति। उपमालङ्कारः।

Change of voice.—अनन्यमानसया विचिन्तयन्त्या उपस्थितः तपोधनः अहं न विद्ये। तेन बोधितेनापि प्रमत्तेन...कृता कथा इव त्वं न स्मरिष्यसे। (स्मारिष्यसे वा)

प्रियंवदा। अप्रिय मनिष्टः। शून्यं वाह्यव्यापारात् निवृत्तं हृदयं यस्याः सा। गता अस्यै अभिशापं दत्त्वा। वेगस्य रयस्य वलेन अतिरेकेण उत्फुल्ला उद्गता तया दुर्व्वारया, वारयितुमशक्यया (वारयतेः खल्स्त्रियां टाप्) गत्या प्रतिगतः। कुड्रोहि उद्गतगतिर्भवति उत्पूर्व्वात् फुल्लविकसने इति धातोः अच् ततः स्त्रियां टाप्। हुतवहः वह्निः वहेरच् ; हुतस्य वहः इति हुतवहः तस्मात् अन्यारादिवर्त्ते इति पञ्चमी। दृष्टान्तालङ्कारः।

अनसूया। अर्घ्यं पूजार्थं द्रव्यं, उदकं पाद्यञ्च तयोः समाहारः इति अर्घ्योदकं। "चार्थे द्वन्द्वः" समाहारः खलु अस्यार्थान्तरम्।

अनसूया। अम्मो इति खेदसूचकमव्ययम् आवेगेन स्खलिता तया [पुष्पाणां भूमिपतितानां उच्चयं उत्तोलनं रूपयति अत्र हस्तादानेऽपि तथा स्तेयाभावेऽपि न घञ् तथाच वार्त्तिकम् "उच्चयस्य प्रतिषेधो वक्तव्यः"]।

प्रियंवदा। प्रकृत्या स्वभावेन वक्रः कुटिलः अनुनयं न गृह्णाति। पुराणकृत् दुर्व्वासोमुखेन तच्चरित्रं वर्णयति।

> "ज्वलज्जटाकलापस्य भ्रुकुटीकुटिलं मुखं।
> निरीक्ष्य कस्त्रिभुवने मम यो न गतोभयम्॥
> नाहं कृपालुहृदयो न च मां भजतेक्षमा।
> अक्षान्तिसारसर्व्वस्वं दुर्व्वाससमवेहि माम्॥
> नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो।
> विडम्बनामिमां भूयः करोष्यनुनयात्मिकाम्॥"

अनुक्रोशः दया तेन सह वर्त्तमानः सानुक्रोशः सदयः।

अनसूया। कोपने तस्मिन् ईषदपि क्रोधोपशमः भूयानित्यर्थः।

प्रियंवदा। अयमपराधः न ज्ञानपूर्व्वः नापि असकृदाचरितः अतः सोढ़व्यः। न विज्ञातः तपसः प्रभावो येन तस्य। इच्छति इति वर्त्तमानसामीप्ये (भूते) लट् वर्त्तमानसामीप्ये वर्त्तमानवद्वा।"

अनसूया। ततः ततः। प्रसादनस्य किं फलं वृत्तमिति ज्ञातुं मनसः परीक्षां द्योतयितुं द्विरुक्तिः।

प्रियंवदा। अभिज्ञायते अनेन इति अभिज्ञानं स्मारकं आभरणं अलङ्करणं तस्य दर्शनेन शापः अभिसम्पातः निवृत्तो भविष्यति। शापनिर्मुक्तिर्भविष्यति। अन्तर्हितः अदर्शनं गतः। अकर्म्मकत्वात् अन्तर् पूर्व्वाद् दधाते कर्त्तरि क्तः।

अनसूया। प्रस्थितेन प्रस्थातुमुद्युक्तेन आरम्भे क्तः। पिनद्धम् अपिपूर्व्वात् नह्यतेः क्तः अपेरकारस्य पाक्षिकः लोपः "वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः।" स्वाधीनः स्वतन्त्रः उपायः राज्ञः स्मृत्युपस्थापनस्य यस्याः सा स्वाधीनोपाया। स्वस्यामधि इति शौण्डादिगणे अधिशब्दस्य पाठात् सप्तमीशौण्डादिभिरिति सप्तमी समासः। वृत्तिमात्रे सर्व्वनाम्नः इति पुम्वद्भावः अष्युत्तरपदाच्चेति खः स्वार्थिकः ततः स्वाधीनः निष्पन्नः।

प्रियंवदा। वामे सव्ये हस्ते उपहितं न्यस्तं वदनं यया सा; आलिखिता चित्रलिखिता। आत्मानमपि न विभावयति आत्मदेहव्यापारमपि न जानाति; किं पुनः आगन्तुकं अतिथिम् आङ् पूर्व्वात् गमेः तुन् प्रत्ययः स्वार्थे कन्।

अनसूया। प्रकृत्या स्वभावेन पेलवा कोमला प्रियसखी शकुन्तला एतं वृत्तान्तं न श्रावयितव्या।

प्रियंवदा। उष्णेन उदकेन कोमलायाः नवमल्लिकायाः सेचनमिव अस्य वृत्तान्तस्य श्रावणं निर्दग्धेर्मृदीः शकुन्तलाया अत्याहितकरमित्यर्थः। वैधर्म्येण दृष्टान्तालंकारः।

[তাহার পর পুষ্পোচ্চয়ন করিতেছে এরূপ সখীদ্বয়ের প্রবেশ]

অনসূয়া। প্রিয়ংবদে যদিও গান্ধর্ব্ববিধানানুসারে বিবাহমঙ্গল সম্পাদিত হওয়ায় শকুন্তলা যোগ্যস্বামী প্রাপ্ত হইয়াছেন, এই নিমিত্ত আমার হৃদয় সুখী হইয়াছে, তথাপি ইহা চিন্তার বিষয়।

প্রিয়ংবদা। কি ?

অনসূয়া। ঋষিগণ যজ্ঞ-সমাপ্ত করিয়া অদ্য সেই রাজর্ষিকে বিদায় দিয়াছেন; তিনি অন্তঃপুরস্ত্রীবর্গের সহিত মিলিত হইয়া এ স্থানের বৃত্তান্ত স্মরণ করিবেন কি না।

প্রিয়ংবদা। বিশ্বস্ত হও। সেরূপ বিশিষ্টাকৃতি গুণবিরোধিনী হয় না। পিতা এই বৃত্তান্ত শুনিয়া জানি না কি করিবেন।

অনসূয়া। আমি যেরূপ দেখিতেছি, তাহাতে তাঁহার অনুমত হইবে।

প্রিয়ংবদা। কিরূপে ?

অনসূয়া। গুণবান্ পাত্রে কন্যা দান করিতে হইবে ইহা প্রধান সঙ্কল্প। যদি দৈব তাহা সম্পাদন করে তাহা হইলে বিনাক্লেশে গুরুজন সফলমনোরথ হইলেন।

প্রিয়ংবদা। [পুষ্পপাত্রের (সাজির) দিকে দৃষ্টিপাত করিয়া] সখি, পূজার উপযুক্ত পর্য্যাপ্ত কুসুমচয়ন হইয়াছে।

অনসূয়া। শকুন্তলার সৌভাগ্যদেবতাকে অর্চ্চনা করিতে হইবে।

প্রিয়ংবদা। উপযুক্ত বটে [সেই কার্য্য—পুষ্পচয়ন—আরম্ভ করিল]।

নেপথ্যে—কে আছ আমি উপস্থিত হইয়াছি।

অনসূয়া। [শুনিয়া] সখি, অতিথির বাক্যের ন্যায় শুনিতেছি।

প্রিয়ংবদা। শকুন্তলা ত পর্ণশালায় আছে। [আত্মগত] অদ্য কিন্তু তাহার হৃদয় এস্থানে নাই।

অনসূয়া। যাহা হউক, আর অধিক পুষ্পে প্রয়োজন নাই।

[দুইজনে প্রস্থান করিল]

নেপথ্যে—আঃ দুষ্টে, অতিথির অবমাননাকারিণি, তুমি অনন্যচিত্তে যাহার চিন্তায় নিমগ্ন হইয়া এস্থানে উপস্থিত তপস্বী আমাকে অবজ্ঞা করিলে সেই ব্যক্তি স্মরণ করাইয়া দিলেও, উন্মত্ত ব্যক্তি প্রথমে উচ্চারিত কথা যেমন মনে করিতে পারে না সেইরূপ তোমাকে স্মরণ করিবে না।

প্রিয়ংবদা। হা ধিক্ কি অনিষ্ট ঘটিল, কোন পূজার্হ ব্যক্তির নিকট শূন্যহৃদয়া শকুন্তলা অপরাধ করিল [পুনর্ব্বার বিলোকন করিয়া] যে সে কোন ব্যক্তি নয়। ইনি সুলভকোপ মহর্ষি দুর্ব্বাসা ; ঐরূপ শাপ দিয়া অতিবেগে উদ্ধতগতিতে প্রতিনিবৃত্ত হইতেছেন ; অগ্নি ভিন্ন অন্য কে দগ্ধ করিতে পারে ?

অনসূয়া। যাও তাঁহার চরণে পতিত হইয়া ফিরাইয়া আন, আমিও অর্ঘ্য, উদক ইত্যাদির আহরণ করি।

প্রিয়ংবদা। তাহাই করি। [নিষ্ক্রান্ত হইল]।

অনসূয়া। [এক পা গমন করিয়া পরে আঘাত লাগায় (উছট্ খাইয়া)] ওমা বেগে গমনহেতু চরণে আঘাত লাগায় আমার হস্ত হইতে পুষ্পপাত্র পতিত হইয়াছে। [পতিত ফুলগুলি তুলিতে আরম্ভ করিল]।

প্রিয়ংবদা। [প্রবেশ করিয়া] সখি, তিনি স্বভাবতঃ কুটিল, কাহার অনুনয় গ্রহণ করেন ? কিন্তু কিছু সদয় করিয়াছি।

অনসূয়া। [ঈষৎ হাস্যের সহিত] তাঁহার নিকট এই যথেষ্ট, বল।

প্রিয়ংবদা। যখন নিবৃত্ত হইতে ইচ্ছা করিলেন না তখন আমি নিবেদন করিলাম ; ভগবন, এই প্রথম অপরাধ বিবেচনা করিয়া, তপঃপ্রভাবের বিষয় অবগত নয় এরূপ কন্যাজনের এক অপরাধ আপনাকে ক্ষমা করিতে হইবে।

অনসূয়া। তার পর, তার পর।

প্রিয়ংবদা। তারপর "আমার বাক্য অন্যথা হইবে না, কিন্তু অভিজ্ঞানস্বরূপ কোন অলঙ্কার দেখাইলে শাপনিবৃত্তি হইবে" এইরূপ বলিয়া স্বয়ং অন্তর্হিত হইলেন।

অনসূয়া। এক্ষণে আশ্বস্ত হইতে পারা যায়। সেই রাজর্ষি যাইবার সময় এই আমার স্মরণচিহ্ন বলিয়া স্বনামাঙ্কিত অঙ্গুরীয় স্বয়ং পরাইয়া দিয়াছেন ; সেই অঙ্গুরীয় দ্বারা স্মৃতি উৎপাদনের উপায় শকুন্তলার স্বায়ত্ত হইবে।

প্রিয়ংবদা। সখি, এস দেবকার্য্য সম্পাদন করিগে [গমন করিতে লাগিল]।

প্রিয়ংবদা। [অবলোকন করিয়া] অনসূয়ে, দেখ বাম হস্তে কপোল বিন্যস্ত

করিয়া চিত্রার্পিতের ন্যায় প্রিয়সখী স্বামিচিন্তায় এত নিমগ্ন যে আপনার দিকে তাহার দৃষ্টি নাই ; অতিথির কথা ত দূরে ।

অনসূয়া। প্রিয়ংবদা, এই বৃত্তান্ত আমাদের দুই জনের মুখে থাক্, স্বভাবতঃ কোমলা প্রিয়সখী শকুন্তলাকে রক্ষা করিতে হইবে ।

প্রিয়ংবদা। কোন্ ব্যক্তি উষ্ণ উদকের দ্বারা নবমালিকাকে সিক্ত করে ?

উভয়ে [নিষ্ক্রান্ত] ।

PRELUDE TO ACT IV.

Enter the two Companions of Sakuntala in the act of plucking (gathering) flowers].

Anasuya.—Priyambada, though my heart is satisfied that Sakuntala has got a worthy husband, her marriage being performed according to the form known as *Gandharva* that (which obtains among the Gandharvas), yet this much is to be thought about.

Priyambada.—What ?

Anasuya.—The hermits having finished their sacrifice have dismissed today that saint of a king, who returning to the city and being in the company of the ladies of the harem may or may not remember all that has taken place here.

Priyambada.—Don't be anxious on that score ; (literally, have confidence.) Such noble forms are not without good qualities. But I do not know what father Kanwa will do when he hears this matter.

Anasuya—As it appears to me, (I am of opinion) that it will be approved by him.

Priyambada.—How so ?

Anasuya—That a daughter is to be given away in marriage to a person having noble qualities is the first thought (of parents). If it is accomplished by chance, parents got their heart's wish astisfied without any trouble to themselves.

Priyambada.—[*Looking at the flower-basket*]. Dear friend, we have gathered flowers enough for worshipping the gods.

Anasuya.—But we have to worship the deity presiding over the good fortune of Sakuntala.

Priyambada.—Quite proper. [*Both do the same act*].

Behind the Scenes.

Ho ! there ! I am here.

Anasuya.—[*Listening*]. This (sounds) like the announcing of a guest.

Priyambada.—Sakuntala is present in the cottage. [*Aside*]. But in mind she is not present to-day.

Anasuya—Well ! no need of more flowers. [*They go away*].

Behind the Scenes.

You slight a guest ? He, of whom you think deeply with undivided attention and do not know me standing here whose riches is penance, shall not, though reminded, remember you just as a mad man does not the word he uttered before.

Priyambada.—Alas ! Alas ! A calamity has taken place. Sakuntala, absent-minded as she is, has offended some one deserving of respect. [*Looking again*]. No ordinary man, he is the great sage Durbasa who is easily provoked . Having cursed her in the aforesaid manner, he goes back with hasty and haughty strides which none can turn back. What else than fire can have the potency of consuming ?

Anasuya.—Go and, falling at his feet, bring him back, while I will make ready water and other articles for his worship.

Priyambada.—I will (do what you say). [*Exit*]

Anasuya.—[*Walking a few steps and stumbling*]. Alas ! My flower-basket has fallen from my hand owing to my foot slipping on account of hurry. [*Gathers the fallen flowers*].

Priyambada.—[*Entering*]. Friend, to whose entreaties will he, crooked by nature, listen ? But he has been moved a little to compassion.

Anasuya.—[*Smiling*]. This little is much for him. Go on.

Priyambada.—When he refused to come back, I entreated him that seeing that this was first, he would be pleased to pardon this offence of Sakuntala who was but a daughter to him and was ignorant of the power of penance.

Anasuya—What next ?

Priyambada.—"My words will not be otherwise, but this curse

shall cease at the sight of some ornament of recognition," uttering these words he vanished.

Anasuya.—Now we can breathe freely, (console ourselves). That saint of a king, while he was about to depart, did himself fasten (on Sakuntala's finger) a ring with his name engraved on it, as a souvenir. In it she will have the means (of raking the king's memory up) in her power.

Priyambada. – Come, friend, let us do our duties to the gods, [*Both walk on*].

Priyambada.—[*Looking*]. See Anasuya, our dear friend Sakuntala resting her face on her left hand, and motionless as a picture, absorbed in the thought of her husband, pays no attention to herself, what to speak of a guest?

Anasuya.—Let this matter, Priyambada, do not pass our lips. Our dear friend, delicate by nature, must be spared (this affair).

Priyambada.—Who ever thinks of pouring hot water on the jasmine?

Both.—[*Exeunt*]. Prelude.

[ततः प्रविशति आदौ सुप्तः पश्चादुत्थितः पूर्व्वकालेत्यादिना समासः शिष्यः अन्तेवासी—शास्तेः क्यप्]।

शिष्यः। वेलायाः समयस्य उपलक्षणार्थं ज्ञानार्थं (अर्थेन सह नित्यसमासः विशेष्यलिङ्गता यद्वा वेलायाः उपलक्षणमेव अर्थः प्रयोजनं यस्मिन् कर्म्मणि तत् यथा तथा इति विग्रहः) कियदवशिष्टं रजन्याः इति परिज्ञातुमित्यर्थः, प्रवासात् सोमतीर्थादित्यर्थः उपावृत्तेन प्रत्यागतेन कण्वेन आज्ञप्तोऽस्मि। प्रकाशं कुटीरात् बहिरित्यर्थः निर्गतः सन् समयं निरूपयामि [परिक्रम्यावलोक्य च] हन्त इति हर्षे, अव्ययमिदम्, प्रभातमिति नपुंसके भावे क्तः।

तथाहि एकतः ओषधीनां पतिः अस्तशिखरं याति ; अरुणपुरःसरः अर्कः एकतः आविष्कृतः। तेजोद्वयस्य युगपत् व्यसनोदयाभ्यां लोक आत्मदशान्तरेषु नियम्यते इव ॥२॥

एकतः एकस्यां दिशि पश्चिमे दिग्विभागे ओषधीनां पतिः चन्द्रः अस्तस्य अस्ताचलस्य इति लाक्षणिकः अर्थः, शिखरं शृङ्गम् अस्ताचलचूड़ां याति अवलम्बते ; चन्द्रोऽस्तमयते इति सरलार्थः। एकतः अपरस्यां दिशि प्राचीभागे, पुरः अग्रे सरति इति पुरःसरः सरतेः टः ; अरुणः अनूरुः पुरःसरः अग्रगामी यस्य सः अरुणपुरःसरः

अर्कः सूर्यः आविष्कृतः आविर्भूतः उदितः इत्यर्थः। आविष्करोतेः कर्त्तरि क्तः अकर्म्मकत्वात्; अकर्म्मकत्वञ्च, धातोरर्थान्तरे वृत्तिवशादित्यनुसन्धेयम्। तथाच— "धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसिद्धेरविवचातः कर्म्मणोऽकर्म्मिका क्रिया।" यद्वा आविष्कृतः आविष्कर्त्तुं प्रकाशयितुं आत्मानमितिशेषः आरब्धः; इति आविष्करोतेः "आदिकर्म्मणि क्तः कर्त्तरि च" इति कर्त्तरि क्तः। एवं तेजसी इयम् इति तेजोद्वयम् तस्य तेजोभूयसोः पदार्थयोः युगपत् समं एकदैव व्यसनञ्च उदयञ्च ताभ्यां व्यसनोदयाभ्यां तिरोभावरूपेण व्यसनेन आविर्भावेणच लोकः अन्याः दशाः इति दशान्तराणि, मयूरव्यंसकादयश्चेति निपातनात् समासः, विभिन्नाः अवस्थाः इत्यर्थः आत्मनः दशान्तरेषु अवस्थान्तरेषु "दशा वर्त्ताववस्थायामित्यमरः" आपतितेषु सत्सु इति शेषः नियम्यते इव। विपत्सम्पद्रूपाः अवस्थाभेदाः नित्यं न तिष्ठन्ति इत्युपदेशदानेन स्वस्वावस्थासु नियन्त्र्यते इव। उत्प्रेचालङ्कारः।

Change of voice—पत्या अस्तशिखरं याग्यते।...पुरःसरेण अर्केण आविष्कृतेन भूयते आविष्कृतं वा। व्यसनोदयौ नियच्छतः लोकम्।

अपिच—सा एव कुमुदिनी शशिनी अन्तर्हिते संस्मरणीयशोभा मे दृष्टिं न नन्दयति; अवलाजनस्य इष्टप्रवासजनितानि दुःखानि नूनमतिमात्रसुदुःसहानि ॥ ३॥

शशिति समुपोढ़े या नेवनिर्व्वाणं वितरति सा एव कुमुदिनी शशिनि चन्द्रे अन्तर्हिते अस्तमिते सति संस्मरणीया स्मरणस्य विषयीभूता नतु प्रत्यचा विलुप्ता इति तात्पर्य्यम्, शोभा कान्तिः यस्याः सा संस्मरणीयशोभा विच्छाया सती मे मम दृष्टिं नयनं न नन्दयति न प्रीणयति; कुत एतदिति शङ्कायां हेतुमुत्प्रेचते—अवलेति —अवलाजनस्य इष्टः अभिमतः वल्लभः इति यावत् तस्य प्रवासेन विदेशगमनेन विरहेण इत्यर्थः जनितानि उत्पादितानि दुःखानि नूनं निश्चितमेव अतिमात्रं सुदुःसहानि अतिदुःखेनैव सोढ़ुं शक्यानि। दुष्यन्तविरहेण दीना शकुन्तला शोच्यतां गता इतिवस्तुध्वनिः।

अवलाजनस्य इति षष्ठी सम्बन्धे दुःखानि इत्यनेन सम्बन्धः। न खलर्थानामिति निषेधात् न कृद्योगलचणा कर्त्तरि षष्ठी। वृत्तं वसन्ततिलकं तल्लचणम्—ज्ञेयं वसन्ततिलकं तभजा जगौगः। अत्र श्लोके कार्य्येण कारणसमर्थनरूपः अर्थान्तरन्यास; सचोत्प्रेचया सङ्कीर्य्यते।

Change of voice.—तया कुमुदिन्या...शोभया दृष्टिः न नन्द्यते दुःखैः...सुदुःसहैः भूयते।

[তাহার পর নিদ্রোত্থিত শিষ্য প্রবেশ করিলেন]।

শিষ্য। প্রবাস হইতে প্রতিনিবৃত্ত ভগবান্ কণ্ব সময়নিরূপণ করিবার জন্ম আমাকে আদেশ করিয়াছেন। বাহিরে নির্গত হইয়া দেখি রাজনীর কত অবশিষ্ট

আছে। [দুই এক পদ গমন করিয়া এবং নিরীক্ষণ করিয়া] আঃ প্রভাত হইয়াছে। একদিকে ওষধিপতি চন্দ্র অস্তশিখরে গমন করিতেছেন, অন্যদিকে সূর্য্য অরুণকে অগ্রে করিয়া আবির্ভূত হইতেছেন। এইরূপে এক সময়ে তেজোময় পদার্থদ্বয়ের উদয়াস্তময়ের দ্বারা লোক স্ব স্ব অবস্থাভেদে নিয়ন্ত্রিত হইতেছে।

এবং,—শশী অস্তমিত হওয়াতে সেই কুমুদিনী বিলুপ্তশোভা হইয়া আমার নেত্র-প্রীতি উৎপাদন করিতেছে না। বল্লভজনের প্রবাসনিমিত্ত অবলাগণের দুঃখ নিশ্চয়ই অত্যন্ত দুঃসহ।

[*Enter a disciple arisen from sleep*].

Disciple.—The venerable Kanwa, descendant of Kasyapa, returning from his sojourn, has ordered me to ascertain the time. Going out into the open air, I shall see how much of night does still remain. [*Walking and looking about*]. Oh ! it is (already) day-break.

In one quarter (of the sky), the lord of the herbs, (the Moon), goes to the summit of the setting mountain while in another (viz. the eastern) the sun, with Aruna (literally, the red coloured) as his usher, rises. In this way by the rise and setting of the two luminaries at the same time, man is reconciled, as it were, to the vicissitudes of his own fortune.

And also—the moon having vanished, the same waterlily with its beauty (no more to be seen but) to be recalled before the mind, pleases my eyes no more. Surely do women's sorrows brought on by the absence of their lovers become endurable with great difficulty.

[पटाः यवनिकायाः चेपः इति पटीचेपः स न भवति इति अपटीचेपः तेन ; पटीचेपं विनैव इत्यर्थः पटीचेपो न कर्त्तव्यः आर्त्तराजप्रवेशने" इत्युक्तेः। अन्येतु व्याचक्षते अपठ्याः तिरस्करिण्याः यवनिकायाः इति यावत् चेपेण उत्तोलनेन प्रविश्य]

अनसूया। विषयेभ्यः इन्द्रियग्राह्येभ्यः वस्तुभ्यः पराङ्मुखः निवृत्तः तस्य ;— कामान् विहाय अरण्ये निवसतः अविज्ञातलोकाचारस्य इत्यर्थः। विदितमिति "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्त्तमाने क्तः "क्तस्य च वर्त्तमाने" इति "जनस्य" इत्यत्र कर्त्तरि षष्ठी। शकुन्तलां प्रति राज्ञः व्यवहारः सम्यक् नेति अविदित-लोकरीत्यापि मया ज्ञायते इत्यर्थः।

शिष्य। होमस्य प्रातरनुष्ठितस्य वेलां कालं कथाय निवेदयामि ; गुरुं ज्ञाप-यितुमिति क्रियार्थोपपदेत्यादिना चतुर्थी, कथनार्थधातुयोगे वा। [निष्क्रान्तः]।

अनसूया। प्रतिबुद्धा बुध धातोः कर्त्तरि क्तः जागरिता ; लुङि अबोधि, अबुद्ध ; नित्यकरणीयेषु प्रात्यहिकेषु व्यापारेषु। हस्तौ च पादौ च इति हस्तपादम् प्राण्यङ्गत्वात् द्वन्द्वे एकवद्भावः। असत्या मिथ्या सन्धा अभिप्रायः यस्य तस्मिन् असत्यसन्धे प्रवञ्चके। शुद्धं हृदयं यस्याः सा शुद्धहृदया, ऋजुत्वात सरलहृदया। अथवेति—फलमेतत् दुर्व्वासः शापस्य। तादृशानि मन्त्रयित्वा—शीघ्रमेव त्वामन्तःपुरं नेता जनस्तव समीपे उपस्थास्यते इति कथयित्वा। कालमिति अत्यन्तसंयोगे द्वितीया अस्मै इति क्रियया यमभिप्रैति इति चतुर्थी। तपस्विजने इति निर्द्धारे सप्तमी। सखीगामी इति सखीगामी इति द्वितीयातत्पुरुषः। अत्र विषये शकुन्तलायाः एव दोष इति तातकाश्यपाय निवेदयितुं न शक्नोमि। व्यवसिता कृतनिश्चया ; व्यवपूर्व्वात् स्यतेः अकर्म्मकात् कर्त्तरि क्तः स्त्रियां रूपम्।

[যবনিকা উত্তোলন না করিয়া অথবা যবনিকা উত্তোলনপূর্ব্বক প্রবেশ করিয়া]

অনসূয়া। যদিও বিষয়পরাঙ্মুখ ব্যক্তির ইহা বিদিত নহে ;—তথাপি সেই রাজা শকুন্তলার প্রতি অন্যায় ব্যবহার করিয়াছেন।

শিষ্য। হোমসময় উপস্থিত ইহা গুরুর নিকট নিবেদন করিগে। [নিষ্ক্রান্ত]

অনসূয়া। জাগিয়াই বা কি করিব। অভ্যস্ত নিত্যকর্ত্তব্য বিষয়ে আমার হস্ত পদ অগ্রসর হইতেছে না ; অসত্যসন্ধ নরপতিতে শকুন্তলাকে আসক্ত করাইয়া কন্দর্পের মনোরথসিদ্ধি হউক। অথবা দুর্ব্বাসার শাপ এইরূপ বিকার উপস্থিত করিয়াছে। নতুবা সেই রাজর্ষি সেইরূপ বলিয়া গিয়া এতদিন হইল একখানি পত্রিকা পর্য্যন্ত দিলেন না। তবে এই স্থান হইতে অভিজ্ঞান অঙ্গুরীয় পাঠাইয়া দিই। ব্রতানুষ্ঠানে দুঃখশীল তপস্বিগণের মধ্যে কাহাকেই বা প্রার্থনা করি। সখীর দোষ ইহা কৃতনিশ্চয় হইয়াও প্রবাস হইতে প্রতিনিবৃত্ত পিতা কণ্বকে বলিতে পারিতেছি না যে শকুন্তলা দুষ্যন্তকর্ত্তৃক পরিণীতা ও গর্ভবতী। ঈদৃশ অবস্থায় আমরা কি করিব ?

[*Entering by a toss of the screen or without raising the screen*]

Anasuya.—Though it is known to persons averse to worldly pursuits, yet (it can be said that) the king has behaved improperly towards Sakuntala.

Disciple.—I will inform my preceptor that it is now the time of offering burnt oblation.

Anasuya.—Though I am awake, yet what shall I do? My hands and feet do not move to do my daily usual occupations. Let love which has brought my dear friend of a guileless heart in contact with a perfidious man have its object accomplished. Or

it may be, that the curse of Durbasa brings about this perverse change. Otherwise how can it be that the king having promised in that way does not send even a letter after so long a time? Let me therefore send the ring of recognition. But whom among these hermits, devoted to the practice of austerities, shall I request? Though it has been concluded that Sakuntala had been in fault, yet I could not inform father Kanwa, returned from his sojourn, of Sakuntala being married to Dushyanta, and big with child. Under such circumstances what is to be done?

प्रविश्य—

प्रियंवदा। त्वरस्व इति हर्षे: द्विरुक्तिः प्रस्थानकौतुकं स्वामिगृहप्रस्थानमङ्गलम्। कौतुकं नर्मणीच्छायां उत्सवे कुतुके मुदि पारम्पर्य्यागतख्यातमङ्गलोद्वाहसूत्रयोः इति हैमः।

प्रियंवदा। सुखेन शयितं, यद्वा सुखं सुखकरं शयितं (शीधातोः नपुंसके भावे क्तः) इति सुखशयितं तत् पृच्छति या सा सुखशयितप्रच्छिका (प्रच्छधातोः ण्वुल् वा शकः स्त्रियां टाप्) सौखशायनिकी। सुखशयितपृच्छिका इति पाठे सुखशयितस्य पृच्छा यस्याः सा सुखशयितपृच्छिका: ; संज्ञायां कन्, कात् पूर्व्वस्येकारः।

प्रियंवदा। लज्जया अवनतं मुखं यस्या तां लज्जाविनम्राननाम् परिष्वज्य आलिङ्ग्य ; स्वनज् धातोः भौवादिकात् आत्मनेपदिनः ल्यप्। धूमेन आकुलिता कलुषा विषयग्रहणासमर्था इत्यर्थः दृष्टिः नयनं यस्य तस्य यजमानस्य आहुतिः देवोद्देशेन प्रक्षिप्तं घृतादिकं पावके वह्नौ एव नतु भूमौ पतिता। अन्तरायतिमिरे सत्यपि भाग्येनैव ईदृशः आत्मानुरूपस्य भर्त्तुः समाश्रयः। दृष्टान्तालङ्कारः। मेधाविने अनसूयकाय शिष्याय परिदत्ता विद्या इव न शोककारणमसि।

প্রিয়ংবদা। [প্রবেশ করিয়া আহ্লাদের সহিত] সখি শকুন্তলার স্বামিগৃহে গমনসময়ে মঙ্গল সম্পাদন করিবার জন্য শীঘ্র এস শীঘ্র এস।

অনসূয়া। সখি, ইহা কিরূপে হইল?

প্রিয়ংবদা। শুন, আমি এইমাত্র সুখে নিদ্রা হইয়াছিল কি না জিজ্ঞাসা করিবার জন্য শকুন্তলার নিকট গমন করিয়াছিলাম।

অনসূয়া। তারপর, তারপর।

প্রিয়ংবদা। (দেখিলাম) তাত কাশ্যপ লজ্জাবনতমুখী শকুন্তলাকে আলিঙ্গন করিয়া এইরূপে অভিনন্দন করিলেন—সৌভাগ্যক্রমে ধূমাকুলিতনয়ন যজমানের আহুতি বহ্নিতেই পতিত হইয়াছে; বৎসে সুশিষ্যে প্রদত্ত বিদ্যার ন্যায় তোমার অন্য দুঃখের কোন কারণ নাই। অদ্যই ঋষিগণ সমভিব্যাহারে তোমাকে স্বামিসকাশে প্রেরণ করিব।

Priyambada.—[*Entering—With joy*]. Quick, quick, friend, to do the ceremonies against Sakuntala's departure.

Anasuya.—How is it so, my dear ?

Priyambada—Listen, I went just now to Sakuntala to inquire if she had a peaceful sleep

Anasuya.—What next ? What next ?

Priyambada—Father Kanwa embracing her, while her face was bowed down by reason of bashfulness, congratulated her (on her choice) in these words :—"Luckily the offering of the sacrificing priest, though his eyes were troubled by smoke, has fallen into the fire. My child, like knowledge imparted to a good student, you are not to be pitied. This very day I will send you to your husband guarded (escorted) by certain hermits."

अनसूया। सूचित: निवेदित: ; काश्यपस्येति विवक्षया षष्ठी। अथेति प्रश्ने, मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ इत्यमर:।

प्रियंवदा। अग्नीनां शरणं गृहं इति अग्निशरणं अग्न्यागारम् शरणं गृहरक्षित्रोः। शरीरं विना अशरीरिण्या छन्दोमय्या छन्दोनिबद्धया वाण्या सूचित: इति शेष:।

प्रियंवदा। [संस्कृतमाश्रित्य संस्कृतभाषया नतु प्राकृतेन] हे: ब्रह्मन् दुष्यन्तेन आहितं तेज: भुव: भूतये दधानां तनयां अग्निगर्भां शमीमिव अवेहि ॥४॥

हे ब्रह्मन्, दुष्यन्तेन राज्ञा आहितं निषिक्तं तेज: वीर्य्यं भुव: पृथिव्या: भूतये मङ्गलाय, भूतिर्भस्मनि सम्पदि इत्यमर: दधानां धारयन्तीं तनयां कन्यां शकुन्तलां अग्नि: गर्भे यस्या: तां शमीमिव अवेहि। उपमया गर्भस्थशिशो: तेजस्वित्वं व्यज्यते। अलङ्कारेण वस्तुध्वनि:। आङ्पूर्व्वात् दधाते: कर्म्मणि क्त: क्लीवे आहितं। भूतये इति तादर्थ्ये चतुर्थी। अवपूर्व्वादिणो लोटि हौ अवेहि।

Change of voice.—दधाना तनया अग्निगर्भा शमीव अवेयताम्।

अनसूया। [प्रियंवदा आश्लिष्य परिरभ्य] शकुन्तला अद्यैव पतिगृहं प्राप्यते इति उत्कण्ठया दु:खेन, साधारणं मिश्रं उत्कण्ठासाधारणं दु:खसहितं परितोषं आह्लादं अनुभवामि।

प्रियंवदा। तपस्विनी वराकी निर्वृता भर्त्तृसमागमेन मुदिता हृष्टा इति यावत्।

অনসূয়া। এই বৃত্তান্ত তাত কাশ্যপকে কে বলিল ?

প্রিয়ম্বদা। তিনি অগ্নিগৃহে প্রবিষ্ট হইলে ছন্দোগ্রথিত অশরীর বাক্যে বলিয়াছে।

অনসূয়া। [আশ্চর্য্যের সহিত] বল।

প্রিয়ংবদা। [সংস্কৃতে বলিতে আরম্ভ করিল] ব্রহ্মন্, আপনার কন্যা দুষান্ত-নিষিক্ত তেজঃ পৃথিবীর মঙ্গলের জন্য ধারণ করিতেছে, তাহাকে অগ্নিগর্ভা শমীর ন্যায় জানিবেন।

অনসূয়া। [প্রিয়ংবদাকে আলিঙ্গন করিয়া] সখি, এ সংবাদ আমার অতিশয় প্রিয়; কিন্তু অদ্যই শকুন্তলাকে লইয়া যাইতেছে এই জন্য বিষাদের সহিত আহ্লাদ অনুভব করিতেছি।

প্রিয়ংবদা। সখি, আমরা কোনরূপ উৎকণ্ঠা দূর করিব। দীনা শকুন্তলা সুখী হউক।

Anasuya.—By whom was father Kanwa informed of the matter?

Priyambada.—By an incorporeal (heavenly) voice in verse, when he entered the sanctuary of fire.

Anasuya.—[*Wondering*] Tell (it).

Priyambada.—[*In Sanskrit*] Brahman, know that your daughter, like the Sami-plant containing fire within, holds for the good of the world the seed deposited by Dushyanta.

Anasuya.—[*Embracing Priyambada*]. This is very delightful to me. But I feel joy with sorrow, because she will be taken away this very day.

Priyambada.—Friend, we shall console ourselves ; let her poor self be happy.

अनसूया। चूतस्य: आम्रस्य शाखायां विटपे अवलम्बिते स्थापिते रचिते नारिकेलस्य समुद्गके, सम्पुटके पात्रे इति यावत् ; चूतशाखया अवलम्बिते, आम्रशाखासनाथे नारिकेलसम्पुटके इति केचित् व्याख्यायते, कालान्तरं चमते इति कालान्तरक्षमा, ईङ्चिचमिभ्यारुवेति घप्रत्ययः कालापगमेऽपि विनाशमनुपेयुषी केशरस्य वकुलस्य मालिका, वकुलपुष्पैः ग्रथिता माला मया एतन्निमित्तमेव, प्रस्थानमङ्गलं सम्पादयितुमेव मया निक्षिप्ता रचिता, तत् तां मालां हस्तेन धारय। अहमपि अस्यै, अस्याः शकुन्तलायाः कृते मृगरोचनां गोरोचनां (मृगः पशौ कुरङ्गे च इति विश्वः), तीर्थस्य पुण्यक्षेत्रस्य मृत्तिका तां दूर्व्वायाः किसलयानि अचिरोद्गतानि पत्राणि इत्येभिः मङ्गलार्थं समालम्भनानि विलेपनानि विरचयामि— "समालम्भनमालेपे तिलकेऽलङ्कृतावपि" इति यादवप्रकाशः। लभिर्ण्यन्तात् ल्युट् लम्भनम् लभेश्चेति नुम्।

नेपथ्ये—मिश्रशब्दो नाटकादौ सम्मानार्थं पात्रादेर्नाम्ना समस्य प्रयुज्यते।

प्रियंवदा। [कर्णं दत्वा] हस्तिनापुरं गजसाह्वयं दुष्यन्तनगरं गामिनः इति द्वितीयातत्पुरुषः। शब्दाय्यन्ते आह्वयन्ते। शब्दं करोति इति शब्दवैरकलहेत्यादिना क्यङ् ततः शब्दायनामधातोः कर्म्मणि लट्। आह्वानार्थकत्वात् सकर्म्मकत्वम्। अत्र कर्म्मभूतानां ऋषीणां धात्वर्थेनानुपसंग्रहात् न अकर्म्मकत्वम्।

प्रविश्य समालम्भनहस्ता समालम्भनसहितः हस्तः यस्याः सा इति विग्रहे मध्यपदलोपिना वहुव्रीहिणा सिद्धम्। यद्वा—गड्वादेः आकृतिगणत्वात् समालम्भनं हस्तेन यस्याः इति विग्रहे "गड्वादेः परा सप्तमी" इति वार्त्तिकेन सप्तम्यन्तस्य परनिपातः।

प्रियंवदा। सूर्य्योदये प्रातरेव शिखया सह मज्जिता शिरसोऽपि मज्जनमनुभाविता एषा, प्रतीष्टः गृहीतः नीवारः हस्तेन याभिः ताभिः आशीर्व्वादार्थं हस्तेन गृहीतधान्याभिः स्वस्ति इत्यस्य वाचनं इति स्वस्तिवाचनम्, कर्म्मारम्भे विघ्नोपशान्तये ब्राह्मणद्वारा कर्त्तव्यकर्म्मणां शुभतावाचनम् तस्मै स्थिताः इति स्वस्तिवाचनिकाः टन् प्रत्ययः स्त्रियां टाप्। ताभिः तापसीभिः सम्वर्द्ध्यमाना।

ण्यन्तात् मस्जेः क्तः मज्जित; मस्ज् लट्—मज्जति, लिट् ममज्ज, लृट् मङ्क्ष्यति, लुङ् अमाङ्क्षीत्; क्तः मग्नः।

অনসূয়া। অতএব চূতবৃক্ষের শাখায় অবলম্বিত এই নারিকেলপুটে (মালায়) বহুদিনেও নষ্ট না হয় এরূপ বকুলফুলের মালা যাহা আমি এই জন্য রাখিয়াছিলাম তাহা হস্তে লও। গোরোচনা, তীর্থমৃত্তিকা ও দূর্ব্বাকিসলয় প্রভৃতি দ্বারা ইহার জন্য মঙ্গলবিলেপন প্রস্তুত করি।

প্রিয়ংবদা। তাহাই কর।

অনসূয়া। [নিষ্ক্রান্ত হইলেন]।

প্রিয়ংবদা। [পুষ্পগ্রহণ অভিনয় করিলেন]।

নেপথ্যে—গৌতমি, শার্ঙ্গরব প্রভৃতি ঋষিগণকে শকুন্তলাকে লইয়া যাইবার জন্য আদেশ কর।

প্রিয়ংবদা। [শ্রবণ করিয়া] অনসূয়ে শীঘ্র এস, শীঘ্র এস, হস্তিনাপুরগামী ঋষিগণকে আহ্বান করিতেছেন।

অনসূয়া। [বিলেপনহস্তে প্রবেশ] সখি, এস যাই। গমন করিতে লাগিলেন।]

প্রিয়ংবদা। [অবলোকন করিয়া] প্রত্যূষেই স্নান করিয়া শকুন্তলা, ধান্যহস্তে স্বস্তিবাচনিক তাপসীগণের দ্বারা অভিনন্দিত হইতেছে; এস আমরা উহার নিকটে যাই [গমন করিলেন]।

Anasuya.—For this purpose, I kept a garland of Vakul flowers which endures the lapse of time without being decayed, in a cocoa-casket, suspended on a bough of that mango tree; take it in your

hands, while I will prepare an unguent for this auspicious occasion with the earth of holy places, the blades of the Durba-grass and the yellow pigment from the urine of cows.

Priyambada.—Let it be done.

Anasuya.—[*Exit*]

Priyambada.—[*Takes the flowers*].

Behind the scenes.—Gautami, bid Sarngaraba and others to escort Sakuntala.

Priyambada.—[*Listening.*] Quick, quick, Anasuya, the hermits that will go to Hastinapur are being called.

[*Entering with unguent in hand.*]

Anasuya.—Come, friends let us go. [*They walk away*].

Priyambada.—[*Looking.*] There sits Sakuntala, bathed to the crown of her head, being congratulated by the holy women of the hermitage with wild rice in their hands and invoking blessings upon her. Let us approach her. [*They approach*].

[निर्द्दिष्टमनतिक्रम्य इति यथानिर्द्दिष्टम् यथोक्तम् व्यापार: यस्या सा, आसने तिष्ठति इति आसनस्था, आसने उपविष्टा शकुन्तला प्रविशति ; शकुन्तला प्रति तापसीनाम् ।]

अन्यतमा । जाते सत्से ; वहुमान: आदर: तस्य सूचक: ज्ञापक: तम् । महादेवी, महिषी इति शब्द: आख्या तम् महादेवीशब्दम्—शाकपार्थिवादिवत् समास: ।

द्वितीया । वीरं प्रसूते इति वीरप्रसविनी (स्त्रियाम्), "जिदृक्षिविश्रीण्व-माव्यथाभ्यमपरिभूप्रसूभ्यश्च" इति इनि: (कृदन्त:) यद्वा प्रसव: पुत्र: अस्या: अस्ति इति प्रसविनी जनयित्री वीरस्य प्रसविनी, वीरप्रसु ; नतु वीर: प्रसव: सा अस्या: अस्ति इति मत्वर्थीय: इनि: "न कर्म्मधारयान्मत्वर्थीय: वहुव्रीहिश्चेदर्थप्रतिपत्तिकर:" इति निषेधात् ।

तृतीया । वहुमता, सत्कृता, आदरभाजनमित्यर्थ: । भर्त्तुरित्यत्र क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी [आशिष: दत्वा गौतमीवर्ज्जं निष्क्रान्ता] आशिष: आशीर्व्वचनानि, आङ्पूर्व्वात् शास्धातो: अदादिगणीयात् आत्मनेपदिन: क्विप् । गौतमीं वर्ज्जयित्वा इति गौतमीवर्ज्जं ; द्वितीयान्तोपपदात् वर्ज्जयते: णमुल् यद्वा गौतम्या वर्ज्ज: वर्ज्जनं यस्मिन् कर्म्मणि तत् यथा तथा इति वहुव्रीहि: ।]

N. B. The णमुल् or चणम् seems to be an improvement on the क्त्वाच् in many respects. What deserves special notice is the fact that this कृदन्त affix has increased the power of the language, rending it more pliable. The several cases of nouns can not be expressed in a compound form with the क्त्वाच् whereas almost all the cases can be so done with the णमुल् though with restrictions. Writers posterior to Panini, in spite of their deference to his aphorisms, have a tendency to widen the scope of this suffix—to which the above example bears a strong testimony.

सख्यौ। सुखं सुखकरं मज्जनं इति कर्म्मधारयः।

उभे। [मङ्गलपात्राणि आदाय उपविश्य] सज्जधातोः कर्त्तरि अच् स्त्रियां टापि सज्जा। सज्जधातुर्भौवादिकः परस्मैपदी ; अयमात्मनेपदीति केचित्।

शकुन्तला। सखीभ्यां मण्डनं प्रसाधनं अलङ्करणमिति यावत्। । [वाष्पं नेत्र-जलं वाष्पमुष्माश्रु इत्यमरः विहरति मुञ्चति रोदिति इत्यर्थः]।

उभे। अर्हार्थोपपदे रुदेः तुमुन्।

[अश्रूणि शकुन्तलायाः नयनजलानि प्रमृज्य विशोध्य नाट्येन प्रसाधयतः अलङ्कुरुतः]।

प्रियंवदा। आश्रमे तपोवने सुलभानि अनायासलभ्यानि यानि प्रसाधनानि पुष्पप्रवालादीनि अलङ्करणानि तैः इदं रत्नार्हं रूपं विकृतिं नीयते।

[उपायनं उपढौकनं हस्ते ययोः तौ व्यधिकरणो बहुव्रीहिः···यद्वा उपायन-सहितौ हस्तौ ययोः इति विग्रहः मध्यपदलोपश्च]।

प्रथमः। तातस्य काश्यपस्य प्रभावात् ; प्रभावः योगबलमित्यर्थः।

गौतमी। मनसः प्रसूता इति मानसी, सङ्कल्पजा। मनसः अण्।

द्वितीयः। शकुन्तलायाः हेतोः, षष्ठी हेतुप्रयोगे इति षष्ठी तया सह समासः। वनस्पतिभ्यः वृक्षेभ्य अपादाने पञ्चमी। "अपुष्पा फलवन्तो ये ते वनस्पतयः स्मृताः" इति वनस्पतिसंज्ञा नात्र आदृता, तथात्वे तु महान् विप्रतिषेधः "द्रुमात्रेऽपि वन-स्पतिः" इति यदुक्तं तदेवात्र आदृतम्। वनस्य पतयः इति वनस्पतयः पारस्करादि-त्वात् सुट्। आहरत अवचिनुत।

[তাহার পর যথোক্তব্যাপার, আসনে উপবিষ্ট শকুন্তলার প্রবেশ ; শকুন্তলার প্রতি তাপসীদিগের]।

একজন। বৎসে, স্বামীর আদরসূচক মহাদেবীশব্দ প্রাপ্ত হও।

দ্বিতীয়া। বৎসে, বীরপ্রসূ হও।

তৃতীয়া। বৎসে, স্বামীর আদর প্রাপ্ত হও।

[আশীর্ব্বাদ করিয়া গৌতমী ভিন্ন সকলের প্রস্থান]।

সখীদ্বয়। [সমীপে গমন করিয়া] সখি, তোমার স্নান সুখকর হউক।

শকুন্তলা। আমার সখীদ্বয়ের শুভাগমন হউক ; এই স্থানে উপবেশন কর।

উভয়ে। [মঙ্গলপাত্র লইয়া উপবেশন পূর্ব্বক] সখি, প্রস্তুত হও মঙ্গলবিলেপন করি

শকুন্তলা। ইহা আমার পক্ষে আদরের বিষয় : এখন হইতে সখীকর্ত্তৃক অলঙ্করণ আমার পক্ষে দুর্লভ হইবে। [অশ্রুবিসর্জ্জন করিতে লাগিলেন]।

উভয়ে। সখি, মঙ্গলসময়ে রোদন করা উচিত নহে। [অশ্রু মুছাইয়া দিয়া অলঙ্কৃত করিতে লাগিলেন]।

প্রিয়ংবদা। অলঙ্কারের উপযুক্ত এই রূপ আশ্রমসুলভ পুষ্পাদিদ্বারা বিকৃতি প্রাপ্ত হইতেছে।

[উপঢৌকন হস্তে প্রবেশ করিয়া]

ঋষিকুমারদ্বয়। এই অলঙ্কার লইয়া ইহাকে অলঙ্কৃত করিয়া দিউন।

সকলে। [নিরীক্ষণ করিয়া আশ্চর্য্যান্বিত হইলেন]।

গৌতমী। বৎস নারদ, ইহা কোথায় পাইলে ?

প্রথম। তাত কাশ্যপের প্রভাবে।

গৌতমী। ইহা কি (তাঁহার) ইচ্ছাপ্রসূত।

দ্বিতীয়। না, শুনুন ; তিনি আমাদিগকে আদেশ করিলেন শকুন্তলার নিমিত্ত বনস্পতি হইতে কুসুমচয়ন কর।

[*Then Enter Sakuntala seated on a seat in the manner described above*]. Of the holy women—

One —[*To Sakuntala*]. My child, may you receive the title of "Chief queen" indicative of the love and respect of (your) husband!

Second.—My child, may you give birth to a hero!

Third.—My child, may you be loved and honoured by your husband!

[*Exeunt all the women except* Gautami *after giving blessings*].

The two companions.—[*Approaching*]. Let this bathing be (source of) delight to you.

Sakuntala. —Welcome to my friends ; sit down here.

Both —[*Taking the vase containing the auspicious thing and sitting down.*] Dear friend, be ready, we will besmear your body with this auspicious unguent.

Sakuntala.— This even is to be highly valued. To be dressed and decorated by my friends will henceforth be a rarity to me. [*Sheds tears*]

Both.— On an auspicious occasion, dear friend, it is not proper to weep. [*Wiping away the tears, they decorate her.*]

Priyambada.—This body of yours, deserving of ornament, is rather disfigured by the decorations that are easily obtained in the hermitage.

[*Enter with presents in their hands*]

Two young hermits.— Here are ornaments. Let this respected lady be decorated (with these).

All. [*Looking at these are astonished.*]

Gautami. - Narada, my child, whence are these?

First. Due to the miraculous power of father Kanwa.

Gautami.—Creation of his mind?

Second.—No indeed! listen, please. We were ordered by the venerable saint (to this effect).—"Collect flowers for Sakuntala from the forest-trees."

तत इदानीं—केनचित् तरुणा इन्दुपाण्डु माङ्गल्यं क्षौमं आविष्कृतं केनचित् चरणोपरागसुभगः लाक्षारसः निष्ठ्यूत, अन्येभ्यः आपर्वभागोत्थितैः तत्किसलयोद्भेदप्रतिद्वन्द्विभिः वनदेवताकरतलैः आभरणानि दत्तानि ॥५॥

केनचित् तरुणा वृक्षेण इन्दुपाण्डु इति इन्दुरिव पाण्डु उपमानानि सामान्यवचनैः इति समासः, चन्द्रधवलम् माङ्गल्यम्, मङ्गलकर्मणि हितं (मङ्गलशब्दात् ष्यञ्—ण्य) क्षुमायाः अतस्याः विकारः इति क्षौमं अतसीजातं पट्टकूलं आविष्कृतं प्रकटितम्, कस्माच्चित् तरोरिदं दुकूलं लब्धम्। केनचित् तरुणा चरणयोः उपरागः रञ्जनमित्यर्थः। तत्र सुभगः सुन्दरः योग्यः इत्यर्थः लाक्षारसः यावकरसः निष्ठ्यूत उद्गीर्णः प्रसुतः इति यावत; वाच्यार्थस्य गुणीभूतत्वान्न ग्राम्यदोषापत्तिः। यथाह दण्डी —निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते इति। अन्येभ्यः वृक्षेभ्यः (अपादाने पञ्चमी) आ पर्वभागेभ्यः इति आपर्वभागं आङ्मर्यादाभिविध्योः इति अव्ययीभावः आपर्वभागं उत्थितानि इति आपर्वभागोत्थितानि, "सह सुपा" इति समासः तैः मणिबन्धं यावत् निर्गतैः तेषां वृक्षाणां किसलयानां पल्लवानां उद्भेदाः उद्गतानि किसलयानि इत्यर्थः (कृदभिहितभावो द्रव्यवत् प्रकाशते) तेषां प्रतिद्वन्द्विभिः तुल्यैः आताम्रत्वात्

सौकुमार्य्याच्च किसलयसदृशैः वनदेवतानां करतलैः कर्त्तृभिः आभरणानि दत्तानि। शार्दूलविक्रीड़ितं वृत्तम्। प्रथमचरणे चतुर्थे च उपमालङ्कारः।

Change of voice.—कश्चित् तरुः...आविष्कृतवान्। कश्चित्...सुभगं लाक्षारसं निष्ठ्यूतवान्...भागोत्थितानि...प्रतिद्वन्द्वीनि...करतलानि...दत्तवन्ति।

ष्ठिवु निरसने इति धातोः कर्म्मणि क्तः निष्ठ्यूतः ; लट् ष्ठीवति, ष्ठीव्यति ; लिट् टिष्ठेव ; लुङ् अष्ठेवीत् ; सन् टुष्ठ्यूषति।

प्रियंवदा। [शकुन्तलां विलोक्य] अभ्युपपत्त्या: गौरवेण, वनस्पतिसेवया इत्यर्थः।

शकुन्तला। व्रीड़ां लज्जां रूपयति अनुभवति इत्यर्थः।]

प्रथमः। अभिषेकात् स्नानात् उत्तीर्णः उद्गतः तस्मै अभिषेकोत्तीर्णाय, कृतस्नानाय इत्यर्थः। वनस्पतीनां सेवा आभरणादिदानेन परिचरणम्।

তাহার পর, কোন তরু, চন্দ্রধবল, মাঙ্গল্য, এই ক্ষৌমবস্ত্র প্রদান করিল। কোন তরু হইতে চরণরঞ্জনযোগ্য এই অলক্তকরস নিঃসৃত হইল ; এবং অন্য কতিপয় তরু-হইতে মণিবন্ধভাগ পর্য্যন্ত নির্গত, কিসলয়োদ্গম, বনদেবতাকরতল কর্ত্তৃক এই আভরণ প্রদত্ত হইল।

প্রিয়ংবদা। [শকুন্তলারদিকে দৃষ্টিপাত করিয়া] সখি, এই গৌরবদ্বারা নিবেদিত হইতেছে, যে তুমি স্বামিগৃহে রাজলক্ষ্মী উপভোগ করিবে।

শকুন্তলা। [লজ্জিত হইলেন]।

প্রথম। গৌতম, এস, স্নানোত্তীর্ণ কাশ্যপকে এই বৃক্ষগুলির সেবার বিষয় নিবেদন করিগে।

দ্বিতীয়। আচ্ছা [নিষ্ক্রান্ত]।

Then :—By a certain tree this moon-white, auspicious, silken cloth was put forth ; by another this fluid of lac fit for dyeing the feet with was exuded : while these ornaments were given by the hands of Dryads, coming out to the wrist from some other trees, and rivalling (in beauty) their sprouting shoots.

Priyambada.—[*Looks at Sakuntala*]. Dear friend, by this honour it is signified that royal fortune is to be enjoyed by you in your husband's house.

Sakuntala.—[*Looks ashamed ; literally, feels bashfulness.*]

First.—Come, Gautama, come ; we will inform Kasyapa, who has finished his ablutions, of the service done by the forest-trees

Second.—*Yes.* [*Both exeunt*].

सख्यौ। अनुपभुक्तं न परिहितं भूषणं येन सः ; कतमत् भूषणं कतमस्मिन्नङ्गे भ्रियते तन्न वेद्मि इति तात्पर्य्यम्। किन्तु चित्रकर्म्मणः आलेख्यस्य परिचयः

संस्तव: दर्शनमित्यर्थ: तेन, चित्रे यस्मिन्नङ्गे यादृशमाभरणं दृश्यते तादृक् तवापि अङ्गे विनियुज्यते इत्यर्थ:।

शकुन्तला। निपुणयो: भाव: इति अण्। नैपुणं प्रावीण्यम्।

उभे। [नाट्येन अलंकुरुत: प्रसाधनमभिनयत: इत्यर्थ:]।

[तत: इति स्पष्टम्]

काश्यप:। अद्य शकुन्तला यास्यति इति उत्कण्ठया हृदयं संस्पृष्टम् ; कण्ठ: स्तम्भितवाष्पवृत्तिकलुष:, दर्शनं चिन्ताजडं अहो अरण्यौकस: मम तावत् स्नेहात् वैक्लव्यं यदि ईदृशम् ; गृहिण: नवै: तनयाविश्लेषदु:खै: कथं न पीड्यन्ते ॥ ६ ॥

अद्य शकुन्तला यास्यति पतिकुलं गमिष्यति इति हेतो: उत्कण्ठया वैमनस्येन दु:खेनेति यावत् हृदयं संस्पृष्टम् भिन्नं अभिभूतमिति तात्पर्य्यम् ; शकुन्तला गमिष्यति इति चिन्तया मे हृदयं व्यथितमित्यर्थ:। कण्ठ: स्तम्भितया स्तन्तात् स्तन्भ् धातो: कर्म्मणि क्त: स्त्रियां स्तम्भिता अवरुद्धया वाष्पाणां अश्रूणां वृत्त्या प्रसरेण कलुष: अविशद: जड़ इति यावत्, रुद्धस्वर इत्यर्थ: ; निरुद्धवाष्पोदयसन्नकण्ठ: सञ्जातोऽहम्। दर्शनं-चिन्तया जड़ं विषयग्रहणापटु। चिन्तावशात् नयनयो: नान्यत्र संवृतम्। अहो इत्याश्चर्य्ये अव्ययम्। अरण्यं ओक: वासस्थानं यस्य स: अरण्यौका: तस्य (ओक: सद्मनि आश्रये corresponding to the Greek root *oikos*, a house.) अरण्यौकस: वनवासिन: ममत्वाभिमानशून्यस्य इत्यर्थ: मम स्नेहात् शकुन्तलावात्सल्यात् वैक्लव्यं, वियोगवैधुर्य्यं यदि ईदृशं एवंविधं अतिशयितं भवति ; तर्हि न जाने गृहिण: संसारिण: ममत्वाक्रष्टचेतना: इत्यर्थ: नवै: प्रत्यग्रै: तनयाया: विश्लेषेण दु:खै: कन्यावियोगदु:खै: कथं कीदृक् पीड्यन्ते। तेषां वियोगव्यथा नितरां मर्म्मस्पर्शीतिभाव: ; शार्दूलविक्रीड़ितं वृत्तम्।

[परिक्रामति]

Change of voice.—शकुन्तलया यास्यते...हृदयेन संस्पृष्टेन भूयते...नवानि दु:खानि...पीड़यन्ति।

N. B. This is the first time that Kanwa appears on the stage. The very first words which he utters reveal his nature. He is not a stern anchorite devoid of all sympathies ; but the recesses of his heart are full of affection and soft feelings.

সখীদ্বয়। আমরা ভূষণের ব্যবহার জানি না, চিত্রে যেরূপ দেখিতেছি তোমার অঙ্গে সেইরূপ অলঙ্কার পরাইয়া দিতেছি।

শকুন্তলা। আমি তোমাদের নৈপুণ্য জানি।

উভয়ে। [অলঙ্কার পরাইয়া দেওয়ার অভিনয় করিতে লাগিলেন]।

[তাহার পর স্নানোত্তীর্ণ কাশ্যপের প্রবেশ]

কাশ্যপ। শকুন্তলা অদ্য যাইবে এই নিমিত্ত আমার হৃদয় উৎকণ্ঠাকুল হইয়াছে; বাষ্পবেগ নিরুদ্ধ হওয়ায় কণ্ঠের স্বর জড়তাপ্রাপ্ত; নয়ন চিন্তাকুল হইয়া মন্থরতা প্রাপ্ত হইয়াছে। আমি অরণ্যবাসী, স্নেহহেতু যদি আমার এইরূপ কাতরতা হয়; তাহা হইলে গৃহস্থগণ অভিনব তনয়াবিয়োগদুঃখে কিরূপ পীড়িত হন ! [গমন করিতে লাগিলেন]।

The two companions.—This person (ourselves) is unused to ornaments. We will put the ornaments on your limbs accordingly as we have seen them in pictures

Sakuntala.—I know your skill.

Both.—[*Act the part of dressing.*]

[*Then enter* Kasyapa, *having finished his ablutions.*]

Kasyapa.—My heart has been touched with anxiety (grief) because Sakuntala will go away today; the throat is choked because of the repressing of the flow of tears; and the eye is dull and dim with anxious thoughts. If such is the grief, through affection, of me who am but a recluse living in a forest, how (greatly) indeed must householders be afflicted by the anguish of first parting from their daughters ! [*Walks away.*]

सख्यौ। अवसितं समाप्तिं गतं मण्डनं प्रसाधनं यस्याः सा। चौमयोः युगलं उत्तरीयकं अन्तरीयकञ्च

गौतमी। आनन्देन परिवहति स्रवति इति आनन्दपरिवाहि तेन, आनन्दाश्रु विमुञ्चता चक्षुषा नयनेन परिष्वजमानः आलिङ्गन्निव। आनन्दाश्रुपूर्णेन नयनेन स्निग्धं वीक्षमाणः इत्यर्थः। आचारं शिष्टैः परिगृहीतं अभिवादनादिकं प्रतिपद्यस्व गृहाण, अनुतिष्ठ इति यावत्।

शकुन्तला। [व्रीड़या लज्जया सह वर्त्तमानं इति सव्रीड़म्] तात वन्दे।

काश्यपः। वत्से शर्म्मिष्ठा ययातेः इव भर्त्तुः बहुमता भव। सा पूरुमिव त्वमपि सम्राजं सुतं अवाप्नुहि ॥७॥

शर्म्मिष्ठा ययातेः चन्द्रवंशीयनरपतिभेदस्य नहुषस्य इव त्वं भर्त्तुः बहुमता आदृता भव ; सा शर्म्मिष्ठा पूरुमिव त्वमपि सम्राजं सार्व्वभौमं पुत्रं आप्नुहि लभस्व। येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञः स सम्राट् परिकीर्त्तितः। सम्यक् राजते शोभते इति सम्राट् सम्पूर्व्वात् राजते क्विप्। भर्त्तुरित्यत्र कर्त्तरि षष्ठी क्तस्य च वर्त्तमाने इति।

Change of voice.—शर्म्मिष्ठया इव बहुमतया भूयताम् तथा पुरुरिव त्वया सम्राट् सुतः अवाप्यताम् ॥७॥

चन्द्रवंशीयस्य नरपतेर्ययातेर्द्वे पत्न्यौ बभूवतुः। तयोरन्यतरा दैत्यगुरुशुक्राचार्य्य-कन्या देवयानी नाम बहुमानगर्व्विता प्रथमं परिणीता। शर्म्मिष्ठेत्युदाहृता अपरा दैत्याधिपवृषपर्व्वकन्या. देवयान्याः सहचरीभावेनागता ययातिना गूढमूढा भर्त्तुरादर-भाजनमासीत्। अथ कालक्रमेण गूढोद्वाहपरिज्ञानेन रोषकषायितलोचना देवयानी ययातिं विहाय पितुः समीपमुपगम्य सर्व्वमाचख्यौ। श्रुत्वैतदनार्य्यमाचरितं कष्टे-नासुरगुरुणा शप्तस्य ययातेस्तारुण्ये एव जरसा भङ्गोऽभवत्। पश्चादनुनयेन मृदुतां गतस्य शुक्रस्यानुमतेन ययातिर्यदुप्रभृतीन् स्वपुत्रान् जराग्रहणार्थं याचमानः पूरु-मन्तरेण सर्व्वैरेव प्रत्याख्यातः। शर्म्मिष्ठागर्भसम्भूतः पूरुर्वर्षसहस्रं व्याप्य पितुर्जरां स्वस्मिन् संक्रमय्य धृतवान्। ततः पूर्णे वर्षसहस्रे तु जरानिर्मुक्तः कनीयानपि राज्यभागभूदिति पुराणवार्त्ता।

गौतमी। भगवान् वरः खलु एष न आशीः। दैवात् प्राप्त वरः अवश्यम्भावि-फलः; इष्टाभिप्रायाविष्करणं आशीरनियतफला। आङ् + शास + क्विप् = आशीः।

काश्यप। सद्यः सपदि तत्क्षणम्; समाने अहनि इति वाक्ये सद्यः इत्यव्ययं निपातनात् सिद्धम्। दक्षिणां प्रगता इति प्रदक्षिणाः "कुगतिप्रादयः" इति समासः; अप्रदक्षिणान् प्रदक्षिणान् कुरुष्व इति प्रदक्षिणीकुरुष्व इति च्विः। दक्षिणां प्रगताः इति विग्रहे "तिष्ठद्गुप्रभृतीनि च" इति सूत्रेण अव्ययीभावे पुनरव्ययप्रत्ययेन समासा-न्तरं न भवति यथाह काशिका 'चकारोऽवधारणार्थः। अपरः समासो न भवति परमतिष्ठद्गुरिति"। दक्षिणाग्निगार्हपत्याहवनीयाख्याः त्रयः अग्नयः अतएव बहुवचनम्।

সখীদ্বয়। তোমার প্রসাধন শেষ হইয়াছে, সম্প্রতি পট্টবস্ত্রযুগল পরিধান কর

শকুন্তলা। [শকুন্তলা উঠিয়া পরিধান করিলেন]।

গৌতমী। বৎসে, তোমার পিতা আনন্দাশ্রুপূর্ণ চক্ষু দ্বারা তোমাকে যেন আলিঙ্গন করিয়া এই উপস্থিত হইতেছেন, তুমি আচার পরিগ্রহণ কর।

শকুন্তলা। [সলজ্জভাবে] পিতঃ, বন্দনা করি।

কাশ্যপ। বৎসে, শর্ম্মিষ্ঠা যযাতির যেরূপ আদরভাজন হইয়াছিলেন; তুমিও সেইরূপ পতির বহুমত হও। এবং শর্ম্মিষ্ঠা যেমন পুরুনামক সম্রাট্‌পুত্র প্রাপ্ত হইয়াছিলেন তুমিও সেইরূপ সার্ব্বভৌম পুত্র লাভ কর।

গৌতমী। ভগবন্, এ বর, আশীর্ব্বাদ নহে।

কাশ্যপ। বৎসে, এস্থান হইতে (গমনকরিয়া) এইমাত্র পূজিত বহ্নির প্রদক্ষিণ কর।

সকলে। [গমন করিতে লাগিলেন]।

The two companions.—Friend, the decoration (of you) is over. Now put on these two pieces of silken cloths.

Sakuntala.—[*Rises up and puts them on*].

Gautami.—Here comes, my child, your father embracing you, as it were, with his eyes overflowing with tears of joy. Do the usual formality (obeisance &c.)

Sakuntala.—[*Abashed*]. Father I bow to you.

Kasyapa.—My child, may you be loved and honoured by your husband, as Sarmistha was by Yayati. And as Sarmistha got Puru, so may you too get a son who will lord it over the whole world.

Gautami. – Holy sage, this is a boon and no blessing.

Kasyapa.—My child, come this way and walk round the just worshipped fires, having them to your right side.

All. – [*Walk on*].

काश्यप:। ऋक्छन्दसा आशास्ते—वैदिकछन्दोग्रथितेन वचनेन आशिषं दत्ते शासिरयं अदादिगणीय: आत्मनेपदी प्रायेणाङ्पूर्व्व: प्रयुज्यते ।

वेदिं परित क्लृप्तधिष्ण्या: समिद्वन्त: प्रान्तसंस्तीर्णदर्भा: हव्यगन्धै: दुरितं अपघ्नन्त: अमी वैताना: वह्नय: त्वां पावयन्तु ॥ ८॥

वेदि: परिष्कृता भूमि: तां परित: अभित: "परित:समयानिकषाहाप्रतियोगेऽपि" इति द्वितीया । यजनवेद्या: समन्तात इत्यर्थ: क्लृप्तं रचितं धिष्ण्यं स्थानं येषां ते (धृष्धातो: ण्यप्रत्ययेन निपातितं धिष्ण्यमिति पदम्) क्लृप्तधिष्ण्या: विरचितस्थाना: समिध: काष्ठानि विद्यन्ते येषां तथोक्ता: प्रान्तेषु सीमासु संस्तीर्णा: आकीर्णा: दर्भा: कुशा: येषां ते प्रान्तसंस्तीर्णदर्भा:, हूयते यत् तत् हव्यं घृतादिकं तस्य गन्धै: दुरितं पापं किल्बिषमिति यावत् अपघ्नन्त: विदूरयन्त: पुनाना: पवनीकृतै: धूमैराहुतिगन्धिभि: इत्यर्थ: अमी वितानस्य यज्ञस्य क्रतुविस्तारयोरस्त्रीवितानमित्यमर: इमे इति वैताना: (वितानशब्दात् अण्) यज्ञसम्बन्धिन: वह्नय: दक्षिणाग्निप्रभृतय: त्वां पावयन्तु अपगतकल्मषां कुर्वन्तु । पुनाते: स्वार्थे णिच् ।

Change of voice—धिष्ण्यै: समिद्वद्भि:...दर्भै: अपघ्नद्भि: अमीभि: वैतानै: वह्निभि: त्वं पाव्यस्व ।

पू लट्—पुनाति, पुनीते ; लिट् पुपाव, पुपुवे ; लुङ्, अपावीत्, अपविष्ट ; क्त: पूत:, पवित:, नाशे तु पुन: ।

प्रतिष्ठस्व—समवप्रविभ्य: स्थ: इति आत्मनेपदम् ।

काश्यपः। सन्निहिताः समीपवर्त्तिनः तपोवनस्य आश्रमस्य तरवः वृक्षाः सम्बोधने (वहुवचनम्)।

युष्मासु अपीतेषु या प्रथमं जलं पातुं न व्यवस्यति, प्रियमण्डनापि या स्नेहेन भवतां पल्लवं नादत्ते, आद्ये वः कुसुमप्रसूतिसमये यस्याः उत्सवः भवति सेयं शकुन्तला पतिगृहं याति सर्वैः अनुज्ञायताम् ॥८॥

युष्मासु अपीतेषु, अपीतजलेषु, असिक्तेषु इत्यर्थः या प्रथमं प्रागेव जलं पातुं न व्यवस्यति नोत्सहते, युष्मासु भ्रातृवात्सल्यात् प्राग युष्मान् जलसेकेन सन्तर्प्य पश्चात् स्वयं जलं पिवति इत्यर्थः प्रियं मण्डनं यस्याः सा प्रियमण्डना, पत्ते मण्डनप्रिया, भूषणप्रियापि स्नेहेन हेतुना भवतसु सौदर्य्यस्नेहवशात् भवतां पल्लवं किसलयं नादत्ते न गृह्णाति न छिनत्ति इत्यर्थः कर्णपूरार्थमिति भावः ; आद्ये भवे इति आद्ये वो युष्माकं कुसुमानां पुष्पाणां प्रसूतेः उद्गमस्य समये काले यस्या उत्सव महान् प्रमोदः भवति, या नितरां मुदिता भवति इत्यर्थः सेयं शकुन्तला पत्युः स्वामिनः गृहं याति, सर्वैः भवद्भिः अनुज्ञायताम्, अनुमन्यताम्।

Change of voice.—यया व्यवसीयते...मण्डनया...नादीयते, उत्सवेन भूयते तया अनया...यायते सर्व्वे अनुजानन्तु।

अपीतेषु इत्यत्र विवचया अकर्म्मकात् पिवतेः कर्त्तरि क्तः यद्वा पिवतेः नपुंसके भावे क्तः पीतं पानं तत् एषामस्ति इति पीताः "अर्शआदिभ्योऽजिति" अच्।

यद्वा विभक्ताः भ्रातरः, भुक्ताः ब्राह्मणाः इतिवत् उत्तरपदलोपोऽत्र द्रष्टव्यः ; पीताः पीतजला इत्यर्थः यथाह कैयटः गम्यमानस्य अप्रयोगः एव लोपः।

"आङोदोऽनास्यविहरणे" इति आदत्ते इत्यत्र आत्मनेपदम्। "वा प्रियस्य" इति वहुव्रीहौ प्रियमण्डनेत्यत्र पाक्षिकः परनिपाताभावः।

কাশ্যপ। [বৈদিকচ্ছন্দে আশীর্ব্বাদ করিলেন]

যজনবেদির চতুর্দ্দিকে যাঁহাদের স্থান কল্পিত হইয়াছে, যাঁহাদের প্রান্তভাগে কুশ বিকীর্ণ রহিয়াছে, হুতঘৃতাদির গন্ধে যাঁহারা পাপ নাশ করিতেছেন, সমিদ্যুক্ত সেই এই যজ্ঞীয় বহ্নিগণ তোমাকে পবিত্র করুন।

এক্ষণে গমন কর [দৃষ্টিপাত করিয়া] শার্ঙ্গরব প্রভৃতি কোথায়?

শিষ্য। [প্রবেশ করিয়া] ভগবন, এই আমারা উপস্থিত।

কাশ্যপ। তোমাদের ভগিনীকে পথ দেখাইয়া চল।

শার্ঙ্গরব। এদিকে আসুন।

সকলে। [গমন করিতে লাগিলেন]।

কাশ্যপ। হে সমীপবর্ত্তি তপোবনতরুগণ!

তোমাদিগকে সিক্ত না করিয়া যে অগ্রে জলপান করিবার উদ্যম করিত না, ভূষণপ্রিয় হইয়াও যে স্নেহবশতঃ তোমাদের পল্লবচ্ছেদ করিত না ; তোমাদের প্রথম

পুষ্পোদ্গমসময়ে যাহার উৎসব হইত, সেই এই শকুন্তলা পতিগৃহে যাইতেছে; সকলে অনুমতি কর।

Kasyapa —[*Blesses in a Vedic metre*].

May yonder sacrificial flames, seats for which have been prepared all around the altar, on the skirts of which lie strewn the Kusagrass; and which purge away sin by the odour of oblations, may those flames nourished by fuel purify you.

Now set out. [*Looking about*]. Where are they—Sarangarava, and others?

Pupil.—[*Entering*]. Holy sage, here we are.

Kasyapa —Show the way to your sister

Sarangarava.—Come you, this way.

All —[*Walk away*].

Kasyapa - O ye trees that stand by!

Sakuntala, who never seeks to drink water first when you have not been watered, who, though fond of ornaments, does never, by reason of her affection for you, pluck your new shoots, and whose highest pleasure is at the time of the first opening of your buds, —the same Sakuntala is going to her husband's. Let her be permitted by you all.

[कोकिलानां रवं सूचयित्वा परभृतविरुतश्रुतिं नाटयन्] वनवासबन्धुभिः तरुभिः इयं शकुन्तला अनुमतगमना, यथा एभि ईदृशम् कलं परभृतविरुतं प्रतिवचनीकृतम ॥१०॥

वनवासस्य यद्वा वनवासे वनवासकाले इत्यर्थः बन्धवः तैः वनवाससहचरैः तरुभिः इयं शकुन्तला अनुमतं अनुज्ञा दत्तं गमनं यस्याः तथोक्ता; यथा यतः एभिः तरुभिः ईदृशं कलं अव्यक्तमधुरं, परैः काकादिभिः भृतः शैशवे पालितः तस्य परभृतस्य कोकिलस्य विरुतं शब्दः अप्रतिवचनं प्रतिवचनं कृतं इति प्रतिवचनीकृतम् मदुक्तस्य प्रत्युत्तरीकृतम् ·

वने वासः इति वनवासः "शयवासवासिष्व अकालात्" इति सप्तम्याः अलुगभावः बाहुलकात् वा चकः। इदम् इव दृश्यते यत् तत् ईदृशम्; इदम्पूर्व्वात दृशेः कञ्; इदमः ईः क्विन्प्रत्यये ईदृक् षकप्रत्यये ईदृक्षम।

आकाशे—अस्याः पन्थाः कमलिनीहरितैः सरोभिः रम्यान्तरः छायाद्रुमैः नियमितार्कमयूखतापः, कुशेशयरजोमृदुरेणुः शान्तानुकूलपवनः शिवश्च भूयात् ॥११॥

अस्याः सकुन्तलायाः पन्थाः मार्गः कमलिनीभिः पद्मिनीभिः हरितानि पालाशानि

तैः तादृशैः सरोभिः कासारैः रम्यं मनोरमं अन्तरं अवकाशः मध्यमिति यावत् यस्य तादृशः, पथि अन्तरा अन्तरा पद्मिनीपत्त्रमण्डितानि सरांसि भूयासुः इत्यर्थः। छाया-प्रधानाः द्रुमाः इति छायाद्रुमाः शाकपार्थिवादिवत् समासः तैः नियमितः दूरीकृतः प्रशमितः इति यावत् अर्कस्य सूर्यस्य मयूखानां किरणानां तापः उत्तापः यस्मिन् सः तादृशः ; कुशे जले शेरते इति कुशेशयानि पद्मानि (अधिकरणे शेते इति अच्) "शयवासवासिष्वकालात्" इति सप्तम्याः अलुक्, तेषां रजांसि परागाः तानि इव मृदवः कोमलाः रेणवः पांशवः यत्र सः कुशेशयरजोमृदुरेणुः, शान्तः मृदुरित्यर्थः अनुकूलः अनुलोमश्च पवनः यस्मिन् सः तादृशः शिवः मङ्गलः निर्बाधः इति यावत् भूयात् आशिषि लिङ्।

सरोभिरिति करणे तृतीया ; णयन्तात् निपूर्व्वात् यमेः कर्म्मणि क्तः नियमितः। कुशेशयानां रजोभिः मृदवः रेणवः यत्र सः इति व्याख्यानं क्वचित् दृश्यते तन्नादृत-मतिप्रकृतत्वात्।

Change of voice.—रम्यान्तरेण...तापेन...रेणुना...पवनेन पथा भविषीष्ट (भाविषीष्ट वा)।

गौतमी। ज्ञातिजनः बन्धुवर्गः स इव स्निग्धाः स्नेहपूर्णाः ताभिः उपमानानि सामान्यवचनैरिति समासः अनुज्ञातं अनुमोदितं गमनं यस्याः सा।

शकुन्तला। [सप्रणामम् परिक्रम्य जनान्तिकम्] आर्य्यपुत्रस्य स्वामिनः दर्शने दर्शनेन वा उत्सुका तस्याः। दुःखेन इत्यत्र प्रकृत्यादिभ्यश्चेत्युपसंख्यानात् तृतीया।

प्रियंवदा। त्वया (सहार्थे तृतीया) उपस्थितः आसन्नः वियोगः यस्य तत् तस्य ; उद्गलितः मुखात् भ्रष्टः दर्भकवलः कुशग्रासः येषां ते तादृशाः मृग्यश्च मृगाश्च इति मृगाः "पुमान् स्त्रिया" इति पुंलिङ्गैकशेषः। परित्यक्तं नर्त्तनं नृत्यं यैः ते तथोक्ताः शुष्काणि इत्यर्थः पत्राणि याभ्यः ताः लता त्वद्वियोगविधुराः अश्रु नयनजलं मुञ्चन्ति इव ॥१२॥

शकुन्तला। [स्मृत्वा] आमन्त्रयिष्ये सम्भाषिष्ये आपृच्छे ; गमनावसरे भगिनीरूपायाः वनज्योत्स्नायाः सम्भाषणमुचितमित्यर्थः।

[কোকিলশব্দশ্রবণ অভিনয় করতঃ]

द्वितीयः। आत्तदण्डः विमार्गप्रस्थितान् नियमयसि, विवादं प्रशमयसि, रक्षणाय कल्पसे। प्रजानां अतनुषु विभवेषु ज्ञातयः सन्तु नाम, बन्धुकृत्यं तु त्वयि परिसमाप्तम् ॥

आत्तः गृहीतः (आङ्पूर्व्वात् ददातेः कर्म्मणि क्तः) दण्डः येन सः लोकरक्षार्थे धृतदण्डः त्वं विरुद्धे कुत्सिते मार्गे प्रस्थिताः तान् विमार्गप्रस्थितान् उन्मार्गगामिनः उत्पथप्रवृत्तानिति यावत् नियमयसि असदाचरणात् विरमयसि। विवादं दायाद्यर्थं कलहं प्रशमयसि सुविचारेण निवारयसि ; रक्षणाय लोकरक्षार्थं कल्पसे ; उत्सहसे ; यद्वा रक्षति इति रक्षणः मन्द्यादित्वात् ल्युः पालकः तस्मै कल्पसे सम्पद्यसे ; सम्पद्यमानात् क्लृप्यादेः इति चतुर्थी। प्रजानां अतनुषु विपुलेषु विभवेषु सत्सु ज्ञातयः बन्धुजनाः सन्तु नामेति सम्भावनायां ; विपुलानि सम्पत्सुखानि अनुभवन्तु नाम बन्धुजनाः। किन्तु बन्धूनां कृत्यं विपत्त्राणादिकं त्वयि परिसमाप्तं पर्य्यवसितम्। त्वमेव प्रजानां हितानुष्ठाने निरतोऽसि इत्यर्थः। बन्धुभ्योऽपि व्यतिरेककथनात् व्यतिरेकः व्यज्यते। वृत्तन्तु पूर्व्ववत्।

नियमयसि इति यमेर्णिचि मितां ह्रस्वः इति ह्रस्वः अनुपसृष्टात् तुणौ यमयतिः यामयति इति पदद्वयं भवति ।

Change of voice.—आत्तदण्डेन विमार्गप्रस्थिताः नियम्यन्ते । विवादः प्रशम्यते रक्षणाय कॢप्यते ।...ज्ञातिभिः भूयताम्...बन्धुकृत्येन परिसमाप्तेन भूयते ।

নেপথ্যে—বৈতালিকদ্বয়। মহারাজের জয় হউক।

প্রথম। আপনি নিজসুখে নিঃস্পৃহ হইয়া প্রতিদিন প্রজার জন্য দুঃখস্বীকার করিতেছেন। অথবা আপনার ব্যবহারই এইরূপ। পাদপ নিজ মস্তকদ্বারা অতিপ্রখর রৌদ্র সহ্য করে; কিন্তু ছায়া দান করিয়া আশ্রিত ব্যক্তিদিগের ক্লেশ নিবারণ করিয়া থাকে।

দ্বিতীয়। আপনি বিপথপ্রস্থিতদিগকে দণ্ড দিয়া বিনীত করিতেছেন, প্রজাদিগের কলহ নিবারণ করিতেছেন এবং লোকদিগের রক্ষার জন্য প্রভাবসম্পন্ন। প্রজাদিগের জ্ঞাতিগণ বিপুল বিভবের সময় (সুখভোগ করিতে) থাকুক; কিন্তু বন্ধুর কার্য্য (বিপৎ-ত্রাণাদি) আপনাতেই পরিসমাপ্ত হইয়াছে।

[*Behind the scenes*].

Two Heralds.—May the lord, the king, be victorious.

First Herald.—Having no desire for your own comforts and happiness, you take trouble every day for the (weal of) the subjects, or rather the course of your conduct is of such a nature. The tree bears on its head the intense heat (of the sun); but allays by its shade the fatigue of those that have resorted to it.

Second Herald.—Holding the sceptre, you check those that have taken to evil ways; put an end to dissensions; and contribute to protection. Let the relations be in times of (*i. e.* to enjoy) abundant riches, but the duty of a relation of the subjects is finished (attained its consummation) in you.

राजा। क्लान्तं खिन्नं मनो येषां ते क्लान्तमनसः वयम्, वहुत्वमत्र अविवक्षितम्। पुनरपि अनवाः नवाः कृता इति नवीकृताः (च्विः) स्वकर्त्तव्यल्लेखेन तरुणमुत्साहमापादिता वयम् ।

प्रतीहारी। अभिनवेन प्रत्यग्रेण सम्मार्ज्जनेन सश्रीकः सुन्दरः सन्निहिता होमस्य धेनुः यत्र सः सन्निहितहोमधेनुः अग्निशरणस्य अलिन्दः वहिर्द्वारप्रकोष्ठवर्त्ती भूमिप्रदेशः ।

राजा। [परिजनस्य स्कन्धे हस्तं निधाय] ऋषीणां आगमनस्य को नु खलु हेतुर्भवेत् ।

किमिति—उपोढ़तपसां व्रतिनां तपः किं तावत् विघ्नैः दूषितं, धर्म्मारण्यचरेषु प्राणिषु केनचित् असत् चेष्टितम्। आहोस्वित् मम अपचरितैः वीरुधां प्रसवः विष्टम्भितः इत्यारूढ़बहुप्रतर्कं मे मनः अपरिच्छेदाकुलम् ॥ ९ ॥

उपोढ़ं धृतं (वहेः क्तः) तपो यैः तेषां उपोढ़तपसां, व्रतिनां तापसानां तपः किं विघ्नैः अन्तरायैः राक्षसादिभिः दूषितं उपहतं, अथवा धर्म्मस्य अरण्यं इति धर्म्मारण्यं तपोवनं तत्र चरन्ति ये तेषु प्राणिषु विषये केनचित् जनेन असत् अनार्य्यं चेष्टितं आचरितं ; आहोस्वित् उताहो अथवेति यावत् मम अपचरितैः पापैः वीरुधां लतानां प्रसवः पल्लवपुष्पादिः विष्टम्भितः प्रतिवद्धः किं पुष्पं "फलं पत्रं च वृक्षाणां प्रसवं विदुः" इति धरणिः। उक्तञ्च—"राज्ञोऽपचारात् पृथिवी स्वल्पशस्या भवेत् किल। अल्पायुषः प्रजाः सर्व्वा दरिद्रा व्याधिपीड़िताः"—इति आरूढ़ाः सञ्जाताः बहवः प्रतर्काः संशयाः यस्मिन् तत् आरूढ़बहुप्रतर्कं एवम्विधैः संशयैः पूर्णं मे मनः अपरिच्छेदेन निश्चयाभावेन आकुलं व्यथितं वर्त्तते। शार्दूलविक्रीड़ितम् वृत्तम्। लक्षणमुक्तम्। विपूर्व्वात् ण्यन्तात् स्तन्भ्धातोः कर्म्मणि क्तः विष्टम्भितः।

प्रतीहारी। सुशोभनं चरितं नन्दन्ति ये ते तादृशः ऋषयः सभाजयितुं आगताः। सभाजधातुरदन्तश्चुरादिः सभाजयितुं संवर्द्धयितुं संमानयितुमित्यर्थः।

রাজা। আমার চিত্ত ক্লান্ত হইলেও পুনরায় নূতন উৎসাহে পূর্ণ হইলাম। [গমন করিতে লাগিলেন]।

প্রতীহারী। এই অগ্নিগৃহের অলিন্দ (আলিসা) সম্প্রতি সম্মার্জ্জিত হওয়ায় সুন্দর পরিষ্কৃত হইয়াছে ; ইহার সমীপে হোমধেনু সন্নিহিত রহিয়াছে। ইহার উপরি আরোহণ করুন।

রাজা। [আরোহণ করিয়া পরিজনের অংসদেশ অবলম্বন করিয়া দাঁড়াইলেন] বেত্রবতি, কি উদ্দেশে ভগবান্ কাশ্যপ আমার নিকট ঋষিদিগকে পাঠাইয়াছেন ?

তপঃপরায়ণ ব্রতিগণের তপস্যা কি রাক্ষসাদিবিঘ্নের দ্বারা প্রতিহত হইয়াছে ; অথবা কোন দুষ্টাত্মা ধর্ম্মারণ্যচারী প্রাণিগণের প্রতি অন্যায়াচরণ করিয়াছে ; কিংবা আমার পাপহেতু লতাদির পল্লবপুষ্পাদির উৎপত্তিনিরোধ হইয়াছে ; এরূপ নানা সন্দেহ সমুদিত হওয়ায় আমার চিত্ত কোনরূপ নির্ণয় করিতে না পারিয়া সমাকুল হইয়াছে।

প্রতীহারী। ঋষিগণ আপনার সচ্চরিত্রের প্রশংসা করিয়া সম্বর্দ্ধনা করিতে আসিয়াছেন এইরূপ বিবেচনা হয়।

King.—Weary as I was in mind, I have been refreshed. [*Walks on*].

Warder.—Here is the terrace of the chamber of fire, beautiful

and clean by reason of its being recently swept ; and with the cow of sacrifice standing near it. Be pleased, my liege, to ascend.

King —[*Ascending, stands leaning on the shoulder of his attendant*]. Vetravati, with what object in view may the hermits have been sent to me by the holy sire Kasyapa? May it be that the rites of pious men practising austerities have been disturbed by obstacles ; or that evil has been done by some one to the animals roving in the grove of penance ; or that, through my sins, the growth of fruits etc. of the creepers have been obstructed? My mind, with several doubts rising in it in this way, has become perplexed for want of decision.

Warder.—I believe, the hermits, the praisers of good deeds have come to pay their respects to your Majesty :—

[पुरस्कृत्य अग्रतः कृत्वा]

शार्ङ्गरवः। अहो महाभागः नरपतिः कामं अभिन्नस्थितिः, वर्णानां अपकृष्टः अपि कश्चित् अपथं न भजते, तथापि शश्वत् परिचितविविक्तेन मनसा अहं जनाकीर्णम् इदं हुतवहपरीत गृहमिव मन्ये ॥१०॥

अहो आश्चर्य्यम्, महान् भागः यस्य स तथोक्तः अयं नरपतिः दुष्यन्तः कामं न भिन्ना स्थितिर्येन सः अभिन्नस्थितिः, मर्य्यादापालकः, अस्य पालनगुणेन वर्णानां मध्ये अपकृष्टः हीनोऽपि कश्चित् न पन्थाः इति अपथं तत् असत्पथं इत्यर्थः न भजते उन्मार्गगामी न भवति ; का कथा उत्कृष्टवर्णानामित्यर्थः अपिकारेण द्योत्यते। तथापि सर्व्वत्रैव सम्यग्व्यवहारदर्शनेन उद्वेगकारणे असत्यपि, शश्वत्निरन्तरं परिचितं अभ्यस्तं विविक्तं जनशून्यस्थानं यस्य तेन तादृशेन मनसा ("इत्थम्भूतलक्षणे" तृतीया करणे वा) चेतसा अहं जनैः आकीर्णं पूर्णं इदं राजगृहं हुतस्य वहः इति हुतवहः वह्निः तेन परीतं व्याप्तं गृहमिव, अग्निना भस्मीक्रियमाणं गृहमिव इदं नृपभवनं सोद्वेगप्रवेशं मन्ये। उपमालङ्कारः। शिखरिणीवृत्तम् ; रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।

वर्णानामिति निर्द्धारे षष्ठी। न पन्थाः इति विग्रहे "पथो विभाषा" इति सूत्रेण समासान्तविधिः पक्षे आप्नोति ; तत्पक्षे अपथम् "अपथं नपुंसकमि"ति क्लीवत्वम्। अन्यत्र अपन्थाः।

When compounded with the negative particle नञ् to form a compound of the तत्पुरुष kind, पथिन् takes the समासान्त augment.

optionally. When it takes the augment it becomes neuter. Thus there would be two forms अपथम्. and अपथ्या:।

Change of voice.—महाभागेन नरपतिना अभिन्नस्थितिना भूयते।...अपकृष्टेनापि केनचित् अपथं न भज्यते...इव...गृहमिव, मया मन्यते।

शारद्वत:। स्नात: अभ्यक्तमिव, शुचि: अशुचिमिव, प्रबुद्ध: सुप्तमिव, स्वैरगति: बद्धमिव, अहं इह सुखसङ्गिनं जनं अवैमि ॥११॥

स्नात: नद्यादौ कृतावगाहन: जन: अभ्यक्तं, तैलादिना स्नानात् पूर्व्वम् म्रक्षितशरीरं जनमिव, अनेन संसारगहने भ्रमतो जनस्य मलासङ्ग: ध्वनित:; शुचि: अशुचिमिव, एतेन संसारवर्त्मन: मोक्षानुपयोगित्वं सूचितम्, प्रबुद्ध: वीतनिद्र: सुप्तं निद्राणमिव, अनेन मायाविजृम्भिते संसारे तात्त्विकबुद्धिर्मोहात्मिकेति द्योतितम्, स्वैरा स्वच्छन्दा गति: यस्य स स्वच्छन्दगमन: बद्धं शृङ्खलादिभि: कारायां निरुद्धमिव; एतेन पारतन्त्र्यात् 'स्वराज्यमिद्धैर्दूरे खलु संसृतिक्लेशनाटकविडम्बनाविधिरिति ख्यापितम्। अहं सुखे सङ्गी तम्, संसारसुखासक्तचेतसं जनं अवैमि मन्ये। नाहं पुरप्रवेशात् भवानिव उद्विग्न:, किन्तु अविद्यापथवर्त्तिनो अस्य जननिवहस्य दशामनुचिन्तयत: मे हृदयमनुकम्पास्पृष्टमिति भाव:। मालोपमा; यदुक्तं मालोपमा यदैकस्य बहूपमानलम।

स्वैरगति स्वादीरेरिणो: इति वृद्धि:। If there be ईर and ईरिन् after स्व let there be वृद्धि instead of गुण।

Change of voice.—...अभ्यक्त इव स्नातेन; शुचिना अशुचिरिव, प्रबुद्धेन सुप्त इव, बद्ध इव स्वैरगतिना, मया जन: सुखसङ्गी अवेयते।

[তাহার পর গৌতমীর সহিত ঋষিগণ শকুন্তলাকে অগ্রে করিয়া প্রবেশ করিলেন; এবং ইহাদিগের অগ্রে কঞ্চুকী ও পুরোহিত প্রবেশ করিলেন]।

কঞ্চুকী। আপনারা এদিকে আসুন।

শার্ঙ্গরব। শারদ্বত, এই মহাভাগ নরপতি সম্পূর্ণভাবে সমাজরক্ষার নিয়মাদি পালন করেন। (ইঁহার অধিকৃত প্রজার মধ্যে) হীনবর্ণের ও কোন ব্যক্তি অসৎপথ অবলম্বন করে না; কিন্তু তথাপি আমার চিত্ত নিরন্তর বিজনপ্রদেশে অভ্যস্ত হওয়ায় এই জনাকীর্ণ রাজভবন আমার নিকট অগ্নিসমাকীর্ণ গৃহের ন্যায় (উদ্বেগকর) বোধ হইতেছে।

শারদ্বত। তুমি পুরে প্রবেশ করিতে এরূপ অনুভব করিতেছ, বোধ হয়। স্নাত ব্যক্তি তৈলাক্তশরীর ব্যক্তিকে দেখিয়া, শুচি অশুচিকে, জাগরিত নিদ্রিতকে, এবং স্বচ্ছন্দগতি অবরুদ্ধ ব্যক্তিকে দেখিয়া যেরূপ মনে করে, আমিও সংসারসুখাসক্তচিত্তব্যক্তিদিগকে সেইরূপ মনে করিতেছি।

[*Then enter the hermits leading Sakuntala with Gautami, and before them, the chamberlain and the priest*].

Kanchuki.—This way, holy sirs, this way.

Sarangarava.—Saradwata, true that this illustrious monarch does never neglect the maintenance of good order. None, not even any one of the meanest of the classes, does take to evil ways yet with my mind always familiar with (or accustomed to) solitude. I look upon this place, full of men as it is, as a house on fire.

Saradwata.—Methinks that on entering the city, you have become so (disposed). I too regard the people here given to pleasures, (in the same way) as a man having finished ablutions looks upon one besmeared with oil ; as pure one looks upon one who is impure ; as one awake looks upon one who is sleeping ; as one moving at will looks upon one fettered

शकुन्तला । [निमित्तं दक्षिणाक्षिस्पन्दनरूपं शकुनं सूचयित्वा अभिनीय]

वामात् इतरत् इति वामेतरत्, तत्पुरुषे सर्व्वनामसंज्ञा दुर्व्वारा, विस्फुरति स्पन्दते ।

पुरोहितः । वर्णा ब्राह्मणादयः आश्रमाः ब्रह्मचर्य्यादयः तेषां, कृद्योगलक्षणा कर्म्मणि षष्ठी रक्षितेति पदं तृच् प्रत्ययसाधितम् ।

शार्ङ्गरवः । महाब्राह्मण इत्यत्र द्विजशब्देन सह महच्छब्दस्य प्रयोगे दुष्टार्थः न तु द्विजपर्य्यायपठितेन ब्राह्मणशब्देन इत्यनुसन्धेयम् । अभिनन्दनीयं प्रशंसनीयम् ; तथापि अवविषये मध्यस्थाः उदासिनाः आचारस्य प्रतिपत्तौ न तोषः नाप्रतिपत्तौ रोषः । यदयं नरपतिरेवमनुष्ठितवान् तत्र न किञ्चित विस्मयकारणम् ; महतामियमेव हि प्रवृत्तिरिति दर्शयन्नाह—भवन्तीति तरवः फलागमैः नम्रा भवन्ति, घनाः नवाम्बुभिः दूरविलम्बिनः सतपुरुषाः समृद्धिभिः अनुद्धताः, परोपकारिणाम् एष एव स्वभावः॥१२॥ तरवः फलागमैः फलानामुदयेन नम्राः नता न तु उद्धताः इति भावः भवन्ति, घनाः मेघाः नवानि प्रावृषि सम्भृतानि अम्बूनि सलिलानि तैः नवाम्बुभिः जलपूर्णाः सन्तः इत्यर्थः (करणे तृतीया) दूरं वहुदूरं भूसन्निधिं यावदित्यर्थः विलम्बन्ते इति दूरविलम्बिनः सुदूरावनता भवन्ति । सत्पुरुषाः साधवः समृद्धिभिः सम्पद्भिः अनुद्धताः अनुत्सिक्ताः विनीता भवन्ति (एकस्यापि धर्म्मस्य चरणत्रये पृथङ्निर्द्देशात् प्रतिवस्तूपमालङ्कारः) परोपकारिणाम् महतां एष एव स्वभावः अभ्युदये विनीतत्वमेव सतां प्रकृतिः । (सामान्यविशेषभावनिर्द्देषात् अर्थान्तरन्यासः अलङ्कारः) ।

Change of voice.—तरुभिः नम्रैः घनैः दूरविलम्बिभिः सत्पुरुषैः अनुद्धतैः भूयते।

प्रतीहारी। प्रसन्नः भयादिभिरकलुषितत्वात् निर्म्मलः मुखवर्णः येषां ते तादृशः ऋषयः विस्रब्धं उद्वेगशून्यं कार्य्यं येषां ते तथोक्ताः अनुमीयन्ते। नैते रक्षोभिर्व्याहततपोऽनुष्ठानाः, नवा उपप्लवान्तरोपद्रुताः।

राजा। केति—पाण्डुपत्राणां मध्ये किसलयमिव तपोधनानां मध्ये नातिपरिस्फुटशरीरलावण्या, अवगुण्ठनवती इयं का स्वित्।।१३।।

पाण्डूनि जीर्णानि पत्राणि तेषां मध्ये किसलयं नवोद्गतं पल्लवमिव तपोधनानां मध्ये न अति परिस्फुटं अवगुण्ठनेन आच्छादितत्वात् न सम्यक् बहिरुद्भिन्नं शरीरस्य लावण्यं कान्तिः यस्याः तथोक्ता अवगुण्ठनावृतशरीरा इयं का भवेत् स्विदिति प्रश्ने अव्ययम्। वितर्के वा। अत्रोपमालङ्कारः, आर्य्या जातिः तल्लक्षणम् यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या।

प्रतीहारी। कुतूहलं ज्ञानेच्छा गर्भे अभ्यन्तरे यस्य स तथोक्तः, कौतूहलिनाकारितः प्रहितः केयमिति निश्चेतुमुत्थापितः अयं तर्कः न प्रसरति, अबाधं न प्रवर्त्तते। नाहं निर्णेतुमलमित्यर्थः। किन्तु अस्याः रमण्याः आकृतिः दर्शनीया दर्शनयोग्या हृदयङ्गममूर्त्तिरियम्।

राजा। परस्य अन्यस्य कलत्रं भार्य्या कलत्रं श्रोणिभार्य्ययोरित्यमरः न निर्वर्णनीयम् न सविशेषं द्रष्टुं योग्यम्।

शकुन्तला। [हस्तमुरसि कृत्वा हृदये हस्तं दत्वा आत्मगतम्] स्वामिनः भावं चित्तस्य स्नेहात्मिकां वृत्तिं अनुरागमित्यर्थः अवधार्य्य हृदये भावयित्वा धीरं भव अवधारय इति पाठे, चित्ताभिप्रायं निरूपय।

पुरोहितः। उपाध्यायस्य गुरोः कण्वस्य कश्चित् सन्देशः वार्त्ता वर्त्तते।

ऋषयः। इष्टेन इति सहार्थे तृतीया। इषधातोः क्तः।

राजा। न सन्ति विघ्नाः येषां तानि निर्विघ्नानि, तथोक्तानि तपांसि येषां ते निर्व्विघ्नतपसः।

ऋषयः। त्वयि सतां रक्षितरि सति धर्म्मक्रियाविघ्नः कुतः। घर्म्मांशौ तपति तमः कथं आविर्भविष्यति ?।।१४।।

भवति साधूनां पालके वर्त्तमाने सति धर्म्मार्थाः क्रियाः इज्यादयः तासां विघ्नः अन्तरायः कुतः कस्मात् सम्भवति, न कुतोऽपि निमित्तादित्यर्थः। तत्र दृष्टान्तमाह घर्म्मो उष्णः (घर्मो निदाघः स्वेदः स्यात, उष्णोऽपि घर्म्मः उभयत्रामरः। घर्म्मः स्यादातपे ग्रीष्मेप्युष्णस्वेदाम्भसोरपीति मेदिनी) अंशवः किरणा यस्य तस्मिन् घर्म्मांशौ

रवौ तपति किरणान् वितरति सति तमः ध्वान्तं कथं आविर्भविष्यति सूर्य्योदये यथा तिमिरं विलयं याति, भवति दण्डधरे तथा साधूनां धर्म्मानुष्ठानविघ्ना अन्तर्हिता इति दृष्टान्तालङ्कारः। अनुरूपोक्तिः रवौ सूर्य्ये तपत्यावरणाय दृष्टः कल्पेत लोकस्य कथं तमिस्रा।

Change of voice.—धर्म्मक्रियाविघ्नेन...तमसा कथं आविर्भविष्यते।

राजा। अर्थवान् अन्वर्थः सार्थक इति यावत् प्रशंसायां मतुप्। लोकस्य जनस्य भुवनस्य वा "लोकस्तु भुवने जने इत्यमरः" अनुग्रहाय लोकानुग्रहं कर्त्तुमिति क्रियार्थोपपदेत्यादिना चतुर्थी लोकं अनुग्रहीतुम् इति वा तुमर्थाच्च भाववचनादिति चतुर्थी, यद्वा तादर्थ्ये।

ऋषयः। स्वाधीनं स्वतन्त्रं कुशलं येषां ते तथोक्ताः हि, सिद्धिः तपसिद्धिः विद्यते येषां ते सिद्धिमन्तः। अनामयः आरोग्य (आमयः रोगः रोगव्याधिगदामयाः इत्यमरः) पूर्व्वः यस्मिन् तत् यथा तथा, शेषात् विभाषा इति समासान्तः कः। Those adjective compounds (बहुव्रीहि), in which no provision for the समासान्त augment (of any kind) has been made, take optionally the augment क। अनामयशब्दप्रयोगे प्रमाणम्—"ब्राह्मणं कुशलं पृच्छेत् चत्त्रबन्धुमनामयम्। वैश्यं चेमं समागम्य शूद्रमारोग्यमेवच"॥

শকুন্তলা। [দুর্নিমিত্ত অনুভব করিলেন এইরূপ অভিনয় করিয়া] (ওমা) আমার দক্ষিণ চক্ষু স্পন্দিত হইতেছে কেন ?

গৌতমী। বৎসে অমঙ্গল দূর হউক, তোমার স্বামিকুলের দেবতাগণ তোমার সুখবিধান করুন [গমন করিতে লাগিলেন]।

পুরোহিত। [রাজাকে দেখাইয়া] হে তপস্বিগণ, বর্ণাশ্রমের রক্ষক এই মহানুভব নরপতি পূর্ব্ব হইতেই আসন পরিত্যাগ করিয়া আপনাদের প্রতীক্ষা করিতেছেন; উঁহাকে অবলোকন করুন।

শার্ঙ্গরব। ব্রহ্মন্, ইহা প্রশংসার বিষয় বটে, কিন্তু আমরা এ বিষয়ে উদাসীন। কারণ, বৃক্ষসকল ফলবান হইলে নম্র হয়, নূতন জলকণে (পূর্ণ হইয়া) মেঘগুলি অনেক দূর পর্য্যন্ত নামিয়া পড়ে, সাধু ব্যক্তিগণ অভ্যুদয়ে অনুদ্ধত হন, পরোপকারীদিগের স্বভাবই এই।

প্রতিহারী। মহারাজ ইহাদিগের মুখবর্ণ নির্ম্মল দেখিতেছি, ঋষিদিগের কার্য্য শান্ত ভাবের, কোনরূপ উদ্বেগহেতুক নহে বোধ হইতেছে।

রাজা। [শকুন্তলাকে দেখিয়া] তাপসদিগের মধ্যে অবগুণ্ঠনাবৃতশরীর, অনভিব্যক্তশরীরকান্তি, পরিপক্ক পাণ্ডুপত্রের মধ্যে অচিরোদ্গত অভিনব কিসলয়দলের ন্যায় দৃশ্যমান এই স্ত্রীলোকটী কে ?

প্রতিহারী। কৌতুহলবশতঃ এইরূপ বিতর্ক উদিত হইতেছে কিন্তু কিছু নির্ণয় করিতে পারিতেছি না। ইহার আকৃতি সুন্দর।

রাজা। হউক, পরস্ত্রী দর্শনযোগ্য নহে।

শকুন্তলা। [হৃদয়ে হস্ত দিয়া আত্মগত] হৃদয়, এরূপ কম্পিত হইতেছ কেন? আর্য্যপুত্রের স্নেহের বিষয় চিন্তা করিয়া স্থির হও।

পুরোহিত। [অগ্রে গমন করিয়া] এই তপস্বিগণ যথাবিধি সৎকৃত হইয়াছেন, ইঁহাদিগের গুরুর কোন বার্ত্তা আছে আপনি তাহা শ্রবণ করুন।

রাজা। আমি মনোযোগ দিয়াছি।

ঋষিগণ। [হস্ত উত্তোলন করিয়া] মহারাজ জয়যুক্ত হউন।

রাজা। আপনাদের সকলকে অভিবাদন করি।

ঋষিগণ। ইষ্টসিদ্ধি হউক।

রাজা। মুনিদিগের তপস্যার কোন বিঘ্ন নাই ত?

ঋষিগণ। আপনি সাধুদিগের রক্ষাকর্ত্তা থাকিতে ধর্ম্মকার্য্যের বিঘ্ন কিরূপে হইতে পারে? সূর্য্য কিরণ দান করিলে অন্ধকার কিরূপে আবির্ভূত হইতে পারে?

রাজা। আমার রাজশব্দ সার্থক। ভগবান কাশ্যপ লোকানুগ্রহের নিমিত্ত কুশলে আছেন ত?

ঋষিগণ। তপঃসিদ্ধদিগের কুশল স্বায়ত্ত। তিনি আপনাকে অনাময়প্রশ্নপূর্ব্বক ইহা বলিয়াছেন।

রাজা। কি আদেশ করিয়াছেন?

Sakuntala.—[*Acting as if feeling an omen*]. Alack! Why does my eye other than the left throb?

Gautami.—Child, (heaven) forbid the evil! May the guardian deities of your husband's family confer happiness (on you) [*walks on*].

Priest.—[*Pointing to the king*]. O hermits, there is the protector of the several classes and orders waiting for you, after having at the first left his seat. See him.

Sarangarava.—Great Brahmin, true that it is laudable; but we are indifferent to it. Because:—Trees become bent or weighed down by the appearance (or growth) of fruits; clouds hang (come) a long way down by new watery particles; good men do not become arrogant in prosperity: such is the nature of the benevolent.

Warder.—They are seen to have a placid appearance, my lord; I believe their business is of a quiet nature.

King.—[*Seeing Sakuntala.*] Who can this veiled lady be with the beauty of her body not clearly perceptible, among the ascetics, like a fresh sprout among yellow, faded leaves ?

Warder.—My lord, my conjecture, roused and directed by curiosity, does not proceed ((to a conclusion.) But her appearance is worth seeing.

King.—Well ! let it be. But the wife of another man is not to be closely looked at.

Sakuntala.—[*Placing her hand on her breast ; aside*]. Why do you, my heart, tremble thus ? Remembering the affection of my husband, be composed.

Priest.—[*Advancing*]. These hermits have been received in proper form. There is some message from their preceptor. It behoves your Majesty to hear it.

King.—I am all attention.

Hermits.—[*Raising their hands*]. Be victorious, O king !

King.—I bow to you all.

Hermits.—May you have your desires (fulfilled).

King.—Are the hermits unmolested in the practice of their penance ?

Hermits.—You being the protector of the good, whence, will there be impediments to religious observances ? How can darkness prevail when the sun is shining ?

King—Truly has my title of king become significant. Is the holy sage Kasyapa faring well for the good of the world (or people) ?

Hermits.—Men of highly developed powers have welfare in their own power. He says it to your Majesty, after having previously made an inquiry as to your good health.

King.—What does his holiness command ?

शार्ङ्गरव। मिथः समयात् अन्यान्यप्रतिज्ञावशात् गान्धर्व्वेण विधिना इत्यर्थः "गान्धर्व्वः समयान्मिथ" इति याज्ञवल्क्यस्मरणात्, यत् भवान् इमां उपायंस्त, उदवोढ़, परिणीतवानिति यावत्, तन्मयानुमोदितम्। उपात् यमेः लुङ्। उपाद्यमः स्वकरणे इति आत्मनेपदम्। The root यम् with the prefix उप takes the आत्मनेपद in the sense of marrying.

कुत इति। त्वं अर्हतां प्राग्रसरः न स्मृतोऽसि ; शकुन्तला च मूर्त्तिमती सत्क्रिया तुल्यगुणं वधूवरं समानयन् प्रजापतिः चिरस्य वाच्यं न गतः ॥१५॥

अर्हतां योग्यानां मध्ये (निर्द्धारे षष्ठी) त्वं प्राग्रसरः प्रकर्षेण अग्रसरः अग्रयायी श्रेष्ठः इत्यर्थः नः अस्माकं स्मृतोऽसि अस्माभिरिति मन्यते इत्यर्थः। प्राग्रहरः इति पाठे प्राग्रहरः श्रेष्ठः "पराड्याग्रहराः" इत्यमरः। शकुन्तला च मूर्त्तिमती साक्षात् शरीरिणी सत्क्रिया अर्चनक्रिया ; इति रूपकम्। तुल्याः गुणाः कुलशीलसौन्दर्यादयः यस्य तत् तुल्यगुणं गुणैरन्योन्यानुरूपं वधूः नवपरिणीता स्त्री वरः वोढ़ा च तयोः समाहारः इति वधूवरं तत् समानयन् योजयन् प्रजापतिः वेधाः चिरस्य चिरकालेन इत्यर्थः वाच्यं निन्दां न गतः ; वाच्यन्तु कुत्सिते हीने वचनार्हे न पुंसि तु ; दूषणे पालने इति शब्दाब्धिः। विषमा हि विधातुः सङ्घटनरीतिः इति लोकवादात् निष्कृतिं गतः। चिरस्येति विभक्त्यन्तप्रतिरूपकमव्ययम्। चिराय चिररात्राय स्याद्याः चिरार्थकाः इत्यमरः ॥१५॥

"अर्हः प्रशंसायामि" ति शत्र प्रत्ययः। In the sense of "praise" the root अर्ह takes the participial form of शतृ, (irrespective of any indication as to time) "नः स्मृतः", नः इत्यत्र मतिबुद्धिपूजार्थेभ्यश्च इति वर्त्तमानविहितक्तयोगात् कर्त्तरि षष्ठी। Verbs having the signification of knowing, liking and honouring take the participial form क्त in the present tense (instead of in the past). And in connection with क्त in the present tense, the nominative case (of the verb with क्त in the present tense) takes the sixth case-ending.

तदिति वाक्योपसंहारे आपन्नं प्राप्तं सत्वं गर्भः यया सा आपन्नसत्वा गर्भिणी इयं स्वीक्रियताम् यद्वा आपन्ना सत्वं इति आपन्नसत्वा। प्राप्तापन्नेद्वितीयया इति तत्पुरुषः।

गौतमी। वचनस्य अवसरः अवकाशः नास्ति, कथं वचनावकाशः नास्ति इति वदसि चेत् तव ब्रवीमि—अनया शकुन्तलया परिणयविधौ गुरुजनः अस्मादृशः न पृष्टः अस्मन्मतानुसारेण नेयं कृतविवाहमङ्गला। नापि त्वया ज्ञातिवर्गस्य अभिप्रायः अस्मिन् विषये जिज्ञासितः। इत्थं अन्योन्यं रहसि आचरिते परिणयकर्म्मणि भवद्भ्यां तद्व्यापारानभिज्ञ मादृशः जनः अन्यस्य कृते अन्यं किं वदिष्यति ॥१६॥

राजा। किमिदं उपन्यस्तम् ? किमिदं वक्तुमारब्धम् उपन्यासस्तु वाङ्मुखमित्यमरः।

शकुन्तला। [आत्मगतम्]। राज्ञः अयं वचनारम्भः वह्निरिव हृन्मर्म्मदाहकः। रूपकालङ्कारः।

शार्ङ्गरवः। लोकस्य वृत्तान्तः वार्त्ता तत्र निष्णाता: कुशला: प्रवीणा: प्रवीणे-निपुणाभिज्ञविज्ञनिष्णातशिक्षिता इत्यमरः। निपूर्व्वात् स्नातेः कर्त्तरि क्तः निष्णातः "निनदीभ्यां स्नातेः कौशले" इति षत्वम्। The initial dental स of the root स्ना is changed into cerebral ष after नि and नदी, when dexterity or expertness is implied.

कथमिदं नाम इति नामाव क्रोधे नामप्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने इत्यमरः। सतीमिति—

भर्त्तृमतीं ज्ञातिकुलैकसंश्रयां सतीमपि (प्रमदां) जन: अन्यथा विशङ्कते। अतः प्रमदा तदप्रियापि स्वबन्धुभिः परिणेतुः समीपे इष्यते ॥१८॥

भर्त्ता स्वामी विद्यते यस्याः तां भर्त्तृमतीं जीवत्पतिकां ज्ञातीनां पित्रादीनां कुलं गृहं ज्ञातिः सगोत्रे पितरि, कुलं जनपदे गृहे ; सजातीयगणेगोत्रम् इति च विश्वः) तदेव एकः आश्रयः निवासः यस्याः तां, नियतमेव पित्रादिगृहे वसन्तीं सतीमपि साध्वीमपि प्रमदां नारीं जनः साधारणो जनः अन्यथाव्यभिचारिणीं इत्यर्थः विशङ्कते उत्प्रेक्षते ; अन्यथा कथमियं स्वामिसकाशं न गच्छति इति वीभत्सः लोकवादः सर्व्वतः प्रसरति इति तात्पर्य्यम्। अतः अस्मात् हेतोः अस्य लोकवादस्य परिजिहीर्षया, प्रमदा तस्य भर्त्तुः स्वामिनः अप्रिया अपि अनभिमता सत्यपि परिणेतुः उपयन्तुः समीपे स्थिता इति शेषः स्वस्या वन्धुभिः पित्रादिभिः इष्यते वाञ्छ्यते। लोकनिन्दायाः स्वामिसन्निधाने भर्त्तुरनुरागजन्यक्लेशो दुहितुः श्रेयान् मन्यते। पित्रादिभिरिति भावः। विशेषे वक्तव्ये सामान्यवचनं अप्रस्तुतप्रशंसा-लङ्कारः इति राघवभट्टः।

Change of voice.—सती अपि ज्ञातिकुलैकसंश्रया जनेन...भर्त्तृमती विशङ्क्यते।...तदप्रियामपि प्रमदां स्वबन्धवः इच्छन्ति।

শার্ঙ্গরব। পরস্পর সময়পূর্ব্বক আমার কন্যাকে যে বিবাহ করিয়াছিলেন তাহা আমি আহ্লাদিত হইয়া অনুমোদন করিয়াছি: কারণ, আপনি সৎকারযোগ্য ব্যক্তিদিগের মধ্যে শ্রেষ্ঠ আমরা এইরূপ বিবেচনা করিয়া থাকি; শকুন্তলাও মূর্ত্তিমতী সৎক্রিয়া। তুল্যগুণ বধূবরকে মিলিত করিয়া প্রজাপতি চিরদিনের জন্য নিন্দা হইতে মুক্তি পাইয়াছেন। এক্ষণে ইনি অন্তর্বত্নী ইহাকে একসঙ্গে ধর্ম্ম আচরণ করিবার জন্য গ্রহণ করুন।

গৌতমী। আর্য্য আমিও কিছু বলিতে ইচ্ছুক হইয়াছি কিন্তু আমার বলিবার অবকাশ নাই। কেন এরূপ বলিতেছি তাহার কারণ, এই শকুন্তলা গুরুজনের অপেক্ষা করে নাই, আপনিও বন্ধুবান্ধবকে জিজ্ঞাসা করেন নাই; এরূপে পরস্পরে আচরণ করিলে এক জনের জন্য অন্য জনকে কি বলিব।

শকুন্তলা। [আত্মগত] আর্য্যপুত্র কি বলিবেন।

রাজা। এ আবার কি আরব্ধ হইল ?

শকুন্তলা। [আত্মগত] এই বাক্যারম্ভ বহ্নিসদৃশ।

শার্ঙ্গরব। এ আবার কি ? (বটে) আপনারাই না লোকব্যবহারে নিতান্ত নিপুণ ?

সাধ্বী সধবা নারী নিয়ত পিতৃকুলে বাস করিলে, সাধারণ লোকে তাহাকে অন্যরূপ সন্দেহ করিয়া থাকে। এই নিমিত্ত প্রমদার বন্ধুগণ স্বামীর অপ্রিয়া হইলেও নারী পতিসমীপে থাকে ইহা অভিলাষ করেন।

Sarngarava.—With gladness have I approved of your marrying my daughter by mutual agreement. Because :—You are looked upon by us as the foremost of worthy persons. And Sakuntala is goodness in bodily form. Bringing together a bride and a bride-groom of equal virtues, the lord of creation has for a long time (to come), not incurred (and will not incur) censure.

Take her then, who is now big with child, for the joint performance of religious observances.

Gautami. – Reverend sir, I am willing to speak something. But there is no room for saying (anything). (If it is asked), why so ? (I will add).—Her superiors she did not wait for ; nor your relations were consulted by you. In a matter done thus between yourselves, what shall I say to one on behalf of the other ?

Sakuntala.—[*Aside*]. What will my huband say?

King.—What is this proposed ?

Sakuntala.—[*Aside*]. The statement (made) in (these) words is fire indeed !

Sarngarava.—How so ? Yourselves are well acquainted with the affairs of the world.

People suspect a woman to be otherwise who, having her husband (living), has the paternal roof as her only shelter, even though she be virtuous and chaste ; hence she is desired by her relations to be near her husband though she may not be in his good grace.

राजा। पूर्व्वं परिणीता इति परिणीतपूर्व्वा, मयूरव्यंसकादयश्चेति निपातनात् समास। "चरटभूतपूर्व्वे" इति निर्द्देशात् पूर्व्वशब्दस्य परनिपातः।

शकुन्तला। [विषादेन राज्ञः वज्रोपमवचनश्रवणात् चेतसी भङ्गेन सह] हृदय, साम्प्रतं ते आशङ्का।

शार्ङ्गरवः। कृतं पूर्व्वापरमनालोचयता चित्तस्यावेगवशात् अनुष्ठितं यत् गूढ़ोपयमनरूपं कार्य्यं तस्मिन् द्वेषात्, वैरागेण घृणावशात् धर्म्मं प्रति विमुखता, अधर्म्मानुष्ठानं किं भवादृशस्य सदृशम्।

राजा। असती कल्पना तस्याः प्रश्नः इति असत्कल्पनाप्रश्नः। गूढ़ोद्वाहस्यापलापः क्रियते कल्पनायाः को ननु ते हेतुः।

शार्ङ्गरवः। अमी विकाराः, अवलेपमूलाः एवम्विधाः चित्तभावाः प्रायेण धनमदोत्सिक्तानामेव भवन्ति। मूर्च्छन्ति प्रसरन्ति प्रादुर्भवन्ति इति यावत्॥१८॥

राजा। अधिक्षिप्तः तिरस्कृतः ; विशेषेण इति प्रकृत्यादिभ्यश्चेत्युपसंख्यानात् तृतीया। वस्तुतस्तु क्रियाविशेषणमिदम्।

রাজা। আমি কি ইহাকে পূর্ব্বে বিবাহ করিয়াছি ?

শকুন্তলা। [বিষণ্ণ হইয়া আত্মগত] হৃদয়, এক্ষণ তোমার আশঙ্কা।

শার্ঙ্গরব। পূর্ব্বকৃত কার্য্যের প্রতি দ্বেষবশতঃ ধর্ম্মের প্রতি বিমুখতাচরণ কি রাজার উচিত ?

রাজা। এরূপ অসৎকল্পনাপ্রশ্ন কি হেতু করিতেছেন ?

শার্ঙ্গরব। ধনমদে মত্তদিগেরই প্রায় এইরূপ বিকার হইয়া থাকে।

রাজা। বিশিষ্টরূপে তিরস্কৃত হইলাম।

গৌতমী। বৎসে মুহূর্ত্তকাল লজ্জা করিও না, তোমার অবগুণ্ঠন মোচন করিয়া দিই তাহা হইলে তোমার স্বামী তোমাকে চিনিতে পারিবেন। [অবগুণ্ঠন মোচন করিয়া দিলেন]।

King.—Has this lady been married before by me?

Sakuntala.—[*Sorrowfully aside*]. O my heart, now is (the cause of) your alarm (come).

Sarngarava.—Is dislike for duty becoming a king, because of his abhorrence for an action done before?

King.—Whence is this question based on a wrong supposition?

Sarngarava—Such changes and inconstancies do generally prevail in men maddened with power and wealth.

King—I am strongly insulted.

Gautami.—Be not bashful, my child, for a while, I will remove your veil; and your husband will recognise you. [*Does as said*].

राजा। अक्लिष्टकान्ति एवं उपनतं इदं रूपं प्रथमपरिगृहीतं स्यात् न वा इति व्यवस्यन् अहं भ्रमरः विभाते अन्तस्तुषारं कुन्दं इव न परिभोक्तुं न च हातुं शक्नोमि खलु॥१९॥

अक्लिष्टा कान्तिर्यस्य तत् अक्लिष्टकान्ति उज्ज्वलशोभं एवं अनेन प्रकारेण आयासं विनैव उपनतं स्वयं प्राप्तं इदं रूपं कान्तिमती आकृतिः प्रथमं पूर्वं परिगृहीतं स्वीकृतं स्यात् न वा इति व्यवस्यन् निश्चिन्वन् विचारयन् अहं भ्रमरः षट्पदः विभाते प्रभाते अन्तः मध्ये तुषारः हिमं नीहार इति यावत् यस्य तत् तादृशं कुन्दं माघ्यं पुष्पमिव, न परिभोक्तुं, न च हातुं त्यक्तुं शक्नोमि। निश्चयाभावात् कर्त्तव्यविमूढतां गतोऽस्मि।—अनुरूपो भावः—

"यथा मज्जन् पयोराशौ लब्ध्वा सर्पावलम्बनम्।
न मुञ्चति न चाधत्ते तथा मुग्धोऽस्मि साम्प्रतम्॥"

उपमालङ्कारः। अन्तस्तुषारमिति विशेषणेन पुष्परसपाने भ्रमरस्य यथा बाधा, तथा परपरिग्रहत्वे, शकुन्तलाग्रहणे पापस्पर्शरूपो व्याघातः अस्ति इति ध्वनितम्। मालिनीवृत्तम्।

Change of voice.—व्यवस्यता मया भ्रमरेणेव न शक्यते।

प्रतीहारी। अहो धर्म्मापेक्षिता भर्त्तुः। ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यः विचारयति। धर्म्मं अपेक्षते अनुरुध्यते इति धर्म्मापेक्षी तस्य भावः धार्म्मिकत्वमित्यर्थः।

शार्ङ्गरवः। जोषम् तूष्णीं ; तूष्णीमर्थे सुखे जोषमित्यमरः। जोषमिति मान्तमव्ययम्। आस्यते, आसेर्भावे लट्।

राजा। स्वीकरणं विवाहः। अभिव्यक्तं परिस्फुटं सत्वस्य लक्षणं यस्याः तां परिस्फुटगर्भचिह्नां इमां शकुन्तलां प्रति आत्मानं चैवं पत्नी अस्य अस्तीति क्षेत्री त क्षेत्रिणं मन्यमानः, भवतु तावत् इयं मत्परिगृहीता,किन्तु अस्यां वीजं न मया निषिक्तं अन्यस्य कस्यापि तेजो दधानां इमां कथं ग्रहीष्यामि।

शकुन्तला। [अपवार्य्य] दूरमधिरोहति या सा दूराधिरोहिणी दूरगता (रोहतेः णिनिः)। अस्य महिषी भूत्वा सुखेन राज्ये निवेशयेयम् इत्याकारा आशा विलुप्ता।

शार्ङ्गरवः। कृतावमर्षां सुतां अनुमन्यमानः मुनिः त्वया मा तावत् विमान्यः नाम मुष्टं स्वं अर्थं प्रतिग्राहयता येन दस्युरिव त्वं पात्रीकृतोऽसि॥२०॥

कृतः अवमर्षः आस्कन्दनं धर्षणं इति यावत् यस्याः तां कृतावमर्षां ; मुनेरनुमतिमन्तरेणैव चौर्य्येणेव स्वयं परिगृह्योपभुक्तां सुतां दुहितरं अनुमन्यमानः त्वत्कृतमस्याः गूढोपयमनमनुमोदयन् मुनिः कण्वः त्वया मा तावत् विमान्यः अवमन्तव्यः, नामेति क्रोधे। शकुन्तलायाः प्रत्याख्यानेनामुं मावजानीहि यद्वा अनुमन्यमानः मुनिः त्वया विमान्योनामः यः इत्थं आचरितवान् तस्य मुनेः दुहितुः प्रत्याख्यानेन अवमाननां करोषि मामित्यर्थः। मातावदिति क्रुद्धस्य वाक्यासमाप्तिं सूचयति। मुष्टं चोरितं स्वं

स्वकीयं अर्थं प्रतिग्राहयता, प्रतिपादयता येन ऋषिणा दस्युरीव इव त्वं अपात्रं पात्र कृतः इति पात्रीकृतः शकुन्तलारूपे वस्तुनि न्यायानुगताधिकारसम्पन्नः कृतः। यथा कश्चित् स्वामी अपहृतं द्रव्यजातं दस्यवे प्रतिपादयन् तं तस्य वस्तुनः स्वामिनं सम्पादयति ; तद्वत् मुनिररि त्वां स्वदुहितुः वोढ़ारं कृतवान् इति उपमालङ्कारः। वृत्तमुपजातिः।

मुष्टम्—मुष स्तेये इति धातोः क्तः कर्म्मणि। मुष्—लट, मुष्णाति ; लिट्, मुमोष ; लुङ्, अमोषीत्।

शारद्वतः। विरमेति व्याङ्परिभ्योरमः इति परस्मैपदम्। The root रम् takes the परस्मैपद in connection with the उपसर्ग वि, आ and परि। प्रत्ययार्थं विश्वासार्थं प्रतिवचनम्। अस्य राज्ञः विश्वासोत्पादनं त्वदधीनं खलु।

রাজা। [শকুন্তলাকে দেখিয়া আত্মগত] স্বয়ং উপস্থিত, অম্লানশোভা এই সুন্দরীকে পূর্ব্বে বিবাহ করিয়াছি কি না এইরূপ বিচারপরায়ণ আমি, ভ্রমর প্রভাতে অন্তস্তুষার কুন্দ পুষ্পকে যেরূপ গ্রহণও করিতে পারে না ত্যাগও করিতে পারে না সেইরূপ উপভোগও করিতে পারিতেছি না ত্যাগও করিতে পারিতেছি না। [চিন্তা করিতে- লাগিলেন]।

প্রতিহারী। প্রভুর কি ধর্ম্মানুরাগ, অনায়াসলব্ধ ঈদৃশ রূপ দেখিয়া অন্য আর কে বিচার করিয়া থাকে ?

শার্ঙ্গরব। রাজন্ মৌন অবলম্বন করিয়া রহিলেন কেন ?

রাজা। ঋষিগণ, আমি অনেক চিন্তা করিয়াও ইহার সহিত পরিণয়ের বিষয় স্মরণ করিতে পারিলাম না। ইহার গর্ভলক্ষণ প্রকাশ পাইয়াছে। ইহার সন্তান, (ইঁহাকে গ্রহণ করিলে) আমার ক্ষেত্রজসন্তান হইবে, ঈদৃশ অবস্থায় কিরূপে ইহাকে গ্রহণ করি ?

শকুন্তলা। [স্বগত] আর্য্যপুত্রের বিবাহেই সন্দেহ ; আমার উচ্চ আশা এক্ষণ কোথায় ?

শার্ঙ্গরব। আপনার কর্ত্তৃক উপভুক্তা কন্যাকে যিনি অনুমোদন করিয়াছেন ; এবং দস্যুকে অপহৃত অর্থসমূহ প্রদান করিয়া যেরূপ সেই ধনের অধিকারী করা যায়, সেইরূপ আপনাকে যিনি কন্যার পরিণেতা করিয়াছেন সেই ঋষিকে আপনি বিমানিত করিবেন না।

শারদ্বত। শার্ঙ্গরব, তুমি এক্ষণ বিরত হও। শকুন্তলে, আমাদের যাহা বলিবার তাহা বলিলাম, নরপতি এইরূপ বলিলেন, এক্ষণে বিশ্বাসোৎপাদক প্রত্যুত্তর ইঁহাকে প্রদান কর।

King.—[Looking attentively at Sakuntala ; aside]. Revolving (in my mind) if this beauty of spotless loveliness, which has come in this manner, has been accepted before or not, I can neither

enjoy nor give it up ; like a bee in the morning (with regard to) a kunda flower having dew within it. [*Remains musing*].

Warder.—Oh ! What a devotion of our lord to righteousness ! Who else would think of hesitating at the sight of such a beauty that has easily come (of itself) ?

Sarngarava.—Why are you, O king, silent ?

King.—O hermits, though I have revolved (the matter in my mind), yet I cannot really remember my acceptance (in marriage) of her. How then shall I take her, in whom the signs of pregnancy are plainly visible, knowing myself to be a husband in name ?

Sakuntala.[*Aside*].—My husband has doubts regarding the marriage itself. Those high, far-reaching hopes ! where are they !

Sarngarava.—That sage who approves of his daughter outraged (by you), and who offering back his stolen property has made you, like a robber, an object of the gift—that sage should not be insulted by you.

Saradwata.—Sarngarava, let you stop now. Sakuntala, we have said what we had to say ; his majesty says so. Give him a reply that is convincing.

शकुन्तला। अन्या अवस्था इति अवस्थान्तरम् मयूरव्यंसकादयश्चेति निपातनात् समासः। स्मारितेन इति गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीया। मोचनीयः लोकनिन्दायाः रक्षणीयः। व्यवसितं स्मारणाय आयुमुद्यमः कृतः। व्यवपूर्व्वात् सोधातोः भावे क्तः। समुदाचारः आर्य्यपुत्रशब्देन सम्बोधनरूपा रीतिः। युक्तं नाम, नामेति कुत्सने। स्वभावोत्तानहृदयं स्वभावेन प्रकृत्या उत्तानं ऋजु हृदयं यस्य तम् ईदृशैः निष्ठुरैः मर्म्मविदारकैः। समयः शपथः पूर्व्वः यस्मिन् तत् यथा तथा समयपूर्व्वकं प्रतिज्ञानपूर्व्वकम्, समयाः शपथाचारकालसिद्धान्तसंविदः इत्यमरः। प्रत्याख्यातुम् अस्वीकर्त्तुं निराकर्त्तुमिति यावत् शकष्टषेत्यादिना युक्तमिति अहार्थोपपदे तुमुन् उत्पूर्व्वात् तनोतेः कर्त्तरि णः उत्तानम् तथाच वार्त्तिकं तनोतेरुपसंख्यानम्।

राजा। कूलङ्कषा सिन्धुः प्रसन्नं अम्भः तटतरुञ्च इव त्वं व्यपदेशं आविलयितुं इमं जनं च पातयितुं किं ईहसे॥२१॥ कूलं कषति या सा कूलङ्कषा कूलमुद्रुजा। सिन्धुः नदी, (देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्) प्रसन्नं निर्म्मलं जलं तटस्थ तरुः तम् तटस्थं वृक्षं च इव, त्वं (कुलटा इति आशयः) व्यपदिश्यसे ख्यायते

अनेन इति व्यपदेश: कुलं, आत्मन: निर्मलं वंशं, आविलयितुं, आविलं कलुषं कर्त्तुं इमं तटस्थं नि:सम्पर्कमिति भाव: जनं पातयितुं निरये निमज्जयितुञ्च किं ईहसे चेष्टसे। उपमालङ्कार: ; आर्य्या जाति: ।

कलुषोऽनच्छ आविल इत्यमर: । आविलं करोति इति आविलयति, आविल-शब्दात् णिच् । कूलं कषति या सा कूलङ्कषा "सर्वकूलाभ्रकरीषेषुकष:" इति खच्प्रत्यय:, "अरुर्द्विषदजन्तस्येति" मुमागम: । The root कष् takes the suffix खच् having सर्व, कूल, अभ्र and करीष used with it as its accusative case. The bases अरुष्, द्विषत्, and those that end in vowels admit of the augment मुम्, when verbs admiting खच् enter into a compound state (उपपदसमास) with them. करीष means dry cowdung.

Change of voice.—कुलङ्कषया सिन्धा इव त्वया...ईह्यते ।

ईह लुङ् ऐहिष्ट, लिट् ईहाञ्चक्रे ।

शकुन्तला । परमार्थत: सत्यमेव ; तृतीयाशास्त्रस् प्रकृत्यादिभ्यश्चेति तृतीया। परस्य स्वे तरस्य परिग्रहं कलत्रं शङ्कते यस्तेन । अभिज्ञायते अनेन इति अभिज्ञान स्मृत्युत्पादकं वस्तु तेन। अपनेष्यामि इत्यस्य कर्म्मण: अशरीरत्वेऽपि कर्त्तृस्थित्वा-भावात् नात्मनेपदम् ।

राजा । उदार: मुख्य: कल्प: न्याय: कल्प: स्यात् प्रत्यये न्याये इति विश्व: । यदयं पक्ष: प्रस्तुतोऽभिज्ञानप्रदर्शनरूप: सोऽतियुक्त ।

शकुन्तला । [मुद्राया: अङ्गुरीयकस्य स्थानं अङ्गुल्या: अंशविशेषं परामृश्य सहा]

गौतमी । शक्रावतार: गङ्गातीरे जनपदविशेष: । शचीतीर्थं शच्या कृत इति प्रसिद्धिं गत: जलावतार:, ("तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरज:सु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु" इति मेदिनी) तत्र जाह्नवीजलं वन्दमानाया: उपस्पृश्य प्रणमन्त्या: ते करात् नद्यां विगलितम् ।

राजा । स्त्रैणम् स्त्रीसमूह: प्रत्युत्पन्ना मतिर्यस्य तत् तथोक्तम । प्रत्युत्पन्न-मतित्वं प्रतिभानवत्वम् । "तात्कालिकी तु प्रतिभा प्रत्युत्पन्नमति: स्मृता ।" स्त्रीणां समूह इति स्त्रैणं "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" इति नञ् । Here नञ् is appended to स्त्री in the sense of collection ; in other senses e. g. हित, भाव &c. it may be used.

शकुन्तला । विधिना दैवेन भाग्येनेति यावत् ।

राजा । श्रोतव्यं श्रवणविषय: ननु दर्शनविषय: अतएव संशयबुद्धि: ।

शकुन्तला । ननु इति वाक्यारम्भे सम्बोधने वा ।

शकुन्तला। पुत्रः कृतः इति पुत्रकृतः "सह सुपा" इति समासः ततः स्वार्थे कन्। यद्वा कृतम् करणम् पुत्रस्य कृतं करणं यस्य स इति बहुव्रीहौ "शेषाद्विभाषा" इति कः। पीतकः शावः "पोतः पाकोऽर्भकोडिम्भः पृथुकः शावकः शिशुरित्यमरः। उपच्छन्दितः प्रार्थितः प्रलोभितः इत्यर्थः। हस्तस्य अभ्यासः समीपः तम्। समीपे निकटासन्नसन्निकृष्टसनीडवत् सदेशाभ्याससविधसमर्यादसवेशवत्। उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययमित्यमरः। प्रणयः धाञ्चा उदकपानेच्छा इत्यर्थः। सगन्धेषु स्वगणेषु आत्मीयेषु समानः तुल्यः गन्धः सम्बन्धः येषां ते सगन्धा बहुव्रीहौ समानस्य छन्दस्य मूर्द्धप्रभृत्युदर्केषु इति सूत्रे समानस्येति योगविभाग इष्टप्रसिद्ध्यर्थं क्रियते तेन सपक्षः सजातीय इत्येवमादयः सिद्धा भवन्ति आदिग्रहणात् सगन्धः इत्यस्यापि प्राप्तिः। इति समानस्य सादेशः। गन्धो गन्धकः आमोदे लेशे सम्बन्धगर्व्वयोरिति विश्वः। अरण्ये निवसतः इति आरण्यकौ आरण्यशब्दात् वुञ् (कण् वा) वन्यौ "अरण्यान्मनुष्ये इति।"

শকুন্তলা। [জনান্তিকে] সেই অনুরাগে এরূপ অবস্থান্তর যখন ঘটিয়াছে, তখন স্মরণ করাইয়াই বা কি ফল! আমার আত্মাকে কলঙ্ক হইতে রক্ষা করিতে হইবে এই জন্য এই উদ্যম করিয়াছি। [প্রকাশ্যে] আর্য্যপুত্র [অর্দ্ধ উচ্চারণ করিয়া] পরিণয়েই যখন সন্দেহ তখন এরূপ সম্ভাষণরীতি যোগ্য নহে। পৌরব, পূর্ব্বে আশ্রমে স্বভাবসরল এই ব্যক্তিকে প্রতিজ্ঞাপূর্ব্বক প্রবঞ্চনা করিয়া এক্ষণে এইরূপ বাক্যের দ্বারা প্রত্যাখ্যান করা আপনার উপযুক্ত বটে!

রাজা। (ঈদৃশ) পাপ শান্ত হউক (ঈশ্বর যেন না করেন)। কূলবিপাটিনী নদী যেরূপ নির্ম্মল জলকে কলুষিত করে, এবং তটস্থিত তরুকে পাতিত করে; তুমিও সেইরূপ নিজ বংশকে কলঙ্কিত ও (নিঃসম্পর্ক) এই ব্যক্তিকে (নরকে) পাতিত করিতে কেন চেষ্টা করিতেছ?

শকুন্তলা। ভাল, যদি যথার্থই পরপত্নী শঙ্কা করিয়া আপনি এরূপ আচরণে প্রবৃত্ত হইয়া থাকেন, তাহা হইলে অভিজ্ঞানের দ্বারা আপনার আশঙ্কা দূর করিতেছি।

রাজা। উৎকৃষ্ট প্রস্তাব।

শকুন্তলা। [অঙ্গুরীয়ের স্থান স্পর্শ করিয়া] হা ধিক্ আমার অঙ্গুলী অঙ্গুলীয়শূন্য [বিষন্নভাবে গৌতমীর মুখের দিকে দৃষ্টিপাত করিলেন]।

গৌতমী। শক্রাবতার গ্রামে শচীতীর্থে গঙ্গাজল বন্দনা করিবার সময় নিশ্চয় তোমার অঙ্গুলীয় পড়িয়া গিয়াছে।

রাজা। [ঈষৎ হাস্য করিয়া] স্ত্রীলোক অতিশয় প্রত্যুৎপন্নমতি এইরূপ যে কথিত আছে, তাহা এই। (অর্থাৎ ইহা তাহার একটি উত্তম উদাহরণ)।

শকুন্তলা। বিধাতা এ বিষয়ে প্রভুত্ব দেখাইয়াছেন; অন্য একটি বিষয় বলি।

রাজা। এক্ষণে শুনিবার বিষয় হইল।

শকুন্তলা। এক দিবস নবমল্লিকামণ্ডপে, আপনার হস্তে পদ্মপত্রে জল ছিল।

রাজা। আমি শুনিতেছি।

শকুন্তলা। সেই সময়ে আমার কৃতপুত্র দীর্ঘাপাঙ্গ নামে মৃগশিশু উপস্থিত হইল। এ প্রথমে জলপান করুক এই বলিয়া আপনি অনুকম্পাপরবশ হইয়া তাহাকে জল দিলেন, সে. কিন্তু অপরিচয় হেতু আপনার হস্তসমীপে গমন করিল না। পশ্চাৎ আমি সেই জল গ্রহণ করিলে সে উদকপানে ইচ্ছা প্রকাশ করিল। তখন আপনি এই বলিয়া হাসিয়াছিলেন যে সকলেই আপন আপন আত্মীয়ে বিশ্বাস করে, তোমরা দুই জনেই বন্য।

Sakuntala–[*Aside*]. That love having undergone such a change, what is the good of reminding ? But I have set about it because my ownself is to be acquitted. [*Aloud*]. My lord ; [*Half uttering.*] When marriage itself is doubted, the form of address should not be this. Descendant of Puru ! It is quite worthy of you to disown in such words this person of a heart frank and unreserved by nature, after having enticed her in that manner with solemn pledges in the hermitage ?

King.—Heaven forbid it ! (literally ; let this sin be averted !) Why dost thou seek to soil thy family and demean this person ; even as a river undermining its bank makes its limpid water turbid and fells the riparian tree ?

Sakuntala.—Very good ! if you have proceeded thus, believing me to be really the wife of another person, then I shall remove your doubt by some token.

King.—A noble proposal.

Sakuntala.—[*Touching the side of the ring*] Alas ! Alas ! my finger is without the ring. [*Looks with anguish at Gautami*].

Gautami.—Surely the ring slipped off (from your finger), when you were bowing to the water of *Sachitirtha in Sakravatra.*

King.—[*With a smile*]. This is what is called ready-witted female sex.

Sakuntala.—Fate has shown its power in it. I shall tell you another circumstance.

K ng.—It has now become a matter to be heard !

Sakuntala.—One day in the jasmine-bower, there was water in your hand in a cup of lotus-leaves.

King.—We are listening.

Sakuntala.—At that instant, my adopted child, the little fawn, named *Dirghapanga*, came. Saying—"Let it drink first," you kindly tried to induce it by means of water. But for want of familiarity it did not come near your hand. Then on my taking the water, it did favour (to it). Then you laughed, saying "every one confides in one's own kind; in this particular case, both of you are wild."

राजा। आत्मनां कार्य्यं निर्व्वर्त्तयन्ति याः तासां स्वाभिप्रेतसाधने तत्पराणां दुष्टानां नारीणां अनृतमयैः मिथ्याप्रचुरैः वाङ्मधुभिः अमृतकल्पैः वचनैः विषयिणः इन्द्रियार्थाकृष्टचेतनाः नराः आकृष्यन्ते अपह्रियन्ते कार्य्याकार्य्यविवेकविधुरा भवन्ति इत्यर्थः ननु मादृशाः इति तात्पर्य्यम्।

गौतमी। मन्त्रयितुं वक्तुं। कितेन वाति इति कितवः (कित्शब्दपूर्व्वात् वाधातोः कः) शठः तस्य कर्म्म इति कैतवं शाठ्यं तस्य अनभिज्ञः (कर्म्मणि षष्ठी)। तपोवने वर्द्धितत्वात् सरलः अयं शकुन्तलारूपः जनः शाठ्यं न जानाति।

राजा। तापसी चासौ वृद्धा चेति कर्म्मधारये पूर्व्वपदस्य पुंवद्भावः। तत् सम्बोधने। स्त्रीणां अमानुषीषु अशिक्षितपटुत्वं संदृश्यते; किमुत याः प्रतिबोधवत्यः। परभृताः अन्तरिक्षगमनात् प्राक् स्वं अपत्यजात अन्यैः द्विजैः पोषयन्ति खलु॥ २२॥

स्त्रीणां मध्ये (निर्द्धारे षष्ठी) अमानुषीषु मानुषीभिन्नासु तिर्य्यग्योनिषु "वञ्चक वागादिव्यवहाररहितासु अपि इति भावः" अशिक्षितं यत् पटुत्वम् तत् शिक्षामन्तरेण नैसर्गिकं कौशलं संदृश्यते; याः प्रतिबोधवत्यः विशिष्टबुद्धयः मानुष्यः ताः किमुत, तासां नैसर्गिकचातुर्य्ये संशयावसरो नास्तीति भावः। परभृताः कोकिलाः (जातित्वस्य मुख्यया वृत्त्या अग्रहणात् न ङीप्), अन्तः स्वर्गपृथिव्योः मध्ये ईक्ष्यते यत् तत् (ईक्ष-धातोः कर्म्मणि घञ्) यद्वा अन्तः ऋक्षाणि नक्षत्राणि यस्य तत् पृषोदरादित्वात् पक्षे ह्रस्वः ऋकारस्य रित्वं वा। अन्तरिक्षं आकाशं तेन गमनं यस्मात् उड्डयनात् इत्यर्थः प्राक् स्वं अपत्यजातं शावसमूहं अन्यैः द्विजैः पक्षिभिः (दन्तविप्राण्डजा द्विजाः इत्यमरः) वायसैः पोषयन्ति पालयन्ति। द्विजैरिति अणिकर्त्तुः कर्म्मत्वाभावात् तृतीया। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः अलङ्कारः। वंशस्थविलं वृत्तम्।

Change of voice.—अशिक्षितपटुत्वं संपश्यन्ति (लोकाः)। परभृताभिः स्वमपत्यजातं पोष्यते।

आत्मनः स्वस्य हृदयं तेन अनुमानं सम्भावनम् तेन; यथा स्वहृदयं कौटिल्यपूर्णं तथा अपरस्यापि हृदयं मन्यसे। धर्म्मरूपे कञ्चुके आवरणे प्रविशिनः सोपधि

धार्म्मिकत्वं प्रख्यापयत: अतएव तृणैन च्छन्न: आवृतमुख: य: कूप: तेन उपमा साहृश्यं यस्य तस्य तृणैराच्छादितत्वात् स्थिरभूमित्वेन परिज्ञायमानस्य अतएव पादैन स्पृष्ट: पतनहेतुभूतस्य कूपस्य इव धर्म्मो: वचनै: आत्मन: सत्यसम्बत्वं प्रकटयत: किन्तु वचनचातुर्य्येण विमुग्धस्य हस्ताभ्यासं उपगतवती नाशकारणस्य ते अनुकृतिं सदृशा-चरणं क: कुर्य्यात् न कोऽपि इत्याशय: ।

N. B.—Notice the confusion of metaphor here. It is due to her just indignation.

রাজা। স্বকার্য্যসাধনোদ্যত নারীদিগের ঈদৃশ অসত্য মধুময় বাক্য দ্বারা বিষয়িগণ আকৃষ্ট হয়।

গৌতমী। মহাশয় এরূপ বলিবেন না। এই ব্যক্তি তপোবনে বর্দ্ধিত, শঠতায় অনভিজ্ঞ।

রাজা। তাপসবৃদ্ধে, পশুপক্ষিজাতীয় স্ত্রীগণেও স্বাভাবিক চাতুর্য্য দেখিতে পাওয়া যায়। যাহারা বিশিষ্টবুদ্ধিযুক্ত তাহাদের কথা কি বলিব। কোকিলেরা আপনাদের শাবকগুলিকে উড়িতে শিখিবার পূর্ব্বে অন্য পক্ষী (বায়স) দ্বারা প্রতিপালন করাইয়া লয়।

শকুন্তলা। [সক্রোধে] অনার্য্য, আপন হৃদয় অনুসারে অনুমান করিতেছ। তুমি ধর্ম্মধ্বজ, তৃণাচ্ছাদিত কূপতুল্য, তোমার অনুকরণ কে আর করিবে?

King.—Men addicted to pleasures of the senses are tempted by such honeyed words, full of untruth, of women serving their own ends.

Gautami.—O gifted king! It beseems you not to speak thus. This person, bred up in the holy wood, is utterly ignorant of guile.

King.—Holy matron, untaught ability is seen, in females other than women; not to speak of those that are possessed of reason. The cuckoos get their own young ones reared by other birds before (they are able to) fly into the sky.

Sakuntala.—[*With anger*]. Dishonourable man, thou judgest by an inference from thy own heart. Who else will follow the track of thee who entering the cloak of virtue resemblest a well covered over with grass?

राजा। सन्दिग्धा संशयं आश्रिता बुद्धि: यस्य तं ताहृशं; नास्ति कैतवं यस्मिन् स: अकैतव: अकृत्रिम: ।

मयि एव विस्मरणदारुणचित्तवृत्तौ रह:वृत्तं प्रणयं अप्रतिपद्यमाने अति-लोहिताक्ष्या अनया अतिरुषा कुटिलयो: भ्रुवो: भेदात् स्मरस्य शरासनं भग्नमिव ॥२३॥

मयि एव विस्मरणेन दारुणा निठुरा परुषा चित्तस्य वृत्तिर्यस्य तस्मिन् स्मृतिभंशात् निष्करुणे, अतएव रहः एकान्ते वृत्तं प्रणयं प्रेमाणं अप्रतिपद्यमाने अस्वीकुर्व्वाणे सति अतिलोहिते अतिरक्ते अक्षिणी यस्याः तया (बहुव्रीहौ षक्) अनया शकुन्तलया अतिरुषा, अतिक्रोधेन हेतुना कुटिलयोः वक्रयोः भ्रुवोः भेदात् पृथग्भावात् स्मरस्य कन्दर्पस्य शरासनं धनुः भग्नमिव इत्युत्प्रेक्षा। क्रोधातिशयात् नृपेऽतिगम्भीरोऽपि अनुरागः अनया मुहूर्त्तं उपेक्षितः इति अलङ्कारेण वस्तुध्वनिः। यद्वा मयि विषये अतिरुषा हेतुना आलोहिताक्ष्या अनया शरासनं भग्नमित्यन्वयः। वसन्ततिलकं वृत्तम्। भ्रूलतायाः कन्दर्पशरासनत्वम् प्रायेणोच्यते कविभिः, तथाच कुमारे अथ स ललितयोषिद्भ्रूलताचारुशृङ्गम्। गीतगोविन्दे अपि।

भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि बाणाः गुणः श्रवणपालिरितिस्मरेण।
तस्यामनङ्गजयजङ्गमदेवतायां अस्त्राणि निर्ज्जितजगन्ति किमर्पितानि॥

मयि एव इत्यत्र स्मृतिभंशवानहमेव मृषावदामि नेयमिति द्योतयत्येवकारः।

Change of voice.—...अतिलोहिताक्ष्या इयं शरासनं भग्नवती। भन्ज लटि भनक्ति, लङि अभनक्, लिटि बभञ्ज, लुङि अभाङ्क्षीत् अभाङ्क्ताम् अभाङ्क्षुः।

রাজা। [আত্মগত] ইঁহার ক্রোধ অকৃত্রিম বলিয়া বোধ হইতেছে এবং আমার বুদ্ধিকে সন্দেহাশ্রিত করিয়াছে। আমিই বিস্মরণহেতু নিষ্ঠুরচিত্ত হইয়া গোপনে সঙ্ঘটিত প্রণয় অস্বীকার করায়, অতিক্রোধে অতিলোহিতাক্ষী ইনি কুটিল ভ্রূদ্বয় ভিন্ন করত যেন কন্দর্পের ধনু ভগ্ন করিয়া ফেলিলেন।

King.—[*Aside*]. Her anger, making me of a wavering mood, seems to be unassumed (genuine). For, with the state of my mind stern by loss of memory, I having disowned the love privately made, she, with crimson eyes because of extreme anger, has, by the dissevering of the curved eyebrows, snapped asunder, as it were, the bow of Cupid.

पुरोहितः। प्रथितं सर्व्वैव विदितं ; न तस्मिन् चरिते किमपि गोप्यमस्ति।

शकुन्तला। सुष्ठु इत्यव्ययम् भद्रमित्यर्थः स्वस्याः छन्देन अभिप्रायेण चरति या सा स्वच्छन्दचारिणी स्वैरिणी। पुरोः वंशः तस्मिन् प्रत्ययः विश्वासः (प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु इत्यमरः) तेन हेतुना, पुरुवंशीया न अधार्म्मिकाः इति विश्वासवशादित्यर्थः। मुखे मधु यस्य तस्य मुखमधोः हृदये स्थितं विषं यस्य तस्य पयोमुखस्य विषकुम्भस्येव अस्य हस्तस्य अभ्यासं समीपं प्राप्ता। अस्य वचने कृतविश्वासा आत्मानं समर्पितवती इत्यर्थः। [पटान्तेन वसनाञ्चलेन आवृत्य आच्छाद्य]।

शार्ङ्गरव:। चपलस्य कर्म्म इति चापलं अविमृश्यकारित्वं परिहृतं व्याहतं विफलं सत् इत्यमनेन प्रकारेण दहति सन्तापयति मनोरुजं जनयति इत्यर्थ:। उक्तञ्च भारविणा।

सहसा विदधीत न क्रियामविवेक: परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धा: स्वयमेव सम्पद:॥

अत इति—अत: रह: सङ्गतं विशेषात् परीक्ष्य कर्त्तव्यम्; अज्ञातहृदयेषु सौहृदं एवं वैरीभवति ॥२४॥

अत: अस्मात् कारणात् चपलताया: विपत्परिणामित्वात् रह: रहसि रहश्चोपांशु चालिङ्गे इत्यमर: निर्जने सङ्गतं प्रणयादिकं विशेषात् विशेषं यत्नातिशयमित्यर्थ: आश्रित्य इति ल्यबलोपे पञ्चमी परीक्ष्य कर्त्तव्यम्। अज्ञातं व्यवहारादिना अपरिज्ञातं हृदयं येषां तेषु लोकेषु विषये सौहृदम् वन्धुत्वम् एवं अनेन प्रकारेण वैरीभवति, अवैरं वैरं भवति इति च्वि: शत्रुत्वे विपरिणमति। वैधर्म्म्येणार्थान्तरन्यास: अलङ्कार:।

Change of voice.—सौहृदेन वैरीभूयते।

राजा। अवभवत्यां शकुन्तलायां प्रत्यय: विश्वास: तस्मात्, शकुन्तलावाक्ये विश्वासेन केवलेन प्रमाणान्तरमनपेक्ष्यैव इत्यर्थ: संयुत: दोष: येषु तानि अक्षराणि तै: संयुतदोषाक्षरै: विषदिग्धै: शरैरिव सापवादै: वचनै: अस्मान् क्षिणुथ अस्माकं यशोलुम्पथ। नैतद्युक्तं प्रमाणान्तराभावादिति भाव:। क्षि हिंसायामिति धातो: स्वादिगणीयात् लटि मध्यमपुरुषवहुवचनम्। लिट—चिक्षाय, लुङ् अक्षैषीत् क्त: क्षीण:

शार्ङ्गरव:। [अनसूया क्रोधेन सह वर्त्तमानं इति सासूयम्] अधरं हीनं अपकृष्टमिति यावत् तादृशम् उत्तरम्।

य: आजन्मन: शाठ्यमशिक्षित:, तस्य जनस्य वचनं अप्रमाणं; यै: परातिसन्धानं विद्येति अधीयते ते आप्तवाच: सन्तु किल ॥२५॥

य: पुरुष: जन्मन: आरभ्य समासस्य विभाषितत्वात् न समास: समासपक्षे आजन्म इत्येवं स्यात्; शाठ्यं खलतां द्विजिह्वत्वं इति यावत् न शिक्षित: नोपदिष्ट: परेण स्वप्रवृत्त्या वा; वाल्यादेव आर्ज्जवप्रधान: इत्यर्थ:, तस्य तादृशस्य जनस्य वचन अप्रमाणं नास्ति प्रमाणं निश्चयप्रतीते: हेतु: यस्य तत् तथोक्तम् अविश्वास्यम्। यै: राजभि: दुष्यन्तप्रमुखैरिति भाव: परेषां शत्रूणां अन्येषामिति ध्वनि: अतिसन्धानं प्रवञ्चनं प्रतारणमिति यावत् विद्येति अधीयते, यावता यत्नेन अनुरागेण च विद्या अभ्यस्यते तावता अध्यवसायेन अधीयते पठ्यते, अधिगम्यते इति यावत्, परप्रवञ्चनपरा: सर्व्वथा विश्वासानर्हा:, ते आप्ता: प्रत्ययिता: विश्वस्ता: वाच: येषां ते तथाविधा: सन्तु किल इति काकु:। किलेति सम्भावनायाम्। सोल्लुण्ठवचनमिदम्। विशेषे वक्तव्ये सामान्यनिर्द्देशरूपाप्रस्तुतप्रशंसा। वृत्तमुपजाति:।

शिच्चित: इत्यत्र द्विकर्म्मकात् शिचधातो: ण्यन्तात् अप्रधाने कर्म्मणि क्त: दुह्यादिषु अयमन्तर्भवति। क्वचित् प्रसज्यप्रतिषेधेऽपि समास: इष्यते इति न शिच्चित: इति अशिच्चित: इति नञ्समास:।

Change of voice.—(कोऽपि) यं शाठ्यं अशिच्चितवान्...वचनेन अप्रमाणेन भूयते। यदा येन...अशिच्चितेन भूयते। ये अधीयते तै: आप्तवाग्भि: भूयताम्।

राजा। सत्यवादिन्निति सोल्लुण्ठम्। अभ्युपगतं यत्त्वयोच्यते तदङ्गीकृतम्, किं फलमुद्दिश्य अस्या: प्रवञ्चनं मत्कर्त्तृकं प्रवृत्तमिति वेदितुमिच्छामि राज्यलाभमुद्दिश्य राजभि: शत्रुविमोहने नीतिशास्त्रोक्तं कौशलं प्रयुज्यते; अस्या: प्रतारणेन तथाविध: कश्चित् लाभो नास्ति; प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते इति न्यायात् केनाप्युद्देश्येन नात्र भाव्यं तत् खलु कीदृशं सम्भावयसि।

शार्ङ्गरव:। अस्या: प्रतारणेन विनिपात: ध्वंस: लभ्यते इति वाक्यसमाप्ति:।

राजा। साधुरयप्रवृत्ते: पुरुवंशीयै: निरयपातहेतुकं कर्म्म स्वेच्छयानुष्ठीयते इति वाक्यं न श्रद्धातुमर्हम्। श्रत् इति आदरार्थे अव्ययम् तत्पूर्व्वात् दधाते: कर्म्मणि यत्। श्रदन्तरोरुपसर्गवद्वृत्ति:।

शारद्वत:। उत्तरेणेति गम्यमानसाधनक्रियापेच्चया करणत्वात् तृतीया।

एषा भवत: कान्ता एनां त्यज वा गृहाण वा। दारेषु सर्व्वतोमुखी प्रभुता उपपन्ना हि॥२६॥

"तदित्युपसंहारे" इति राघवभट्ट। एषा शकुन्तला भवत: कान्ता पत्नी अत्र अणीयानपि संशयो न वर्त्तते। एनां गृहाण त्यज वा, तव विषये अस्मद्वक्तव्यं नास्ति; हि यत: दारेषु पत्न्यां विषये प्रभुता उपयन्तुरिति शेष: सर्व्वत: विषये मुखं प्रसर: यस्या: सा सर्व्वतोमुखी उपपन्ना, त्यागे, दाने ताड़ने वा समर्थतरा न कुत्रापि व्याहन्यते इति तात्पर्य्यम्। सामान्येन विशेषसमर्थनरूप: अर्थान्तरन्यास: अलङ्कार:।

Change of voice.—अनया...कान्तया भूयते; इयं त्यज्यतां गृह्यतां वा सर्व्वतोमुख्या प्रभुतया उपपन्नया भूयते।

शकुन्तला। कितवेन धूर्त्तेन विप्रलब्धा प्रतारिता।

পুরোহিত। ভদ্রে দুষ্মন্তের চরিত্র সর্ব্বজনবিশ্রুত, কিন্তু ইহা (তোমার সহিত পরিণয়) অবগত নহি।

শকুন্তলা। আমি যখন পুরুবংশে বিশ্বাসবশতঃ যাহার মুখে মধু অন্তরে হলাহল ঈদৃশ এই প্রবঞ্চকের হস্তসমীপে উপস্থিত হইয়াছি, তখন আমি যে স্বৈরিণীরূপে পরিগণিত হইব তাহা উত্তম [বসনাঞ্চলে মুখ আবৃত করিয়া রোদন করিতে লাগিলেন]।

শার্ঙ্গরব। স্বকৃত চাপল্য নিষ্ফল হইলে এইরূপে সন্তাপদায়ক হয়। এই হেতু

বিশেষ পরীক্ষা করিয়া গোপনে প্রণয়াদি করিতে হয়। অজ্ঞাতস্বভাব ব্যক্তির সহিত কৃত বন্ধুত্ব শত্রুপরিণামী হয়।

রাজা। আপনারা কি ইহার কথায় বিশ্বাস করিয়া আমাকে এরূপ সদোষ বাক্য দ্বারা বিগর্হিত করিতেছেন ?

विदूषकः। तिष्ठ तावत् यावत् अनेन दण्डकाष्ठेन कन्दर्पवाणं नाशयिष्यामि (दण्डकाष्ठं यष्टिमुद्यम्य उत्तोल्य)

राजा। ब्रह्मणः वर्च्चः इति ब्रह्मवर्च्चसम् ब्रह्मतेजः तेजः पुरीषयोर्वर्च्चः। ब्रह्म-हस्तिभ्यां वर्च्चसः इति समासान्तः अच्। The word वर्च्चस् if compounded with ब्रह्मन् and हस्तिन्, admits of the augment अ। अनुकारिणीषु सदृशीषु। विलोभयामि प्रीणयामि।

विदूषकः। आसन्ना विश्वासभाजनत्वात् सन्निकृष्टा परिचारिका। प्रतिकृतिः चित्रम्।

राजा। हृदयस्य विनोदस्य स्थानं उपायः; चित्तस्य निर्वृतिकारणं उक्तञ्च—वियोगेचायोगे प्रियजनसदृक्षामनुभवनं ततश्चित्रं कर्म्म स्वप्नसमये दर्शनमपि। तदङ्ग-स्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारः कामव्यथितमनसां कोऽपिनिगदितः।

विदूषकः। मणिशिला मणिरूपा दृषत् सा एव पट्टः पीठम् तेन सनाथः सहितः। उपहारेण उपहारस्वरूपेण पुष्पसमूहेन रमणीयता तया। विकसितानि पुष्पाणि उपायनीकृत्य रत्नमयमासनञ्च उपवेशनार्थं सन्दिश्य युवयोः शुभागमनमिति सुरभिवायुरूपया वाचा उक्त्वेव आवां प्रत्युद्व्रज्य अभ्यर्थयते इव।

सानुमती। लतां संश्रिता आरूढ़ा इति, लतासंश्रिता वहूनि मुखानि यस्य तं वहुमुखं अनेकप्रकारं वहुविधं रूपायैः प्रकटीभूतमित्यर्थः।

राजा। प्रत्यादेशस्य प्रत्याख्यानस्य वेलायां समये। सङ्कीर्त्तितं प्रसङ्गक्रमेणोक्तम् कत संशव्दे इति धातोश्चौरादिकात् कर्म्मणि क्तः "उपधायाश्च" इति उपधाभूतस्य ऋतः इत्, रपरत्वम्। उपधायां च इति दीर्घः। कच्चित् इति अव्ययं पृच्छायां वर्त्तते कच्चित् कामप्रवेदने इत्यमरः।

विदूषकः। अवसाने वाक्यसमाप्तौ, अन्ते ; परिहासविजल्पः नर्म्मोक्तं न भूतार्थः सत्यार्थः। आख्यातम् कथितम्। (चक्षधातोः ख्यातिः वा क्तः) मृत्पिण्ड इव जडा इत्यर्थः वुद्धिः यस्य तेन। यथा नर्म्मोक्तित्वेन गृहीतमवबुद्धम्। भवितुमर्हति यत् तत् भवितव्यम् अवश्यम्भावि वस्तु (कृत्यल्युटो वहुलम् इति वाहुलकात् कर्त्तरि तव्यप्रत्ययः) तस्य भावः भवितव्यता।

सानुमती। एवमेतत्। दुर्निवारं खलु नियतिविलसितमित्यर्थः।

विदूषकः। ईदृशं शोकेनाभिभूतत्वम्। अनुपपन्नं अयुक्तम्। वसति इति वास्तव्यः वसेस्तव्यत् कर्त्तरि णिच्च। शोकः वास्तव्यो येषु ते शोकवास्तव्याः शोकवस्तव्या इति पाठे वसधातोः अधिकरणे तव्यः वस्तव्यः। शोकस्य वस्तव्याः इति शोकवस्तव्याः। प्रकृष्टः वातः इति प्रवातः तस्मिन्। उक्तञ्च कविना द्रुमसानुमतां किमन्तरं यदि वायौ द्वितीयेऽपि ते चलाः।

राजा। निराकरणेन विक्लवा कातरीभूता तस्याः समवस्थां दीनां दशां। नास्ति शरणं रक्षिता यस्य तथोक्तः।

इत इति—इतः प्रत्यादेशात् स्वजनं अनुगन्तुं व्यवसिता सा, गुरुसमे गुरुशिष्ये तिष्ठेति उच्चः मुहुः वदति वाष्पप्रसरकलुषां दृष्टिं क्रूरे मयि पुनः अर्पितवती इति यत् तत् सविषं शल्यमिव मां दहति। ९

इतः मत्सकाशात् प्रत्यादेशात् प्रत्याख्यानात् हेतोः स्वजनं गौतमीप्रमुखं अनुगन्तुं अनुसर्त्तुं व्यवसिता कृतोद्यमा (अकर्म्मकत्वात् कर्त्तरि क्तः) सा, गुरुणा पित्रा समे तुल्ये तद्वत् माननीये गुरोः पितुः कण्वस्य शिष्ये शार्ङ्गरवे. तिष्ठ अत्रैव वस इति उच्चैः अनीचैः मुहुः पुनः पुनः वदति सति, यस्य च भावेन भावलक्षणमिति सप्तमी, वाष्पाणां अश्रूणां प्रसरेण निर्गमेण कलुषां, आविलां, अश्रुपूर्णत्वात् कातरां दृष्टिं क्रूरे निष्ठुरे मयि पुनरपि अर्पितवती, शरणार्थिनीति भावः, इति यत् तत् अर्पणं

सविषं विषदिग्धं शल्यं अस्त्रविशेष इव मां दहति मम अन्तस्तापं जनयति। उप-मालङ्कारः। शिखरिणीवृत्तम्।

Change of voice—व्यवसितया तया बाष्पप्रसरकलुषा दृष्टिः अर्पिता इति यत् तेन सविषेण शल्येन इव अहं दह्ये।

বিদূষক। অপেক্ষা করুন, আমি এই দণ্ডকাষ্ঠের দ্বারা কন্দর্পের বাণ বিনাশিত করিতেছি। [যষ্টি তুলিয়া আম্রমুকুল ভগ্ন করিতে ইচ্ছা করিল]।

রাজা। ঈষৎ হাস্যের সহিত] ভাল, ব্রহ্মতেজ দেখিলাম। বয়স্য কোথায় উপবিষ্ট হইয়া প্রিয়ার কিঞ্চিৎ সদৃশ লতায় দৃষ্টি বিনোদন করি।

বিদূষক। কেন আপনি আসন্নপরিচারিকা চতুরিকাকে আদেশ করিয়াছেন, "মাধবীমণ্ডপে এই সময় অতিবাহিত করিব, সেই স্থানে আমার নিজহস্তলিখিত চিত্রফলকস্থিত শকুন্তলার প্রতিকৃতি লইয়া আইস।"

রাজা। চিত্তবিনোদনের এই উপায়, তবে মাধবীমণ্ডপের পথ দেখাও।

বিদূষক। এদিকে আসুন।

[উভয়ে গমন করিতে লাগিলেন] [সানুমতী অনুগমন করিল]

বিদূষক। মণিময়পীঠসনাথ এই মাধবীমণ্ডপ পুষ্পরূপ উপহার দ্বারা রমণীয়তা হেতু যেন নিশ্চয় আমাদিগকে 'স্বাগতের' দ্বারা অভ্যর্থনা করিতেছে। অতএব প্রবেশ করিয়া উপবিষ্ট হউন। [উভয়ে প্রবেশ করিয়া উপবিষ্ট হইলেন]।

সানুমতী। এই লতায় আরোহণ করিয়া সখীর প্রতিকৃতি দেখিব, তাহার পর শকুন্তলার নিকটে, বহুপ্রকারে প্রকটীভূত তাহার স্বামীর অনুরাগের বিষয় বলিব।
[সেইরূপ করিয়া রহিল]

রাজা। সখে, এক্ষণ শকুন্তলার সমস্ত পূর্ব্ববৃত্তান্ত স্মরণ করিতেছি, তোমাকেও বলিয়াছিলাম। তুমি প্রত্যাখ্যানসময়ে আমার নিকটে ছিলে না। কিন্তু পূর্ব্বে ত কখনও তাঁহার নাম কর নাই, তুমিও কি আমার ন্যায় বিস্মৃত হইয়াছিলে?

বিদূষক। বিস্মৃত হই নাই। কিন্তু আপনি সকল কথা বলিয়া শেষে বলিয়াছিলেন যে এ পরিহাসবাক্য, সত্য নহে। জড়বুদ্ধি আমিও সেইরূপ বুঝিয়াছিলাম। অথবা ভবিতব্য বলবান্।

সানুমতী। তাহাই (সত্য)।

রাজা। [চিন্তা করিয়া] সখে আমাকে রক্ষা কর।

বিদূষক। এ কি, আপনার ইহা অযোগ্য, সৎপুরুষেরা কখন শোকের বাসস্থান হন না; ঝটিকা বহিলেও গিরি নিশ্চল থাকে।

রাজা। বয়স্য, প্রত্যাখ্যানহেতু বিক্লবা প্রিয়ার দশা মনে করিয়া অত্যন্ত কাতর ও নিরুপায় হইতেছি। তিনি আমার নিকট হইতে প্রত্যাখ্যাত হইয়া আত্মীয়জনের অনুগমন করিতে উদ্যম করিলেন, কিন্তু গুরুতুল্য গুরুশিষ্য "এই স্থানেই থাক" এই কথা বারম্বার উচ্চৈঃস্বরে বলিলে তিনি উচ্ছলিত বাষ্পবেগনিবন্ধন কলুষদৃষ্টি এই

নৃশংসে যে পুনরায় অর্পণ করিয়াছিলেন তাহাই আমাকে বিষদিগ্ধ শল্যের ন্যায় দগ্ধ করিতেছে।

Vidushaka.—Wait, while I put an end to the arrow of the god of love by this stick (of mine). [*Raising his stick, wishes to knock down the mango-blossom*].

King.— [*With a smile*]. Well, that will do. The power of Brahmin is seen. Friend, where shall I sit and feast my sight on the creepers somewhat resembling my beloved ?

Vidushaka.—Why, you already told your personal attendant Chaturika, that you would pass this part of the day in the jasmine grove, (and ordered her) that she should bring there the portrait of the lady, Sakuntala, drawn by your own hand on a picture-board.

King.—Such are the means of diverting the heart. Show, then, that way.

Vidushaka.—This way, this way, sir.

[*Both walk on*] [*Sanumati follows* (*them*)].

Vidushaka.—Here is the jasmine bower with a marble seat, hailing us surely with a welcome, as it were, by reason of its being charming on account of its offering of (flowers). So, entering here, you may sit down. [*Both enter and sit down.*]

Sanumati.—Climbing on this creeper, I shall see my friend's picture and then inform her of her husband's love, shown in several ways. [*Stands doing the same.*]

King.—Friend, now I recollect everything about the previous account of Sakuntala, and I told you of it. You were not by my side at the time of rejection. But you never before mentioned her name. Did you too forget it like me ?

Vidushaka.—No, I have not forgot it. But telling every thing, you added at the end that all this was spoken in jest and not in earnest. And it was so understood by me having intelligence (dull) as a clod of clay. Or, rather, fate is powerful.

Sanumati.—So it is !

King.—[*Thinking deeply*]. Save me O Friend !

Vidushaka.—What is this ? It is unbecoming of you. Good

men do never become the resting-place of grief. Mountains are unshaken even in tempests.

King.—Friend, calling to mind the (woful) state of my beloved distressed by (my) disowning, I am extremely helpless. She because of refusal from me, attempted to follow her own kinsmen. But the pupil of her father, equal to (the) father (himself), crying aloud again and again "stay," that she again cast her eyes dim with the flow of tears on me, heartless as I was, torments me like a poisoned shaft.

सानुमती। प्रियसख्यां शकुन्तलायां नरपतेरनुरागदर्शनात् आनन्दविह्वलास्मि, अस्य दुःखेन न सन्तप्ता भवामि।

विदूषकः। तर्कः संशयः।

राजा। पतिरेव देवता यस्याः ताम् पतिदेवताम् साध्वीं। देव एव इति देवता अत्र स्वार्थे तल्। अन्यत्र भावे ; यथा निष्ठुरस्य भावः निष्ठुरता। ग्रामजनबन्धु-सहायेभ्यः समूहार्थे तल भवति ; यथा बन्धूणां समूहः इति बन्धुता ; इति त्रिधा प्रवृत्तिस्तल्प्रत्ययस्य। परामृष्टुं स्प्रष्टुम्। जन्मनः उत्पत्तेः प्रतिष्ठा स्थानं कारण-मित्यर्थः। प्रतिष्ठा गौरवे चितौ, स्थाने च यागनिष्पत्तौ इति मेदिनी। तत्सह-चारिणीभि यत्सखीभिः अप्सरोभिः ; आशङ्कते उत्प्रेक्षते।

सानुमती। यस्याभ्रान्तमीदृशमनुमानं तस्य कथं स्मृतिभ्रंशः इति विस्मयः सञ्जायते।

विदूषकः। कालेनेति अपवर्गे तृतीया।

विदूषकः। भर्त्रा वियोगः विरहः तेन दुःखिता तां। माता च पिता च इति द्वन्द्वे मातापितरौ, पितरौ मातरपितरौ इति पदत्रयं भवति।

সানুমতী। স্বার্থপরতা এমন যে ইঁহার সন্তাপে আমি আহ্লাদিত হইতেছি।

বিদূষক। আমার সন্দেহ আছে, কোন আকাশচারী প্রাণী শকুন্তলাকে লইয়া গিয়াছে।

রাজা। পতিদেবতা স্ত্রীকে অন্য কে স্পর্শ করিতে পারে? শুনিয়াছি মেনকা তোমার সখীর জন্মহেতু ; তাঁহার সহচারিণীগণ কর্ত্তৃক তোমার সখী অপহৃতা হইয়াছেন আমার মনে এইরূপ বিবেচনা হয়।

সানুমতী। ইঁহার স্মৃতিভ্রংশ আশ্চর্য্যের বিষয়, প্রতিবোধ আশ্চর্য্যের বিষয় নহে।

বিদূষক। যদি এইরূপ হয় তাহা হইলে কালে তাঁহার সহিত সমাগম হইবে।

রাজা। কিরূপে?

বিদূষক। পিতামাতা স্বামিবিয়োগদুঃখিত কন্যাকে দেখিতে সমর্থ হন না।

Sanumati.—Such is addiction to ones's own interest(selfishness) that I delight in his misery.

Vidushaka.—Well, I have a doubt as to by what celestial being her ladyship was carried away.

King.—Who else would have dared to touch a wife to whom the husband is a deity? I have heard that Menaka is the source of your friend's birth. My heart suspects that your friend was taken away by her (Menaka's) companions.

Sanumati.—(His) loss of memory, not recollection, is indeed to be wondered at.

Vidushaka.—If so, there would be union with her ladyship in course of time.

King.—How so?

Vidushaka.—Parents cannot endure to see (their) daughter, sorrowing for separation from her husband.

राजा। स्वप्न इति स्वप्नः नु, माया नु, मतिभ्रमः नु तावत्फलमेव पुण्यम् क्लिष्टं नु; तत् असन्निवृत्तैत्र अतीतम्, एते नाम मनोरथाः तटप्रपाताः। योऽयं शकुन्तलापरिणयरूपः प्रत्ययः अनुभूयते स किं स्वप्न? स्वप्नसमागमस्य स्मृतौ दृढ़ाङ्कितत्वात् इदानीमपि अपदार्थभूतः सन्नपि सत्यइव प्रतीयते इति संशयः; स्वप्नश्चेत् जाग्रदवस्थायां नातिसुस्पष्टं अनुभूयते तर्हि किमियं माया, इन्द्रजालक्रिया नक्षतन्त्राभ्यां असतः शकुन्तलारूपस्य वस्तुनः प्रकटनं। तदपि न सम्भवति, इन्द्रजालक्रियायाः अल्पक्षणव्यापित्वात्, मासान् व्याप्य तदभावदर्शनाच्च; तर्हि किमयं मे मतिभ्रमः बुद्धेः भ्रंशात् एवम्विधा प्रतीतिः समुत्पद्यते किमिति सन्देहः; नापि तत्पक्षः अविसंवादी, पुरोहितप्रमुखाणां सर्व्वेषामेव पौराणां युगपदेव बुद्धिभ्रंशः न सम्भाव्यते। शकुन्तलासमागमस्य अतात्त्विकत्वसंशये पर्य्यवसानस्य हेतुः विस्मरणहेत्वपरिज्ञानम्। न खलु शकुन्तलापाणिग्रहणं मायादेर्विलसितं, नैतत् मिथ्येति वदितुं शक्यते, तर्हि तावत् एव कतिपयदिनानि तपोवने यः समागमोऽभूत् तद्रूपमेव फलं यस्य तत् तावत्फलं पुण्यं सुकृतं क्लिष्टं क्षीणं नु, पुरा अत्यल्पमेव सुकृतमाचरितं मया तस्यैव लघुपुण्यस्य परिणामः शकुन्तलया क्षणिकसमागमः, तत पुण्यं भोगात् क्षीणं तत्फलमपि अत्यन्तादर्शनं गतम्। सर्व्वत्र नु शब्दः वितर्कसन्देहालङ्कारः। तत् शकुन्तलारूपं वस्तु असन्निवृत्तैत्र अपुनरावृत्तये न सन्निवर्त्तितुमित्यर्थः तुमर्थाच्च भाववचनादिति चतुर्थी। अतीतं गतम्, न पुनः शकुन्तलया सह मिलनं भविष्यतीत्यर्थः; एते नाम मनोरथाः कालेन समागमोभविष्यतीत्येवं

प्रकारा: अभिलाषा: तटस्य कूलस्य इव प्रपात: येषां ते तटप्रपाता: प्रावृषि यथा श्रीघेन पीड्यमाना: नद्यादे: तटा: पतन्ति ; एवं मनोरथा अपि उत्थाय हृदि लीयन्ते। मनोरथानां अतटात भृगो: तुङ्गशैलादिशृङ्गात् प्रपाता: पतनमिति प्रतीयमानोत्प्रेक्षा यथातितुङ्गाच्छैलशृङ्गादध: सलिले पतितस्य जनस्य क्वापि विप्रलय: सम्पद्यते ; न पुनरभ्युत्थानं, तथैतेषां दूराधिरोहिणां मनोरथानामपि आत्यन्तिक एव विलय: सम्पन्न: न कुतोऽपि तेषां चरितार्थताया: सम्भव: इत्थमपि व्याख्यायते। नामेत्यलीके तटप्रपातै: सह मनोरथानां तादात्म्येनावभासनात् रूपकालङ्कार:। उपजाति: वृत्तम्। १०

विदूषक:। य: खलु पदार्थोऽवश्यमेव भविष्यति तस्य संवटनं प्रतर्कयितुमशक्येनापि उपायेन भवति तत्र विषये दृष्टान्त: अङ्गुलीयकप्राप्ति:।

राजा। असुलभं दुर्लभं स्थानं शकुन्तलाङ्गुलीरूपं तस्मात् भ्रश्यति तत् अनात्तपुण्योपचयैर्दुरापात् प्रियाया: अङ्गुलीपदात् प्रभ्रष्टमिदमङ्गुलीयकमनुकम्पार्हम्। तवेति—मे अङ्गुलीय, मम इव तव सुचरितं नूनं प्रतनु फलेन विभाव्यते। यत् अस्या: अरुणनखमनोरमासु अङ्गुलीषु लब्धपदंपच्युतमसि।" यथा मम तथा तव सुचरितं पुण्यं नूनं निश्चितमेव प्रतनु स्वल्पं फलेन विभाव्यते उन्नीयते ; यत् यस्मात् कारणात् अरुणै: लोहितै: नखै: मनोरमासु मनोज्ञदर्शनासु तस्या: शकुन्तलाया: अङ्गुलीषु लब्धं प्राप्तं पदं स्थानं येन तत् तथोक्तमपि सत् च्युतं प्रभ्रष्टमसि। अहमपि प्रतनुपुण्यबलेन तया सह समागतोऽभवम्, क्षीणे पुण्ये तया वियुक्तो निरयं प्रविष्ट इव। अनुमानालङ्कार: पुष्पिताग्रावृत्तम्—लक्षणम् अयुजिनयुगरेफतो यकारो, युजि तु नजौ जरगाश्च पुष्पिताग्रा। ११

Change of voice.—विभावयामि। लब्धपदेन च्युतेन (भूयते)।

विदूषक:। केन उद्देशेन किं फलमुद्दिश्य हेतौ तृतीया।

सानुमती। आकारित: आहूत: आकृष्ट इत्यर्थ:। एतत्परिज्ञाने ममापि कौतूहलं वर्त्तते इत्यर्थ:।

राजा। कियच्चिरेण कियता विलम्बेन अपवर्गे तृतीया प्रतिपत्तिं वार्त्ताम्। स्वनगराय स्वनगरमुद्दिश्य इत्यर्थ: ; प्रस्थानक्रियया नगरस्य अभिप्रेतत्वात् क्रियाग्रहणात् चतुर्थी। यद्वा देशकालभावाध्वगन्तव्या: कर्मसंज्ञा ह्यकर्मणां इति अकर्मणोऽपि तिष्ठते: कर्मसंज्ञं नगरपदं, तत: गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। इति चतुर्थी। Nouns denoting देश (country, city &c.) काल (time), भाव (abstract idea of action), and गन्तव्य अध्वन् (path to be traversed) become the accusative case of intransitive verbs. In the accusative case of verbs denoting

"going" there can be either the second or the fourth case-ending,—when actual locomotion is implied ; but when the accusative case is a noun denoting "path", there should be only the second case-ending ; and when physical motion is not meant, the fourth case-ending should not be used e. g. मनसा कामीमेति । वाष्पेण सह वर्त्तमानं इति सवाष्पं साश्रु, वियोगचिन्तया सास्रमित्यर्थः । अत्र आइेति लट्प्रयोगश्चिन्त्यः । नात्र "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति सूत्रस्यावसरः । वर्त्तमानसामीप्यस्याभावात् ।

राजा । एकैकमिति—अत्र दिवसे दिवसे एकैकं नामाचरं गणय यावदन्तं गच्छसि ; तावत्, हे प्रिये, मदवरोधगृहप्रवेशं नेता जनः तव समीपमुपैष्यतीति अभिहिता॥१२॥

अत्र अङ्गुलीयके दिवसे दिवसे एकैकं नाम्नः अचरं गणय, एकस्मिन् दिने एकं अचरं गणय, इति क्रमेण यावदन्तं अचराणां समाप्तिं गच्छसि गमिष्यसि, यावत् पुरानिपातयोर्लट् इति भविष्यति लट्—तावत्, त्रिचतुरैर्दिनैरिति भावः, हे प्रिये, मम अवरोधगृहे अन्तःपुरे प्रवेशः तं नेता प्रापयिता जनः तव समीपं उपैष्यति प्राप्स्यति इति सा मया प्रत्यभिहिता । न लोकाव्ययनिष्ठाखलर्थतृणामिति निषेधात् गृहप्रवेशमित्यत्र षष्ठी नाप्नोति ।

Change of voice.—नामाचरं गण्यताम् यावदन्तः गम्यते...नेवा जनेन... समीपः उपैष्यते ।

दारुणः आत्मा चित्तं यस्य तेन दारुणात्मना निष्ठुरेण । "एकं बहुव्रीहिवत्" द्विरुक्तं एकशब्दो बहुव्रीहिवत् स्यात्, तेन सुब्लोपपुम्वद्भावौ । When the numeral case एक is reduplicated, it becomes like a compound of the बहुव्रीहि kind. That is to say the case-ending of the first is elided. दिवसे दिवसे इति वीप्सायां द्विरुक्तिः ।

N. B. Truly does Professor Max Muller say that "there are chronicles below her(language's) surface, there are sermons in every word." The word आत्मन् with its several meanings ("आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि") reveals the history of the moral changes which the Aryan race has undergone from the age of the Upanishadas to the age of Materialism. In the age of the Upanishadas, it meant the universal soul, *Brahman.*

and the individual soul, the *jiva.* Gradually it came to mean some of the several states of consciousness which the *jivatma* has ; and finally the imperishable pure essence has become to be identified with the material organism itself. Students of language may observe with interest the depth to which the process of Deterioration may descend.

রাজা। বয়স্য শকুন্তলার সহিত সমাগম হইয়াছিল ইহা স্বপ্ন, মায়া, অথবা আমার মতিভ্রমনিবন্ধন ভ্রান্তিমাত্র। অথবা স্বল্পকালের নিমিত্ত সমাগমরূপ ফলপ্রদ পুণ্যের পরিপাক, সেই পুণ্য ক্ষয় প্রাপ্ত হইয়াছে ; শকুন্তলাসমাগমও চিরকালের নিমিত্ত অতীত হইয়াছে। তাঁহার সহিত পুনরায় সমাগম হইবে এইরূপ মনোরথ উদিত হইয়াই বর্ষাকালে জলৌঘে নিপীড়িত তটপ্রদেশের ন্যায় বিলীন হইয়া যাইতেছে

বিদূষক। এরূপ বলিবেন না; অঙ্গুরীয়ই এ বিষয়ে উদাহরণ ; অবশ্যম্ভাবী পদার্থের সমাগম অচিন্তনীয় উপায়ে হইয়া থাকে।

রাজা। [অঙ্গুলীয় নিরীক্ষণ করিয়া] এই অঙ্গুলীয় দুর্লভ স্থান হইতে ভ্রষ্ট হইয়াছে, ইহার অবস্থা শোচনীয়। অঙ্গুলীয়, আমার ন্যায় তোমারও পুণ্য অত্যল্প ইহা ফলের দ্বারা প্রমাণিত হইতেছে ; যেহেতু তুমি তাঁহার লোহিত নখর হেতু মনোরম অঙ্গুলীতে স্থান পাইয়া ভ্রষ্ট হইয়াছ।

সানুমতী। যদি অন্যের হস্তে পড়িত তাহা হইলে শোচনীয় হইত।

বিদূষক। এই নামাঙ্কিত অঙ্গুলীয় কি জন্য তাঁহার হস্তে দিয়াছিলেন ?

সানুমতী। এই ব্যক্তি আমার কৌতূহলের দ্বারা (এরূপ প্রশ্ন করিতে) প্রেরিত হইয়াছে।

রাজা। শোন, আমি স্বনগরে প্রত্যাগমনে উদ্যুক্ত হইলে প্রিয়া আমাকে উদশ্রু নয়নে বলিলেন স্বামিন্ কত দিনে সংবাদ দিবেন।

বিদূষক। তার পর, তার পর।

রাজা। আমি এই অঙ্গুলীয় তাঁহার অঙ্গুলীতে পরাইয়া দিয়া তাঁহাকে বলিলাম— এই অঙ্গুলীয়ের এক একটি অক্ষর এক এক দিন গণনা কর, যখন শেষ হইবে, তখনই আমার অন্তঃপুরে প্রবেশ করাইবার (যোগ্য) ব্যক্তি তোমার সমীপে উপস্থিত হইবে। কিন্তু মোহহেতু নিষ্ঠুরহৃদয় আমি তাহা করি নাই।

King.—Friend, it was a dream or an illusion, or a (strange) mental delusion. Or it might be some good action bearing (or capable of yielding) that much fruit, now worn away. It has gone not to come back. These longings (of which you speak) have their fall (end) in the same way as a river-bank.

Vidushaka.—Don't say so. This very ring is an instance. What is destined to be comes about unexpectedly.

King.—[*Looking at the ring.*] This ring fallen as it is from a place not to be easily attained, must be pitied. By the consequence it is judged that your merit, O ring, is, like mine, very small. Since you (too) are fallen after having found a seat on her fingers charming by the ruddy nails.

Sanumati.—Had it fallen into the hands of another person, it would really have been (most) pitiable.

Vidushaka.—Well, with what purpose was this ring, with the name on it, made to reach her ladyship's hand ?

Sanumati.—This (fellow) too has been moved by my curiosity.

King.—Listen. To me, about to start for my own city, my love said with tears (in her eyes) :—'After how long will my husband send (me) words ?'

Vidushaha.—What next ?

King.—Then placing this ring on her finger I answered her :—"Count one letter a day, of my name on it ; and when, my love you will come to the end, a person who will lead you to enter the apartments of my harem, shall come to you." But cruel-harted as I am, Idid not do it through loss of memory.

सानुमती। अवधि: सीमा ; विधिना दैवेन ; विसंवादित: वैयर्थ्यमापादित:, विफलतां नीत:। विसंपूर्व्वात् णयन्तात् वद्धातो: कर्म्मणि क्त:।

विदूषक:। धीवरेण कल्पितस्य छेत्वा कृत्तस्य। आसीत् अङ्गुलीयकमिति शेष:।

सानुमती। अतिगभीर: खलु अनुराग: सदैव स्मृतौ वर्त्तते न कदापि विस्मर्य्यते तस्य स्मृत्युपस्थापनाय स्मारकेण प्रयोजनमिति विप्रतिषिद्धमेतत्। शकुन्तलाया: इति नयने: कर्म्मणि कृदयोगलक्षणा षष्ठी ; राजर्षेरिति दिह्धातो: कर्त्तरि कृदयोगलक्षणा षष्ठी।

राजा। उपालप्स्ये—निर्भर्त्सयिष्यामि।

विदूषक:। उन्मत्तानां चीवाणां पन्था: पदवी प्रकार इत्यर्थ: गृहीत:। अचेतनस्य अङ्गुलीयस्य उपालम्भ: निष्फलं इति नासौ गणयति।

राजा। वन्धुरकोमलाङ्गुलिं तं करं विहाय कथं अम्भसि निमग्नं असि अथवा, अचेतनं गुणं न लक्षयेत् नाम, मयैव कस्मात् प्रिया अवधीरिता। १२॥

बन्धुराः उन्नतानताः, यद्वा बन्धुराः रम्याः 'बन्धुरं सुन्दरे रम्ये इति विश्वः' कोमलाः स्पर्शसुभगाः अङ्गुलयः यस्मिन् तम् सर्व्वथा त्यक्तुमयोग्यमिति भावः करं हस्तं विहाय कथं अम्भसि अताहृशस्पर्शे जड़े जले निमग्नं असि, अहो ते मूढ़ता इति भावः। अथवा अचेतनं गुणानां तारतम्यपरिज्ञाने मन्थरं जड़ं वस्तु गुणं करस्य सुखस्पर्शादिकं न लक्षयेत् न जानीयात् अतो युक्तमस्य जले पतनम् किन्तु मया एव चेतनाभिमानवता इति भावः कस्मात् हेतोः प्रिया अधीरिता प्रत्याख्याता। चेतनोऽप्यहमचेतन इति भावः। वंशस्थविलं वृत्तं, जतौ तु वंशस्थमुदीरितं जरौ इति लक्षणम्।

Change of voice.—निमग्नेन भूयते। अचेतनेन गुणः न लक्ष्यते, अहं प्रियां अवधीरितवान्।

विदूषकः। बुभुक्षया ; बुभुक्षा क्षुधा इत्यर्थः। भुजधातोः सन्नन्तात् भावेः अः स च स्त्रियां इति टाप्।

राजा। अनुशयेन पश्चात्तापेन तप्तं हृदयं यस्य तथोक्तः अयं मल्लक्षणीजनः अनुकम्प्यताम् ; दर्शनदानेन अनुगृह्यताम्।

[अपव्याः जवनिकायाः "अपटी काण्डपटिका प्रतिसीरा जवनिका तिरस्करणी" इति हलायुधः। क्षेपेण उत्तोलनेन]।

विदूषकः। भावस्य प्रकृतिसिद्धस्य अवस्थानस्य अनुप्रवेशः वर्त्तिकया चित्रे प्रकटीकरणं अभिव्यञ्जनमिति यावत्, मधुरेण हृद्येन अवस्थानेन विनिवेशनेन इति यावत् दर्शनीयः सुन्दरः संवृत्तः। निम्नेषु नाभिप्रमुखेषु अनुन्नतेषु, उन्नतेषु नासिका-प्रभृतिषु अङ्गेषु दृष्टिः स्खलति इव, निम्नोन्नतदर्शने चक्षुर्गोलकस्य यथा गतिस्खलनं भवति, समतलचित्रेऽपि तथा भवति इति सुमहत् चित्रनैपुण्यम्।

सानुमती। अम्मो एषा राजर्षेः निपुणता, जाने सखी मे अग्रतोवर्त्तते इति। अम्मो इति विस्मये अव्ययम् ; जाने, मन्ये, अनुपसर्गत्वात् कर्त्रभिप्राये वैभाषिकात्मने पदम् अनुपसर्गाज् ज्ञः इति।

সানুমতী। বিধাতা অতি সুন্দর অবধিকে বিফল করিয়াছেন।

বিদূষক। কিরূপে ধীবরখণ্ডিত রোহিত মৎস্যের উদরমধ্যে আসিল ?

রাজা। শচীতীর্থ বন্দনা করিবার সময় তোমার সখীর হস্ত হইতে গঙ্গাস্রোতে পতিত হইয়াছিল।

বিদূষক। হইতে পারে।

সানুমতী। এই জন্যই অধর্ম্মভীরু নরপতির হতভাগিনী শকুন্তলার সহিত বিবাহে সন্দেহ হইয়াছিল। কিন্তু এরূপ অনুরাগ অভিজ্ঞানের অপেক্ষা করে ইহা কিরূপে সম্ভব ?

রাজা। অঙ্গুলীয়কে তিরস্কার করি।

বিদূষক। [আত্মগত] ইনি উন্মত্তদিগের পদবী অবলম্বন করিলেন।

রাজা। তুমি, সুন্দরকোমলাঙ্গুলিবিশিষ্ট সেই কর পরিত্যাগ করিয়া জলে কি নিমিত্ত নিমগ্ন হইলে? অথবা অচেতন পদার্থ গুণ গ্রহণ করিতে পারে না, আমি কেন প্রিয়াকে তিরস্কৃত করিলাম।

বিদূষক। [আত্মগত] ক্ষুধা কি আমাকে খাইয়া ফেলিবে?

রাজা। নিষ্কারণপরিত্যক্তা, প্রিয়ে পশ্চাত্তাপানলে এই ব্যক্তির হৃদয় দগ্ধ হইয়া যাইতেছে, পুনর্ব্বার দর্শন দিয়া ইহার প্রতি অনুকম্পা কর।

[যবনিকা উত্তোলন করিয়া চিত্রহস্তে প্রবেশপূর্ব্বক]

চতুরিকা। এই চিত্রিতা স্বামিনী [চিত্রফলক প্রদর্শন করিল]।

বিদূষক। সাধু বয়স্য, এই সুন্দর অবস্থানহেতু ইহার স্বাভাবিক অবস্থার অঙ্কন অতি মনোরম হইয়াছে। নিম্নোন্নতপ্রদেশে যেন আমার দৃষ্টিস্খলন হইতেছে।

সানুমতী। ওমা রাজর্ষির এরূপ নৈপুণ্য, আমার বোধ হইতেছে যে সখী আমার অগ্রে রহিয়াছেন।

Sanumati.—A charming engagement has been defeated of its end by fate.

Vidushaka.—How came it to be in the interior of the belly of that red fish cut open by the fisherman?

King.—It fell into the stream of the Ganges from the hand of your friend, (while) bowing to the Sachitirtha.

Sanumati.—Hence it is that this saint of a king, afraid of sin, entertained doubts as to (his) marriage with poor Sakuntala. Or how is it that such an affection requires a souvenir.

King.—I will reprove this ring.

Vidushaka.—[*Aside*]. He has adopted the course of mad men.

King.—Why did you sink into water, having left that hand of beautiful and delicate fingers? Or, an inanimate object may not discern merit; but why did I reject my love?

Vidushaka,—[*Aside*]. What! Shall I be devoured by hunger?

King.—O thou, forsaken without cause! Let this person with his heart burning with remorse be pitied by showing (thyself) again.

[*Entering with a toss of the curtain, and having the picture-board in her hands*].

Chaturika.—Here [is the queen (drawn) in the picture. [*Shows the picture-board*].

Vidushaka.—Excellent! my friend! The depicting of the natural state has become charming by reason of that sweet and beautiful attitude. My eye stumbles, as it were, at the high and low relief.

Sanumati.—Oh! Such is the skill of this saint of a king that I believe that my friend is before me.

राजा। चित्रे यत् यत् साधु न स्यात् तत् तत् अन्यथा क्रियते तथापि तस्याः लावण्यं रेखया किञ्चित् अन्वितम्

चित्रे आलेख्यकर्म्मणि यत् यत् साधु न स्यात् यत् यत् अङ्गादिकं अविकलं चित्रयितुं न शक्यते तत् तत् अन्यथा अन्यरूपं क्रियते, स्वेच्छया प्रकारान्तरेण चित्र्यते। तथापि इत्थम् स्वप्रतिभया अंशविशेषाणां प्रकारान्तरेण घटनात् प्रतिकृतेः असम्पूर्णत्वेऽपि तस्याः शकुन्तलायाः लावण्यं रेखया चित्रार्थं तूलिकाविहितया लेखया किञ्चित् अन्वितं अनुसृतं, अत्रचित्रे तल्लावण्यस्य कथञ्चित् उन्मेषः कृतः इत्यर्थः।

Change of voice.—येन येन साधुना न भूयते तत् तत् अन्यथा करोति (चित्रकरः)। लावण्येन अन्वितेन (भूयते)।

सानुमती। अनवलेपस्य अनहङ्कारस्य। अहङ्कारपरिहाराय, एवमुक्तं; पश्चात्तापेन अनुशयेन गुरुः महान् तस्य। चित्रमिदं सर्व्वथा शकुन्तलायाः आकृत्या संवदति तथापि किञ्चिदन्वितमिति यदुक्तं तदहङ्कारपरिहाराय, मया सौहार्दनाश्यमाचरितमिति पश्चात्तापेन द्विगुणीकृतत्वादनुरागस्य शकुन्तलारूपे सातिशयबहुमानादित्यर्थः।

सानुमती। मुहधातोरच् कुत्वम् निपातनात् मोघा।

विदूषकः। केशस्य बन्धः इति केशबन्धः कबरीबन्धनं शिथिलेन विस्रस्तेन केशबन्धेन उद्वान्तानि उन्मुक्तानि कुसुमानि येन तेन। केशान्तेन इति इत्थम्भूतलक्षणे तृतीया एवं वदनेन बाहु~ाम् इत्यत्रापि। उद्भिन्नाः आविर्भूताः स्वेदबिन्दवः घर्म्मोदबिन्दवः यत्र तेन। अपसृताभ्यां शिथिलमूलाभ्यां सरतेर्गत्यर्थत्वात् (अत्र अकर्म्मकत्वाच्च) कर्त्तरि क्तः। अवसेकेन जलसेकेन स्निग्धाः चिक्कणाः तरुणाः अभिनवाः पल्लवाः किसलयानि यस्य तस्य।

राजा। निपुणः अभिज्ञः अनुमानकुशल इत्यर्थः। भावस्य सात्त्विकस्य चिह्नं लक्षणं स्वेदाश्रुप्रभृति। तदेव भावचिह्नं दर्शयति स्विन्नेति—रेखाप्रान्तेषु मलिनः स्विन्नाङ्गुलिविनिवेशः दृश्यते, कपोलपतितं इदं अश्रु च वर्त्तिकोच्छ्वासात् दृश्यम्।

रेखायाः प्रान्तेषु चित्रपटस्य प्रान्तभागे इत्यर्थः मलिनः कृष्णवर्णः खिन्नानां सात्त्विकभावात् स्वेदाप्लुतानां अङ्गुलीनां विनिवेशः स्थापनं दृश्यते। चित्रणसमये अनुरागवशादङ्गुलीनां खिन्नत्वात् चित्रपटे तासां स्पर्शेन मलिनः अङ्कः समुत्पन्नः। कपोले प्रतिकृतेः गण्डस्थले पतितं इदं अश्रु अनुशयात्रुदतो मे नयनात् गलितं जलं वर्त्तिकायाः लेपविशेषस्य चित्रे प्रदत्तस्य उच्छ्वासात् स्फीततया उच्छूनतया इति यावत् दृश्यम् इदानीमपि द्रष्टुं शक्यम् "ऋदुपधाच्चाक्लृपिचृतेः" इति दृशेः क्यप् आर्य्या जातिः। १५॥

Change of voice.—अङ्गुलीनिवेशं मलिनं पश्यामि अश्रुणा च कपोलपतितेन अनेन दृश्येन (भूयते)।

अर्द्धलिखितं असम्पूर्णं विनोदस्थानम् चित्तविनोदस्य उपायभूतमिदं चित्रम् वर्त्तिका तूलिका ("पटलिपे पक्षिभेदे तूलिकायां च वर्त्तिका" इत्यजयः)।

राजा। हे सखे, पूर्व्वं साक्षात् उपगतां प्रियां अपहाय चित्रार्पितां इमां बहुमन्यमानः अहं पथि निकामजलां स्रोतोवहां अतीत्य मृगतृष्णिकायां प्रणयवान् जातः। १६॥

हे वयस्य पूर्व्वं साक्षात् उपगतां मूर्त्तिमतीं मम समीपमुपगतां प्रियां अपहाय अविगणय्य चित्रे अर्पिता न्यस्ता तां चित्रार्पितां चित्रलिखितां इमां प्रियायाः प्रतिकृतिं इत्यर्थः बहुमन्यमानः आद्रियमाणः अहं पथि निकामं अत्यर्थं जलं यस्याः तां निकामजलां प्रभूतोदकाम् पिपासाहरणे समर्थां इति भावः स्रोतसा वहति या ताम् (वहेरच्) स्रोतोवहां नदीं अतीत्य प्रत्याख्याय गत्वा मृगतृष्णिकायां मरुमरीचिकायाम् प्रणयवान् समासक्तः तदनुसरणपरः जातः संवृत्तः। यथा कश्चिदुदन्यन् विमलापं सरो विहाय मरौ मरीचिकामनुसरति तर्षोपशान्तये; तथा अहमपि स्वयमुपस्थितां प्रियां अवमत्य तत्प्रतिकृतिमनङ्गतापनिवारणाय भजामि। इति बिम्बानुबिम्बत्वबोधनात् निदर्शनालङ्कारः। वसन्ततिलकावृत्तम्। मृगस्य तृष्णेव (तृष्णाहेतुत्वात्) इति मृगतृष्णा स्वार्थे कन् कात् पूर्व्वस्येकारः। १६॥

Change of voice.—बहुमन्यमानेन मया...प्रणयवता जातेन (भूयते)।

सानुमती। अभिरूपः अभिमतः। आलिखितुं कामः अभिलाषः यस्य सः तम् काममनसोरिति मकारलोपः।

राजा। सैकतलीनहंसमिथुना स्रोतोवहा मालिनी कार्य्या। तां अभितः निषण्णहरिणाः पावनाः गौरीगुरोः पादाः कार्य्याः, शाखालम्बितवल्कलस्य तरोः अधः कृष्णसारमृगस्य शृङ्गे वामनयनं कण्डूयमानां मृगीं च निर्म्मातुं इच्छामि। १७॥

सैकते सिकतामये पुलिने सिकताशर्कराभ्याञ्चेत्यण्प्रत्ययः। लीनानि उपविष्टानि हंसानां मिथुनानि युगलानि यस्याः सा सैकतलीनहंसमिथुना हंसैरलङ्कृत-

तटा स्रोतोवहा नदी मालिनी कार्य्या अत्र चित्रफलके लिखितव्या, तां मालिनीम् अभितः "अभितः परितः समयानिकषाहाप्रतियोगेऽपि" इति द्वितीया ; मालिन्याः पार्श्वे निषण्णाः उपविष्टा हरिणाः येषु ते विषण्णहरिणाः पावनाः पवित्राः गौर्य्याः पार्व्वत्याः गुरोः पितुः हिमालयस्य पादाः प्रत्यन्तपर्व्वताः कार्य्याः चित्रयितव्याः। पादाः प्रत्यन्तपर्व्वताः पादाः रश्म्यङ्घ्रितुर्य्यांशा इति चामरः। शाखासु लम्बितानि विशोषणार्थं वल्कलानि मुनीनां परिधेयानि यस्य तस्य तरोः वृक्षस्य अधः तले कृष्णमृगस्य कृष्णसारस्य मृगस्य शृङ्गे वामं सव्यं नयनं यद्वा वामं सुन्दरं नेत्रं कण्डूयमानां घर्षन्तीं मृगीं च निर्म्मातुं आलिखितुं इच्छामि। स्वभावोक्तिरलङ्कारः। "कण्डूञ् गात्रघर्षणे" इति धातोः यक् ततः कर्त्तरि शानच्। ॥१८॥

Change of voice.—हंसमिथुनया...स्रोतोवहया मालिन्या कार्य्यया भूयते। ...पावनैः निषण्णहरिणैः पादैः कार्य्यैः भूयते। निर्म्मातुं इष्यते।

विदूषकः। [आत्मगतम्] लम्बानि कूर्च्चानि मुखलोमानि कूर्च्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे इति मेदिनी। येषां तेषां लम्बकूर्च्चानामितिसोपहासोक्तिः। समूहैः।

राजा। अभिप्रेतमभिमतं प्रसाधनं भूषणम्।

विदूषकः। किमिव। किं भूषणम्।

सानुमती। सौकुमारस्य शकुन्तलाशरीरमार्द्दवस्य। सुकुमारशब्दादण्।

রাজা। চিত্রে যে যে অংশ সম্যক্রূপে অঙ্কিত হইতে পারা যায় না সেই সেই অংশ অন্যরূপে বিন্যস্ত করা যায়। তথাপি (এই নিমিত্ত অন্যরূপ হইলেও) তাঁহার লাবণ্য এই চিত্রে তুলিকার দ্বারা কথঞ্চিৎ উন্মীলিত করিয়াছি।

সানুমতী। এই বাক্য নরপতির নিরহঙ্কারতা ও পশ্চাতাপহেতু বর্দ্ধিত অনুরাগের যোগ্য।

বিদূষক। বয়স্য এই চিত্রফলকে তিনজনকে দেখিতেছি; সকলেই সুন্দরী, ইহাদের মধ্যে কে শকুন্তলা?

সানুমতী। ঈদৃশ রূপবিষয়ে এ অভিনজ্ঞ; ইহার দৃষ্টি নিষ্ফল।

রাজা। তুমি কোন্‌টীকে মনে কর?

বিদূষক। যাঁহার কবরীবন্ধন উন্মুক্ত হওয়াতে কেশাগ্র হইতে পুষ্প স্খলিত হইয়া পড়িয়াছে, আননে স্বেদবিন্দু সমুদ্গত হইয়াছে এবং বাহুদ্বয় শিথিল হইয়া পড়িয়াছে এবং জলসেকহেতু স্নিগ্ধপল্লব আম্রবৃক্ষের পার্শ্বে ঈষৎ পরিশ্রান্তের ন্যায় যিনি আলিখিত হইয়াছেন, ইনি শকুন্তলা অপর দুই জন সখী।

রাজা। তুমি নিপুণ, এই চিত্রে আমার সাত্ত্বিকভাবের চিহ্ন আছে। চিত্রফলকের প্রান্তে ঘর্ম্মাক্ত অঙ্গুলীর সন্নিবেশহেতু মলিন অঙ্ক দৃষ্ট হইতেছে (এবং চিত্রিত মূর্ত্তির) গণ্ডস্থলে পতিত এই অশ্রুবিন্দু পটলেপের স্ফীততা নিমিত্ত দৃষ্টিযোগ্য হইয়া রহিয়াছে।

চতুরিকে, চিত্তবিনোদনের উপায়স্বরূপ এই চিত্রখানি অসম্পূর্ণ রহিয়াছে। তুমি যাও তুলিকা প্রভৃতি আনয়ন কর।

চতুরিকা। আর্য্য মাঠব্য,আমি যতক্ষণ না আসি সে পর্য্যন্ত আপনি এই চিত্রফলকখানি ধরুন।

রাজা। আমিই ধরিতেছি। [চিত্রফলক ধরিলেন] [দাসী নিষ্ক্রান্ত]।

রাজা। সখে, প্রিয়া স্বয়ং সাক্ষাৎ উপস্থিত হইলে তাঁহাকে অবজ্ঞা করিয়া (এক্ষণে) তাঁহার চিত্রার্পিত প্রতিমূর্ত্তির প্রতি আদরবান্ হওয়াতে আমার (কার্য্য) পক্ষে প্রভূতজলধারার নদী পরিত্যাগ করিয়া মৃগতৃষ্ণিকায় আসক্ত হওয়ার ন্যায় হইয়াছে।

বিদূষক। [আত্মগত] ইনি নদী অতিক্রম করিয়া মৃগতৃষ্ণিকায় অনুরক্ত হইলেন। [প্রকাশ্যে] বয়স্য ইহাতে আর কি লিখিবেন ?

সানুমতী। যে যে প্রদেশ সখীর অভিমত তাহাই লিখিতে ইচ্ছুক হইয়াছেন।

রাজা। শোন, যাহার পুলিনপ্রদেশে হংসমিথুন উপবিষ্ট রহিয়াছে, ঈদৃশ মালিনী নদী, এবং মালিনীর পার্শ্বে যাহার উপরি হরিণ উপবিষ্ট আছে এরূপ পবিত্র হিমালয়ের প্রত্যন্তপর্ব্বত এই চিত্রফলকে লিখিতে হইবে, এবং বিশেষণার্থ বল্কল যাহার শাখা হইতে ঝুলিতেছে এবম্বিধ তরুতলে কৃষ্ণসার মৃগের শৃঙ্গে বামনয়ন কণ্ডুয়ন করিতেছে। এরূপ মৃগী লিখিতে ইচ্ছা করিতেছি।

বিদূষক। [আত্মগত] যেরূপ দেখিতেছি ইনি দীর্ঘশ্মশ্রু তাপসসমূহের দ্বারা এই চিত্রফলকখানি পরিপূর্ণ করিবেন।

রাজা। বয়স্য শকুন্তলার অভিপ্রেত ভূষণ এখানে (লিখিতে) বিস্মৃত হইয়াছি।

বিদূষক। কিরূপ ?

সানুমতী। বনবাসের এবং সৌকুমার্য্যের যাহা উপযুক্ত হইতে পারে।

King.—That which can not be portrayed well in a picture is done otherwise (by painters). Yet her loveliness has been somewhat sketched by the drawing.

Sanumati.—This is worthy of affection heightened through remorse, and of modesty.

Vidushaka.—Friend, here are seen three ladies; and all of them are beautiful; which of these is Sakuntala ?

Sanumati.—Of no use indeed is the eye of this fellow, incapable as he is of distinguishing such beauty.

King.—Whom do you think (her) to be ?

Vidushaka.—I believe that she—who with the end of her hair dropping flowers by reason of the fillet being slackened, with a face on which drops of sweat have collected, and with the arms

greatly drooping, has been drawn as if a little tired, by the side of the mango-tree, with its new-grown leaves fresh with watering,—she is Sakuntala. The other two (are her) companions.

King—You are discerning. In it there is a proof of my passion (for her). On the edge of the sketch is seen the black (impression) of the perspired fingers ; and this drop of tear fallen on her cheek is observable by reason of the swelling of the paint.

Chaturika, this picture, the means of diverting my heart, is half-painted (incomplete). Go and bring the brush.

Chaturika.—Noble Mathavya. hold this picture-board till I come (back).

King.—I will hold it myself [*does as said*].

[*Exit the maid-servant*].

King.—Having first rejected my beloved one, come to me in person, and (now) paying attention to her drawn in the picture, I have become, O friend, a lover of the mirage, after having left a stream of vast water.

Vidushaka.—[*Aside*]. His Majesty has resorted to the mirage, having passed a river.[*Aloud*]. Well, what else is to be drawn here ?

Sanumati.—He is longing to draw those places which were delighted in by my friend.

King.—Listen. The stream Malini with pairs of swans sitting on its sandy banks is to be portrayed ; and by it, (the Malini), the holy spurs of the Himalaya with the antelopes sitting on them. And I wish to draw a doe rubbing her left (or beautiful) eye against the horn of a black deer, beneath a tree from the branches of which barks, (the vests of the hermits) are hanging down.

Vidushaka.—[*Aside*]. The picture-board, I see, will be filled up by him with multitudes of long-bearded anchorites.

King.—And, moreover, we have forgot the decoration of Sakuntala, intended (by us).

Vidushaka.—What (decoration) ?

Sanumati.—That which may be suitable to a forest-life and delicateness.

राजा । हे सखे, कर्णार्पितबन्धनं, आगण्डविलम्बिकेशरम् शिरीषं न कृतम् न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं स्तनान्तरे रचितम् ।१८॥

कर्णयोः श्रवणयोः, अर्पितं न्यस्तं बन्धनं वृन्तं यस्य तत् कर्णार्पितबन्धनं, अवतंसार्थं कर्णयोरवस्थापितमित्यर्थः, गण्डाभ्यां आ इति आगण्डं (मर्य्यादायमव्ययीभावः) कपोलपर्य्यन्तं विलम्बिनः इति आगण्डविलम्बिनः (सहसुपेति समासः) कपोलयोरपि अलङ्कर्त्तार इति भावः ; केशराः किञ्जल्काः यस्य तत् तादृशं शिरीषं शिरीषपुष्पं न कृतं नालिखितं शिरीषपुष्पेणास्याः कर्णभूषणं न कृतमित्यर्थः। न वा शरच्चन्द्रस्य कौमुदीधवलमित्यर्थः मृणालसूत्रं हारः इत्यर्थः स्तनयोः अन्तरे मध्ये वक्षसि न रचितं न दत्तम्। वात्र समुच्चये। वंशस्थविलं वृत्तम् तल्लक्षणम् जतौ तु वंशस्थमुदीरितं जरौ ॥१८॥

Change of voice.—शिरीषं न कृतवान् न वा...रचितवान्।

विदूषकः। रक्तं लोहितं कुवलयं उत्पलं तस्य पल्लववत् शोभते...तेन। अग्रहस्तेन अङ्गुलिभिः, अवयवावयविनोः अभेदविवक्षया अङ्गुलिषु हस्तत्वारोपः। चकितचकिता चकितप्रकारा सन्त्रस्ता इत्यर्थः (प्रकारे गुणवचनस्य इति द्विर्भावः कर्म्मधारयवदुत्तरेषु इति पूर्व्वपदस्य विभक्तेर्लुक्) कुसुमरसस्य मकरन्दस्य पाटच्चरः चौरः। अभिलङ्घते अभिभवति अभिलङ्घ्य धावति इत्यर्थः।

राजा। कुसुमशोभिता लता इति कुसुमलता शाकपार्थिवादिवत् समासः तस्याः प्रियः अतिथि ; सत् सम्बोधने। कुसुमनिषण्णा, अनुरक्ता एषा सती मधुकरी तृषितापि भवन्तं प्रतिपालयति, त्वया विना मधु न खलु पिवति। ॥ १९ ॥

कुसुमे पुष्पे निषण्णा उपविष्टा पुष्परसग्रहणार्थं इति आशयः। अनुरक्ता त्वदासक्तचित्ता एषा सती पतिव्रता मधुकरी भ्रमरी तृषिता तृष्णातुरा अपि भवन्तं त्वां प्रतिपालयति अपेक्षते ; त्वया विना एकाकिनी इत्यर्थः मधु न पिवति। भवता सह मधु पास्यति इत्याशया तृष्णां निरुध्य भवदागमनं प्रतीक्षते ; न ते युक्तं ईदृशीं प्रियामवमत्यान्यत्र परिपतनमिति भावः। आर्य्याजातिः ॥१९॥

Change of voice – एतया कुसुमनिषण्णया तृषितयापि सत्या अनुरक्तया मधुकर्य्या भवान् प्रतिपाल्यते मधु न पीयते।

सानुमती। "अभिजातः स्थितौ न्याय्यः" इति विश्वः। अभिजातं न्याय्यं योग्यमित्यर्थः यथा तथा वारितः इति सोल्लुण्ठवचनम्।

विदूषकः। प्रतिषिद्धापि वामा एषा जातिः। निवारिता सत्यपि प्रतिकूलतामापद्यते इयं भ्रमरजातिः। वामौ वल्गुप्रतीपयोरित्यमरः।

राजा। शासने आदेशे। हे भ्रमर, अक्लिष्टबालतरुपल्लवलोभनीयं रतोत्सवेषु मया सदयमेव पीतं प्रियायाः विम्बाधरं चेत् स्पृशसि, त्वां कमलोदरबन्धनस्थम् कारयामि।२०।अक्लिष्टः अपरिम्लानः बालः अभिनवः यः तरुपल्लवः यद्वा बालतरो क्षुद्र-

वृक्षस्य पल्लवः प्रवालं स इव लोभनीयः मनोज्ञत्वात् चित्ताकर्षकः तं, रतोत्सवेषु सदयमेव न तु दृढं अतिकोमलत्वादिति भावः पीतं नतु दष्टम् प्रियायाः बिम्बतुल्यः अधरः इति बिम्बाधरः (मध्यपदलोपिसमासः तथाच वामनः "बिम्बाधरः इति वृत्तौ मध्यपदलोपिन्याम्") तं चेत् यदि स्पृशसि दशसि, तर्हि त्वां कमलस्य पद्मस्य उदरं अभ्यन्तर एव बन्धनं बध्यते अस्मिन् इति बन्धनं कारागृहं तत्र तिष्ठति यः तं कमलोदरबन्धनस्थम् कारयामि। "प्रतिनायकव्यवहारसमारोपात् समासोक्ति" रिति राघवभट्टः। वसन्ततिलकं वृत्तम्॥ २०॥

Change of voice.—लोभनीयः पीतः बिम्बाधरः चेत् स्पृश्यते ; त्वं कमलोदरबन्धनस्थः कार्य्यसे।

विदूषकः। तीक्ष्णदण्डस्य इति विवक्षया षष्ठी, तीक्ष्णदण्डात् इति सम्यक्। ईदृशः वर्णः उन्मत्तस्येव अक्षरं वाक्यमित्यर्थः यस्य सः ईदृशवर्णः उन्मत्तः इव।

सानुमती। अवगतार्था विदितार्था। यथालिखितं अनुभवति यः सः यथालिखितानुभावी। शकुन्तलाधरमभि भ्रमरस्य पतनं मया वास्तवत्वेन ज्ञातम्। तदपि चित्रमिति ज्ञानं विदूषकवाक्यश्रवणादेव संवृत्तम। यदि ममापि ईदृक् भ्रमः सम्भवति, का कथा खलु तन्मयहृदयेन चित्रं परमार्थं भावयतः राज्ञः।

राजा। पौरोभाग्य दोषैकदृक्त्वम् अनिष्टाचरणमित्यर्थः। तन्मयेन हृदयेन साक्षादिव दर्शनसुखं अनुभवतः मे स्मृतिकारिणा त्वया कान्ता पुनरपि चित्रीकृता॥२१॥

तन्मयेन शकुन्तलामयेन हृदयेन साक्षात् इव दर्शनसुखं मूर्त्तिमत्याः प्रियायाः दर्शनेन यत् सुखं, सङ्कल्पाभ्यासपाटवात् चित्रदर्शनेनापि तत् सुखं अनुभवतः मे स्मृतिं चित्रत्वज्ञानं करोति यस्तेन त्वया कान्ता पुनरपि अचित्रं चित्रं कृता इति चित्रीकृता ; तन्मयत्ववशात् चित्रं अचित्रं भूतं भोश्चित्रमेतत् इति वाक्येन तदचित्रज्ञाननिरासात् पुनरपि चित्रत्वबोधः समुत्पन्नः। इयमार्य्या॥२१॥

Change of voice.—कान्तया चित्रीकृतया भूयते।

सानुमती। पूर्व्वं च अपरञ्च विरुणद्धि यः सः पूर्व्वापरविरोधी प्राक् चित्रज्ञानं ततः चित्रस्य अचित्रत्वेनज्ञानं पुनरपि च चित्रज्ञानं इति पूर्व्वापरविरोधः।

राजा। प्रजागरात् तस्याः स्वप्ने समागमः खिलीभूतः, बाष्पस्तु एनां चित्रगतामपि द्रष्टुं न ददाति॥२२॥प्रजागरात् निद्राभावात् तस्याः शकुन्तलायाः स्वप्ने समागमः मिलनम् स्वप्नसमागमरूपी विनोदनोपायः खिलीभूतः व्याहतः ; यच्च प्रतिकृतिदर्शनेन दुःखितं हृदयं विनोदयामि तदपि न घटते इत्याह बाष्पः इति बाष्पःदर्शनसमये मुहुरुपचीयमानं नयनजलं चित्रगतामपि, प्रत्यक्षदर्शनं खलु दुरापास्तमिति अपिकारेण द्योत्यते, एनां द्रष्टुं न ददाति॥२२॥अनुरूपो भावः मेघदूते—

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायां
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥

Change of voice.—समागमेन खिलीभूतेन (भूयते)। बाष्पेण न दीयते द्रष्टुम्।

सानुमती। सर्व्वथा प्रमृष्टं त्वया प्रत्यादेशदुःखं शकुन्तलायाः। प्रमृष्टं क्षालितं दूरीकृतमित्यर्थः।

রাজা। সখে, যাহার কেশর গণ্ডস্থল পর্য্যন্ত লম্বমান হইয়াছে এবং বৃন্ত কর্ণে অর্পিত হইয়াছে এরূপ শিরীষপুষ্প তাঁহার কর্ণভূষণার্থে অঙ্কিত করি নাই, এবং স্তনদ্বয়ের মধ্যে শরচ্চন্দ্রের কিরণের ন্যায় সুকুমার ধবল মৃণালসূত্রহার অর্পিত হয় নাই।

বিদূষক। বয়স্য ইনি রক্তোৎপলদলের ন্যায় সুন্দর অঙ্গুলী দ্বারা মুখ আবৃত করিয়া চকিতের ন্যায় রহিয়াছেন কেন?

[সযত্নে অবলোকন করিয়া] আঃ এই দাসীপুত্র মকরন্দচোর মধুকর ইঁহার বদনের দিকে আসিতেছে।

রাজা। এই দুষ্টকে বারণ কর।

বিদূষক। আপনিই দুষ্টদিগের শাসনকর্ত্তা; ইঁহাকে নিবারণ করিতে সমর্থ হইবেন।

রাজা। একথা উপযুক্ত বটে, হে কুসুমিত লতার প্রিয় অতিথি,এস্থানে পরিপতনের ক্লেশ কেন অনুভব করিতেছ?

ঐ পুষ্পোপরি উপবিষ্ট তোমার প্রতি অনুরক্ত সতী ভ্রমরী তৃষ্ণাতুর হইয়াও তোমার জন্য প্রতীক্ষা করিতেছে, তোমার অনুপস্থিতিতে মধুপান করিতেছে না।

সানুমতী। মহাশয় ইহাকে উপযুক্তরূপে নিবারণ করিয়াছেন?

বিদূষক। এই জাতি নিষিদ্ধ হইলেও প্রতিকূল হয়।

রাজা। হে ভ্রমর তুমি আমার আদেশ পালন করিলে না তবে শোন; প্রিয়ার এই অম্লান তরুণ তরুপল্লবের ন্যায় মনোহর অধর যাহা আমি রতোৎসবে ধীরে ধীরে সদয়ভাবে পান করিয়াছি তাহা যদি তুমি স্পর্শ কর তাহা হইলে তোমাকে কমলের অভ্যন্তররূপ কারাগৃহে অবরুদ্ধ করাইব।

বিদূষক। এরূপ তীক্ষ্ণদণ্ড হইতে কেননা ভীত হইবে? [হাসিয়া আত্মগত] ইনি উন্মত্ত। ইঁহার সঙ্গে আমিও এইরূপ হইয়াছি। [প্রকাশ্যে] বয়স্য ইহা চিত্র।

রাজা। কি, চিত্র!

সানুমতী। আমিও এক্ষণে বুঝিতে পারিলাম; যেমন লিখিয়াছেন সেইরূপ অনুভব করিতেছেন যিনি সেই এই রাজা ত মনে করিতেই পারেন।

রাজা। বয়স্য, এরূপ অহিতাচরণ কেন করিলে? তন্ময়হৃদয়ে সাক্ষাৎ প্রিয়ার

দর্শনে যে সুখ তাহাই অনুভব করিতেছিলাম ; কিন্তু তুমি স্মৃতি উৎপাদন করিয়া প্রিয়াকে পুনরায় চিত্র করিলে ? [বাষ্প ত্যাগ করিতে লাগিলেন]

সানুমতী। পূর্ব্বাপরবিরোধী এই বিরহমার্গ অপূর্ব্ব।

রাজা। বয়স্য এইরূপে নিরন্তর দুঃখ কিরূপে অনুভব করি ?

নিদ্রার অভাবহেতু স্বপ্নে তাঁহার সমাগমের ব্যাঘাত হইয়াছে। এবং বাষ্প ইঁহার চিত্রও দেখিতে দিতেছে না।

সানুমতী। আপনি শকুন্তলার প্রত্যাখ্যাননিবন্ধন দুঃখ সকলপ্রকারে দূর করিলেন।

King.—Friend, a *Sirisha* flower with its stalk on the ear, and the filaments pending towards the cheek has not been drawn ; nor has the lotus-fibre, soft (and white) as the autumnal moon-beam, been placed (drawn) between the bosoms.

Vidushaka. – Friend, why does her ladyship, covering her face with her fingers beautiful as the petals of a red lily, stand, as if afraid (of something) ? [*Looking carefully*]. Ah ! This son of a harlot, the bee, the thief of the honey of flowers, is flying at the face of her ladyship.

King —"Drive off the impudent insect."

Vidushaka.—Chastiser as you are of the ill-behaved, you will be able to drive it off.

King.—Quite true. O you, favourite guest of flowering creepers, why do you take the trouble of hovering about here ? Here is the female bee, devotedly attached to you, waiting for you, sitting on a flower, and, though thirsty, does not sip the honey without you.

Sanumati.—Noble sir, you have driven it off in a very polite way.

Vidushaka—This species (of creatures) though expelled, is obstinate and perverse.

King—O you do not thus abide by my order ? Then listen to (me) now. If you touch my beloved one's lip, red as the *Bimba fruit* sweet and charming as a fresh-grown unimpaired sprout of a tree and sucked by me gently and tenderly on occasions of joyous dalliance, I shall have you placed, in confinement in the inside of a lotus.

Vidushaka. – Why will not it be afraid of such a severe punish-

ment ? [*Laughing aside*]. He is mad. I too, in his company, am speaking in the same manner [*Aloud*]. It is a picture, friend.

King.—What ! A picture !

Sanumati.—I too am now aware of the real thing. How much less should (the king be knowing the truth), who feels actually, as he has drawn.

King.—What an evil, my friend, you have done there ? With a heart, entranced, (absorbed in her), while I was feeling the pleasure of the sight of her as if present in person, you, raking up my memory, have again turned my beloved one into a picture. [*Sheds tears*].

Sanumati.—Strange is this course of separation, inconsistent as it is with the antecedent and consequent circumstances.

King.—Friend, how shall I bear (literally feel) this incessant grief ? A meeting with her in dreams has been obstructed by reason of wakefulness. And tears on the other hand do not allow (me) to see her even in a picture.

Sanumati.—You have by all means attoned for Sakuntala's grief on account of (her repudiation).

चतुरिका। करण्डकं वंशादिनिर्म्मितपेटकं गृहीत्वा आदाय।

चतुरिका। उपनेष्यामि, समीपं प्रापयिष्यामि। बलात्कारेण बलप्रयोगेण सह इति सबलात्कारं। सः वर्त्तिकाकरण्ड:।

चतुरिका। निर्व्वाहित: अपवाहित:। तावदहं पलायिताम्मि। ण्यन्तात् वहे: कर्म्मणि क्त:।

राजा। बहुमानेन मत्प्रदर्शितेन प्रधानपत्नीगौरवेण गर्व्विता।

विदूषक:। अन्त:पुरकालकूटात् अन्त:पुरशब्देन पत्नी लक्ष्यते; तस्य कालकूटात्; क्रोधमूर्च्छितायाः नागाङ्गनाया: इव पत्न्या: कालकूटात् विषात् यदि मुक्ति: भवेत् तदा मेघप्रतिच्छन्दे अतितुङ्गत्वात् अभ्रङ्कषत्वात् मेघप्रतिच्छन्दाख्ये प्रासादे सौधे मां शब्दायस्व आह्वय अत्र धात्वर्थेन कर्म्मण: अनुपसंग्रहात् शब्दायधातोर्न अकर्म्मकत्वम्।

सानुमती। अन्यस्यां शकुन्तलायां संक्रान्तं इति अन्यसंक्रान्तं वृत्तिमात्रे सर्व्वनाम्न: पुम्वद्भाव: इति पुम्वद्भाव: तथोक्तं हृदयं यस्य स: अन्यान्तरक्तहृदय:, प्रथमं पूर्व्वसम्भावनं गौरवं अपेक्षते अनुरुध्यते। शिथिलं अल्पीभूतं सौहृदं प्रेम यस्य स:।

राजा। अन्तरा पथीमध्ये ; देवी अभिषिक्ता पत्नी वसुमती।

राजा। कार्य्यस्य उपरोध: तं, कलहेन प्रजानां कार्य्यस्य व्याघातम्।

प्रतीहारी। अमा राज्ञा सह वर्त्तते प्रकृतिकार्य्यं अवलोकयति इति अमात्य: अमा इत्यव्ययात् त्यप् अर्थानां जातं समूह: ("जातंजात्यौघजन्मसु" इति विश्व) तस्य गणनाया: बहुलतया।

राजा। [अनुवाच्य पठित्वा] समुद्रे व्यवहरति, देशात् देशान्तरं द्रव्यजातं नयति इति समुद्रव्यवहारी, वारिपथोपजीवी, सार्थं वहति इति (वहेरण्) सार्थवाह: वणिक् ; नौव्यसने नौभङ्गे विपन्न: मृत:। विचार्य्यतां अनुसन्धीयताम्। आपन्नसत्त्वा आपन्नं सत्त्वं यया सा गर्भिणी। यद्वा आपन्ना सत्त्वं इति आपन्नसत्त्वा प्राप्तापन्ने द्वितीयया इति तत्पुरुष:। द्विगुप्राप्तापन्नालंपूर्व्वगतिसमासेषु परलिङ्गताप्रतिषेधो-वक्तव्य: इति विशेष्यलिङ्गता।

प्रतीहारी। साकेतस्य अयोध्याया:। निर्वृत्तं पुंसवनं संस्कार: यस्या: सा। पुमान् सूयते अनेन इति पुंसवनम्।

राजा। गर्भ: गर्भस्थ: शिशु:। पितुरागतं इति (यत्) पित्र्यं पैतृकम् रिक्थम् धनम्। रिच्यते पुत्राद्यर्थं पित्रादिभि: त्यज्यते यत् तत् रिक्थं (रिच् धातो: थक्)।

চতুরিকা। (প্রবেশ করিয়া) স্বামীর জয় হউক। আমি চিত্রভাণ্ড লইয়া এই দিকে আসিতেছিলাম।

রাজা। তারপর কি ?

চতুরিকা। আমিই আর্য্যপুত্রের নিকট লইয়া যাইব এই বলিয়া দেবী বসুমতী তরলিকার সহিত বলপূর্ব্বক সেই চিত্রভাণ্ড পথিমধ্যে আমার হস্ত হইতে লইয়াছেন।

বিদূষক। ভাগ্যক্রমে তোমাকে ছাড়িয়া দিয়াছেন।

চতুরিকা। তরলিকা যখন বৃক্ষশাখায় লগ্ন দেবীর উত্তরীয় উন্মুক্ত করিতেছিল সেই অবকাশে আমি পলাইয়া আসিয়াছি।

রাজা। বয়স্য বহুমানগর্ব্বিত দেবী আগতপ্রায়, তুমি এই চিত্রখানি রক্ষা কর।

বিদূষক। বলুন যে নিজকে রক্ষা কর। [চিত্রফলক গ্রহণপূর্ব্বক উত্থান করিয়া] যদি আপনি অন্তঃপুরকালকূট হইতে মুক্তি পান তাহা হইলে আমাকে মেঘপতিচ্ছন্দ নামক প্রাসাদে আহ্বান করিবেন। [দ্রুতপদে নিষ্ক্রান্ত]।

সানুমতী। ইনি অন্যাসক্তহৃদয় হইলেও প্রথমপ্রণয়ের গৌরব রক্ষা করেন। এক্ষণে ইঁহার সৌহার্দ্দ শিথিল হইয়াছে।

প্রতীহারী। [পত্রহস্তে প্রবেশ করিয়া] প্রভুর জয় হউক।

রাজা। বেত্রবতি, পথমধ্যে দেবীকে দেখ নাই ?

প্রতীহারী। আজ্ঞা হাঁ, আমাকে পত্রহস্ত দেখিয়া ফিরিয়া গেলেন।

রাজা। কার্য্যজ্ঞা দেবী কার্য্যের বিঘ্ন পরিহার করিলেন।

প্রতিহারী। দেব, অমাত্য নিবেদন করিয়াছেন যে অদ্য অর্থসমূহ গণনা করিতে বহুল সময় অতিবাহিত হওয়াতে একটিমাত্র পৌরকার্য্য দেখিতে পারিয়াছেন, তাহা পত্রস্থ করিয়া প্রদত্ত হইল আপনি অবলোকন করুন।

রাজা। পত্র দেখাও।

প্রতীহারী। [প্রদান করিল]

রাজা। [পাঠ করিয়া] কি? সমুদ্র ব্যবহারী ধনমিত্র নামে বণিক নৌভঙ্গে প্রাণত্যাগ করিয়াছে। হতভাগ্য অপত্যহীন। অমাত্য লিখিয়াছেন তাহার সঞ্চিত অর্থরাশি রাজা প্রাপ্ত হইবেন। পুত্রাদি না থাকা সাতিশয় ক্লেশের বিষয়! বেত্রবতি, সেই বণিক ধনবান ছিল, তাহার বহুপত্নী থাকিবার সম্ভাবনা, অনুসন্ধান কর যদি তাহার পত্নীর মধ্যে কেহ গর্ভিণী থাকে।

প্রতীহারী। অমরা শুনিয়াছি যে সম্প্রতি উহার পত্নী অযোধ্যার শ্রেষ্ঠিকন্যার পুংসবন সংস্কার সম্পন্ন হইয়াছে।

রাজা। গর্ভস্থ শিশু পৈতৃক ধনের উত্তরাধিকারী। অমাত্যকে এই কথা বল।

· প্রতীহারী। যে আজ্ঞা করেন [প্রস্থানে উদ্যত হইল]।

Chaturika [*Entering.*]—May our lord, the king, be victorious! I was coming this way, having taken the box of pencil and colour.

King.—What then?

Chaturika.—On the way the box was taken by force from my hand by the queen Vasumati with Taralika as her companion, saying that she herself would bring it to her husband.

Vidushaka.—Luckily you have been let off.

Chaturika.—While Taralika was disentangling the mantle of the queen, caught in the branch of a tree, I carried myself off.

King.—The queen, proud because of my attentions, is coming. Keep this portrait, (with you) my friend.

Vidushaka.—Say (rather), (keep) yourself (safe). [*Taking the picture-board and rising.*]. If you escape from the poison of the harem, call me at the palace called *Meghapratichhanda.* [*Exit with fast steps.*]

Sanumati.—Though he has his heart attached to another, yet he keeps up his former respect (for this queen). Now his affection is slackened.

Warder.—[*Entering with a letter in her hand.*] May our liege be victorious?

King.—Vetravati, was not the queen seen by you on the way?

Warder.—Yes. But seeing me with letter in my hand, she turued back,

King.—She has the sense of what ought to be, and therefore avoids interruptions to my state-affairs.

Warder.—My lige, the minister informs your Majesty that owing to long calculations of the revenue, one case only of the citizens has been attended to ; which, put on paper, your Majesty will be pleased to see.

King.—Show the letter here. [*Warder delivers it.*]

King.—[*Reading*]. What ! A merchant named Dhanamitra, trading on the seas died in ship-wreck ! the poor man was childless. The minister writes that the wealth (laid up by him) will go to the king. The state of being childless is a misery indeed ! Vetravati, being a man of immense riches he must have had several wives ; see, if any one of his wives be big with child.

Warder.—It is heard that his wife, the daughter of a merchant of *Saketa* has had but recently the ceremony for giving birth to a male child done (for her).

King.—The child in the womb has rights to paternal wealth ; go and tell this to the minister.

Warder.—As your majesty commands. [*Is about to go*].

राजा। अस्य सन्ततिः अस्ति नवेत्यनुसन्धानेन प्रयोजनं नास्ति ; प्रजा येन येन स्निग्धेन बन्धुना वियुज्यन्ते दुष्यन्तः पापात् ऋते तासां स स इति घुष्यताम् ॥२३॥

प्रजाः प्रकृतयः येन येन स्निग्धेन स्नेहपूर्णेन बन्धुना पित्रादिना आत्मीयेन वियुज्यन्ते विच्छिद्यन्ते। मृत्युना येन येन स्वजनेन प्रकृतीनां वियोगः भवति इत्यर्थः। दुष्यन्तः पापात् ऋते पापात्मानं दुराचारमित्ति यावत् विना तासां प्रजानां सः सः ; प्रजानां तत्तद्बन्धुस्थानीयः दुष्यन्तः भविष्यति, किन्तु पापिनः स्थानीयो न भविष्यति इति घुष्यताम् सर्व्वत्र प्रख्याप्यताात्। यद्वा ये खलु सम्बन्धाः विप्रतीपाः अधर्म्मग्राश्च तानन्तरेण सर्व्वमेव सम्बन्धं प्रजाः दुष्यन्ते आश्वासीरन्। बन्धुनेति सहार्थे तृतीया। यथा अनुक्ते कर्त्तरि तृतीया, वियुज्यन्ते इत्यस्य कर्त्तृपदम् ॥२३॥

प्रतीहारी। प्रवृष्टं शोभनं वर्षणं (वृषधातोः भावे क्तः)।

राजा। सन्तायते: वंशः अनया इति सन्ततिः तस्याः छेदेन लोपेन नास्ति अवलम्बः आधारः येषां येषां कुलानां वंशानां मूलपुरुषस्य धनस्वामिनः अवसाने अन्ते मृत्यौ इत्यर्थः सम्पदः परं अन्यं उपतिष्ठन्ति प्राप्नुवन्ति। उपपूर्व्वात् तिष्ठतेः

सकर्म्मकत्वात्, देवपूजाद्यर्थाभावाच्च, आत्मनेपदम्। अनपत्यत्वाद् यथास्य धनमितस्य सम्पन्मामुपतिष्ठति, तथा मयि मृते ममापि धनं कश्चिदपरं जनमाश्रयिष्यति ; यतोऽहमपुत्रकः।

राजा। उपस्थितं स्वयं शकुन्तलारूपं यत् श्रेयः गर्भवत्त्वात् वंशस्य अविच्छेद हेतुभूतं मङ्गलम् तत् अवमन्यते प्रत्याचष्टे यः तम्।

राजा। आत्मनि संरोपितेऽपि, काले उप्तवीजा वसुन्धरा इव महते फलाय कल्पिष्यमाणा कुलप्रतिष्ठा धर्म्मपत्नी मया त्यक्ता नाम॥२४॥

आत्मनि स्वस्मिन् संरोपितेऽपि, गर्भे संक्रमितेऽपि, आत्मा वै पुत्रनामासि आत्मा वै जायते पुत्र इत्यादिश्रुतेः, काले समये उप्तं वीजं यत्र सा वसूनि धरति या सा (संज्ञायां भृतॄवृ इत्यादिना धरतेः खच्) वसुन्धरा, पृथिवी इव महते भूरिणे फलाय, एकत्र पुत्ररूपमहोदयाय, अन्यत्र शस्याय कल्पिष्यमाणा भविष्यन्ती कुलस्य प्रतिष्ठा वंशस्य अविच्छेदस्य निदानम् धर्मस्य पत्नी (अश्वघासादिवत् तादर्थ्ये षष्ठ्या समास) यद्वा धर्म्मार्था पत्नी धर्म्मपत्नी मया त्यक्ता अवधीरितानामेति कुत्सने उपमालङ्कारः। उपजाति वृत्तम्॥२४॥

Change of voice.—धर्म्मपत्नीं कुलप्रतिष्ठां कल्पिष्यमाणां वसुन्धरां उप्तवीजामिव त्यक्तवान् अहम्।

सानुमती। अपरिच्छन्ना अविच्छिन्ना।

चतुरिका। [जनान्तिकम्] सार्थवाहस्य वणिजः वृत्तान्तः तेन। अनपत्यत्वात् तद्धनं राजगामीति वृत्तान्तस्य उद्घातेन स्वस्यानपत्यतां स्मरन्, द्वौ गुणौ आवृत्ती (गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु इति वैजयन्ती) यस्य सः द्विगुणः तथोक्तः उद्वेगः वैमनस्य यस्य सः द्विगुणोद्वेगः।

राजा। अहो इति खेदे ; संशयं आरूढ़ाः सन्दिहानाः पिण्डं भजन्ते ये ते (भजो ण्विः) पिण्डभाजः पूर्व्वपुरुषा। अस्मात् परं नः कुले कः यथाश्रुति सम्भृतानि निवपनानि नियच्छति इति पितरः प्रसूतिविकलेन मया प्रसिक्तं उदकं धौताश्रुशेषं पिवन्ति॥२५॥

तत् इति खेदे अव्ययम् ; अस्मात् दुष्यन्तात् परं नः अस्माकं कुले कः श्रुतिं अनतिक्रम्य इति यथाश्रुति वेदानतिक्रमेण सम्भृतानि यथाशास्त्रं संगृहीतानि इत्यर्थः निवपनानि (पितृदानं निवापः स्यादित्यमरः) श्राद्धादीनि नियच्छति (दानधातोः लटिरूपम्) दास्यति, (वर्त्तमानसामीप्ये वर्त्तमानवद्वा) इति भविष्यति लट् ; इति दुःखेन इत्यर्थः पितरः पूर्व्वपुरुषाः प्रसूत्या तनयेन विकलः हीनः तेन प्रसूतिविकलेन अपुत्रकेण मया प्रसिक्तं दत्तं उदकं पयः धौतं (धाव मार्ज्जने इत्यस्मात् क्तः) चालितं अश्रु नयनजलं येन तत् धौताश्रु तच्च तत् शेषं चेति धौताश्रुशेषं पिवन्ति नूनं।

पिण्डलीपशङ्कया रुदन्तः पितरः न प्रकामभुजः इति भावः। उत्प्रेक्षालङ्कारः। वसन्ततिलकं वृत्तम् ॥२५॥

Change of voice,—निवपनानि केन निदीयन्ते, इति पितृभिः...उदकं... पीयते।

चतुरिका। [सम्भ्रमेण सह ससम्भ्रमं व्यग्रं यथा तथा अवलम्ब्य राजानं धारयित्वा] समाश्वसितु भर्त्ता।

सानुमती। दीपे सत्यपि व्यवधानस्य दोषेण अन्तरायदोषेण यथा अन्धकारं अनुभवति लोकः तथा अयमपि सत्यामपि शकुन्तलायां सत्यपि च पुत्रे बहुभिः प्रदेशैः व्यवहितत्वात् अदर्शननिबन्धनं मोहं अनुभवति इति अप्रस्तुतप्रशंसालङ्कारः। निर्वर्तं सस्विनं यज्ञे ये भागाः तेषु उत्सुकाः इति यज्ञभागोत्सुकाः एतेन पुरुवंशीयानां इष्टिपरायणत्वं गम्यते। [उत्भ्रान्तकेन नृत्येन—उद्भ्रान्तकलक्षणम्—"पूर्वं दक्षिण-मुत्थाप्याथाव कुञ्चयेत्। वामं शीघ्रं भ्रमेत् वामावर्त्तमुद्भ्रान्तकं विदुः॥"]।

नेपथ्ये—अब्रह्मण्यम्। अब्रह्मण्यमवध्योक्तौ इत्यमरः। ब्रह्मणे हितमिति ब्रह्म-ण्यम् तन्न भवति इति अब्रह्मण्यम्। ब्राह्मणः खलु अवध्यः तस्य व्यापादने उद्यमः न ब्रह्मण्यः। अवध्योऽपि ब्राह्मणोऽहं हन्ये ; अब्रह्मण्यं खलु किमपि वर्त्तते त्रायतां भोः इति अब्रह्मण्यशब्दार्थः।

রাজা। এস।

প্রতীহারী। এই আমি উপস্থিত (আছি)।

রাজা। সন্ততি আছে কি না ইহার অনুসন্ধানের প্রয়োজন নাই। এইরূপ ঘোষণা করিবে যে প্রজা যে যে স্নিগ্ধ বন্ধুর বিয়োগ প্রাপ্ত হইবে দুষান্ত তাহাদের সেই সেই বন্ধুর স্থানীয় হইবে, কিন্তু দুরাচার বা বিরুদ্ধসম্পর্ক আত্মীয়ের স্থানীয় হইবে না।

প্রতীহারী। এইরূপ ঘোষণা করিব। [নির্গত হইয়া পুনঃ প্রবেশ করিয়া] উপযুক্ত সময়ে প্রভূত বর্ষণের ন্যায় মহারাজের আদেশ প্রজাবর্গ অভিনন্দন করিয়াছে।

রাজা। [দীর্ঘ উষ্ণ নিশ্বাস ত্যাগ করিয়া] এইরূপে পুত্রলোপহেতু নিরালম্ব বংশের মূলপুরুষের মৃত্যুর পর ধনসম্পদ্ পরের হস্তগত হয়। পুরুবংশের সম্পদেরও আমার মৃত্যুর পর এইরূপ দশা।

প্রতীহারী। ঈদৃশ অমঙ্গল নিবারিত হউক।

রাজা। আমি উপস্থিত মঙ্গলের অবমাননা করিয়াছি, আমাকে ধিক্।

সানুমতী। নিশ্চয়ই সখীকে মনে করিয়া ইনি আপনাকে নিন্দা করিলেন।

রাজা। কালে নিক্ষিপ্তবীজ ভূমির ন্যায় সুমহৎ ফল প্রদানে সমুদ্যত, বংশের প্রতিষ্ঠার কারণ, ধর্ম্মপত্নীকে গর্ভিণী হইলেও আমি অবজ্ঞাপূর্ব্বক নিরাকৃত করিয়াছি।

সানুমতী। আপনার সন্ততি অবিচ্ছিন্ন হইবে।

চতুরিকা। [জনান্তিকে] এই বণিক্‌বৃত্তান্তে প্রভুর উদ্বেগ দ্বিগুণ হইয়াছে,

ইঁহাকে আশ্বস্ত করিবার নিমিত্ত মেঘপ্রতিচ্ছন্দ প্রাসাদ হইতে আর্য্য মাঠব্যকে লইয়া আইস।

প্রতীহারী। উত্তম কথা বলিয়াছ। [নিষ্ক্রান্ত]

রাজা। হায়, দুষ্যন্তের পিণ্ডভাগী পূর্ব্বপুরুষগণ সংশয় প্রাপ্ত হইয়াছেন। কারণ— এই দুষ্যন্তের পর আমাদের বংশে কে আর বিধানানুসারে শ্রাদ্ধাদির অনুষ্ঠান করিবে এই চিন্তায় পিতৃপুরুষগণ নিশ্চয়ই পুত্রহীন মৎকর্ত্তৃক প্রদত্ত জলদ্বারা অশ্রুধৌত করিয়া অবশিষ্টাংশ পান করিতেছেন। [মূর্চ্ছাগত হইলেন]

চতুরিকা। [ব্যস্ত হইয়া রাজাকে ধরিয়া] মহারাজ আশ্বস্ত হউন।

সানুমতী। আহা ইনি দীপ থাকিতেও ব্যবধান হেতু অন্ধকার অনুভব করিতেছেন। আমি এক্ষণেই ইঁহাকে সুখীকরি। অথবা শকুন্তলাকে আশ্বস্ত করিবার সময় মহেন্দ্রজননীর মুখে শুনিয়াছি যে যজ্ঞভাগে সমুৎসুক দেবতারাই এরূপ উপায় করিবেন যাহাতে শীঘ্রই স্বামী ধর্ম্মপত্নীকে অভিনন্দন করিবেন। তবে আমার আর সময়ক্ষেপ করা উপযুক্ত নহে। আমি এই বৃত্তান্তদ্বারা প্রিয়সখীকে সমাশ্বস্ত করিগে।

[একরূপ নৃত্য করিতে করিতে নিষ্ক্রান্ত হইল]

নেপথ্যে—অবধ্য ব্রাহ্মণ নিহত হয় রক্ষা করুন।

King.—Come (again).

Warder.—Here I am.

King.—What is the good of (inquiring) if there be an issue or not? Let it be proclaimed that of whatever affectionate relation be the subjects bereaved, Dushyanta will be that kinsman to them excepting the sinful.

Warder.—It shall be so proclaimed. [*Exit and re-enters.*] Your Majesty's orders have been hailed like a good shower in time.

King.—[*Having a deep, warm sigh*]. Thus do the riches (of families) supportless by reason of progeny being cut short, come to another at the death of the principal person, (the present owner). The fortune of Puru's race, too, will at my death, come to this pass.

Warder.—Heaven forbid the evil. (Literally, let the evil be averted).

King.—Woe to me who have rejected the good (which) offered itself!

Sanumati.—Surely has he blamed his own self, having in mind my friend herself.

King.—Though I have transferred my own self into her, I rejected my lawful wife, the cause of the continuance of my family who was, like the earth with seed sown in time, about to bring forth a good and great issue.

Sanumati.—Your issue will now be without a break.

Chaturika.—[*Aside*]. By this matter of the merchant, his Majesty has got his anxiety doubled. To console him, bring the noble Mathavya from Meghapratichhanda palace.

Warder.—You say well. (A good advice).

King.—Alas ! the ancestors (literally, those who are entitled to the funeral rice-ball) of Dushyanta have come to a critical pass. Because, — with the thought that 'who after him in our race will offer libations prepared according to the precepts of the Vedas ?" My ancestors do surely drink of the water, poured by me without an issue as it remains after their tears have been washed by it. [*Falls into a swoon.*]

Chaturika. – [*Supporting him in a hurry.*] Compose (yourself) my liege.

Sanumati.—Alas ! Alas ! Though there is light, he feels the evil of darkness, by reason of obstruction (obscuring his sight). I will just now make him happy. But I have heard from the mouth of the mother of Mahendra, while consoling Sakuntala, that the gods, anxious as they are for their shares in sacrifices, will themselves so contrive that the husband will shortly welcome his lawful wife. So it is not proper to while away the time here ; I will console my dear friend, Sakuntala, with his account.

[*Exit with a peculiar dance*].

Behind the Scences.—Help ! Help ! Oh ! (Literally, some wrong to a Brahmin is about to be perpetrated).

राजा। [प्रत्यागतः प्राप्तचेतनः...] अयं आर्त्तस्वरः शरणार्थं उच्चार्य्यमाणः अयं कातरताव्यञ्जकः ध्वनिः माठव्यस्य इव।

प्रतीहारी। संशयगतं कष्टमभ्यापन्नं ; जीविष्यति न वेति सन्देहविषयम् प्राप्तम्।

राजा। आत्तः गृहीतः गन्धः गर्व्वः यस्य सः आत्तगन्धः अभिभूतः गन्धो गन्धक आमोदे लेशे सम्बन्धगर्व्वयोः" इति विश्वः आत्तगन्धः अभिभूतः इत्यमरः। माणवकः

चुद्र मनुष्य: मनुशब्दात् अञ्जिक्ते अल्पार्थे णत्वम् अव अनुकम्पाद्योतनाय प्रयुक्तोऽयं शब्द: "माणवको हारभेदे वाले कुपुरुषे वटौ" इति मेदिनी।

प्रतीहारी। न दृष्टं रूपं यस्य तेन, दर्शनगोचरवपुषा ; अतिक्रम्य आक्रम्य अभिभूय इति यावत् ; अग्रभूमिं शिखरदेशम्। आरोपित: नीत:।

राजा। मा तावदिति क्रोधात् वाक्यसमाप्ति:। विदूषक: मा हन्यताम् इति पर्य्यवसानम्। ममापि नियमेन प्रजापालनशीलस्य, धर्म्माद्यनुष्ठानपरस्य इति तात्पर्य्यम्। गृहशब्द: पुंसि वहुवचनान्त:। अथवेति—अहनि अहनि आत्मन: प्रमादस्खलितं तावत् ज्ञातुं न शक्यम् ; प्रजासु क: केन पथा प्रयाति इति अशेषत: वेदितुं शक्ति: अस्ति।।२६।।

अहनि अहनि (नित्यवीप्सयोरिति द्वित्वम्) प्रतिदिनं आत्मन: स्वस्य प्रमादेन अनवधानतया स्खलितं शास्त्रविधेरतिक्रम: तावत् साकल्येन ज्ञातुं न शक्यम् ; प्रजासु मध्ये क: पुमान् केन पथा वर्त्मना प्रयाति, कीदृगाचरति इति अशेषत: समग्रं यथा तथा वेदितुं परिज्ञातुं शक्ति: सामर्थ्यम् अस्ति , न कदापि इति भाव:। यदि तावत् आत्मन: पापं प्रतिदिनमनुष्ठीयमानं निरूपयितुमशक्यम् निखिलानां प्रजानां स्खलितमवधारयितुं सर्व्वथैवाशक्यमिति किमु वक्तव्यम्। प्रजानां पापेन नृपस्य प्रत्यवायो भवति। यथाह मनु: —

सर्व्वत: धर्म्मषड्भाग: राज्ञो भवति रक्षत:।
अधर्म्मादपि षड्भाग: भवत्यस्य ह्यरक्षत:॥

तत्प्रत्यवायफलं सत्त्वाभिभव:॥ २६॥

नेपथ्ये—भो वयस्य अविहा अविहा। अविहेति खेदे निपात:।

शिरस: धरा इति शिरोधरा ग्रीवा प्रत्यवनता अवाची शिरोधरा यस्य तं, अवाक्शिरसं इत्यर्थ: त्रिभि: भङ्ग: यस्य तं त्रिभङ्गं त्रिखण्डम्।

यवनिका। हस्तं आवपति रक्षति इति हस्तावाप: (कर्म्मण्यण्) तेन सहितम्।

नेपथ्ये—अभिनवकण्ठशोणितार्थी शार्दूल: पशुमिव एष: अहं चेष्टमानं त्वां हन्मि, आर्त्तानां भयं अपनेतुं आत्तधन्वा दुष्यन्त: इदानीं तव शरणं भवतु ॥ अभिनवं प्रत्यग्रं यत् कण्ठशोणितं तत् अर्थयते इति अभिनवकण्ठशोणितार्थी शार्दूल: व्याघ्र: पशुं इव एष: अहं चेष्टमानं आत्मानं त्रातुं हस्तपादादिकं विक्षिपन्तं त्वां हन्मि विनाशयामि। आर्त्तानां प्रपीड़ितानां विपन्नानां भयं अपनेतुं निराकर्त्तुम् आत्तं गृहीतं धनुर्येन स आत्तधन्वा गृहीतकार्मुक: दुष्यन्त: इदानीं तव शरणं रक्षिता भवतु। राजानं कोपयितुमिदमुक्तम्। उपमालङ्कार:। प्रहर्षिणीवृत्तम्। तल्लक्षणं त्र्याशाभिर्मनजरगा: प्रहर्षिणीयम्।।२८।।

आत्तं धनुर्येन इति विग्रहे आत्तधन्वा—"धनुषश्च" इति बहुव्रीहौ समासान्तः अनङादेशः। Compounds ending in धनुष admit of the augment अनङ् in बहुव्रीहिः।

Change of voice.—......अभिनवकण्ठशोणितार्थिना शार्दूलेन पशुरिव त्वं एतेन मया हन्यसे चेष्टमानः...आत्तधन्वना दुष्यन्तेन...शरणेन भूयताम्।

राजा। कुणपः (कण धातोः कपन् सम्प्रसारणञ्च) मृतदेहः अशनं यस्य सः कुणपाशनः राक्षसः ततसम्बोधने: भविष्यसि जीविष्यसि। शृङ्गस्य विकारः इति सार्ङ्गं धनुः।

विड़ालेन मार्ज्जारेण गृहीतः धृतः।

राजा। तिरस्करण्या अन्तर्धानसम्पादनविद्यया गर्व्वितः दृप्तः। तं द्रष्टुं बाणं सन्दधे धनुषि योजयामि—

यः वध्यं त्वां हनिष्यति रक्ष्यं द्विजं रक्षिष्यति, हंसः क्षीरं आदत्ते तन्मिश्राः अपः वर्ज्जयति ॥२८॥

यः बाणः वध्यं वधार्हं "हनो वा यद्वधश्च वक्तव्यः" इति वार्त्तिकेन हन्धातोः यत्प्रत्ययेन वधादेशे वध्यः सिद्धः; यद्वा वधं अर्हति इति दण्डादिभ्यः यः। कृतागसं इत्यर्थः त्वां हनिष्यति व्यापादयिष्यति रक्ष्यं रक्षणार्हं द्विजं विप्रं विदूषकं रक्षिष्यति त्वत: त्रास्यते। एतदेव स्पष्टीकर्त्तुं दृष्टान्तमाह;—हंसः क्षीरं दुग्धं आदत्ते किन्तु तन्मिश्राः दुग्धेन मिश्रिताः अपः जलानि वर्ज्जयति हंसः पेयं दुग्धं पिबति अपेयं जलं यथा त्यजति तथा मम बाणः वध्यं त्वां व्यापादयिष्यति, अवध्यं विप्रं त्यक्ष्यति। दृष्टान्तालङ्कारः॥२८॥

Change of voce.—...येन वध्यः त्वं घानिष्यसे रक्ष्यः द्विजः रक्षिष्यते; हंसेन क्षीरं आदीयते...आपः वर्ज्ज्यन्ते।

मातलिः। हरिणा असुराः तव शरव्यं कृता तेषु इदं शरासनं विकृष्यताम्। सतां प्रसादसौम्यानि चक्षूंषि सुहृज्जने पतन्ति दारुणाः शराः न॥२९॥

हरिणा आखण्डलेन (यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु इत्यमरः) असुराः अस्यन्ति क्षिपन्ति भिन्दन्ति च ये ते असुराः (असेरुरन्) यद्वा असुभिः प्राणैः रमन्ते इति (असुशब्दोपपदात् रमेर्डः कर्त्तरि) तव शरव्यं लक्ष्यं कृताः लक्षं लक्ष्यं शरव्यञ्च इत्यमरः विधेयविशेषणत्वात् नियतलिङ्गत्वाञ्च, लिङ्गवचनयोः स्वातन्त्र्यम् तेषु इदं शरासनं विकृष्यताम्—ते एव तव वध्याः नाहमिति भावः। कुत इदमित्यत आह सतां साधूनां प्रसादेन अनुग्रहेण सौम्यानि सुन्दराणि प्रसादामलानि न तु कोपकषायितानि चक्षूंषि सुहृज्जने बन्धुजने पतन्ति दारुणाः भीषणाः शराः बाणाः न पतन्ति; साधवो

वन्धून: स्निग्धं वीचन्ते न तु वाणैर्भिन्दन्ति। तृतीये द्वितीये च चरणे परिसंख्यालङ्कार:। द्वितीयार्द्धेन प्रथमार्द्धस्य समर्थनात् अर्थान्तरन्यास: अलङ्कारश्च। वंशस्थविलं वृत्तम्। समस्तएव असुरगण: त्वदेकेषुनिपातसाध्य: इति द्योतयितुं शरव्यमित्यत्र एकत्वम्; क्षता: इत्यस्य असुरा: इत्यनेन्वाय:—प्रकृतेविकृतेर्वापि यत्रैकत्वं द्वयोरपि वाचक: प्रकृते: संख्यां गृह्णाति विकृतेर्नतु॥" इति न्यायपञ्चाननचरणा:॥२८॥

शृणाति इति शरु: (शृधातो: उन्) वाण: तस्मै शरवे वाणक्षिप्तायै इत्यर्थ: हितं इति शरव्यं (शरुशब्दात् यत्)।

Change of voice.—हरि: असुरान् शरव्यं कृतवान्, इदं शरासनं विकर्ष। प्रसादसौम्यै: चक्षुर्भि: न दारुणै: शरै: पत्यते।

विदू। इष्टि: याग: तस्या: पशु: इति इष्टिपशु: तमिव मारयित्वा इति मारयते रनुप्रयोग:। उपमाने कर्मणि च।

When comparison is meant, verbs having the उपमान as their accusative case (and also nominative) take the कृदन्त suffix णमुल्; and roots like कष, हन &c. are repeated as finite verbs.

मातलि:। कालनेमि: तदाख्यस्य शतवाहो: दानवस्य प्रसूति: तद्वीवसम्भूत: दुर्जय:, दु:खेन जीयते इति (जयते: खल्) अन्वर्थसंज्ञ:।

स ते सख्यु: शतक्रतो: अजय्य: किल, त्वं रणशिरसि तस्य निहन्ता स्मृत: असि सप्तसप्ति: यत् नैशं तिमिरं उच्छेत्तुं न प्रभवति चन्द्र: तत् अपकरोति॥३०॥

स दानवगण: तव सख्यु: सुहृद: शतक्रतो: इन्द्रस्य (कृत्यानां कर्त्तरि वेति षष्ठी) अजय्य: जेतुमशक्य: (चय्यजय्यौ शक्यार्थ इति निपात:)। रणशिरसि रणमूर्द्धनि त्वं तस्य निहन्ता विनाशयिता स्मृत: मत: असि। य: खलु इन्द्रस्याप्यजय्य: स कथं मया घानिष्यते इति शङ्कां निरस्यन्नाह सप्तसप्तय: अश्वा: यस्य स: सप्तसप्ति: सूर्य्य: यत् निशाया: इदं इति नैशं शार्व्वरं तिमिरं अन्धकारं उच्छेत्तुं दूरीकर्तुं न प्रभवति शक्नोति, चन्द्र: तत् अन्धकारं अपाकरोति नुदति। हिमतेजसाऽपि अहिमतेजसोऽच्छेद्यं नैशं ध्वान्तं यथापाक्रियते, भूपालेनापि द्युपालस्यानभिभवनीय: शत्रु: तथा व्यापादयिष्यते इत्यर्थ:। दृष्टान्तालङ्कार:। प्रहर्षिणीवृत्तम् लक्षणमुक्तम्॥३०॥

Change of voice—तेन अजय्येन भूयते। त्वया निहन्ता स्मृतेन भूयते सप्तसप्तिना न प्रभूयते...चन्द्रेण तत् अपाक्रियते।

राजा। मघवत: इन्द्रस्य; सम्भावनया, गौरवेण।

मातलि:। किञ्चित् निमित्तं कारणं यस्य तस्मात्; विक्लव: कातर:।

चलितेन्धनः अग्निः ज्वलति, विप्रकृतः पन्नगः फणं कुरुते। प्रायः जनः चोभात् स्वं महिमानं प्रतिपद्यते॥३१॥ चलितानि कम्पितानि (चल कम्पने घटादिः अतः णिचि ह्रस्वत्वम्) इन्धनानि काष्ठानि यस्य सः चलितेन्धनः वह्निः ज्वलति स्वदीप्तिपरिग्रहं करोति; विप्रकृतः, कृतानिष्टः पन्नगः फणं कुरुते उन्मीलयति दंशनार्थमिति भावः। वाक्यद्वये एकधर्म्मस्य पृथक् निर्देशात् प्रतिवस्तूपमालङ्कारः। पूर्व्वोक्तमेव सामान्यवचनेन द्रढ़यति। प्रायः हि जनः चोभात् उत्तेजनात् स्वं स्वकीयं महिमानं महत्त्वं तेजः इत्यर्थः प्रतिपद्यते प्रतिगृह्णाति अर्थान्तरन्यासः। आर्य्याजातिः। पन्नं अधोमुखं यथा तथा गच्छति इति पन्नगः, यद्वा पद्भ्यां न गच्छति इति पन्नगः॥ ३१॥

Change of voice.—चलितेन्धनेन अग्निना ज्वल्यते; विप्रकृतेन पन्नगेन फणः क्रियते, जनेन...स्वः महिमा प्रतिपद्यते।

राजा। दिवः स्वर्गस्य पतिः इति दिवस्पतिः तस्य दिवस्पते: दिवस्पतिः इत्यत्र षष्ठ्या अलुक्। "षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु" इति सूत्रस्य छन्दोविषयत्वात् नात्रावसरः, अतएव "विभाषा स्वसृपत्योरिति सूत्रस्य ऋदन्तभिन्नेऽपि शब्देऽतिदेशः कार्य्यः; अतएव "क्वचिदन्यत्रापि" इति सूत्रं कुर्व्वन् वाचस्पतिः दिवस्पतिः वास्तोस्पतिरित्यादि उदाजहार क्रमदीश्वरः। पद्मनाभस्तु संज्ञायां षष्ठ्या अलुक् इत्याह।

The rule that the sixth case ending of bases ending in ऋ is optionally elided, when they are compounded with स्वसृ and पति, must be extended so as to include bases other than those ending in ऋ. Hence it is that *Kramadiswara*, the author of the *Sankshiptasara*, has made a separate *sutra*; and quoted दिवस्पति &c. as its illustration.

The विसर्ग in दिवः in दिवस्पतिः is changed into स् because it comes within the class known as कस्कादि।

त्वन्मतिरिति—केवला त्वन्मतिः प्रजाः परिपालयतु अधिज्यं इदं धनुः अन्यस्मिन् कर्म्मणि व्यापृतं॥३२॥ केवला अन्यनिरपेक्षा मत्साहाय्यमन्तरेणेत्यर्थः त्वन्मतिः तव मतिः बुद्धिः प्रजाः परिपालयतु अधिज्यं आरोपितगुणं इदं मम धनुः अन्यस्मिन् कर्म्मणि असुरवधरूपे देवकार्य्ये व्यापृतं निरतम्॥ ३२॥

Change of voice.—अधिज्येन अनेन धनुषा व्यापृतेन भूयते। त्वन्मत्या केवलया प्रजाः परिपाल्यन्ताम्।

इति षष्ठः अङ्कः समाप्तः।

রাজা। [সংজ্ঞাপ্রাপ্ত হইয়া শ্রবণ করিয়া] মাঠরোর স্থায় আর্ত্তস্বর, এখানে কে আছ?

প্রতীহারী। [প্রবেশপূর্ব্বক ব্যস্ত হইয়া] আপনার বয়স্য সংশয়াপন্ন, তাহাকে রক্ষা করুন।

রাজা। ব্রাহ্মণকুমার কাহার কর্ত্তৃক অভিভূত হইয়াছে ?

প্রতিহারী। অদৃষ্টশরীর কোন প্রাণী আপনার প্রিয় বয়স্যকে আক্রমণ করিয়া মেঘপ্রতিচ্ছন্দ প্রাসাদের শিখরদেশে লইয়া গিয়াছে।

রাজা। [উত্থান করিয়া] আমার প্রিয় বয়স্যকে কেহ বিনাশ করিতে পারিবে না। আমারও গৃহে ভূত প্রেতাদির উপদ্রব ? অথবা (আশ্চর্য্যের বিষয় কি ?) প্রতিদিন অনবধানবশতঃ নিজেরই সমস্ত পাপ জানিতে পারা যায় না ; প্রজাদিগের মধ্যে কে কোন্ পথে গমন করিতেছে ইহা কি সম্পূর্ণভাবে জানিবার শক্তি আছে ?

নেপথ্যে—হে বয়স্য মরিলাম ! মরিলাম !

রাজা। [দ্রুতগতিতে গমণ করিয়া] সখে ভয় করিও না, ভয় করিও না।

নেপথ্যে—[মরিলাম ইত্যাদি পাঠ করিয়া] হে বয়স্য, কেন ভয় করিব না ? এই কে একজন আমার স্কন্ধ নীচের দিকে দিয়া আমাকে ইক্ষুর ন্যায় তিন খণ্ড করিতেছে।

রাজা। [দৃষ্টিপাত করিয়া] ধনুক লয়ে এস।

যবনিকা। [ধনুঃহস্তে প্রবেশ করিয়া] প্রভু হস্তত্রাণ সহিত এই ধনুক।

[রাজা শর সহিত ধনুর্গ্রহণ করিলেন]

নেপথ্যে—অভিনবকণ্ঠশোণিতপিপাসু শার্দ্দূল যেরূপ বিচেষ্টমানপশুকে বিনাশ করে, আমিও সেইরূপ তোমাকে বিনাশ করিব। বিপন্নদিগের ভয় দূর করিবার জন্য যিনি ধনুর্ধারণ করেন সেই দুষ্যন্ত এক্ষণে তোমার সহায় হউন।

রাজা। [ক্রোধের সহিত] কি ? আমাকে উদ্দেশ করিয়া বলিতেছ ? রে রাক্ষস থাক্ এই তুই আর বাঁচ্লি না। [ধনুকে গুণ দিয়া] বেত্রবতি, সোপানের পথ দেখাও।

প্রতীহারী। এদিকে আসুন মহারাজ, এদিকে আসুন।

[সকলে সত্বর গমন করিতে লাগিলেন]

রাজা। [চতুর্দ্দিক্ অবলোকন করিয়া] এ ত সব শূন্য।

নেপথ্যে—মরিলাম, মরিলাম। আমি আপনাকে দেখিতেছি ; আপনি আমাকে দেখিতে পাইতেছেন না। বিড়ালধৃত মূষিকের ন্যায় আমি জীবনে নিরাশ হইয়াছি।

রাজা। হে রাক্ষস, তুমি অন্তর্ধানবিদ্যার প্রভাবে গর্ব্বিত হইয়াছ ; কিন্তু আমার শস্ত্র তোমাকে দেখিতে পাইবে। আমি সেই অস্ত্র সংযোজিত করিতেছি ; যাহা বধার্হ তোমাকে বিনাশ করিবে, কিন্তু রক্ষার যোগ্য এই ব্রাহ্মণকে রক্ষা করিবে। যেমন হংস দুগ্ধ পান করে কিন্তু দুগ্ধের সহিত মিশ্রিত জল পরিত্যাগ করে।

[বাণ যোজনা করিলেন।]

[তাহার পর বিদূষককে পরিত্যাগ করিয়া মাতলি প্রবেশ করিলেন]।

মাতলি। ইন্দ্র অসুরগণকে আপনার বাণের লক্ষ্য স্থির করিয়াছেন, তাহাদের প্রতি

এই ধনুঃ আকৃষ্ট করুন। সাধুগণ বন্ধুগণের প্রতি প্রসন্ন ও অমল দৃষ্টি পাতিত করেন, দারুণ শর পাতিত করেন না।

রাজা। [অস্ত্র সংহৃত করিয়া] মাতলি ! মহেন্দ্রসারথে, আপনার শুভাগমন।

বিদূষক। [প্রবেশ করিয়া] আমাকে যিনি যজ্ঞের পশুর ন্যায় মারিয়া ফেলিতে-ছিলেন, তাঁহাকে শুভাগমন বলিয়া অভিনন্দন করিতেছেন।

মাতলি। [ঈষৎ হাস্যের সহিত] আমি যে জন্য ইন্দ্রকর্তৃক আপনার নিকট প্রেরিত হইয়াছি তাহা শ্রবণ করুন।

রাজা। আমি মনোযোগ দিয়াছি।

মাতলি। কালনেমির বংশোৎপন্ন দুর্জ্জয় নামে দানবগণ আছে।

রাজা। আছে, আমি পূর্ব্বে নারদের মুখে শুনিয়াছি।

মাতলি। সেই দানবগণকে আপনার সুহৃদ্ ইন্দ্র জয় করিতে সমর্থ নহেন। আপনি রণাঙ্গনে তাহাদের বধসম্পাদন করিবেন ইহা আমরা বিবেচনা করি। সূর্য্য যে নৈশ অন্ধকার দূর করিতে সমর্থ হন না, চন্দ্র তাহা দূর করিয়া থাকেন। আপনি সশস্ত্রই আছেন, এক্ষণে ইন্দ্রের রথে আরোহণ করিয়া জয়ের জন্য প্রস্থান করুন।

রাজা। মঘবার এই গৌরবপ্রদর্শনে আমি অনুগৃহীত হইয়াছি। মাঠব্যের প্রতি এরূপ ব্যবহার কেন করিয়াছেন ?

মাতলি। তাহাও বলিতেছি, কোন কারণবশতঃ মনঃসন্তাপে আপনাকে কাতর দেখিয়াছিলাম ; আপনাকে ক্রুদ্ধ করিবার জন্য এরূপ করিয়াছি। কারণ—

অগ্নির কাষ্ঠ সঞ্চালিত করিয়া দিলে অগ্নি জ্বলিয়া উঠে, সর্পকে আঘাতাদি করিলে সে ফণা উত্তোলন করে। উত্তেজিত হইলে প্রায়ই লোকে স্বীয় তেজ ধারণ করে।

রাজা। [জনান্তিকে] বয়স্য, স্বর্গপতির আদেশ অনুল্লঙ্ঘনীয়, অতএব এ বিষয় অমাত্যকে অবগত করাইয়া আমার বাক্যানুসারে বলিবে—কেবল আপনার বুদ্ধি এক্ষণে প্রজাদিগকে পালন করুন। আরোপিতগুণ এই ধনু অন্য কার্য্যে ব্যাপৃত হইয়াছে।

বিদূষক। আপনি যেরূপ আদেশ করেন। [নিষ্ক্রান্ত]

মাতলি। আয়ুষ্মন্ রথে আরোহণ করুন।

[রাজা রথারোহণ অভিনয় করিলেন]

[সকলে নিষ্ক্রান্ত]

ষষ্ঠ অঙ্ক সমাপ্ত।

King.—[*Recovering himself. Listening*]. Ha ! This cry of distress is like Mathavya's. Who is there ?

Warder.—[*Entering. In a hurry.*] My liege, save your friend who is in a critical state.

King.—By whom that poor young fellow has got his pride humbled ?

Warder.—By some evil spirit of invisible form he has been seized and taken to the top of the Meghapratichhanda palace.

King.—[*Rising*]. That must not be (allowed). Even my house is infested by demons. Or when it is not possible, to know the faults of my own self occurring day by day by reason of carelessness is there the power of knowing entirely which of the subjects takes to which way ?

[*Behind the Scenes*].

Ah ! Friend ! I die !

King.—[*Walking in an altered pace.*] Don't fear, my friend, don't fear.

Behind the Scenes.—[*Repeating the same*]. Why shall I not fear ? Here is some one breaking me, with my neck bent downwards into three parts like a piece of sugarcane.

King.—[*Glancing round*]. (My) bow.

A Yavana-woman.—[*Entering with a bow in the hand*]. Here is, my liege, the bow with the finger-guard (thimble).

King.—[*Takes the bow with arrows.*]

[*Behind the Scenes*]

Here I kill you, as a tiger seeking fresh blood of the throat does a beast struggling (for life). Let Dushyanta, who wields the bow to remove the fear of the distressed, be your succour now.

King.—[*With fury*]. What, he defies me ! Stay, thou, eater of dead bodies ! Thou salt be no more ! [*Stringing the bow*]. Vetravati, show the way to the staircase.

Warder.—This way, my liege, this way. [*All walk in haste*].

King.—[*Looking on all sides*].—There is nothing here (Literally it is vacant.)

[*Behind the Scenes*.

Alack ! I die ! I see you ; but you do not see me. Like a mouse caught hold of by a cat, I have become hopeless about my life.

King.—O you, proud of your power of making yourself invisible ! my weapon shall see you. Here do I set such a shaft as shall kill you deserving of death, and save the Brahman deserving

to be saved ;—even as a swan takes up milk and casts off water mixed with it. [*Sets the arrow to the bow*].

[*Then enter Malati having released Vidushaka.*]

Matali.—The Asuras have been made the mark for your arrows by Hari (Indra) ; let then this bow be drawn against them. Looks, kind by reason of favour, and not terrible arrows, of good men fall on their friends.

King.—[*Withdrawing the weapon*]. O ! Matali ! Welcome, charioteer of Indra.

Vidushaka.—[*Entering*]. He by whom I was going to be killed like an animal for sacrifice is greeted with a welcome !

Matali.—[*With smile.*] Long-lived prince, hear (the reason) why I have been sent to you by Indra.

King.—I attend.

Matali.—There is a clan of demons (the Danavas), by name Durjaya, the offspring of Kalanemi.

King.—There is. I heard (of them) before from Narada.

Matali.—That (clan) is not to be conquered by your friend, the performer of hundred sacrifices. You are considered to be its destroyer in the forefront of battle. (For), the moon dispels that nocturnal darkness which the seven-horsed sun is unable to disperse. You are now equipped with arms ; set out for victory, having ascended the car of Indra.

King.—I have been favoured by this honour (done to me) by Maghavan (Indra). But why have you acted in this manner towards Mathavya) ?

Matali.—That too (I am going) to tell. On account of some mental distress due to a certain cause, your Majesty was found by me utterly overcome. Then in order to make you angry, I did so. Because, the fire with its fuel stirred up blazes, the snake, being offended, raises its hood Generally does every being assume and put forth its energy through provocation.

King.—[*Aside*] My friend, the command of the lord of heaven cannot be transcended. Therefore, making the minister informed of the matter tell him from me that—"let your intelligence alone

protect the people (for a while) ; this well-strung bow is employed in another task."

Vidushaka.—What your Majesty commands (shall be obeyed). [*Exit.*]

Matali.—Let the long-lived prince ascend the car.

[*The king acts the part of mounting on the chariot.*[

[*Exeunt all*].

End of the sixth act.

सप्तमोऽङ्कः।

[दानवविजयादनन्तरं उर्व्वीं प्रतियास्यन् नरपतिः (आकाशयानेन) विमानेन प्रविशति]

राजा। अनुष्ठितः कृतः प्रतिपालितः निर्देशः मघवतः आदेशः येन तथोक्तः, सत्क्रिया आदरः तस्य विशेषः अतिशयः तस्मात् हेतोः ; अनुपयुक्तं अयोग्यं तादृशस्य आदरस्य अनर्हं मन्ये।

मातलिः। उभयं भवन्तं मघवन्तञ्च। भवान् मरुत्वतः प्रतिपत्त्या प्रथमोपकृतं लघु मन्यते, सः अपि भवतः अवदानविस्मितः सत्क्रियागुणान् न गणयति॥ १॥

भवान् मरुतः देवाः सन्ति अस्य इति मरुत्वान् तसौ मत्वर्थे इति पदसंज्ञायाः अभावात् न जश्त्वम्। इन्द्रः तस्य मरुत्वतः प्रतिपत्त्या गौरवेण सम्माननया इति यावत् ; सत्क्रियादर्शनेन इत्यर्थः प्रथमं उपकृतं दानववधरूपं तत् लघु मन्यते। एवम्विधस्य सत्कारस्यायोग्यः खलु सत्कृतोऽसुरसंहारः इति त्वं मन्यसे। सः इन्द्रः अपि भवतः अवदानेन वीरकर्म्मणा अवदानं खण्डने स्यादतिवृत्ते च कर्म्मणि इति मेदिनी। विस्मितः विस्मयपरवशः सन् क्रियायाः स्वकृतायाः गुणान् उत्कर्षान् विशेषान् इति यावत् न गणयति। विस्मयाप्लुतः विगलितवेद्यान्तरः आत्मकृतां सम्माननां योग्यां न मन्यते। अवपूर्व्वात् दोच्छेदने इति धातोः ल्युट् अवदानं दो लट् द्यति ; लिट् ददौ ; लुङ् अदात्। यद्वा दाप छेदने इति धातोः ल्युट्। दा लट् दाति, लिट् ददौ ; लुङ् अदासीत्। वियोगिनीवृत्तम् लक्षणमुक्तम्।। १॥

Change of voice.—भवता मन्यते। तेन...अवदानविस्मितेन सत्क्रिया गुणाः न गण्यन्ते।

राजा। मनोरथानां अभिलाषाणां अभूमिः अगोचरः। मनसापि भावयितुं न शक्यः। विसर्ज्जनस्य आमन्त्रणस्य अवसरे समये सत्कारः द्यौः अोकः येषां ते

दिवौकस: देवा: पृषोदरादित्वात् साधु पदमिदम् ; यद्वा दिवं स्वर्ग: ओक: येषां ते दिवौकस:। अर्द्धम् आसनस्य इति अर्द्धासनम् "अर्द्धं नपुंसकम्" इति समांशवाचिना नपुंसकेन अर्द्धशब्देन सह समासे पूर्व्वनिपात:। The word अर्द्ध when it implies half is always neuter ; in a compound of the तत्पुरुष kind, the neuter base अर्द्ध is always placed first.

अन्तर्गतमिति। अन्तर्गतप्रार्थनं अन्तिकस्थं नयन्तं उद्वीक्ष्य कृतस्मितेन हरिणा आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला (मम) पिनद्धा ॥२॥

अन्त: हृदयं गता इति अन्तर्गता हृदि स्थिता प्रार्थना मालाप्राप्तीच्छा यस्य तम् अन्तर्गतप्रार्थनं अन्तिकस्थं समीपस्थितं स्वतनयं जयन्तम् उद्वीक्ष्य दृष्ट्वा विज्ञाय इत्यर्थ: कृतं स्मितं येन तेन कृतस्मितेन न तेऽभिलाष: पूर्णो भविष्यति इति ज्ञापयितुमिव ईषत् हसता हरिणा इन्द्रेण, आमृष्टं संघर्षणेन विलुप्तं यत् वक्षस: हरिचन्दनं विलेपनार्थं प्रदत्तं हरिचन्दनानुलेपनं तदेव अङ्क: चिह्नं यस्या: सा आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला मन्दारपुष्पै: ग्रथिता स्रक् अर्द्धासनोपवेशितस्य मम कण्ठे इति शेष: पिनद्धा स्वयं परिधापिता अपिपूर्व्वात् नह्यते: कर्म्मणि क्त:। वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरिति अकारलोप: पाक्षिक:। पुत्रप्रार्थना तिरस्कृत्य यन्मह्यं अर्द्धासने उपविष्टाय मालां स्वकण्ठादुन्मुच्य प्रादात् किन्तन्मनसापि चिन्तयितुं शक्यते ; अहो मयि दिवस्पतेरनुग्रह: इति भाव:। वियोगिनीवृत्तम् लक्षणमुक्तम् ॥२॥

Change of voice.—कृतस्मित: आमृष्टवक्षोहरिचन्दनाङ्कां मन्दारमालां हरि: पिनद्धवान्।

मातलि:। पुरा पुरुषकेशरिण: नखै: अधुना आनतपर्व्वभि: तव शरैश्च उभयै: सुखपरस्य हरे: त्रिदिवं उद्धृतदानवकण्टकं कृतम् ॥३॥

पुरा कृतयुगे पुरुषश्चासौ केशरी चेति पुरुषकेशरी तस्य पुरुषकेशरिण: नृसिंहस्य नखै: नृसिंहावतारभाज: विष्णो: हिरण्यकशिपुघातिन: नखरै:, अधुना इदानीं तव आनतानि ऋजुत्वात् सन्नतानि पर्व्वाणि ग्रन्थय: येषां तै: आनतपर्व्वभि: शरै: वाणैश्च इति उभयै: सुखपरस्य सुखासक्तचेतस: हरेरिन्द्रस्य त्रिदिवं स्वर्ग: उद्धृता: उन्मूलिता दानवा: एव कण्टका: यस्मात् तत् तथोक्तं निष्प्रत्यूहोपभोगमित्यर्थ: कृतम्। अत्र प्रस्तुतस्य नृपशरस्य अप्रस्तुतस्य नृसिंहनखस्य च एकधर्म्माभिसम्बन्धात् दीपकालङ्कार:। वृत्तम् द्रुतविलम्बितम्। तृतीया द्यौ: इति त्रिदिव: (वृत्तिविषये संख्याशब्दस्य पूरणार्थत्वम्) निपातनात् साधु: ; यद्वा त्रयो दीव्यन्ति अत्र इति आधारे घञर्थे क:, त्रिदिवशब्दस्य क्लीवे प्रयोगश्चिन्त्य:। अयममरेण पुंसि पठित: "स्वर्गनाकत्रिदिवत्रिदशालया:" ॥ पाणिनिरपि देवासुरात्मस्वर्गगिरीत्यादिना अस्य पुंस्त्वमेवानुमन्यते।

"दिवं क्लीवं तयोः स्मृत" मिति मेदिनी, तृतीयं दिवं इति त्रिदिवम् इति कथञ्चिन्निर्व्वाहः ॥३॥

Change of voice.—...आनतपर्व्वाण: शरा: नखाश्च इति उभये त्रिदिवं... कृतवन्त:।

राजा। अत्र दानवजये इन्द्रस्यैव माहात्म्यं प्रशंसनीयम्; नियोज्याः महत्सु अपि कर्म्मसु सिध्यन्ति इति यत् तं ईश्वराणां सम्भावनागुणं अवेहि। अरुणः किंवा तमसां विभेत्ता अभविष्यत् चेत् सहस्रकिरणः तं धुरि न अकरिष्यत्॥४॥ नियोज्याः भृत्याः महत्सु आयाससाध्येषु अपि कर्म्मसु कार्य्येषु सिध्यन्ति, कृतार्थाः भवन्ति इति यत् तं ईश्वराणां प्रभूणां सम्भावनायाः गौरवस्य ("सम्भावना वासनायां गौरवे ध्यानकर्म्मणि" इत्यजयः) गुणं अवेहि जानीहि प्रवलस्येन्द्रपतिस्तन्नाममहिम्ना एव कार्य्यसिद्धिर्भवति न तव सेवकानां कोऽपि गुणः, उक्तञ्च "व्यपदेशेऽपि सिद्धिः स्यादतिशक्ते नराधिपे"। एतदेव समर्थयितुमुदाहरति किंवेति,—अरुणः गरुड़ाग्रजः तमसां अन्धकाराणां विभेत्ता नाशकः किं कथं अभविष्यत् चेत् यदि सहस्रं किरणाः यस्य सः सहस्रकिरणः सूर्य्यः तं अरुणं धुरि स्वस्य यानाग्रे न अकरिष्यत् तमोनिरसने सूर्य्यस्यानुभावस्यैव कर्त्तृत्वम् अरुणस्तत्र निमित्तमात्रमित्यर्थः। यद्वा सम्भावनायाः अयमत्र व्यापारे योग्यः इत्येवम्विधायाः प्रभुकृतायाः सम्भावनायाः गुणः फलमित्यर्थः यो यत्र कर्म्मणि प्रभुणा नियुज्यते सोऽङ्गव्ययेनापि तत्कर्म्म साधयितुं चेष्टते। तच्च चेष्टितं प्रभोः सम्भावनायाः समुत्थमिति वा व्याख्यानं। विशेषेण सामान्यसमर्थनमर्थान्तरन्यासः, दृष्टान्तः इति राघवभट्टः। क्रियातिपत्तौ लृङ्। अत्र नञ्सहितायाः क्रियाया अतिपत्तिः। धुरि अंकरणस्य अतिपत्तिः (असमाप्तिः), ततो लृङ्॥४॥

निपूर्व्वात् युजेः ण्यत् नियोज्यः "प्रयोज्यनियोज्यौ शक्यार्थे" इति कुत्वाभावः। The ज of युज with प्र and नि is not changed into ग in the presence of the कृदन्त suffix ण्यत् when the meaning is a servant or a subordinate.

Change of voice.—नियोजेन यत् सिध्यते स सम्भावनागुणः अवेयताम्। अरुणेन विभेत्ता...अभविष्यत, सहस्रकिरणेन...सः नाकरिष्यत।

[তাহার পর আকাশযানে রথারূঢ় রাজা ও মাতলির প্রবেশ]

রাজা। মাতলে, আমি ইন্দ্রের আদেশ পালন করিয়াছি সত্য কিন্তু তাঁহার বিশিষ্ট আদর ও অভ্যর্থনা দেখিয়া আমি আপনাকে (সেই আদরের) অনুপযুক্ত বিবেচনা করিতেছি।

মাতলি। [ঈষৎ হাস্যের সহিত] আয়ুষ্মন্! আপনাদের উভয়কেই এ বিষয়ে অতৃপ্ত-

বোধ হইতেছে। আপনি দেবেন্দ্রের অনুষ্ঠিত আদর ও গৌরবহেতু নিজকৃত প্রথম উপকার অকিঞ্চিৎকর বোধ করিতেছেন, দেবেন্দ্রও আপনার বীরোচিত কর্ম্মে বিস্মিত হইয়া স্বকৃত অভ্যর্থনা লঘু বিবেচনা করিতেছেন।

রাজা। মাতলে, এরূপ বলিবেন না। বিদায়সময়ে তিনি যেরূপ সম্মান প্রদর্শন করিয়াছেন তাহা মনোরথের অগোচর। কারণ বাসবসমীপে উপবিষ্ট নিজপুত্র জয়ন্তকে (স্বকণ্ঠস্থিতমালালাভে) অভিলাষবান্ দেখিয়া ঈষৎ হাস্যপূর্ব্বক সমস্ত দেবগণের সমক্ষে অর্দ্ধাসনে আমাকে উপবেশন করাইয়া নিজ বক্ষঃস্থলের চন্দনচর্চ্চানুলিপ্ত মন্দারমালা স্বয়ং আমার কণ্ঠে পরাইয়া দিয়াছেন।

মাতলি। আপনি অমরেশ্বরের নিকট হইতে কোন্ বস্তু পাইবার যোগ্য নহেন? দেখুন পূর্ব্বে নৃসিংহের নখর এবং এক্ষণে সন্নতপর্ব্ব আপনার শর এই উভয়ে, সুখাসক্ত ইন্দ্রের স্বর্গ হইতে দানবকণ্টক উন্মূলিত করিয়াছে।

রাজা। এ বিষয়ে শতক্রতুর মহিমাই প্রশংসনীয়। কারণ সেবকগণ অতি মহৎ কার্য্যেও যে সিদ্ধি প্রাপ্ত হয় তাহা প্রভুদিগের মহিমার গুণ জানিবেন। যদি সূর্য্য অরুণকে নিজ যানাগ্রে নিবেশিত না করিতেন, তাহা হইলে কি অরুণ অন্ধকারচ্ছেদ করিতে পারিতেন?

[*Then enter by a celestial car the king seated on the car, and Matali.*]

King.—Though I have executed the orders of Indra, yet because of the extreme honour (done to me by him), think myself unworthy (of it.)

Matali.—[*With a smile*] Long-lived prince, I think both of you to be without satisfaction. On account of the honour (done) by Indra, you think your service to be insignificant; and he too struck with wonder at your exploits attaches no value to the honour shown by himself.

King.—No Matali, don't say so. The honour done to me at the time of taking leave is beyond the range of even the wildest expectation. For, on me, seated on half his seat, in the very presence of the gods, was put the garland of Mandara flowers, with the yellow sandal rubbed off from his breast as its mark or distinction, by Indra himself who smiled at seeing his own son Jayanta, sitting near him, have an inward longing for the garland.

Matali.—What does not your Majesty deserve at the hands of the lord of the immortals? See—the heaven of the pleasure-loving

Indra has been made free from the thorns of demons by two things viz. by the nails of the man-lion in the days of yore ; and now by your arrows having even and plain joints.

King.—In this matter the greatness of the performer of hundred sacrifices is to be praised. That servants succeed even in important matters, know that to be result of the majesty of the masters themselves. Could Aruna have become the dispeller of gloom, had not the sun placed him in front of his car, (literally on his yoke) ?

मातलिः । सुखशीर्षं जलेषु कं इति मेदिनी नकं अकं दुःखं नास्ति अकं दुःखं यत्र सः नाकः स्वर्गः तस्य पृष्ठे प्रतिष्ठितम् इति नाकपृष्ठप्रतिष्ठितं ; स्वर्गतले सर्व्वत्र वहुलीभूतम् इत्यर्थः । अमी दिवौकसः गीतक्षमं अर्थजातं विचिन्त्य कल्पलतांशुकेषु सुरसुन्दरीणां विच्छित्तिशेषैः वर्णैः त्वच्चरितं लिखन्ति ॥ ५॥

द्यौ रौको येषां ते दिवौकसः देवाः गीतस्य क्षमं योग्यं अर्थजातं अर्थसमूहं विचिन्त्य तवचरितं गीतनिवद्धं कृत्वा कल्पलतानां अंशुकेषु कल्पवल्लीसमुद्भूतेषु वसनेषु, सुराणां देवानां सुन्दर्य्यः नार्य्यः तासां विच्छित्तिः अङ्गरागः (विच्छित्तिरङ्गरागेऽपि हारविच्छेदयोरपि इति विश्वः) तस्याः शेषैः अङ्गरागादवशिष्टैः वर्णैः नीलपीतादिभिः रागैः करणैः तव चरितं लिखन्ति । तव यशोगीतिं लिखन्ति इत्यर्थः । समृद्धिमद्वस्तुवर्णनात् उदात्तालङ्कारः वृत्तमुपजातिः॥ ५॥

राजा । असुरैः सह सम्प्रहारः संग्रामः तेन तत्र वा उत्सुकः तेन ; चेतसः संग्रामचिन्ताव्यापृतत्वात् स्वर्गस्य पन्थाः न सम्यक् अवलोकितः । "मरुतां पथि वायुस्कन्धे" "तत्र सप्त आयुस्कन्धाः वावहादयः तदुक्तं सिद्धान्तशिरोमणौ"—

"भूवायुरावह इह प्रवहस्तदूर्द्धः स्यादुद्वहस्तदनुसंवहसंज्ञकश्च ।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकोऽस्मात् वाह्यः परावह इमे पवनाः प्रसिद्धाः ॥"

मातलिः । यः गगनप्रतिष्ठां त्रिस्रोतसं वहति ; प्रविभक्तरश्मिः ज्योतींषि वर्त्तयति च । तस्य परिवहस्य द्वितीयहरिविक्रमनिस्तमस्कं इमं मार्गं वदन्ति ॥ ६॥

यः परिवहाख्यः वायु गगने व्योम्नि प्रतिष्ठां स्थितां प्रतिपूर्व्वात् तिष्ठतेः कर्त्तरि कः ततः स्त्रियां टाप् । यद्वा गगने प्रतिष्ठा यस्याः तां त्रीणि स्रोतांसि प्रवाहाः यस्याः तां त्रिस्रोतसं त्रिपथगां गङ्गां वहति । प्रविभक्ताः विभज्य प्रेरिताः समन्तात् विसारिताः रश्मयः ग्रहनक्षत्रादीनां किरणाः येन सः प्रविभक्तरश्मिः ज्योतींषि ग्रहादीनि वर्त्तयति भ्रमयति ; प्रग्रहैणेवाश्वानां रश्मिप्रविभागेन ग्रहादीनां यदृच्छागमनं यो रुणद्धि इत्यर्थः । तस्य परिवहस्य वायोः, द्वितीयेन हरेः वामनावतारभाजः विष्णोः विक्रमेण

पादन्यासेन नास्ति तमः अंहः यत्र तं द्वितीयहरिविक्रमनिस्तमस्कं ; शेषाद् विभाषेति कः। विष्णुपादस्पर्शेन अपहतपाप्मानं इमं मार्गं वदन्ति पण्डिता इति शेषः। परिवहस्य वर्त्मनि वर्त्तामहे इति भावः। समृद्धिमद्वस्तुवर्णनात् उदात्तालङ्कारः।।६।। वसन्ततिलकं वृत्तम्। अत्र वामनपुराणम्—

"क्रमवये तोयमवेक्ष्य दत्तम् महासुरेन्द्रेण विभुर्यशस्वी।
चक्रे ततो लङ्घयितुं त्रिलोकं त्रिविक्रमं रूपमनन्तशक्तिः॥
कृत्वानुरूपं दितिजाय हत्वा प्रणम्य चर्षीन् प्रथमक्रमेण।
महीं महीध्रैः सहितां महार्णवां जहार रत्नाकरपत्तनैर्युताम्॥
ततः सनाकं त्रिदशाधिवासं सोमार्कऋक्षैरभिनन्दितं नभः।
देवो द्वितीयेन जहार वेगात् क्रमेण देवप्रियमीप्सुरीश्वरः॥"

Change of voice.—येन गमनप्रतिष्ठा त्रिस्रोताः उह्यते। ज्योतींषि वर्त्तन्ते च प्रविभक्तरश्मिना।...द्वितीयहरिविक्रमनिस्तमस्कः अयं मार्गः उद्यते।

राजा। मातले, अतः हरेश्वरथसम्पर्केण पवित्रीकृते परिवहवर्त्मनि सञ्चरणात्, बहिर्भवैः बाह्यैः चक्षुरादिभिः करणैः अन्तःकरणेन मनसा च वर्त्तमानः इति सबाह्यान्तःकरणः अन्तरात्मा प्रसीदति निर्मलो भवति। बहिस् इत्यव्ययात् ञ्यञ् प्रत्ययेन सिद्धः बाह्यशब्दः। मेघानां पदवी वर्त्म तम् मेघपदवीम्।

राजा। शीकरक्लिन्ननेमिः अयं ते रथः अरविवरेभ्यः निष्पतद्भिः चातकैः अचिरभासां तेजसा अनुलिप्तैः हरिभिः च वारिगर्भोदराणां घनानां उपरि गतं पिशुनयति।।८।।

शीकरैः क्षुद्रोदबिन्दुभिः तोयदगलितैरिति भावः क्लिन्ना आर्द्रीकृता नेमिः चक्रप्रान्तः (चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमानित्यमरः) यस्य सः शीकरक्लिन्ननेमिः (हेतुगर्भविशेषणमिदम्) अयं ते रथः अराणां चक्राङ्गाणां विवरेभ्यः रन्ध्रेभ्यः निष्पतद्भिः निर्गच्छद्भिः चातकैः मेघाम्बुजीविभिः पक्षिविशेषैः चातकसन्निधानात् मेघपदव्यामवतरणमनुमीयते इति भावः अचिरं क्षणं व्याप्य इत्यर्थः भासः यासां तासां अचिरभासां क्षणप्रभाणां तेजसा अनुलिप्तैः विद्युत्प्रभारञ्जितकलेवरैः हरिभिः इन्द्राश्वैः च करणैः वारि जलं गर्भे मध्ये यस्य तत् तथाविधं उदरं अभ्यन्तरं येषां तेषां वारिगर्भोदराणां जलपूर्णानां घनानां मेघानां उपरि गतं (नपुंसके भावे क्तः) गमनं पिशुनयति सूचयति ज्ञापयति इति यावत्। शीकरैः नेमीनां क्लिन्नत्वम् चातकसन्निधानं चपलास्फुरणञ्चेति त्रिभिर्लिङ्गैर्लिङ्गिनो मेघस्य सन्निधिरूहितः। काव्यलिङ्गमलङ्कारः। मालिनीवृत्तम् पिशुनशब्दात् णिचि लटिरूपम् पिशुनयति।। ८।।

Change of voice.—अनेन शीकरक्लिन्ननेमिना रथेन गतं पिशुण्यते।

मातलिः। क्षणादिति ल्यब्लोपे पञ्चमी। स्वस्य अधिकारः यस्यां सा स्वाधिकारा सा चासौ भूमिश्चेति स्वाधिकारभूमिः तत्र।

राजा। आश्चर्यं दर्शनं यस्य सः आश्चर्यदर्शनः। उन्मज्जतां शैलानां शिखरात् मेदिनी अवरोहति इव। पादपाः स्कन्धोदयात् पर्णाभ्यन्तरलीनतां विजहति। तनुभावनष्टसलिलाः आपगाः व्यक्तिं भजन्ति ; पश्य, उत्क्षिपता केन भुवनं मत्पार्श्वं, आनीयते इव ॥ ८॥

उन्मज्जतां, दूरत्वात् प्राक् पयसि निमग्नानां इव ; इदानीं क्रमेण सन्निहिततया दृष्टिपथं गच्छतां प्रकटीभवताम् इत्यर्थः शैलानां शिखरात् शृङ्गात् मेदिनी पृथिवी अवरोहति दूरं गच्छति इव। अतिदवीयस्तया शैलशिखराणि भूतलञ्च समदेशवर्त्तीनि इव दृश्यन्ते स्म ; इदानीं शैलानां तुङ्गत्वं पृथ्वीतलस्य निम्नत्वञ्च पृथक् लक्ष्यते। पादैः मूलसंहतिभिः पिबन्ति इति पादपाः वृक्षाः स्कन्धानां प्रकाण्डानां उदयात् आविर्भावात्, पर्णानां पत्राणां अभ्यन्तरे लीनाः प्रच्छन्नाः तेषां भावः पर्णाभ्यन्तरलीनता तां विजहति त्यजन्ति ; वृक्षाः प्राक् पर्णराशयः इव लक्ष्यमाणाः इदानीं मूलादारभ्य सर्व्वैरेवावयवैरसङ्कीर्णमालोकनीयतां गता इत्यर्थः। तनूनां भावः इति तनुभावः सूक्ष्मत्वम् तेन नष्टं अन्तर्हितं अदर्शनं गतमित्यर्थः सलिलं यासां ताः तनुभावनष्टसलिलाः, दूरत्वात् अदृश्यमानसलिलाः रेखाः इव प्रतीयमानाः आपगाः नद्यः, (अपां समूहः इति आपं आपशब्दात् अण् तेन आपेन गच्छन्ति याः ताः आपगाः) सन्तानैः पुनरपि अपां विस्तारैः व्यक्तिं प्रकाशतां भजन्ति प्राप्नुवन्ति ; पुनरपि सजलाः दृश्यन्ते इत्यर्थः। पश्य उत्क्षिपता उत्क्षिप्य, ऊर्द्धमानयता केनापि जनेन भुवनं पृथिवी मम पार्श्वं आनीयते इव। अतिवेगेन अधोऽवतरणात् पृथ्वीतलस्य तावतैव नवेन विप्रतीपगमनं प्रतीयते इति उत्प्रेक्षालङ्कारः। शार्द्दूलविक्रीड़ितं वृत्तम्॥ ८॥

Change of voice.—मेदिन्या अवरुह्यते ; पादपैः पर्णाभ्यन्तरलीनता विहीयते तनुभावनष्टसलिलाभिः आपगाभिः व्यक्तिः भज्यते। कोऽपि उत्क्षिपन् भुवनं मत्पार्श्वं आनयतीव।

N B.—In the above sloka, how skilfully does the poet display his close observation of the appearance of the surrounding objects in relation to a man moving in a fast running carriage ; and the application by transference of that observation to an imaginary case !

मातलिः। उदारा महती चासौ रमणीया चेति उदाररमणीया ; उदारो दात्महती त्यमरः।

राजा। कनकस्य रसं निस्यन्दते स्रवति इति कनकरसनिस्यन्दी अनुविपर्य्यभिनिभ्यः स्यन्दतेरप्राणिषु इति पाक्षिकः षत्वाभावः। द्रुतसुवर्णं क्षरन्निव, पूर्व्वं अपरं पश्चिमञ्च समुद्रं अवगाढ़ः प्रविष्टः, सुविस्तीर्णः इत्यर्थः। मेघः परिघः इव सुदीर्घा-

গলমিব ইতি মেবপরিঘ:। সানুমান্ পর্ব্বত:। পরীঘ:। পরৌ হন্তেরপ্ স্যাৎ করণে ঘ শব্দস্যাদেশ:।

মাতলি:। কুৎসিতা: অশ্বমুখত্বাদিতিভাব: পুরুষা: ইতি কিম্পুরুষা: কিন্নরা: তেষাং পর্ব্বত:। তপ:সিদ্ধে: স্থানং। অত্র তপস: ফলং আশু লভ্যতে।

স্বায়ম্ভুবাৎ মরীচে: য: প্রজাপতি: প্রবভূব, সুরাসুরগুরু: স: সপত্নীক: অত্র তপস্যতি॥৮॥ স্বয়ম্ভুব: ব্রহ্মণ: অপত্যং পুমান্ ইতি স্বায়ম্ভুব: তস্মাৎ ব্রহ্মতনয়াৎ মরীচে: য: প্রজাপতি: কশ্যপ: প্রবভূব সংজজ্ঞে; সুরাণাং দেবানাং অসুরাণাং দৈত্যাদীনাং গুরু: জনয়িতা স: কশ্যপ: পত্ন্যা অদিত্যা সহ বর্ত্তমান: ইতি সপত্নীক: (বহুব্রীহৌ সমাসান্ত: ক:) অত্র হেমকূটে তপস্যতি তপশ্চরতি॥৮॥

স্বয়ং ভবতি ইতি স্বয়ম্ভূ: (ভবতে ক্বিপ্) তস্য অপত্যমিতি অণি কৃতে ওরোদিতি বক্তব্যে ওর্গুণ ইতি সংজ্ঞাপূর্ব্বকবিধানাদনিত্যত্বান্ন গুণ উবঙ্।

তপশ্চরতি ইতি তপস্যতি "কর্ম্মণো রোমন্থতপোভ্যাং বর্ত্তিচরো:" ইতি তপস্শব্দাৎ ক্যঙ্ "তপস: পরস্মৈপদং চ" ইতি পরস্মৈপদম্। When the words রোমন্থ and তপস: are accusative cases of verbs in the sense of বর্ত্তন and আচরণ respectively, the verbal affix ক্যঙ্ is added to them. But তপস্ with the suffix is used in the পরস্মৈপদ।

Change of voice.—যেন প্রজাপতিনা প্রবভূবে; সুরাসুরগুরুণা তেন সপত্নীকেন তপস্যতে।

রাজা। শ্রেয়োঽর্জনস্যাবসরা ন খলু ত্যক্তব্যা:। ভগবতী মারীচস্য প্রদক্ষিণীকরণেন বন্দনয়া চ শুভস্য হেতু পুণ্যমর্জ্জয়িতুমিচ্ছামি।

মাতলি:। প্রথম: শ্রেষ্ঠ: কল্প: সঙ্কল্প:। এষ ইচ্ছা প্রশস্যতমা।

মাতলি। ইহা আপনার উপযুক্ত। [কিয়দ্দূর গমন করিয়া] আয়ুষ্মন্, এস্থান হইতে স্বর্গপৃষ্ঠে প্রতিষ্ঠিত স্বীয় যশের উৎকর্ষ অবলোকন করুন। দেবগণ সুরসুন্দরীদিগের অঙ্গরাগের অবশিষ্ট পীতাদি রঙ্গের দ্বারা কল্পবৃক্ষপ্রসূতবসনে আপনার বীরোচিত কর্ম্ম গীতনিবদ্ধ করিয়া লিখিতেছেন।

রাজা। মাতলে, পূর্ব্বদিন অসুরদিগের সহিত যুদ্ধের (চিন্তায়) উৎসুকচিত্ত ছিলাম, স্বর্গের পথ অবলোকন করি নাই। এক্ষণে আমরা কোন্ বায়ুর পথে রহিয়াছি?

মাতলি। যে পরিবহ বায়ু ব্যোমপ্রতিষ্ঠিত ত্রিপথবাহিনী গঙ্গাকে বহন করে, এবং গ্রহনক্ষত্রাদির রশ্মিমণ্ডল ইতস্তত: প্রসারিত করিয়া তাহাদিগকে স্ব স্ব চক্রে প্রবর্ত্তিত করে সেই পরিবহ বায়ুর পথ বলিয়া ইহা অভিহিত এবং ইহা বামনরূপী হরির দ্বিতীয় পাদবিক্ষেপ হেতু তম:সম্পর্কশূন্য।

রাজা। এই নিমিত্ত বাহ্য ও অন্তরিন্দ্রিয়ের সহিত আমার অন্তরাত্মা প্রসন্ন হইতেছে। [রথচক্র অবলোকন করিয়া] আমরা মেঘপদবীতে অবতীর্ণ হইয়াছি।

মাতলি। কিরূপে জানিলেন?

রাজা। ক্ষুদ্র ক্ষুদ্র জলবিন্দু দ্বারা সিক্তচক্রপ্রান্ত এই ভবদীয় রথ, অরবিবর দ্বারা নির্গত চাতকপক্ষী এবং বিদ্যুৎপ্রভায় পিশঙ্গদেহ অশ্ব দ্বারা সজল জলদের উপর গমন বিজ্ঞাপিত করিতেছে।

মাতলি। আপনি মুহূর্ত্তকালমধ্যে স্বকীয় অধিকৃত ভূমিতে উপস্থিত হইবেন।

রাজা। [অধোদিকে অবলোকন করিয়া] মাতলে, অতিবেগে অবতরণ হেতু মনুষ্যলোক অতি আশ্চর্য্য দেখাইতেছে। উর্দ্ধে উত্থিত হইতেছে এরূপ প্রতীয়মান শৈলরাজির শিখর হইতে পৃথিবী যেন নামিয়া যাইতেছে। মূল ও প্রকাণ্ড প্রদেশের আবির্ভাব হেতু বৃক্ষসমূহ পত্ররাশির মধ্যে বিলীনভাব পরিত্যাগ করিতেছে। ক্ষীণত্ব হেতু অন্তর্হিতসলিল নদীসমূহ পুনর্ব্বার বিস্তীর্ণতা ধারণ করিয়া প্রকাশ পাইতেছে। দেখুন যেন কেহ পৃথিবীকে উর্দ্ধে উৎক্ষিপ্ত করিয়া আমার সমীপে আনয়ন করিতেছে!

মাতলি। অতি নিপুণভাবে অবেক্ষণ করিয়াছেন। [আদরের সহিত অবলোকন করিয়া] আহা, পৃথিবী বিপুল এবং রমণীয়।

রাজা। মাতলে, পূর্ব্ব হইতে পশ্চিম সমুদ্র পর্য্যন্ত বিস্তীর্ণ, স্বর্ণদ্রবস্রাবী সন্ধ্যাকালীন মেঘমালার ন্যায় ঐ কোন্ পর্ব্বত দেখা যাইতেছে?

মাতলি। আয়ুষ্মন্, এটি হেমকূট নামে কিন্নরদিগের পর্ব্বত, তপস্যার সিদ্ধিক্ষেত্র। দেখুন—স্বয়ম্ভুতনয় মরীচি হইতে যে প্রজাপতি উৎপন্ন হইয়াছেন, দেবদৈত্যদিগের জনয়িতা সেই কশ্যপপত্নীর সহিত এখানে তপস্যা করিতেছেন।

রাজা। অতএব মঙ্গলের অবসর অতিক্রম করা উচিত নহে, ভগবান্‌কে প্রদক্ষিণ করিয়া গমন করিতে ইচ্ছা করি।

মাতলি। অতি উৎকৃষ্ট সঙ্কল্প [অবতরণ অভিনয় করিলেন]।

Matali.—This is quite proper (for you). [*Traversing a little distance*]. Long-lived Prince, see hence the glory of your fame established on the surface of heaven. Yonder gods, thinking of a composition full of meaning,—and capable of being set to music, do write your exploit on clothes of (canvas spread out by) the Kalpa creepers, with colours, the remains of the painting dye of the beauties of heaven.

King.—Anxious as I was yesterday, for the fight with the demons, while ascending the heaven, I did not mark its path. In what region of the winds do we move now?

Matali.—They call it the region or path of the wind named Parivaha, purged from all evil by the second stride of Hari;—the

same Parivaha that bears the three-streamed river situated in the heaven; and causes the planets and stars to move (in their own orbits), having scattered their rays (far and wide).

King.—Hence it is, Matali, that my soul with the external as well as the internal senses becomes calm and delighted—[*Looking at the wheel of the car*]. We have descended to the sphere of the clouds.

Matali.—How do you know that?

King.—This car of yours, with the tire of its wheels wet with minute watery particles speaks of its passing over clouds with their inside full of water, by means of the Chataka birds flying through the openings between the spokes of the wheels; and by the horses of Indra glistening with the flash of lightning.

Matali—In a little while the long-lived Prince will be in his own dominion, the earth.

King.—[*Looking downwards*]. Matali, the region of human beings is seen to have a wonderful appearance, by reason of (our) descent with rapidity. For so, the earth descends as it were from the top of hills rising up (and appearing to view).—The trees, from the appearance of their stems, are leaving off the state of being concealed within their leaves. The rivers, the waters whereof disappeared by reason of attenuation, (again) get their distinctness on account of their (growing) expansion. And behold, the earth is being brought, as it were, to my side by some one hurling it up.

Matali.—Well observed! [*Looking with admiration*]. Oh! Grand and beautiful is the Earth.

King.—Matali, what is that mountain which having plunged into the eastern and western oceans, appears like a bank of evening clouds, emitting molten gold as it were?

Matali.—long-lived Prince, this is the hill of the Kimpurushas, named Hemkuta, the land of the fulfilment of the fruits of penance. See, the progenitor of the gods and demons, who sprung from Marichi—the son of the self-begotten Brahma, practises penance here with his wife.

King.—Therefore this occasion of (earning) good must not be passed by. I wish to go after having walked round the holy sage.

Matali.—"An excellent idea!" [*Both act the part of descending*].

राजा। रथाङ्गनेमय: उपोढ़शब्दा: न, प्रवर्त्तमानं रज: च न दृश्यते ; निरुन्धत: तव रथ: अभूतलस्पर्शतया अवतीर्णोऽपि न लक्ष्यते॥१०॥ रथाङ्गानां चक्राणां नेमय: प्रान्तभागा: उपोढ़: धृत: कृत इत्यर्थ: शब्द: भूमिसंघर्षजन्य: ध्वनि: याभि: ता: उपोढ़शब्दा: न,—प्रवर्त्तमानं उत्तिष्ठत् रज: धूलिपटलं च न दृश्यते ; अतएव निरुन्धत: अश्वान् संयच्छत: तव रथ: स्यन्दन:, नास्ति भूतलस्य स्पर्श: यस्य स: अभूतलस्पर्श: तस्य भाव: तत्ता तया, अभूतलस्पर्शतया, पृथिवीपृष्ठेन सह संसर्गाभावात्, अवतीर्णोऽपि, अवरूढ़: सन्नपि न लक्ष्यते अवतीर्णत्वेन न परिज्ञायते। लोकविलक्षणस्ते रथ इति भाव:। वंशस्थविलं वृत्तम्। विशेषोक्तिरलङ्कार: लक्षणम् विशेषोक्तिरखण्डेषु कारणेषु फलावच:॥१०॥

Change of voice.—रथाङ्गनेमिभि:...उपोढ़शब्दाभि: (भूयते)।...रज: न पश्यामि ; अवतीर्णमपि रथं न लक्षयामि।

मातलि:। विशेष: प्रभेद:।

मातलि:। वल्मीकार्द्धनिमग्नमूर्त्ति: सन्दष्टसर्पत्वचा उरसा (उपलक्षित:) जीर्णलताप्रतानवलयेन कण्ठे अत्यर्थसंपीड़ित: ; अंसव्यापि शकुन्तनीड़निचितं जटामण्डलं बिभ्रत् स्थाणुरिव अचल: असौ मुनि: यत्र अभ्यर्कबिम्बं स्थित:॥११॥

वल्मीके वामलूरे, पिपीलिकाकृतमृत्स्तूपे अर्द्धं यथा तथा नियमा मूर्त्ति: शरीरं यस्य स: वल्मीकार्द्धनिमग्नमूर्त्ति: ; बहुकालं व्याप्य तपश्चरन्निति तात्पर्य्यम्, सन्दष्टा संलग्ना सर्पत्वक् निर्म्मोको यस्मिन् तत् तेन सन्दष्टसर्पत्वचा उरसा वक्षसा उपलक्षित: (इत्थंभूतलक्षणे तृतीया) ; जीर्णानां शुष्काणां लताप्रतानानां लतासमूहानां लतासूक्ष्मतन्तूनां वा वलयेन वेष्टनेन, कण्ठे गले (अवच्छेदे सप्तमी) अत्यर्थं भृशं सम्पीड़ित: दृढ़ं निबद्ध:, अंसौ व्याप्नोति यत् तत् अंसव्यापि ; स्कन्धदेशं यावत् विलम्बमानं, शकुन्तानां पक्षिणां नीड़ै: कुलायै: (कुलायो नीड़मस्त्रियामित्यमर:) निचितं व्याप्तं आकीर्णमिति यावत् जटामण्डलं बिभ्रत् धारयन् स्थाणु: कीलइव (स्थाणु: कीले हरे पुमानिति मेदिनी) अचल: स्थिर: असौ मुनि: यत्र प्रदेशे अर्कस्य सूर्य्यस्य बिम्बं मण्डलं अभिलक्षीकृत्य इति अभ्यर्कबिम्बं (लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभाव:, यद्वा अभिरभागे इति कर्म्मप्रवचनीयसंज्ञावशात् तद्योगे द्वितीया) सूर्य्यमण्डलं अभिलक्ष्यीकृत्य स्थित: तत्र प्रदेशे मारीचाश्रम: इति वाक्यसमाप्ति:। स्थाणुरिवेत्युपमालङ्कार:। शार्दूलविक्रीड़ितं वृत्तम्॥११॥

Change of voice.—वल्मीकार्द्धनिमग्नमूर्त्तिना...अत्यर्थसम्पीड़ितेन...बिभ्रता स्थाणुनेव अचलेन मुनिना अमुना...स्थितम् ।

अभ्यर्कविम्बं may be taken either as a compound of the अव्ययीभाव kind, or as two words, अभि and अर्कविम्बं। In the first case, the rule that अभि and प्रति are compounded with words signifying direction or mark, when the sense of "direction towards" is implied, is applied. In the second case, अर्कविम्बं has the second case-ending in connection with अभि; which assumes the power of governing an accusative case, except in the sense of a part or portion.

राजा। कष्टं तपः यस्य तस्मै कष्टतपसे, नमस्शब्दयोगात् चतुर्थी।

मातलिः। [संयतः निरुद्धः प्रग्रहः अश्वरश्मिर्य्यस्य सः तं] अदित्या देवमात्रा परिवर्द्धिताः मन्दारवृक्षाः यस्मिन् तम्।

राजा। निर्वृतिः सुखं तस्य स्थानं। अमृतमये ह्रदे अवतरणेन यादृश सुखमुत्पद्यते, अत्र उपगमनेन तथाविधं मे इति अर्थः।

राजा। कथं इदानीं वर्त्तिष्यते इति शेषः। रथादवतरिष्यति न वेति प्रश्नः।

मातलिः। संयन्त्रितः निरुद्धः, मन्त्रबलेनेति भावः।

राजा। सत्कल्पवृक्षे वने अनिलेन प्राणानां वृत्तिः उचिता। काञ्चनपद्मरेणुकपिशे तोये धर्म्माभिषेकक्रिया; रत्नशिलातलेषु ध्यानं; विबुधस्त्रीसन्निधौ संयमः; अन्यमुनयः तपोभिः यत् काङ्क्षन्ति अमी तस्मिन् तपस्यन्ति ॥१२॥

